Śāstramandākinī

(Double Peer-reviewed Book)

EDITORS

PROFESSOR DHARMENDRA ROUT

HoD, Department of Sahitya,

Shri Lal Bahadur Shastri National Sanskrit University, New Delhi

DR. SUBHRAJIT SEN

Assistant Professor, Dept. of Sanskrit,

University of Gour Banga, Malda, WB

SHRI BHASKAR GANGOPADHYAY

Research Scholar, Department of Sahitya,

Shri Lal Bahadur Shastri National Sanskrit University, New Delhi

Shivalik Prakashan

New Delhi, 110002

Price : ₹995/-

Year of Publication : 23rd January, 2021

ISBN : 978-81-950125-1-0

No part of this book may be reproduced or utilized in anyform or by any means withour Prior Permission from the Author & Publisher.

©All Right Reserved

Publisher:

Shivalik Prakashan
4648/21, Ansari Road, Daryaganj
New Delhi – 110002
Phone : 011-4235161
Mob : +9811693579
E-mail : shivalikprakashan@yahoo.com

International Branch:
64, Grant Boulevard, Dundas
Ontario, Cananda L.9H 4MI

Published in India

Published by Virendra Tiwari for Shivalik, Prakashan, 27/16, Shakti Nagar, Delhi – 110007. Type setting Aadil Printographics and Printed by R. K. Offset Printers, Delhi

---

Śāstramandākinī

(Double Peer-reviewed Book)

Editors

PROFESSOR DHARMENDRA ROUT
DR. SUBHRAJIT SEN
SHRI BHASKAR GANGOPADHYAY

ADVISORY BOARD

Padmashree 'Abhiraj' Rajendra Mishra
Ex-Vice Chancellor,
Sampurnananda Sanskrit University, Varanasi, UP

Professor Haridutt Sharma
Visiting Professor, Silpakorn University, Thailand
&
Ex-Head, Allahabad University, U.P.

Professor Kalpika Mukherjee
Former Head, Department of Sanskrit,
Pali and Prakrit, Visva Bharati, Santiniketan

Professor Gopalchandra Mishra
Ex-Vice Chancellor, University of Gour Banga
&
Senior Professor, Rabindra Bharati University, Kolkata, W.B.

Professor Taraknath Adhikari
Dean, Faculty of Arts & HoD, Sanskrit,
Rabindra Bharati University, Kolkata, W.B.

Professor Ayan Bhattacharyya
Shiksharatna & HoD, Sanskrit
West Bengal State University, W.B.

Professor Bhagirathi Nanda
Dean, Faculty of Academic Affairs
Shri Lal Bahadur Shastri National Sanskrit University, New Delhi

PEER REVIEWED COMMITTEE

Professor Tarapada Chakraborti
Former Head, Department of Sanskrit
Burdwan University, W.B.

Professor Brajakishore Swain
Retd. Professor
Shree Jagannath Sanskrit University
Puri, Odisha

Professor Raghunath Ghosh
Former Emeritus Professor & Ex-Dean, Faculty of Arts
North Bengal University, W.B.

Professor Dhananjay Chakraborti
Retd. Professor, Bejoy Narayan Mahavidyalaya
Burdwan, W.B.

Professor Taraknath Adhikari
Dean, Faculty of Arts & HoD, Sanskrit,
Rabindra Bharati University, Kolkata, W.B.

Professor Bhagirathi Nanda
Dean, Faculty of Academic Affairs
Shri Lal Bahadur Shastri National Sanskrit University, New Delhi

Professor Aruna Ranjan Mishra
Professor & Ex-Head,
Department of Sanskrit, Pali & Prakrit
Visva Bharati, Santiniketan, W.B.

Professor Mau Dasgupta
Ex-HoD, Department of Sanskrit
University of Calcutta, W.B.

Dr. Shaikh Sabir Ali
Assistant Professor, Dept. of Sanskrit,
West Bengal State University, W.B.

EXECUTIVE COMMITTEE

Professor Dharmananda Rout
HoD. Dept. of Sahitya
Shri Lal Bahadur Shastri National Sanskrit University
New Delhi

Dr. Subhrajit Sen
Assistant Professor, Dept.of Sanskrit
University of Gour Banga
Malda, W.B.

Dr. Santu Singha
TIC and Assistant Professor,
Dept. of Sanskrit,
Bankura University, WB

Dr. Abhijit Mondal
Assistant Professor, Dept. of Sanskrit,
Cooch Behar Panchanan Barma University,
Cooch Behar, W.B.

Mr. Soumyajit Sen
Assistant Professor, Dept. of Sanskrit,
Cooch Behar Panchanan Barma University,
Cooch Behar, W.B.

Mr. Bhaskar Gangopadhyay
Research Scholar, Dept. of Sahitya
Shri Lal Bahadur Shastri National Sanskrit University
New Delhi

Mr. Vivekananda Lakshman
Research Scholar, Department of Vyakarana
National Sanskrit University, Tirupati, A.P.

Mr. Malay Maity
Research Scholar, Department of Sanskrit Studies
University of Hyderabad, Hyderabad, Telangana



This book is dedicated in the hallowed memory of

Late Professor Subuddhi Charan Goswami.

MAHĀMAHOPĀDHAYA 'ABHIRAJ' RAJENDRA MISHRA

Padmashri (2020), Presidential Recipient (2002),
Sahitya Akademi Awardee (1988)
&
Former Vice Chancellor, Sampurnananda Sanskrit University, Varanasi

नान्दीवाक्

केषाञ्चित् हृदयेषु शीर्षकमिदं विस्मयमप्युत्पादयेत्। कथमिति? किं काव्यशास्त्रस्यापि अर्वाचीनत्वं सम्भवतीति कृत्वा। तत्रेदमेव तावत्समाधानं यत्काव्यप्रकारे परिवर्तिते सति काव्यशास्त्रमपि परिवर्तत एव। यतो हि काव्यं तच्छास्त्रञ्चेत्युभयमप्यन्योऽन्याश्रितम्। अतएवैकतरस्मिन् परिवर्तिते सत्यन्यस्य परिवर्तनं सर्वथा शक्यमेव।

प्राचीनं काव्यशास्त्रं प्रायशो नाट्यशास्त्रमूलकमेव। तत्रैवेदं प्रथमतया काव्य-नाट्यालङ्कार-रस-प्रवृत्ति(रीति)-गुण-वृत्ति-लक्षणादीनां चर्चा समवाप्यते। किञ्च, नाट्यशास्त्रकारः स्पष्टतया काव्यनाट्यशब्दौ पर्यायभूतौ प्रयुनक्ति। एवं प्रतीयते यत्तज्जीवनकाले उभयोः पार्थक्यं स्थापितं नाऽसीत्। अतएव भरतः क्वचिन्नाट्यरसशब्दं व्यवहरति क्वचित्पुनः काव्यरसशब्दम्। परन्त्वभिप्रायस्तस्य भवत्येक एव।

भरताऽनन्तरं सर्वप्रथममाचार्यभामह एव पृथक्काव्यशास्त्रं प्रारभते। काव्यालङ्कारनाम्नि ग्रन्थेऽस्मिन् काव्यलक्षणं गुणोऽलङ्कारः अन्ये च ते विषया निरूपिता दृश्यन्ते येषां दृढा स्थापना परवर्तिनि काव्यशास्त्रवाङ्मये जाता। अत्राचार्यः काव्यं लक्षयन् कथयति शब्दार्थौ काव्यमिति। पश्चाच्चेयमेव परिभाषा दण्डि-रुद्रटकुन्तकमम्मटविश्वनाथजगन्नाथग्रन्थेषूत्तरोत्तरं संस्कृता संशोधितोपबृंहिता च परिलक्ष्यते। एवमेव काव्यप्रयोजन-काव्यहेतु-काव्यभेद-काव्यार्थप्रकार-गुण-वृत्ति-रीति-महाकाव्यनाटकादिलक्षण-प्रसङ्गा अपि प्रत्याचार्यं विपरिवर्तिताः संवर्धिताश्च दृश्यन्ते।

वस्तुतः शास्त्रं भवति प्रयोगस्य (व्यवहारस्य वा) नियामकम्। अतएव प्रतियुगीनं शास्त्रं स्वयुगीनप्रयोगान् सम्यक् परीक्ष्यैव नियमान् सृजति। महाकाव्यानां नायकाः प्रायेण देवा राजवंशोत्पन्नाः राजर्षय एवाऽभूवन्। तां प्रवृत्तिं दृष्ट्वैव लक्षणकारेण विन्यस्तम् – 'तत्रैको नायकः सुरः। सद्वंशः क्षत्रियो वाऽपि धीरोदात्तगुणान्वितः॥ एकवंशभवा भूपाः कुलजा बहवोऽपि वा' इति।

अत्र साहित्यदर्पणोक्ते लक्षणे पूर्ववर्तिमहाकाव्यानां नायकव्यवस्था साध्ववलोकयितुं शक्यते। कुमारसम्भवनायकश्शिवः सुरः। किरातार्जुनीयनायको युधिष्ठिरः सद्वंशः क्षत्रियः। रघुवंशनायकाः दिलीपरघ्वजदशरथरामादिकाः एकवंशभवाः बहवो भूपाः। परन्तु महाकाव्यस्य यानीमानि वैशिष्ट्यानि साहित्यदर्पणकारेण प्रोक्तानि तान्येव पूर्ववर्तिकाव्यशास्त्रीयग्रन्थेषु नासन्। नूतनं किञ्चित्काव्यादर्शे आसीत्। ततोऽपि नूतनं किञ्चिद्रुद्रटालङ्कारे आसीत्। ततोऽपि किञ्चिन्नूतनं वक्रोक्तिजीविते आसीत्। ततोऽप्यधिकं नूतनं किञ्चित्काव्यप्रकाशे पर्यलक्ष्यत। अन्ते च सर्वाधिकनूतनं समधिकञ्च साहित्यदर्पणे समदृश्यत।

एवं हि, काव्यमात्रेव काव्यशास्त्रयात्रापि मृदुमन्थरगत्याऽग्रे सरतीति सिद्धम्। तेन कथयितुं शक्यते यदिदानीन्तनं संस्कृतकाव्यशास्त्रं सर्वथा नवीनं परिवर्तितञ्च। तस्य नवीनत्वस्य परिवर्तनस्य सन्ति बहूनि कारणानि। यथाहि, नेदानीं भूपाः शास्तारः। सर्वत्राऽपि प्रभवति लोकतन्त्रम्। लोक एव लोकं प्रशास्ति। कथाऽऽख्यायिकापद्धतिः क्षीणप्रायाऽधुना। कथानिकारुचयस्सञ्जाताः पाठकाः। बृहन्नाटकविरचनप्रदर्शनपरम्पराऽपि समाप्तप्राया। एकाङ्के लघुकलेवरे रुचिमन्तस्सर्वे। छन्दोऽपेक्षया मुक्तगीतेषु लोकगीतेषु वा सर्वेषां प्रीतिः। प्रागज्ञातप्राया अप्रयुक्ता वा वृत्तभेदाः सम्प्रति प्रयुज्यन्ते सीजो – तान्का – हाइकु – सानेटप्रभृतयः।

चिरकालं यावत्परिवर्तिते सत्यपि काव्यप्रकारे काव्यशास्त्रमपरिवर्तितमेव स्थितम्। परन्तु शनैः शनैस्तदपि परिवर्तनोन्मुखं जातम्। अयं प्रयत्नो व्यतीतशताब्द्या अष्टमे दशके प्रारब्धः। अस्मान्मित्रवर्येण राधावल्लभेन सागरविश्वविद्यालयीय-संस्कृतविभागेऽभिनवसंस्कृतकाव्यशास्त्रसम्भावनामुपलक्ष्य काचित्त्रिदिवसीया शोधसङ्गोष्ठी समायोजिता याऽतितरां साफल्यमुपगता। ततोऽग्रेऽपि नैकाः संङ्गोष्ठ्यः संयोजिता अन्येषु विश्वविद्यालयेषु नूतनकाव्यशास्त्रमधिकृत्य। तस्या एव संङ्गोष्ठीपरम्परायाः परिणामोऽयं यदद्धाऽभिनवं संस्कृतकाव्यशास्त्रमनेकाचार्योपकल्पितं सहृदयजनसमक्षं वरीवर्ति।

तत्राचार्यब्रह्मानन्दशर्मप्रणीतः 'काव्यसत्यालोकः', आचार्यरेवाप्रसादद्विवेदिना प्रणीता 'काव्यालङ्कारकारिका', आचार्याभिराजराजेन्द्रेण प्रणीतम् 'अभिराजयशोभूषणम्', आचार्यशिवाज्युपाध्यायप्रणीतः 'साहित्यसन्दर्भः', आचार्यराधावल्लभत्रिपाठीप्रणीतम् 'अभिनवकाव्यालङ्कारसूत्रम्', आचार्यरहसविहारि-द्विवेदिप्रणीता 'नव्यकाव्यतत्त्वमीमांसे'ति ग्रन्था महीयन्ते।

एतानेव ग्रन्थान् ग्रन्थकारांश्चावलम्ब्य साम्प्रतिकसंस्कृतकाव्यशास्त्रस्य कानिचन प्रकरणानि समीक्षन्ते। तत्र काव्यत्वे शब्दस्यार्थस्य वा पृथग्भूमिकामवलम्ब्य नव्या अपि पृथङ्गतयो दृश्यन्ते। शब्दार्थौ

काव्यमित्यवोचदाचार्यभामहः षष्ठख्रिस्ताब्द एव। न केवलं शब्दः, न केवलमर्थो वा काव्यं भवितुमर्हतीति ध्रुवम्। उभयोः समष्टिरेव काव्यम्। तदाह वक्रोक्तिजीवितकारः –

'शब्दार्थौ काव्यम्। वाचको वाच्यश्चेति द्वौ सम्मिलितौ काव्यम्। द्वावेकमिति विचित्रैवोक्तिः। तेन यत्केषाञ्चिन्मतं कविकौशलकल्पितकमनीयतातिशयः शब्द एव केवलं काव्यमिति, केषाञ्चिद्वाच्यमेव रचनावैचित्र्यचमत्कारकारि काव्यमिति पक्षद्वयमपि निरस्तं भवति। तस्माद्द्वयोरपि प्रतितिलमिव तैलं तद्विदाऽह्लादकारित्वं वर्तते, न पुनरेकस्मिन्निति'।

कुन्तकमतानन्तरं न किञ्चिदवशिष्यतेऽस्मिन्सन्दर्भे कथयितुम्। सत्यमेव शब्दार्थसमष्टिरेव भवति काव्यम्। यद्यप्याद्यास्तित्वं भवति शब्दस्यैव। परन्तु स एव शब्दो यावदर्थभावेन न विवर्तते, तावज्जगत्प्रक्रिया (लोकव्यवहारः) न प्रारभते। इदमेव शब्दार्थद्वैतं प्रस्तौति वाक्यपदीयकारो भगवान्भर्तृहरिः

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः"।।

यद्येवं, तर्हि कथं शब्दार्थयोरेकतरं प्रति दृश्यते सद्भावः काव्यलक्षणकाराणाम् ?

शब्दार्थोभयपक्षधरा आचार्या मम्मटवाग्भटहेमचन्द्रविद्यानाथभोजदेवादिका वर्तन्ते। शब्दार्थौ निर्दोषौ सगुणौ प्रायः सालङ्कारौ काव्यमिति वाग्भटः काव्यानुशासने। अदोषौ सगुणौ सालङ्कारौ च शब्दार्थौ काव्यमिति हेमचन्द्रः। गुणालङ्काररसहितौ शब्दार्थौ दोषवर्जितौ गद्यपद्योभयमयं काव्यं काव्यविदो विदुरिति विद्यानाथः। तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापीति मम्मटः।

शब्दपक्षधराणामाचार्याणां पुनः शब्दस्यैव काव्यत्वे स्वारस्यम्। तद्यथा पण्डितराजो जगन्नाथः – 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्'। 'शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली'ति व्याहरन् दण्ड्यपि शब्दमात्रस्य काव्यत्वं प्रति प्रीतिं दर्शयति।

परन्तु 'वाक्यं रसात्मकं काव्यमि'ति प्रतिपादयन् विश्वनाथः वाक्यार्थं प्रत्यनुरक्तो दृश्यते।

अर्वाचीनेष्वपि काव्यशास्त्रकारेषु सैव परम्पराऽवलोक्यते। तत्र ब्रह्मानन्दशर्मा शब्दार्थसमष्टिवादी। सत्यानुभूतिरेव काव्यस्यात्मेति तन्मतम्। काव्यगतं तत्सत्यं त्रिविधं भवति – प्रकृतिगतं प्राणगतं हृदयगतञ्चेति। प्राणगतसत्यमेव आर्थिकसत्यमप्युच्यते –

“प्राणा मूलं हि लोकस्य प्राणाश्चैतेऽर्थमाश्रिताः।
अर्थोन्मुखानि भूतानि अर्थस्यातः परा स्थितिः”।।

एवं हि, ब्रह्मानन्दः काव्येऽर्थस्य परां स्थितिं मन्यते। परन्त्वर्थोऽयं भवत्येव शब्दगम्यः शब्दानुस्यूतो वा। ततः शब्दोऽपि काव्यस्य भवति स्वरूपमेव। एवं हि, शब्दार्थोभयमेव भवति काव्यमिति प्रतिपादयति काव्यसत्यालोककारः।

परन्तु नेदं मन्यते आचार्यो रेवाप्रसादः। तन्मते न तु काव्यं भवत्येव ज्ञानरूपम्। शब्दाश्च भवन्ति ज्ञानबाह्याः। अतएव शब्दानां ज्ञानरूपत्वाभावे तेषां काव्यस्वरूपताभावः स्वयमेव सिध्यति –

“काव्यस्य ज्ञानरूपत्वं शब्दत्वं नोपपद्यते।
शब्दस्य ज्ञानतायाञ्च शब्दतैव विनश्यति”।।

काव्ये काव्यप्रयुक्तशब्दानां स्थितिस्तावदेव तिष्ठत्यक्षुण्णा यावत्तेषामर्थज्ञानं न भवति। शब्दानामर्थज्ञाने जाते सत्येव काव्यं भवति ज्ञानरूपम्। तस्यां स्थितावर्थ एव ज्ञानरूपो महीयते। शब्दा भवन्त्येव ज्ञानबाह्याः। अनुभवसिद्धेयं स्थितिः। अतएव शब्देषु ज्ञानबाह्येषु सिद्धे अर्थ एव भवति काव्यमिति सनातनो रेवाप्रसादः।

तन्नेति भूयोऽप्याह ब्रह्मानन्दः। तन्मतं तच्छब्दैरेव प्रतिपाद्यते – शब्दस्यैकं कार्यमस्ति स्वोच्चारणरूपतया प्रस्तुतभावानुकूलस्य कठोरताकोमलतादिकस्य प्रस्तुतिः। अपरञ्च कार्यमस्ति अर्थद्योतकता। अस्मद्दृष्ट्या तु काव्ये प्रथमस्याप्युपयोगिता। द्वितीयस्य तु सा सर्वैरेव स्वीकार्या।

किञ्च, काव्येऽर्थद्योतनान्तरं न हि शब्दस्य पृथग्भावोऽपि तु काव्यानुभूतौ तस्य मुहुर्मुहुरुपस्थितिरिति न हि तस्य काव्याद्बहिर्भावः। शास्त्रे तु अर्थद्योतनानन्तरं शब्दस्य विराम इति न हि तत्रैतादृशी स्थितिः।

“काव्यस्य ज्ञानरूपत्वेवैमत्यं न कदाचन।
बाह्यत्वेन स्थितः शब्दः ज्ञानाकारं प्रपद्यते॥

शब्दस्य ज्ञानतायां हि शब्दो यदि विनश्यति।
अर्थस्य ज्ञानतायां हि नश्येदर्थ इति ध्रुवम्”॥ (*काव्यसत्यालोकः*)।

अभिराजराजेन्द्रोऽपि काव्यस्य शब्दार्थमयत्वं प्रत्येव निष्ठां प्रदर्श्य, सविशेषमर्थं प्रति स्वारस्यं प्रस्तौति। परन्तु तन्मतप्रतिपादनशैली काचिदन्यैव। शब्दोऽर्थो वा काव्यस्य ज्ञानरूपतायां बहिस्तिष्ठत्यन्तर्वेति प्रश्न एव विवादास्पदम्। उभयोः पक्षे विपक्षे च तुल्यतर्काः सम्भवन्ति। अतएव साधारण्येव त्याज्या।

यशोभूषणकारस्तर्कतेयत् काव्ये प्रवृत्तिनिमित्तकं तत्त्वं किंभवति शब्दोऽर्थो वा? 'स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटे'ति पद्ये कर्णशष्कुलीसुखयितृशब्दजातं शृण्वन्नपि अर्थज्ञानविरहितः पाठकः किं व्यवहारे प्रवर्तते? यद्यपि ध्वनिमाधुर्येण सुखयति तत्कर्णकुहरं पद्यमेतत्। तथाप्येऽमूक इवैव तिष्ठत्यसौ। कस्मात् ? यतो हि प्रयुक्तानां तेषां शब्दानामभिप्रायमेवासौ न बुध्यति। अनेन शब्देनाऽयमर्थो बोध्य इतीश्वरेच्छारूपं शब्दार्थं यावदसौ नावगच्छति तावत्क्व व्यवहारप्रवृत्तिः? क्व कथासूत्रज्ञानम् ? क्व पुनः काव्यप्रयुक्तगुणालङ्काररसादीनां वाऽपि ज्ञानम्। शब्दच्छलाऽर्थच्छलयोः क्वाऽनुभूतिः ?

अतएव स्वानुभवसिद्धमिदं सत्यं यत्काव्यबन्धेऽर्थज्ञानं विना न किञ्चिदपि पुरस्सरति। अतएवोक्तं मया यशोभूषणे –

"शब्दार्थसाहिती काव्यं यद्यपीह सुनिश्चितम्।
परमार्थस्तथाप्यत्र प्रेक्षावद्भिर्निरूप्यताम्॥

काव्यप्रयुक्तशब्दानां केवलं पठनेन चेत्।
जायेत चित्तविश्रान्तिश्शब्दानां तर्हि काव्यता॥

किन्तु नैवं भवत्येव शब्दैश्चित्रं न रज्यते।
केवलं जायते तैस्तु श्रुतिरन्ध्रानुरञ्जनम्॥

काव्यप्रयुक्तशब्दानामप्यर्थावगमादृते।
क्व नु सा चित्तविश्रान्तिः काव्यानन्दोऽप्यसौ कुतः॥

तस्मात्काव्यार्थ एवासौ जायते परमार्थतः।
काव्यं तद्विग्रहो वापि प्रमाणं रसिकाः स्वयम्"॥

ननु शब्दार्थौ सहितावेव काव्यम्। नाऽत्र काऽपि संशीतिः। न केवलं शब्दो न चाप्यर्थः काव्यमितरेतरवियोगाऽसहिष्णुत्वात्। तथापि व्यवहारदृष्ट्या शब्दप्रकटितार्थ एव काव्यम्। काव्यप्रयुक्तशब्दानामभिप्रायेऽवगत एव जायते काव्यानन्दः। अतएवाऽर्थसम्पदेव काव्यमित्यभिराजः। (*अभिराजयशोभूषणम्*, पृ.- १२४)

नन्वेतावताऽपि अर्थस्यैव काव्यत्वं सिध्यति यद्वाच्य एवार्थः सर्वत्र काव्यं न भवति। क्वचिल्लक्ष्य एवाऽर्थः क्वचित्पुनर्व्यङ्ग्य एवार्थः काव्यं चरितार्थयति।

आस्तां तावत्। प्राचां हि काव्यलक्षणानि ज्ञातान्येव। नव्यानां काव्यलक्षणानि पश्यन्तु सुधियः। तत्र कथयति ब्रह्मानन्दः शर्मा

"शब्दार्थवर्तिसत्यस्य सुन्दरं प्रतिपादनम्।
काव्यस्य लक्षणं ज्ञेयं सत्यस्यात्र विशेषता॥

काव्ये सत्यानुभूतिर्या सा न हेया कदाचन।
इयमात्मा हि काव्यस्य इयमस्मिन् समीहिता"॥

काव्यालङ्कारकारिकाकार आचार्यरेवाप्रसादः काव्यं परिभाषते –

"आनन्दकोषस्योल्लासे लोकोत्तरविभावना।
अलंकृतार्थसंवित्तिः शाब्दी काव्यं प्रकीर्त्यते"॥

अभिनवकाव्यालङ्कारसूत्रकार आचार्य राधावल्लभस्तु प्रतिपादयति – 'लोकानुकीर्तनं काव्यम्'। अनुकीर्तनं चतुर्विधम्। तेनाऽस्य पूर्णता। पूर्णता चालङ्कारः। तेन अलङ्कार एव काव्यमिति।

आचार्यो रहसविहारिद्विवेदः काव्यं लक्षयति –

"सुहृदां हृदयाह्लादे लोकोद्बोधे च सङ्गता।
प्रज्ञावतः कवेः सद्वाक्काव्यमित्यभिधीयते॥"

आचार्यशिवज्युपाध्यायः काव्यशब्दव्युत्पत्तिं विवृण्वानः काव्यं परिभाषते –

"कविकर्मतया ख्यातं काव्यं यत्कवृधातुजम्।
तत्स्वरूपमथैकान्तं काव्यत्वमिति सुस्थिरम्॥

निर्गलद्रसनिर्व्यूढं गुणालङ्कारसञ्चितम्।
निर्दुष्टं भावभूयिष्ठं काव्यसाहित्यमेव तत्''॥

किं मयोक्तमिति प्रतिपादनात्प्राक्स्वोपज्ञकाव्यलक्षणदृष्टिमेव विशदीकर्तुं समीहे। तत्राऽवधेया इमे बिन्दवः,

(१) न मया कदापि चिन्तितं यद्विद्यमानेषु सत्स्वपि मम्मटविश्वनाथजगन्नाथकृतकाव्यलक्षणेषु कस्यचिदभिनवस्य काव्यलक्षणस्यापेक्षाऽथवौचित्यं वर्तते। अस्माकं सर्वेऽपि श्पूर्वसूरयोऽस्मदपेक्षया सहस्रगुणाधिकमहितप्रतिभावन्तस्त्रिकालदर्शिनश्चासन्।

(२) मयेदमपि तावदनुभूतं यत्तेषां काव्यलक्षणेषु वर्तत एवैकस्वरूपम्। ते सर्वेऽप्येकमतयः एकप्रतिप्रतिपिपादयिषा एकप्रयोजनाश्च। केवलं पृथगात्मास्तीत्वं संस्थापयितुं ते समानमेव वक्तव्यमसमानशब्दैः प्रतिपादयन्ति, येन समीक्षकाष्टीकाकाराः परवर्तिनो वाऽऽचार्याः शास्त्रार्थाऽवसरं लभन्ते।

(३) अतएव तेषां लक्षणानां मिथस्संयोजनं करणीयम्। तेषां मतसमन्वयः करणीयः। स्वोपज्ञे लक्षणे मया तदेव कृतम्। कापि नूतना काव्यपरिभाषा न मया दत्ताऽपि तु प्राचामेव परिभाषाः सम्मेल्य कथितं मया –

"काव्यं लोकोत्तराख्यानं रसगर्भं स्वभावजम्।
परत्रेह न निर्व्याजं यशोऽवाप्तिप्रयोजनम्" ॥

आख्यायते शब्दार्थसमष्ट्येत्याख्यानम्। अनेनाभामहान्मम्मटं यावच्छब्दार्थयोः काव्यत्वाङ्गीकरणस्याविच्छिन्नपरम्पराया अनुमोदनम्। यच्च महामहिमपण्डितराजैरुक्तं 'रमणीयार्थप्रतिपादकः शब्दः काव्यमि'ति तदपि व्याजान्तरेण शब्दार्थसमष्टेरेव काव्यत्वाङ्गीकरणम्। न केनापि शब्दमात्रस्य काव्यत्वमङ्गीकृतम्। किञ्च, रमणीयार्थप्रतिपादनपरस्यापि शब्दस्याङ्गीकारे शब्दार्थाविव काव्यमिति स्फुटं भवति।

न कोऽप्येवंविधशब्दो योऽर्थविरहितः स्यात्। न चाऽप्यर्थः शब्दादृते सम्भवति। उभयोरविनाभावः। तदलंकाव्यसंघटनाङ्गभूतयोः शब्दार्थयोरेकतरं प्रतिस्वारस्य प्रदर्शनेन। वस्तुतः शब्दार्थावुभौ सम्भूयैव काव्यपदवीमारहतो न पुनः पृथग्भूय। तथा च ध्वनिकार आनन्दवर्धनः – 'सहृदयहृदयाह्लादिशब्दार्थमयत्वमेव काव्यत्वमिति'।

तर्ह्यलंकाव्यत्वप्रसङ्गे शब्दार्थयोरेकतरस्मिन् कस्मिन्नपि विवादजनयित्रीं प्रीतिं प्रदर्श्य। तस्मादुच्यते आख्यानमेव काव्यमिति। तत्किंयत्किमप्याख्यानं काव्यपदवाच्यमुताहो विशिष्टमेवेत्याशङ्क्याह लोकोत्तरमिति। अनेन काव्यत्वे रमणीयार्थत्वपक्षधरस्य रसगङ्गाधरकारस्य मन्तव्यानुमोदनं जायते।

तच्च लोकोत्तराख्यानं (काव्यम्) भवति रससिद्धम्। सद्यः परिनिर्वृत्तिकरेण रसेन प्रत्यङ्गानुविद्धमिति तात्पर्यम्। रससिद्धशब्दग्रहणेन वाक्यं रसात्मकं काव्यमिति स्थापनापराणां विश्वनाथमहापात्राणां भवति भावानुमोदनम्।

काव्यं तावत्स्वतःस्फूर्तं भावोच्छलनं किमपि। काव्यं न तावद्विमृश्य-विमृश्य, ध्यायं-ध्यायं शास्त्रमिव सा या संलिख्यते। प्राक्पश्चाद्वर्त्याग्रहविनिर्मुक्तमिदं

भावोच्छलनं स्वतःस्फूर्तत्वाल्लोकोत्तरत्वाच्च भवत्येव स्वभावजम्। नेदं शास्त्रप्रभृतिवाङ्मयान्तरमिव कृत्तिमप्रयत्नसाध्यम्।

काव्यस्य लोकोत्तरत्वं किन्नाम? तदुच्यते। सगुणत्वं रसाभिव्यञ्जकानां माधुर्यादिगुणानां साहचार्यम्। अदोषत्वं पदवाक्यरसादिदोषाणां मुख्यार्थहतिपर्यवसितानाम् अभावः। निष्प्रयत्नो प्रयत्नरहिता स्वाभाविकी वाऽलङ्कृतिः। नवोनवोन्मेषानित्यस्फूरणा प्रज्ञा प्रतिभा। एतत्सर्वं सम्भूय काव्यलोकोत्तरत्वकारणम्।

सामान्यग्राम्यकथनापेक्षया काव्यमेभिरेव गुणैरतिरिच्यते। ग्राम्यकथनेषु वार्ताभूतेषु न भवन्ति माधुर्यादयो गुणाः, न भवन्ति हृदयावर्जकाः शब्दार्थालङ्काराः, न चापि सम्भवन्ति श्रुतिकटुतेयार्थादिदोषाणामभावाः। किञ्च, न दृश्यते तत्र न मनागपि प्रतिभासंस्पर्शविलासः। कथन्तु जायेत तर्हि काव्येतराऽभिव्यक्तौ लोकोत्तरत्वम् ? एवं हि, काव्यस्य लोकोत्तराभिव्यक्ती भावे समेषामेव सगुणत्वाऽदोषत्वसालङ्कारत्वादिधर्माणां मम्मटाभिमतानां सद्भावोऽपेक्ष्यत इति वाग्देवतावतारस्य मम्मटाचार्यस्याभिप्रायो गृहीत एव।

इदानीमर्वाचीनकाव्यलक्षणकाराणां काव्यप्रयोजनादिप्रकरणं समीक्ष्यते। तथोक्तं सनातनरेवाप्रसादेन –

"प्रयोजनं कवेः काव्येनापि किञ्चन विद्यते।
चुङ्कृतौ कलविङ्कस्य यथा प्राभाविके क्षणे"॥

यशोभूषणकारेणापि मम्मटप्रोक्तकाव्यप्रयोजनजातं समीक्षमाणेन सविस्तरं प्रतिपादितम् –

"न धनाय न पुण्याय व्यवहाराय नापि वा।
न च सद्यः सुखार्थाय काव्यं निर्मात्ययं कविः॥

वस्तुतस्तस्य कर्मैतत्संस्कारोत्थं स्वभावजम्।
यदकृत्वा क्षणं यावन्नासौ शमधिगच्छति॥

यथा नोत्पतितुं शक्तो भ्रमरो गुञ्जनादृते।
तथा कविरयं काव्यादृते शक्तो न जीवितुम्॥

काव्यमेतत्ततो मन्ये कविकर्म स्वभावजम्।
जन्मजन्मान्तराऽवाप्तदिव्यसंस्कारसत्फलम्॥

यन्निसर्गाद्बहिर्भूतं तद्भवेत्सप्रयोजनम्।
निसर्गे क्व पुनस्तस्य चर्चाऽनास्थाविवर्धिनी॥

पश्यन्त्येव यदि प्राज्ञाः काव्यसृष्टौ प्रयोजनम्।
परत्रेह च निर्व्याजं यशस्तन्मेऽभिरोचते॥

न च काव्येतरत्कृत्यं किमप्येतादृशं भुवि।
यदत्र परलोके च यशश्शाश्वतमर्जयेत्" ॥ (*अभिराज.*, पृ. 28)

'मुक्तिस्तस्य प्रयोजनम्' (अभि. 1.2.1) इत्याह राधावल्लभः। भारतीयदर्शनोक्तमुक्त्यवधारणामनङ्गीकुर्वन्नसौ काव्यप्रयोजनभूतायाः स्वाभिमतमुक्तेः स्वरूपमपि प्रतिपादयति। तत्सर्वं मूलग्रन्थादेवाध्येतव्यम्।

आचार्यो रहसविहार्यपि स्वाभिमतकाव्यप्रयोजनान्युपन्यस्यन् कथयति –

"असन्तं मार्गमुत्सृज्य सन्तं गमयितुं जनम्।
हृदाह्लादिकया वाचा प्रज्ञावान् काव्यमङ्क्ते।।

कविकीर्तिपुरस्कारस्वान्तःसुखसमीहया।
प्राक्कथावस्तुसंस्कारं सताञ्च चरिताङ्कनम्॥

नव्यकाव्यविधोन्मेषं व्यङ्ग्योक्तिं विकृतौ तथा।
राष्ट्रभक्तिं युगौचित्यं पर्यावरणचेतनाम्

समुदिदश्याधुना काव्यं कुर्वन्ति कवितल्लजाः" ॥

काव्यहेतुसन्दर्भे प्रायशस्सर्वेऽपि पूर्वसूरयः शक्तिव्युत्पत्त्यभ्यासपक्षधराः। तत्रापि शक्तिं प्रतिभाप्रज्ञाऽपरपर्यायां प्रति समेषामनपायिनी श्रद्धाऽवलोक्यते। नव्येष्वपि सैव परिपाटी सन्दृश्यते। आचार्यो रेवाप्रसादो भणति नाट्यानुशासने रसभोगाख्यपञ्चमोन्मेषे –

"सर्वेषामपि भावानां कलासु प्रतिभात्मता।
पातिभासिकसत्तात्मेत्युच्यतां दर्शनेषु सा" ॥

द्विवेदी रहसविहारी प्राक्तनमतमेव किञ्चित्परिवर्त्य प्रस्तौति –

"काव्योपयोगिशब्दार्थोपस्थितिः प्रतिभामयी।
नैपुण्यं लोकशास्त्राणां विद्याज्ञानञ्च कारणम्" ॥

जागरितां प्रतिभामेव काव्यहेतुं मन्यते राधावल्लभः। मिश्रोऽभिराजराजेन्द्रोऽपि स्वमतं सविस्तरमुपन्यस्यति –

वस्तुतः काव्यप्रणयनहेतुर्द्विविधोऽङ्गीकरणीयः। अलौकिको लौकिकश्चेति। तत्राऽलौकिको हेतुर्दैवायत्तः। स हेतुरेव प्रज्ञा-प्रतिभा -शक्तिप्रभृतिपदवाच्यः। द्वितीयश्च लौकिको हेतुर्व्युत्पत्त्यभ्यासयुगलसमन्वितः प्रयत्नसाध्यः। एतौ द्वौ पुनः प्रतिभाया एव संस्कारकौ, न पुनः काव्यहेतू सर्वतन्त्रस्वतन्त्रौ। अनयोरभावेऽपि लोकोत्तरचमत्कारकारि वाग्वैदग्धीमण्डितं काव्यं प्रतिभामात्रबलेन समुद्भावयितुं शक्यम्। परन्तु प्रतिभाया अभावे काव्यं न जातु प्रसरेत्, प्रसृतं वोपहसनीयं स्यात्। वस्तुतो नवनवोन्मेषवती प्रतिभैव कवित्वबीजम्। किञ्च,

"प्रज्ञा बीजं कवित्वस्य शक्तिरूपा चिरन्तनी।
जन्मजन्मान्तरोपात्तसंस्कारप्रसवाऽमला॥

मृत्तिकाजलवायूनां सद्भावेऽपि यथाऽङ्कुरः।
बीजेऽसति धरागर्भे नैव जातु प्ररोहति॥

तथैवाऽचरितेऽभ्यासे भूयोभूयोऽप्यनारतम्।
लब्धेऽपि शास्त्रपाण्डित्ये शतशाखेऽतिविस्तृते॥

प्रज्ञां विना कवित्वस्य बीजं नैव प्ररोहति।
सत्यमेतद्दृषद्रेखाकल्पमूह्यं मनीषिभिः" ॥(*अभिराजयशोभूषणम्*, पृ. ३५)

काव्यलक्षणप्रयोजनहेत्वनन्तरमिदानीं काव्यविभाजनप्रकरणं निरूप्यते। प्राचां लक्षणकाराणां विषये विदितवेदितव्या एव सर्वे। प्रायेण व्यञ्जनावादिन आचार्या उत्तममध्यमाधमवर्गीकरणपक्षधराः। भामहदण्डिभ्यां तु भाषादृष्ट्याऽपि काव्यविभाजनं प्रस्तुतम्।

नव्येषु लक्षणकारेषु कतिपय एव वर्गीकरणोल्लेखं कुर्वन्ति। आचार्यो राधावल्लभः प्राचामेव मतमनुवदति काव्यस्योत्तममध्यमाधमभेदान् स्वीकृत्य। परन्तु अभिराजयशोभूषणकारः प्रस्तौति किञ्चिदभिनवं विलक्षणं काव्यवर्गीकरणम्। तदभिमतवर्गीकरणे सन्दृश्यते काऽपि साधीयसी तर्कङ्गता दृष्टिरपि। मूलग्रन्थादेव तन्मतमुदाह्रियते यथायथम् –

"काव्यं सहृदयास्वाद्यं कोविदास्वाद्यमेव च।
लोकास्वाद्यमिति ख्यातं त्रिविधं रोचते मम॥

सृष्टिस्सारस्वती पूता प्रोच्यते यदि वाऽधमा।
मध्यमा चेति तन्मन्ये वाङ्मयं गौरवं हतम्॥

व्यङ्ग्यार्थावगमे शक्ता वतस्सहृदया बुधाः।
पण्डिताश्चापि लक्ष्यार्थे वाच्ये लोकाः समादृताः॥

ततस्सहृदयास्वाद्यमाद्यं काव्यविभाजनम्।
भाति प्रीततमं हृद्यं स्फूरद्व्यङ्ग्यार्थजीवितम्॥

उत्तमं यदि चेदं स्याद्यदि वाऽप्युत्तमोत्तमम्।
न तत्र काचिदापत्तिर्वैषम्यं मतस्य वा" ॥

आचार्याभिराजकृते विभाजने न काव्यानां त्रिविधानां पौर्वापर्यप्रसङ्गो न चापि प्रवराऽवरप्रश्नः। वस्तुतो भिन्नरुचिर्हि लोकः। यस्य पाठकस्य यादृग्विधे काव्यप्रकारे सन्तुष्टिश्चित्तविश्रान्तिर्वा स एव काव्यप्रकारस्तत्कृते उत्तम इति। सहृदयानां कृते प्रतिभोल्लसितं, कोविदानां कृते पाण्डितीमण्डितं, लोकानाञ्च कृते ललितस्वभावोक्त्यादिसंवलितं काव्यं रोचते। तन्नाऽत्र प्रवराऽवरसंस्पर्शः कल्पनीयः। अतएव भणत्याचार्यः

"काव्यं सहृदयास्वाद्यं काव्यं व्यङ्ग्यार्थमण्डितम्।
तथैव कोविदास्वाद्यं पाण्डितीपरिपाकजम्॥

लोकोत्तरस्वादवती नूनं कवितानर्तकी न वा।
स्वभावोक्त्या रसज्ञानां चित्तमाकृष्य नृत्यति॥

या वद्धाऽतिशयोदात्तैर्वर्णनैर्गुणगुम्फितैः।
लोकं रञ्जयति प्राच्यं सा कविता मता मम॥

शारदासत्कृपावाप्ता नवाऽभिप्रायमेदुरा।
अक्लिष्टपदबन्ध्याढ्या लोकसंस्पर्शचिन्मयी॥

लोकास्वाद्यापि क्वचिच्च संवेदनमनोरमा।
गाहते हृदयं गाढं पाठकानामनुत्तमा" ॥

(*अभिराजयशोभूषणम्*, लक्षणोन्मेषः)

रसतत्त्वसन्दर्भेऽपि किञ्चिन्नूतनो विचारः समपेक्षितः प्रतिभाति। स च विचारो मया सविस्तरं प्रस्तुतः स्वोपज्ञे ग्रन्थान्तरेऽभिनवरसमीमांसानाम्नि। अस्माकं प्राक्तना आचार्या मम्मटविश्वनाथजगन्नाथप्रभृतयो रसं ब्राह्मानन्दसहोदरमात्रं मन्यन्ते, न

तावत्साक्षादब्राह्मानन्दमेव। तन्न मेऽभीष्टम्। अहं तावत् रसं साक्षाद्ब्रह्मानन्दमेव मन्ये। तत्र युक्तिरियमवधेया।

दार्शनिकी रसस्थितिरिव साहित्यिकी रसस्थितिरपि द्विविधा भवति – सविकल्पका (सम्प्रज्ञाता वा) निर्विकल्पका (असम्प्रज्ञाता च) यथा दार्शनिकरसानुभूतौ (समाधौ) ज्ञातृज्ञेयज्ञानभेदानुभवेऽक्षते सति समाधिः सविकल्पका भवति, त्रिपुटीज्ञाने क्षते च सति निर्विकल्पकाः जायते (बिन्दोः सिन्धुत्वमिव) तथैव ललितरसगर्भनिर्भरे पद्येऽनुशीलिते सति कदापि विभावानुभावसञ्चारिभेदा अक्षतास्तिष्ठति। तदायं काव्यरसो भवति सविकल्पकः।

परन्तु एवम्विधपद्यान्यपि वर्तन्ते देववाण्यां यत्पाठं पाठं विभावानुभावसञ्चारिभेदज्ञानमेव नश्यति। चैतन्यं रसमयं जायेत बिन्दोः सिन्धुत्वमिव। अपरिगतप्रमातृतावशादेवं सिद्ध्यति। सा रसस्थितिः काव्यात्मिकी सत्यपि साक्षाद्ब्राह्मी भवतीति ममानुभवः। अस्माकं सूरयो न मन्यन्ते ताम्। अतएव काव्यानन्देन कोऽपि मुक्तो न भवतीति तेषां पक्षः। परन्तु पद्यमिदं पठित्वा मन्मतं समीक्षन्तां भवन्तः –

“आदाय मांसमखिलं स्तनवर्जमङ्गाद्
मां मुञ्च वागुरिक! याहि कुरु प्रसादम्।
अद्यापि घासकवलग्रसनाऽनभिज्ञो
सन्मार्गवीक्षणपरस्तनयो मदीयः” ॥ (*अभिनवरससमीमांसा*)

(अध्यायत्रयात्मके कारिकाः सविस्तरं पठन्तु कृपया) साहित्यिकब्रह्मानन्देनापि जीवन्मुक्तिः विदेहमुक्तिश्च सम्भवतः। माद्दशास्तत्र प्रमाणम्।

अस्मत्प्रेष्ठमित्रवर्यैर्धर्मानन्द्रराउत-शुभ्रजित्सेन-भास्करगङ्गोपाध्यायैः प्रायेण चत्वारिंशन्मितानां नव्यविदुषां सारस्वतसहयोगेन ‘शास्त्रमन्दाकिनी’ति प्रकाश्यतेऽभिनवकाव्यशास्त्रात्मिकी कृतिः। मन्येऽनया सारस्वतशेवधिर्वर्धतेतराम्। सम्पादकैर्वच्मि जयजीव शब्दं स्वस्ति च।

शिमला,
18.1.2021

अभिराजराजेन्द्रमिश्र

(अभिराजराजेन्द्रमिश्रः)

RABINDRA BHARATI UNIVERSITY

PROFESSOR GOPALCHANDRA MISRA

Professor of Sanskrit, Rabindra Bharati University, W.B.

Former Vice Chancellor, University of Gour Banga, Malda, W.B.

Former Dean of the Faculty of Arts, RBU

Few words

I take this privilege and pleasure in knowing that a book entitled '*Śāstramandākinī*' is going to be brought out very shortly by Sivalik Prakasaka, New Delhi. This book is also known to be edited by Professor Dharmananda Rout and Dr. Subhrajit Sen respectively. Professor Rout stands well known as a renowned Sanskrit scholar who is now engaged in contributing his academic excellences and administrative abilities to Shri Lal Bahadur Shastri Sanskrit Central University in the capacity of the Head of the Department of Sahitya. Dr. Sen is a young Sanskrit Scholar who is now serving The University of Gour Banga as an Assistant Professor of Sanskrit In its Sanskrit Department.

The book is known to have been dedicated to the unforgettable memory of late lamented Professor Subuddhi Charan Goswami, Former Professor and Head of the Department of Sanskrit of Rabindra Bharati University and the former Dean of the Faculty of Arts of the Same University. We deeply mourn this kind of irreparable loss and pay homage, honour and respect to his departed soul.

The book comprises at least 40 contributions which will surely provide an open forum for the students, teachers, researchers and so

on to encourage original as well as innovative aspects of Sanskritic wisdom. Even more, it is highly expected that the book is going to contain thought provoking contents as the articles are being contributed by the distinguished scholars on various dimensions of Sanskrit learning adhered to indological studies. In this connection, however, I cherish to keep on record the endeavours rendered by the Editors and their team of experts who have taken responsibility of going through the research papers and thereby referred to their valued views to the addition, alteration and correction whatever necessary for this publication. Even in particular, I hope that this volume of Sanskrit learning will surely add some new ideas on Indology to pave the path of illuminating stimulation and motivation of the researchers to come.

‘सरस्वती श्रुतिमहतां महीयताम्’

‘Let the words of the learned flourish!’

(Gopal Chandra Misra)

RABINDRA BHARATI UNIVERSITY

PROFESSOR TARAK NATH ADHIKARI

Dean, Faculty of Arts, Rabindra Bharati University, W.B.
&
Head, Department of Sanskrit, Rabindra Bharati University, Kolkata

MESSAGE

‘सरस्वती श्रुतिमहतां महीयताम्’

It goes without iteration that during Covid-19 pandemic, the most affected area was educational institutions. Right from primary education to highest level of University education it perceived a massive setback. Even though seminars, workshops, research activities tracked in virtual mode, but rural India could not enjoy the taste of normal atmosphere. In this scenery, I am happy to see that some erudite scholars did not stop their endeavor, the result of which reflects in a valuable research book ‘*Śāstramandākinī*’. Jointly edited by two highly acclaimed Sanskrit scholars one from Delhi and the other one from West Bengal. Editor Professor Dharmendra Rout is a well – known scholar in Sanskrit firmament for long time, while Dr. Subhrajit Sen is a very energetic young teacher of a University of West Bengal. The articles to be published are written by some well known scholars like Dr Harshadev Madhev, Professor Raghunath Ghosh, Professor Aruna Ranjan Mishra, Professor Mau Dasgupta etc. while young scholars, with budding spirit have joined hands to make it a very valuable collection on Indology. More or less all the important areas of sanskritic studies have been covered, from which the readers of this book will coin valuable materials for research. Right from Vedic studies to modern Sanskrit literature that have been included in this edited book. I will be educated from this volume,

when it will be published. As a student of Sanskrit, I eagerly wait its publication.

It is a great fortune for me to see that the book is dedicated to my teacher, well wisher and a myriad minded Sanskrit Scholar Professor Subuddhi Charan Goswami. One of the happiest moments personally for me. I pay regard to the editors for this wise decision. I wish every success, the efforts of the editors, who even in this grave pandemic situation have done a great joy for the Sanskrit lovers and Ideologists as well.

WEST BENGAL STATE UNIVERSITY

PROFESSOR AYAN BHATTACHARYA

Shiksharatna (awarded by the Govt. of West Bengal)
President of India, Dr. Shankar Dayal Sharma Medalist
Professor and Head of the Department of Sanskrit
West Bengal State University,
Barasat, Berunanpukuria, P.O. – Malikapur, Kolkata -700126
Phone: (033) 2416 4226 Mobile - (0) 9830035401
Email: bhatta.ayan@gmail.com

Residence:
Saheb Apartment,
1st Floor, 26 2nd Street
Modern Park, Santoshpur
Kolkata - 700075
West Bengal, India

श्रीः

।। हितशंसनम् ।।

शास्त्रं नाम सुरसरित् या हि सदाशिवादिदेववक्त्रसमात्तस्फूर्त्तिरादौ वेदाद्याकरग्रन्थकुण्डे सञ्चीयमाना सती परं विविधधाराभिः समवाप्तविभक्तिर्नानानिबन्धोर्मि-सञ्चूर्णितपूर्वपक्षप्रक्षिप्तप्रश्नपाषाणपुञ्जप्रतिबन्धसन्ततिरुच्चावचमार्गेण अग्रतः प्रसरन्ती प्रतिरोधसङ्घर्षक्रमोन्मिषितनवनवतरोपपत्तिफेनपरिवर्तमानविचित्रवर्णवर्णिलसलिलावगाहमानानां देवापरपर्यायविबुधपदवेद्यदैवतोपमविदुषां शङ्कामलनिःशेषप्रक्षालनपुरःसरं चिदभिषेकं परमपरितोषदं विदधती प्रवहतितराम्।

शास्त्रार्थस्त्वतिगहनः। स हि मधुकरसहस्रसमाच्छन्नक्षौद्रपटलान्तःसञ्चितमधुरस इव निमीलित-शतदलदलान्तरितकेशर इव मञ्जूषागर्भनिगूढमहामूल्यालङ्कार इव विवादरत्नाकरातल-जलान्तर्निहित-महारत्नमिव कुण्डलितविषधरफणीन्द्रपाशबद्धमहामणिः इव मधुकरविधूननधूमेनेव तपनकिरणेनेव कुञ्चिकयेव जलान्तःस्थलोपयायिपोतेनेव निशितासिनेव शोधनिबन्धेनोद्धृत्य पुरस्क्रियते।

गवेषणनिबन्धश्च मुख्यतोऽनाविष्कृतनूतनतथ्यानां सविमर्शप्रकाशनमापाततो विरोधितया प्रतीयमानानां मतानामकृतपूर्वापेक्षितसामञ्जस्यप्रदर्शनमसमाहितपूर्वपक्षप्रश्नानां समाधानपूर्वकं ग्रन्थस्य परिष्करणं पूर्वपक्षोत्थापनपूर्वकस्वकीयनूतनमतोपस्थापनमिति चतुष्टयं व्यस्ततया समस्ततया वा सम्पादयन्नान्वर्थ्यमयते। अन्यथेतस्ततो विक्षिप्तानामन्यदीयमतानामन्यदीय-व्याख्यानसनाथितानां केवलं संकलनात्मकमभिनव-विचित्रवाचोयुक्तिविच्छुरितवैदुष्यच्छटा-विरहितं प्रकाशनं ज्ञानभाण्डागारे किमपि संयोजनमकुर्वत् किमप्यवदानमनिदधत् सार्थकपदवीं नोपैति नाद्रियेत वा सुधीभिः।

विषयः सम्बन्धोऽधिकारी प्रयोजनं चेत्यनुबन्धचतुष्टयवानुपोद्घातस्ततः संशयपूर्वपक्षादिमुखेन युक्तिसिद्धानुक्रमानुसारं नानामतपुरष्कारपुरःसरं प्रतिपिपादयिषिता-र्थस्योपस्थापनं ततः संगृहीतमतानां प्रमाणैः परीक्षणं ततश्चाभिनवो निर्णय इति या सनातनी गवेषणनिबन्धरचनापद्धतिः सा यथोपयोगमाधुनिकगवेषणकौशलैर्योजयित्वा निबन्धनिर्माणे समाश्रयणीया। एवं प्राचीनार्वाचीन-गवेषणविधीनां सुसमञ्जस-सुसंहतप्रयोगेण निर्मिताः शोधनिबन्धाः प्रशस्या भवन्ति।

किन्तु हा हन्त हन्त सम्प्रति परिश्रमविमुखा गवेषकाः केचित् कुशकाशावलम्बिमतयो बहु किमपि नवीनमुपस्थापयतोऽपि जयन्तभट्टपादस्य कुतो वा नूतनं वस्त्वित्यादि विनयवचनं यथाश्रुतार्थतो गृहीत्वा स्वानुकूलतयावलम्ब्य विनायासमनायासप्राप्यपरकीयवचोनिचयमेवानुपूर्वीपरिवृत्तिमात्ररूपमायाजालवितानेन नूत्नीकृत्य प्रदर्शयन्ति। केचिदप्रासङ्गिकवचःसारमसारं निबन्धं प्रस्तुवन्ति। केचिच्च सुदीर्घप्रस्तावनावर्धितकलेवरमत्यल्पप्रकृतानुषङ्गिकं बध्नन्ति निबन्धम्। प्रकाशकाश्चास्पष्टाद् अतिविस्पष्टाद्वा कारणात् तत्सकलं स्वीयपत्रिकासु प्रकाशयन्ति।

परं परमामोदपदमेतद् यदेतादृशविद्यानुशीलनदैन्यध्वान्तमयेऽस्मिन् संसारे दीपतुल्याः सन्ति केचनादर्शगवेषकास्तद्रचिता अनवद्यनिबन्धास्तन्मात्र-प्रकाशिकाश्चाङ्गुलिगण्याः शोधपत्रिकाः। तास्वियं शास्त्रमन्दाकिनीत्याह्वया शोधपत्रिका वेदवेदाङ्गदर्शनसाहित्यादि-विविधविषयेषु तत्तज्ज्ञसूक्ष्मेक्षिकाचालनीपरिपूतानत्युपादेय-निबन्धान् प्रकाश्य वैलक्षण्यं बिभ्रती भास्वरतया चिराय विराजेतेत्याशासे। एतत्पत्रिकायाः सम्पादकद्वयं प्रफेसर्-धर्मानन्दराउतमहाभागं तथा शुभ्रजित्सेनमहोदयं सहसम्पादकं श्रीभास्करगङ्गोपाध्यायमहाशयं च प्रति तेषां प्रकाशनप्रयासमनुस्मृत्य साधुवादान्

व्याहरामि। तेषां प्रयासस्योत्तरोत्तरभाविसाफल्यं चानुमायाग्रिमाभिनन्दनैस्तान् युनज्मि। किं बहुना? अन्ततश्छन्दोमय्या प्रशंसयोपसंहरामि।

शङ्खध्मानरतः पुरः प्रचलति श्रीभास्कराख्यः सुधी-
र्धर्मानन्दरथोऽनुयाति तमहो श्रीशुभ्रजित्सारथिः।
तच्चक्रैः कृतखातदत्तसरणिः स्रोतस्विनी स्पर्शनैः
काप्यज्ञानकलङ्कपङ्कसकलं विद्रावितुं धावति।।

या नानाविधशास्त्ररूपपयसां धारात्मिकैका नदी
नानायुक्तिविचित्रवर्णनिचयापूर्वच्छटामण्डिता।
नानातथ्यसमृद्धबन्धलहरीचञ्चज्जला सन्ततं
विच्चेतस्तटचुम्बिनी प्रवहतात् सा शास्त्रमन्दाकिनी।। इति शम्।

इति

प्रफेसर्. डः-अयनभट्टाचार्येण
प्रधानाध्यापकेन संस्कृतविभागस्य
पश्चिमबङ्गराष्ट्रियविश्वविद्यालयस्य
पश्चिमबङ्गान्तःपातिवारासातस्थानस्थितस्य।

SHRI LAL BAHADUR SHASTRI NATIONAL SANSKRIT UNIVERSITY

PROFESSOR BHAGIRATHI NANDA
Dean, Faculty of Sahitya Sanskriti,
Shri Lal Bahadur Shastri Rastriya Sanskrit Vidyapeetha
(Deemed University), Qutab Institutional Area,
New Delhi-110067

स्वस्ति

सुतरां मोदातिशयं बिभर्मि यद् श्रीलाल-बहादुर-शास्त्रि-राष्ट्रियसंस्कृतविश्वविद्यालयस्य साहित्यविभागाध्यक्षेण प्रो. धर्मानन्दराउतमहाभागेन तथा गौड़वङ्गविश्वविद्यालयीय-संस्कृताध्यापकेन ड.शुभ्रजित्सेनेनास्माकञ्चान्तेवासिना गङ्गोपाध्यायभास्करेण श्रमेण महता 'शास्त्रमन्दाकिनी'ति नानाशास्त्रविशारदानां विशदपरिशीलनायासमन्दरेण विज्ञानपारावारसमुत्थापितनवनीतायमानगहनगवेषण-परशोधनिबन्धकदम्बसंवलितः कश्चन ग्रन्थविशेषः साधु सम्पाद्याबध्यत इति। अनन्तानि शास्त्राणि जगतो व्यवहारतः। तेष्वपि सौक्ष्म्यमनन्तम्। तत्सौक्ष्म्यसमाकलनेऽपि दृशोऽनन्ताः। अतः पदे पदे सूक्ष्मचिन्तनानि व्याहरतां शास्त्राणां तेषां सूक्ष्माविकलदृशा समुपासनेन शास्त्रोपदेशा व्यायतिमुपयान्ति। यथैकैव मृत्तिकाऽनन्तसम्भावनाऽऽधारत्वं धारयन्त्यपि ततोऽपि नैकसम्भावनाः क्रीडीकृत्य प्रथतेतरां, शास्त्रवार्तापि तथा।

अतः प्रशस्यतरोऽयं प्रयास इति मेऽकैतवोक्तिः। वर्धतामीदृशः प्रयत्नो भास्करस्यानितरसाधारणश्रमशीलस्य तत्सहचारिणाञ्चेति नमः कालिकायै।।

सम्पादकीयम्

“ऋषीणाञ्चरितैः पुण्ये भारते भातु भारती।
अमृतत्वाय धर्माय विद्यानाञ्चाभिवृद्धये।।”

विश्वेऽस्मिन् विश्वेऽतिमारिपरिस्थितौ विद्याचर्चायां विघ्नितायामपि वाग्देव्याः परमाशिषा प्रकाश्यमानं शास्त्रमन्दाकिनीति द्विभाषामयं विशेषज्ञसमीक्षितं शोधग्रन्थप्रसूनं शास्त्रानन्दपिपासूनां करे विनिवेश्य मोदमनुभवामो वयम्। शास्त्रमन्दाकिनीत्याख्ये शोधप्रबन्धसंकलनात्मके ग्रन्थे चत्वारिंशन्मितानां नवनवोन्मेषशालिनां वरिष्ठानां प्राध्यापकानां नवीनानां गवेषकाणां गवेषिकाणाञ्च शोधधर्मिणो निबन्धाः स्थानं प्राप्ताः। करोणाख्यातिमारिपरिसरे आसमुद्रहिमाचलस्य सर्वेषां शिक्षाव्रतिनां समक्षमारात्रिकदीपकल्पोऽयं ग्रन्थः।

‘शास्त्रमन्दाकिनी’ति ग्रन्थनामान्वर्थकम्। शास्त्रमेव मन्दाकिनी इति विग्रहे मयूरव्यंसकादिवत् समासः। उत ‘शास्त्राणां मन्दाकिनी’ति षष्ठीतत्पुरुषसमासेन निष्पन्नोऽयं ‘शास्त्रमन्दाकिनी’ति शब्दः। शिष्यतेऽनुशिष्यतेऽपूर्वोऽर्थो बोध्यतेऽनेनेति शास्त्रम्। तेन शास्त्रपदेन वेदस्मृतिपुराणादीनां ग्रहणम्। शासनात् शास्त्रमिति व्युत्पत्त्या शास्धातोः “सर्वधातुभ्यः ष्ट्रन्” इति उणादिसूत्रेण ष्ट्रन्प्रत्यये निष्पन्नस्य शास्त्रशब्दस्य अनुशासनरूपोऽर्थो भवति। सर्वेषां वेदादिशास्त्राणामनुशासनमत्र प्रद्योतितम्। ननु साहित्यस्य शास्त्रत्वं कथं सङ्गच्छत इति चेदुच्यते कविकर्मणः शासकत्वात्। साहित्यस्य यावदुपलब्धिविषयरूपत्वाद्विषयाणाञ्चानेकरूपत्वान्निरवधि गाम्भीर्यमिति कृत्वा साहित्यस्यापि शास्त्रत्वमक्षुण्णम्। अपरतः, मन्दमकति गच्छति अग्धातोरुत्तरं णिनिप्रत्ययेन मन्दाकिनीशब्दो निष्पद्यते। मन्दाकानि स्रोतांसि सन्त्यस्या इति विग्रहे मन्दाकशब्दात् णिनि-प्रत्ययेन मन्दाकिनी इति शब्दः। यद्वा मन्दमकितुं शीलमस्या इति णिनिप्रत्ययः। अथवा मन्दनाम्नः सरसः अकति गच्छति इति मन्दाकिनी। ‘स्वर्गगङ्गायां स्वर्गे मन्दाकिनी तथा पुराणम्’ इति वाचस्पत्यम्। मन्दाकिनीति पदेऽत्र लक्षणा स्वीकर्तव्येति। स्वर्गगङ्गायाः सन्तानो यथा पवित्रपावनस्तथैव संस्कृतशास्त्राणां निरवच्छिन्ना धारा पवित्रतमेति सङ्गतिः।

मन्दाकिनीव पावनाः वेद-दर्शन-व्याकरण-साहित्य-अलंकार-शिलालिपि-धर्मशास्त्रीयमर्मोद्घाटका निबन्धा बहुश्रुतैर्भारतीसमाराधकैः विहितभूरिश्रमैर्विद्वद्भिर्मण्डिता राजन्ते ग्रन्थेऽस्मिन्निति कृत्वा शास्त्रमन्दाकिनीति।

बन्धबन्धकेष्वन्यतमानां साहित्य-अकाडेमीपुरस्कारेण सम्मानितानां प्रतिष्ठितानां संस्कृतकवीनां श्रीहर्षदेवमाधवानां साम्प्रतिकसंस्कृतसाहित्यस्य महत्सम्भावनमिति (Sanskrit in Twenty First Century: Prospects and Possibilities) विषयमाधारीकृत्य रचितः प्रबन्धोऽद्धानितरसाधारणः। प्राध्यापकस्य श्रीतारकनाथाधिकारिणः 'Understanding the Veda by Tagore' इति शीर्षके प्रबन्धे कविगुरोः रवीन्द्रनाथस्य वेदार्थविषये नयः स्पष्टतया समुल्लिखितः। कलिकाताविश्वविद्यालयस्य वेदाध्यापिका मौदासगुप्ता 'Folk elements in the literature of the poetesses of the Ṛg-veda' शीर्षकं शोधप्रबन्धं युक्तिनिष्ठतया सतथ्यं च परिवेशितवती। निबन्धमिमं पाठं पाठं सर्वे पाठका अवश्यमेव समृद्धा भविष्यन्तीति। सर्वभारतीयपरिसरे सुप्रसिद्धवरिष्ठाध्यापकास्तथा चोत्तराधुनिककवित्वेन राराज्यमानाः अरुणरञ्जनमिश्राः पद्मश्रीसम्मानेनाभूषितानां राजेन्द्रमिश्रवर्याणां नाट्यकृद्रूपेण स्थानमिति (Dramaturgical Excellences of Abhiraja Rajendra Mishra : An Overview) इति निबन्धं विरच्य प्रमाणीकृतवन्तो यत् आचार्यो राजेन्द्रमिश्रः प्राचीनसंस्कृतनाट्यकाराणां परम्परां न केवलं साधु परिवेशितवान्, चापि नाट्येषु आधुनिकभावधाराञ्च संयोज्य ऐतिह्याधुनिकतयोः सम्मेलनं साधितवान्। वयसा नवीनाः परं ज्ञानप्रवीणाः पश्चिमवङ्गराष्ट्रियविश्वविद्यालये अध्यापनरताः ड. सेख-साविर-आलिमहाभागाः प्रौढभाषया मायावादविदारणे श्रीजीवगोस्वामिनो मतवैशिष्ट्यं सयुक्ति पर्यालोचितवन्तः। दर्शनशास्त्रव्याख्याने आलिमहाभागस्य वैदुष्यमद्धा प्रशंसार्हमित्यत्र नास्ति संशयलवः। किञ्च, वङ्गप्रान्तस्य अन्ये न्यायादिशास्त्रनिष्णाताः बाँकुड़ाविश्वविद्यालये विभागाध्यक्षपदवीमलङ्कुर्वन्तः ड. सन्तुसिंहमहाभागाः गदाधरभट्टाचार्यस्य चतुर्दशलक्षण्याः प्रथमस्वलक्षणस्थस्य यावदिति पदप्रयोगस्य सार्थक्यं दर्शनशास्त्रोक्तरीत्या नव्यन्यायशैल्या च साधु परिवेशितवन्तः।

पश्चिमवङ्गस्य कोचविहारपञ्चाननवर्माविश्वविद्यालयस्य संस्कृतसंकायस्य नवीनाध्यापकेन अभिजिता अजातिवादे बौद्धदर्शनस्य प्रभावस्तथा दर्शनान्तरसमीक्षेति प्रबन्धो रमणीयतया दर्शनशास्त्ररीत्या च न्यरूपि। अपि च, अस्यैव विश्वविद्यालयस्य सहायकाध्यापकेन सौम्यजित्सेनेन आङ्गलभाषया निर्मिते 'Church Sanskrit': A Gleam of an Evangelical and Didactic Literature, With a Special Reference to John Muir (1810-1882)' इत्यस्मिन् प्रबन्धेऽनवद्यतया संस्कृतखृष्टीयसाहित्यविषये प्राच्यतत्त्वविदो जान्-म्यूरवर्यस्य योगदानम् उपायनीकृतम्। भिन्नमार्गावगाही नूत्नार्थप्रदर्शी निबन्धोऽयमवश्यं भाव्यगवेषणाध्वनिदेशकः स्यादित्यत्र नास्ति संशीतिः। एतेषां प्रबन्धरचयितॄणां भाषा-विषय-शैल्यादिदृष्ट्या वैदुष्यं नो नयनपथं पान्थायते। अन्ये तरुणाध्यापका गवेषका गवेषिकाश्च भिन्नभिन्नशास्त्रधाराश्चानुसृत्य निबन्धान् निरूप्य ग्रन्थस्यास्य ऋद्धिं साधितवन्तः। स्वशोधलेखमाध्यमेन शोधग्रन्थरत्नस्यास्य समृद्ध्यै स्वकीयं योगदानं कृतवद्भ्यो बन्धकेभ्यः कार्तज्ञ्यप्रकटनमस्मदीयं पावनं परमञ्च कर्तव्यं वर्तते।

अस्मदीयग्रन्थरत्नस्य कानिचिद्वैशिष्ट्यान्युल्लेखार्हाणि –

प्रथमतः, अतलस्पर्शिन्याः सुरसरितः शास्त्रधारायाः प्रतिबिन्दु आदाय ग्रन्थेऽस्मिन् बन्धकाः बन्धान् अबध्नन्।

द्वितीयतः, वेदादिप्राच्यविषयैः सममाधुनिकानामत्याधुनिकानां विषयाणां तथा च पाश्चात्यगवेषणविज्ञानस्य सुसमञ्जसं सुसंहतञ्च सम्मेलनं परिदृष्टमिह ग्रन्थे।

तृतीयतः, अस्माकं गुरुचरणानामयनभट्टाचार्यपादानां नयमङ्गीकृत्य वक्तुमलं यदद्यतनीयाः श्रमविमुखाः गवेषकाः साधारणतया स्वमतं विनायासं परकीयवचोविन्यासञ्च भिन्नाङ्किकेन विचित्रवचोविन्यासेन च नूत्नीकृत्य प्रकाशयन्तीति। किन्त्विह ग्रन्थे एतादृशाः पिष्टपेषणरूपा अप्रासङ्गिकवचःसारासारयुताः प्रबन्धास्त्यक्ताः समीक्षकाणां सुतीक्ष्णदृग्भङ्ग्या सूक्ष्मेक्षिकया समीक्षया चेति। अत्र स्थानितं प्रतिप्रबन्धं तत्त्वदृष्ट्या भिन्नमार्गावगाहि मौलिकमिति निश्चप्रचं शक्यवचम्।

चतुर्थतः, नवनवीनविषयाणामाविष्कारस्य, प्रत्नविषयाणां याथार्थ्यनिरूपणस्य, नूतनज्ञानकिरणैः प्राचीनज्ञानानां पुनःपरीक्षणस्य, विषयनिष्ठैतिहासिकसमीक्षात्मकस्यानुध्यानशीलमनुसन्धानं गवेषणं पर्येषणं वेति 'पर्येषणा परीष्टिश्चान्वेषणा च गवेषणा' इत्यमरकोषवचनप्रामाण्यात्। गवेषणाकार्यस्य पर्यायक्रमोऽप्युल्लिखितः शास्त्रेषु –

'विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्।
निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं विदुः'।।

इह ग्रन्थे स्थानितेषु प्रायः सर्वेषु प्रबन्धेषु अनाविष्कृतनूलतथ्यानां सविमर्शप्रकाशनम्, पूर्वपक्षीयमतोल्लेखखण्डनादिपुरःसरं नूतनमतोपस्थापनं, सिद्धान्तश्चेति गवेषणधर्मि-वैशिष्ट्यानि लसन्तीति ध्रुवम्। विशेषेण, सेख-साविर-आलिमहाभागस्य मायावादविदारणे श्रीजीवगोस्वामिनः मतनिरूपणमिति प्रबन्धे, सन्तुसिंहस्य गदाधरभट्टाचार्यस्य चतुर्दशलक्षण्या निर्दिष्टपदप्रयोगसार्थक्यमिति निबन्धे तथा च विमल-ईश्वर-सौम्यदीप्त-जयदेव-शम्पा-शङ्कर-मलयादिगवेषकाणां प्रबन्धेषु सत्यमेव शास्त्रदिशोच्चकोटिकास्तथा शोधधर्मिणश्च मतवादाः स्थानमाप्ता इति निश्चप्रचम्।

पञ्चमतः, अन्यदीयमतानां व्याख्यानानाञ्चैकत्र संकलनं ज्ञानभाण्डारे किमप्यवदानं विदधातीति प्रश्नः। वस्तुतः, संग्रहात्मकगवेषणपद्धत्या (Accumulative Research) अन्यदीयप्रबन्धाः सामूहिकतया शिक्षाव्रतिनां समक्षं प्रकाशपदवीं गच्छेयुश्चेत् महोपकारः संसाध्यत इति मानकीनो नयः। परं कस्यचित् प्रस्तोतुः केवलः प्रबन्धः उच्चकोटिको वा भवतु नाम, कथमप्यनायासेन बहूनां शिक्षाव्रतिनां सकाशं नाभिगच्छेदिति। अपि च, प्रकाशनव्ययभारोऽपि लाघवो भवेत् बहूनां प्रबन्धानां समाकलनेनेति भाव्यम्।

षष्ठतः, सहर्षमुद्घोष्यते यत् रवीन्द्रभारतीविश्वविद्यालयस्य कलासंकायाध्यक्षाणां राष्ट्रपतिपुरस्कारेण सभाजितानां साम्प्रतम् अमृतालोकमितानां प्रोफेसर्-

सुबुद्धिचरणगोस्वामिपादानाञ्चरणकमलयोः समर्प्यतेऽस्मदीयं ग्रन्थरत्नमिदम्। तेषामाशिषा अस्मदीयस्य ग्रन्थस्य साफल्यं सम्पाद्येतेति आशा।

शतशः कर्मव्यस्ततायामपि पद्मश्रीसम्माननेन सभाजितानां महामहोपाध्यायानां श्रीमताम् अभिराजराजेन्द्रमिश्रवर्याणां 'नान्दीवाचा' ग्रन्थस्यास्य क्षतिपूर्तिः साधिता। नान्दीवाचि मिश्रवर्येण अर्वाचीनालंकारशास्त्रमाश्रित्य सुदीर्घो मनोज्ञः प्रबन्धो व्यरचि। तेषाञ्चरणकमलयोर्भक्तिपुष्पाञ्जलिं समर्पयामो वयम्। पश्चिमवङ्गस्य गौड़वङ्गविश्वविद्यावयस्योपाचार्यचराणां साहित्यशास्त्रधुरन्धराणां गोपालचन्द्रमिश्रवर्याणाम् आशीर्वाग्भिर्विभूषितोऽस्मद्ग्रन्थः। किञ्च, पश्चिमवङ्गस्य रवीन्द्रभारतीविश्वविद्यालयस्य कलासंकायाध्यक्षाणां वेदादिशास्त्रचञ्चूनां प्रो.तारकनाथाधिकारिणां समृद्धवाग्भिस्तथा चाशीर्वचनेनास्माकं ग्रन्थो गौरवावहो जातः। अपि च, पश्चिमवङ्गस्य सर्वकारपक्षतः शिक्षारत्नोपाधिना सम्मानिताः न्यायवेदान्तमीमांसाव्याकरणादिशास्त्रेष्वप्रतिहत-प्रकटितवैदुष्या मान्यमान्यास्तत्र भवन्तः प्रोफेसर्-अयनभट्टाचार्यपादा 'हितशंसन'पुरःसरं प्रशस्तिं प्रदत्तवन्तः। सूर्यवन्महागतिमतः प्राचार्यस्य हितशंसनं प्रकारान्तरेणोच्चकोटिकं काव्यप्रसूनमिति मन्यामहे। अपि च, दिल्लीस्थश्रीलाल-बहादुरशास्त्रिराष्ट्रिय-संस्कृतविश्वविद्यालयस्य साहित्यसंस्कृतिसंकायाध्यक्षाः प्रो.भागीरथीनन्दमहाभागाः 'स्वस्ति'वचनेन ग्रन्थस्यास्य ऋद्धिं समासादितवन्तः। एतेषामाचार्यवराणामानृण्यं शिरसा प्रवहन्तः प्रणतिततिभिर्वयं प्रह्वीभवामः। प्रो.सुबुद्धिचरणगोस्वामिनः सुकन्या तथा रवीन्द्रभारतीविश्वविद्यालयस्य सङ्गीततत्त्वविभागस्याध्यापिका ड. विशाखागोस्वामिचरणा स्वपितरमुद्दिश्य श्रद्धाञ्जलिरूपामन्तरानुभूतिं स्ववाचा प्रकाश्य कृतार्थीकृतवत्यस्मान्।

ग्रन्थस्यास्य रघुनाथघोष-अरुणरञ्जनमिश्र-मौदासगुप्त-धर्मानन्दराउत-सुज्ञानकुमारमाहान्ति-सेखसाविर-सुरजिद्व्यानार्जि-सन्तुसिंह-सौम्यजित्सेन-अभिजित्-मण्डलादिभ्यो मान्यमान्येभ्यः समीक्षकेभ्यः प्रणतिं वितरामः। प्रसङ्गतः उल्लेख्यं यत् प्रकाश्यमानाः सर्व एव शोधप्रबन्धा एतैर्निरीक्षकैर्द्विर्निरीक्षिताः समीक्षकैश्च सूक्ष्मेक्षिकया परीक्षिताश्चेति। लेखानाञ्चयने विशेषज्ञानां मतमेवाङ्गीकृतम्।

मुद्रणप्रमादादीनां संशोधनाय शोधग्रन्थस्यास्य सार्वत्रिकोन्नतये च निरन्तरं प्रेरणादानाय पश्चिमवङ्गस्य कोचविहारपञ्चाननवर्माविश्वविद्यालयस्य संस्कृतसंकायस्य सहायकाध्यापकद्वयस्य सौम्यजितः अभिजितस्तथा च बाँकुडाविश्वविद्यालयस्य संस्कृतसंकायस्य सहायकाध्यापकस्य सन्तुसिंहस्य कर्मतत्परता संस्मरणीया। शिवालिकप्रकाशनस्य सत्त्वाधिकारिभिरस्य ग्रन्थस्य सुन्दरं मुद्रणं यथासमयं प्रस्तुतमिति तेऽप्यस्माकं प्रणयपरिधिमधिकुर्वन्ति। प्रच्छदनिर्मितौ अस्माकमन्तेवासिनः अर्घ्यघोषस्य अवदानमुल्लेखनीयम्। पुटविन्यास-टङ्कनाक्षरपरिष्कारादिकर्मसु साहाय्यमाचरितवद्भ्यां हैदराबादविश्वविद्यालये शोधकर्मणि कुर्वते मलय-माइतिः इत्येतस्मै तथा तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयस्थशोधच्छात्राय विवेकानन्द-लक्ष्मणः इत्येतस्मै च सविनयं धन्यवादान् वितरामि। तेषां सारस्वतसिद्धिः काम्यते।

इदमपि विवेदनं यदस्मत्प्रमादात् संगणकजन्यदोषाद्वा काश्चन त्रुटयो नेत्रातिथ्यं गताश्चेत्ताः संशोध्य विद्वद्भिर्निरक्षीरविवेकिभिश्च सूचनीया वयम्। संस्कृतानुरागिणां गवेषकाणामध्येतॄणामुत्कर्षः साफल्यं चेद् ग्रन्थेनैतेन संपाद्यते, तर्हि श्रमो नः फलेग्रहिः।

'आ परितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्' इति कालिदासोक्तिं स्मारं स्मारं वक्तुमलं यद्विद्वत्परितोषेणैवास्मत्परितोष इति। भगवतोऽनुकम्पया द्विभाषामयस्य विशेषज्ञसमीक्षितस्य शोधग्रन्थस्य प्रकाशनस्रोतो निर्विघ्नं भवत्विति सम्प्रार्थ्य विरम्यतेऽस्माभिरिति शिवम्।

सम्पादकाः

धर्मानन्दराउतः
शुभ्रजित्सेनः
भास्करगङ्गोपाध्यायश्च

सूचीपत्रम्

नान्दीवाक्

- पद्मश्रीः अभिराजराजेन्द्रमिश्रः…………………………………….Page - i

Few Words

- Professor Gopalchandra Mishra………………………...Page - viii

Message

- Professor Tarak Nath Adhikari…………..…….………...Page - ix

हितसंशनम्

- प्रो. अयनभट्टाचार्यः……………………………..…………… Page - x

स्वस्ति

- प्रो. भागीरथिनन्दः……………………………..…………..Page - xii

सम्पादकीयम्

- प्रो. धर्मानन्दराउतः
- ड. शुभ्रजित्सेनः
- भास्करगङ्गोपाध्यायः………………....………………………Page - xiii

INVITED PAPERS

Prof. S.C. Goswami : Some Memories and Inspirations

- Dr. Bisakha Goswami……………………………..……Page - 1

Sanskrit in Twenty First Century: Prospects and Possibilities

- Dr. Harshdev Madhav……………...….……………..... Page - 4

Understanding the Veda by Tagore

- Professor Tarak Nath Adhikari………...……………….. Page - 12

Dramaturgical Excellences of Abhiraj Rajendra Mishra - An Overview

- Professor Aruna Ranjan Mishra……………...………... Page - 21

Folk elements in the literature of the poetesses of the Ṛg-veda

- Professor Mau Das Gupta……………..…………..….. Page - 25

ध्वन्यालोककारस्यार्थतत्त्वम्

- प्रो. धर्मानन्दराउत…………………………………………… Page - 31

मायावादविदारणे श्रीजीवगोस्वामिमतवैशिष्ट्यम्

- **ड.** सेख-साविर-आलिः………………………………………… Page - 35

PEER REVIEWED PAPERS

'Church Sanskrit': A Gleam of an Evangelical and Didactic Literature, With a Special Reference to John Muir (1810-1882)

- Soumyajit Sen………………………………..……. Page - 44

Discrepancy in the Distribution of Verses: A major problem in editing *Śikṣā* Texts (With Special Reference to the Amoghānandinī Śikṣā)*

- Aniruddha Kar……………………...……….……….. Page - 53

Unsung Buddhist Poets: A Study from *Saduktikarṇāmṛta*

- Debobrato Sarkar…………………………...……..…… Page – 60

Disambiguation of Dative case suffix in Sanskrit

- Malay Maity……………………………...….………. Page - 65

गदाधरदिशा चतुर्दशलक्षण्याः प्रथमस्वलक्षणस्थाभावघटकतयावत्पदप्रयोजनविचारः

- ड. सन्तु-सिंहः…………………………………………………. Page - 73

अजातिवादे बौद्धप्रभावस्तथा दर्शनान्तरसमीक्षा

- ड. अभिजित् मण्डलः……………………………………………. Page - 81

धर्मशास्त्रे पारिवेशिकं मूल्यम्

- ड. सुरजित् व्यानार्जी…………………………………………… Page - 85

भवभूतेः उत्तररामचरितमिति रूपके अद्भुतरसस्य प्रयोगवैचित्र्यम्

- ड. सोमनाथचट्टोपाध्यायः……………………………………… Page – 92

साहित्यशास्त्रे सन्धितत्त्वस्योपयोगः

- सौम्यदीप्तसेनः……………………………...……………Page - 100

नैयायिकानुमतधातुधात्वयवप्रत्ययार्थान्वयः

- विमलरक्षितः……………………………………………….Page - 107

आधुनिकचिकित्सायां सांख्ययोगदर्शनयोरुपयोगः

- ईश्वर आखुली……………………………………………Page - 120

न्यायसिद्धान्तमुक्तावल्या आकाशग्रन्थे दिनकरी-प्रभाटीकयोः समीक्षणम्

- सुव्रत-गायेनः……………………………………………Page - 128

निरुक्तदिशा निपातज्ञानजन्यबोधे सादृश्यज्ञानस्योपयोगः

- शम्पा-पालः……………………………...……………...Page - 132

अलंकारनिकाये वक्रोक्त्यलङ्कारस्य प्राणधर्माधायकत्वम्

- ड. सञ्जय-भट्टाचार्य्यः……………………………………...Page - 137

आधुनिकालंकारशास्त्रे रसतत्त्वस्य नवानुसन्धानम्

- अमितदासः……………………………...……………...Page - 141

समसामयिके संस्कृतवाङ्मये उत्तराधुनिकभावधारा

- मण्टुकुमारजाना…………………………...……………..Page - 150

आशुबोधव्याकरणस्य लकारार्थप्रकरणे लडर्थविषये पाणिनि-तदितराणां वैयाकरणानां प्रभावः

- मौसुमी राणी गिरिः…………………………...……..………Page - 154

'श्रीकृष्णस्य परमदेवत्वं तथा परमब्रह्मत्वं' गोपालतापन्युपनिषद्दिशैकं संक्षिप्तावेक्षणम्

- भवेश-मण्डलः……………………………………………...Page - 164

अथर्ववेदसम्मतम् आयुश्शब्दार्थवैचित्र्यम्

- देवजित् दासः……………………………………………Page - 169

वेदस्य अपौरुषेयत्वसाधनम्

- जयदेवदिण्डा…………………………………………….Page – 178

प्राचीनवङ्गेषु दानपत्रस्य भूमिका

- रूपमदासः………………………………………………Page - 185

श्रीश्वरविद्यालङ्कारकृतं श्रीभिक्टोरियाजीविताश्रितं 'विजयिनीकाव्यम्' –विश्लेषणात्मिका समीक्षा

- तापस-वर्मणः……………………………………………Page – 190

अष्टाध्याय्यां वाक्यपदीये च रूपतात्त्विकविश्लेषणम्

- देवाञ्जलि-वोसः…………………………………………..Page - 197

मुद्राराक्षसे दैवप्रभावः – एका आलोचना

- अनन्यासरकारः…………………………………………...Page - 204

स्वप्नवासवदत्तमिति नाटके करुणरसप्रसङ्गः

- वापन-रुइदासः…………………………………………...Page - 210

व्याकरणशास्त्रे कर्मणो भेदाः तत्स्वरूपञ्च

- विवेकानन्दलक्ष्मणः………………………………………Page - 219

निपाता नामाख्यातार्थयोर्द्योतका वाचका वेति निरूक्तिः

- पार्थसारथिघोषः…………………………………………..Page - 229

पुराणे विविधानां कलाविद्यानां समीक्षणम्

- अर्पितामैत्री……………………………………………Page - 234

वैदिकवाङ्मये प्रतिभासितं गणिकाजीवनम्

- देवव्रतगुप्तः……………………………………………Page – 238

पराशरीयाचारकाण्डे आद्यश्लोके टीकयोः पदार्थविमर्शः

- सायन्ती-गराइ……………………………………………Page - 242

संस्कृतवाङ्मये स्वल्पख्यातदूतकाव्यपरिचयः

- श्रीमती टिनामण्डलः……………………………………..Page – 248

दार्शनिकदृष्ट्या श्रीमद्रामायण-श्रीरामचरितमानसयोः अनुबन्धचतुष्टयालोचनम्

- अर्घ्यगुप्तः………………………………………………..Page - 254

पाश्चात्यच्छन्दसां प्रयोगे संस्कृतविदुषां वैदुष्यम्

- भास्करच्याटार्ज्जी…………………………………………….Page - 265

काव्यदोषान्वेषणे विद्यानाथपूर्ववर्तिराद्धान्तैः समं विद्यानाथमतस्य तुलनात्मकम् अध्ययनम्

- सुमनब्यानार्जी……………………………………………Page - 273

मीमांसकोद्धृतनञर्थघटितश्रुतिस्मृतिवाक्ययोर्नञर्थपर्यालोचनायां रघुनाथशिरोमणेः स्वातन्त्र्यम्

- शङ्करमण्डलः……………………………………………..Page - 281

दामोदरगुप्तरचिते कुट्टनीमते काव्ये कामशास्त्रस्य प्रभावः

- जयन्तशीलः……………………………………………..Page - 288

संस्कृतसाहित्यसाधनायां रमाचतुर्धुरी – एकं सामान्यमध्ययनम्

if he uses words from the common place. No doubt, Rajendra Mishra has extra-ordinary command on the classical Sanskrit literature and his art of diction and delineation makes him a New-Kālidāsa. But he uses many words which come from the common life and render a realistic tinge to his expressions. Some words are like as follows – अपूपः (flour-cake), आटोपः (Pride), आढ़कः (One-fourth of a *Droṇa*), आसन्दी (small couch), ईषीका (Dart), एरण्डम् (plant of castor-oil), कजरी (a type of folk song), कण्डिनी (pestle), कर्णग्राहः (helmsman), काकिणी (a quarter of pana), कान्दिशीकः (fugitive), कुविन्दः (weaver), क्षेत्रपुरुषः (straw-man), गोपानसी (beam of a thatch), चर्चरी (hand-beats), जाल्मः (rouge), डिण्डीरः (foam on water), ताम्रचूड़ः (cock), निष्कुटः (pleasure groove near a house), लोपाकः (a type of jackle), विष्टरम् (bed), स्नुही (common white flower), सिता (sugar) etc.

The plays of Rajendra Mishra seem complete with the instructions (as if of a director) he artfully supplies in brackets near dialogues. This makes the dialogue-delivery very convincing to the actor on stage. It also makes the dialogues easily understandable to the audience. Some of the instructions for gestural actions he gives also make a reader concentrated to the incident being enacted on stage. We present here some such instructions in his plays – 'अधरमाकुञ्चति', 'साधरविकम्पनम्', 'सग्रीवान्दोलनम्', 'सग्रीवाभङ्गम्', 'चिबुकमुन्नमय्य', 'नेत्रे विस्फार्य', 'ऊर्ध्वं निःश्वस्य', 'सनृत्यमुद्रम्', 'द्रुतं प्रविश्य', 'निभृतपदैः परितः परिक्रम्य', 'सादरमुपस्टत्य', 'कोपं नाटयन्ती', 'हस्तौ सम्मेल्य', 'भालं ताड़यन्ती', 'साञ्जलिपुटम्', 'सामर्षम्', 'अश्रूणि प्रमृज्य', 'सोत्कण्ठम्', 'सदैन्यम्', 'सपुलकम्', 'रोमाञ्चमनुभूय', 'सरोषम्', 'सलज्जम्', 'सविनयम्', 'सव्यङ्गम्', 'सस्नेहम्', 'सहर्षम्' and 'स्नेहेन गादीभूय' etc.

All these instruction have great actional value on stage. Hundreds of such instructions given by Prof. Mishra in his world of plays have depicted four types of *abhinaya* prescribed by Bharata. Their effect on the heart of audience is really emotive.

Rajendra Mishra is the foremost of the Sanskrit writers in both 20th and 21st century. His classical aura around the expressions, delving deeper into the characters, tendency to always create new genre in writing, non-stop endeavor in producing new pieces of poetry, story or drama etc and his literary leadership in Sanskrit community have made him a living Legend in the contemporary society.

References

1. *चतुष्पथीयम्*, Rajendra Mishra, Vaijayant Prakashan, Prayagrag, 1983

2. *नाट्यनवरत्नम्*, Rajendra Mishra, Vaijayant, 2006.

3. *नाट्यनवार्णवम्*, Rajendra Mishra, Vaijayant, 2010.

4. *नाट्यपञ्चगव्यम्*, Rajendra Mishra, Vaijayant, 1972.

5. *नाट्यसप्तपदम्*, Rajendra Mishra, Eastern Book Linkers, Delhi, 1996.

6. *Globalisation and Post colonialism*, Sankaran Krishna, Rawat Publications, Delhi, 2009.

7. *Sociology of Postmodernism*, Scott Lass, Routledge, London, 1990.

8. *The Philosophy of Modern Literary Theory*, Peter V. Zima, Rawat Publications. Delhi, 2013 (Indian. Rep.)

Folk elements in the literature of the poetesses of the Ṛg-veda

Professor Mau Das Gupta[1]

(Abbreviations: BṛhD = Bṛhad-devatā, ṚV = Ṛg-veda**)**

Folk culture, according to the Wikipedia, refers to the lifestyle of a culture. Historically, handed down through oral tradition, it demonstrates the "old ways" over novelty and relates to a sense of community. To have a holistic knowledge of folk culture in the lives of Indian women, it is necessary to look into the earliest literature ascribed to women available in this sub-continent.

According to a list furnished by the Bṛhad-devatā (an ancient metrical index of the Ṛg-vedic gods attributed to Śaunaka) there were twenty seven female seers (poetesses) who contributed to the bulk of the Ṛg-veda. A close study suggests that there were at least fourteen women who composed a number of the Ṛg-vedic mantras. Among these female seers mentions should be made of Romaśā, Apālā, Yamī, Ghoṣā and Indrāṇī, who undoubtedly were women in flesh and blood. The verses ascribed to them possess a bold expression of their desire and despair, victory and defeat, ecstasy and agony, as well as some folk elements. In this paper, an attempt will be made to trace the distinct folk features in the literature of two of the abovementioned poetesses of the Ṛg-veda, viz. Romaśā and Apālā.

Women in the Ṛg-vedic society in general desired a dependable yet heroic husband and a number of male children, as is the universal desire of women. Physical pleasure, too, mattered much for them as the verses of the female seers are marked for their ardent longing for sexual pleasure in naïve and unsophisticated language. Their utterances are sometimes so bold and provoking that the later index-makers of the Ṛg-veda had no other option but to accept the conversing pairs as husbands and wives. For instances, the speakers of ṚV 1.126.7 or of 8.1.34 are accepted as the wives of the respective persons whom these verses are addressed to. Though no concrete evidence of their being husbands and wives is available in the texts themselves.

Romaśā, according to tradition, is the seer of ṚV 1.126.7. The Bṛhad-devatā (2.155) says that she is the wife of king Svanaya Bhāvayavya, and the daughter of Aṅgiras. The entire hymn 1.126 itself is a praise for gifts, addressing king Svanaya, the last two stanzas of which are a dialogue of the royal couple, but these two stanzas seem to have no apparent connection with what precedes. They

[1] Former HoD, Sanskrit, University of Calcutta, WB

rather actually comprise a bedroom-conversation between a man and a woman, than a dialogue of the royal couple as mentioned in the Bṛhad-devatā.

In this hymn of seven stanzas, the first five verses are ascribed to Kakṣīvant, while the seer of verse six is king Bhāvayavya and the seventh one goes by the name of his queen, viz. Romaśā. According to a traditional legend (BṛhD 3.140-154), Kakṣīvant, the son of seer Dīrghatamas Aucathya, while returning from his teacher's hermitage on completion of his study, met king Svanaya Bhāvayavya on the way. The king liked the youth very much and honoured him with his daughters and wealth. On the next morning Kakṣīvant rushed to his father to inform of his good fortune and asked him to pray for the sake of king Bhāvayavya. Thus in the preceding hymn, 1.125, a praise of gifts (i.e. dānastuti, or nārāśaṃsī as termed by BṛhD 3.154) by Kakṣīvant and his father Dīrghatamas is found.

Kakṣīvant is seen again at the next hymn, praising king Svanaya Bhāvayavya with the first five stanzas, whereat the next and last two stanzas contain an intimate erotic conversation between two lovers, who have been identified as king Svanaya and his wife Romaśā. Śākapūṇi, an ancient writer of Nirukta (the ancient Indian study of Vedic etymology) who precedes Yāska the famous Nirukta writer, thinks that these two stanzas constitute a dialogue of Indra and the king with Romaśā. But Śākaṭāyana, another of Yāska's predecessors, thinks that in this couple of verses a story of a husband and wife, who were in contact with Indra, has been told (cf. BṛhD 3.155-56). According to BṛhD 4.1-4 Indra was present at the time of this conversation. The Bṛhad-devatā states that once Indra came to the couple and asked the queen in friendly jest: "Have you hair or have you not, o Queen?"[1] In reply the queen addressed him in a childlike manner: "Hug me tight, mighty one" (*upopa me parāmṛśa* etc.) at verse seven. Then the king soothed her with the previous stanza, i.e. the sixth verse of the present hymn[2]. In fact, neither is there any mention of the queen's personal name in the text concerned, nor does the Bṛhad-devatā give it, the adjective *romaśā*- 'hairy' serving the purpose throughout the Vedic mythology[3].

These last two stanzas visibly have no connection with the preceding five, as thereat the gifts of Svanaya to his son-in-law have been described in detail. In the initial mantra the seer says: "I compose with delight a number of praises for king Bhāvya alias Svanaya, who lives on the bank of the river Sindhu, who, unhurt by anyone and desirous of fame, grants me thousands of soma sacrifices". In the following four stanzas, Kakṣīvant gives a list of the gifts he received from the king and describes them explicitly.

The two concluding stanzas of this hymn, however, strike a different note. At verse six a man is heard speaking about his lady-love: "This girl, fit to enjoy, has been fully accepted by me (or, this girl has embraced me deeply); she gets stuck to one like a she-mongoose who has given birth to children; being moistened with

desire she gives me hundreds of erotic embraces"[4]. The woman shots back to her lover in the following stanza: "Come close to me, give me a close hug, and do not consider me to be a minor. I am hairy all over the body (i.e. quite enjoyable), just like a ewe of the Gandhāras"[5].

According to Griffith: 652 the above two stanzas appear to be a fragmentary piece of a popular song, as these have no apparent connection with what precedes and are composed in a different metre. The first five verses are in triṣṭubh of eleven syllables, while the rest two are in octosyllabic anuṣṭubh. Griffith considers these couple of verses to be "a fragment of a liberal Shepherd's love-song", where the seventh stanza should have preceded the sixth.

According to Ludwig the word Yādurī in the sixth verse, which is explained by the traditional commentators as an approaching woman[6] and by the philologists as 'semen genitale; effundens'[7] (Grassmann: s.v.), may actually be the name of a slave girl. Lassen: 2.150 says that the country of Gandhāra, in the statement *gandhārīṇām ivāvikā* 'as a ewe of Gandhāras', was situated to the west of the Indus and to the south of the Kophen or Kabul (= Vedic Kubhā) river. King Darius in a rock inscription mentions the Ga(n)dāna in association with the Parthians and other races. The name of the country is preserved in that of the modern Kandahar.

The later indigenous researchers of the Ṛg-veda, following the different schools of interpretations, give various explanations of this love song. The mystic school of Aurobindo explains the expression *gandhārīṇām* as 'of those that hold the light' (vide Purani: 152) Another Indian school translates this stanza attributed to seer Romaśā[8]. These later explanations, however, may accelerate the rise of yet another phase of myth-making, in view of the continuous process of human mind and civilization.

The importance that has been traditionally attached to this hymn, however, should not be altogether ignored. The myths and legends about the seers of the hymns, their families and the gods they invoked can hardly be totally conjectural in character, since they have come down to the present age from a very ancient period.

Apālā of the family of Atri, is the seer of the entire hymn ṚV 8.80 (91). A fascinating legend about her has been traditionally narrated. Her poetry is remarkable from many points of view, one being the folk elements found therein.

Citing the Śāṭyāyana-brāhmaṇa, Sāyaṇa, the famous commentator of the Vedas of fourteenth century, narrates an interesting legend about her in the preface of the exegesis of this hymn. It is said that afflicted with a skin disease and repudiated by her husband, Apālā, returned to her father's hermitage to practice hard penances for long seeking the favour of Indra. Intending to make a soma offering to the god, once she went to have a bath in the river, and on her way back

home found some soma which she picked up and ate as she walked. Hearing the noise of the jaws chewing soma, Indra mistook it for the sound of the friction of the stones used for pressing soma. At once appearing in her front, he inquired from her if there were any stones pounding soma. Apālā answered in the negative and told him the truth, at which Indra started turning away from her. Apālā called him back and offered him to drink the soma-juice in her mouth cavity. At her insistence, Indra drank the juice from her mouth as she wished for, and could not help falling in love with her. Triumphant at winning his heart, Apālā exclaimed, "I have been repudiated by my husband, and yet Indra comes to me!" Moved, Indra granted her any three boons of her choice. She opted for the following ones: May (1) her father's bald head and (2) barren fields and (3) the private parts of her own body sprout again. To fulfill her wishes, Indra dragged her first through the wide hole of his chariot, next through the narrower hole of the cart, and finally through the small hole of the yoke. In the process she cast off three skins one after another. The first skin became a hedgehog, the second an alligator and the third a chameleon, and Apālā was graced with a sun-like skin.

BṛhD 6.99-107 gives a detailed account of the above Apālā hymn. In a delightful-reading narrative style it relates the legend with ṚV 8.91. Somewhat different from the one narrated by Sāyaṇa, the story runs thus: There was once a girl called Apālā, the daughter of Atri, who was suffering from a skin disease. Indra saw her in the lonely hermitage of her father and fell in her love. Aware of his intention through penance, Apālā went out with a pitcher to fetch water. Having found some soma on the way, she praised it (the soma), and this incidence is told in the first verse of the hymn. She pressed the plant in her mouth, and thereafter invoked Indra with the second stanza of the hymn, even as the latter sipped it from her mouth. After Indra relished cakes and meal at her place, she praised him with the next three verses. She prayed Indra to make her have abundant hair and faultless limbs and fair skin. Pleased by her praise, Indra passed her first through the carriage-aperture, then between the bodies of the cart and in end through the yokes, thrice in all. As a result she became fair-skinned. The rest of this legend is the same as at Sāyaṇa. The Bṛhad-devatā categorizing the hymn as "aindra" points out that Yāska and Bhāguri accept it as "itihāsa" ('story' or 'myth').

Sarasvati & Vidyalankar 1982: 10.3553 derive *apālā-* from *pāl-* 'to protect', and attributes to the word the meaning 'an unmarried girl', lit. 'one yet to get protected i.e. married'. However farfetched the meaning may appear, the term *kanyā* in the opening stanza of the hymn suggests that Apālā must have been a maiden, contra Sāyaṇa. Oldenberg: 2.142 rightly points out that the two attributes *patidviṣaḥ* and *yatiḥ* made Sāyaṇa and his predecessor commentator Veṅkaṭamādhava peculiarly go astray in assuming that Apālā was a married woman. Both the aforesaid words were explained by Sāyaṇa and Veṅkaṭamādhava as 'being repudiated by her husband' while Griffith explains the term *patidviṣaḥ* not as a

bahuvrīhi, but as a tatpuruṣa compound meaning ‘hostile to the lord’. The accentuation however would seem to lend support to Griffith’s assumption.

Kshetres Chandra Chatterjee: 61 observes that Sāyaṇa has freely drawn on his imagination in supplementing the statements in the Śāṭyāyana-brāhmaṇa. The Brahmanical story is somewhat shorter. Chatterjee strongly believes that Apālā is a maiden, and hence at the end of the hymn she asks for the prosperity of crops in her father’s, not any husbands, fields from Indra. Apālā’s love-relation with Indra is manifest from 4d (*indreṇa saṃgamāmahai*).

Sāyaṇa, Śaunaka and the author of Śāṭyāyana-brāhmaṇa, followed recently by Oldenberg and Geldner, have amply brought out the purport of 5d and 6b of the hymn. Chatterjee: o.c., l.c. ingeniously suggests that the desire expressed at these lines for crops and especially for hair below Apālā’s waist can be appreciated and gains significance in the present context only by assuming an erotic (or more precisely, erotic-cum-mystic) relation of the speaker with Indra. The first desire is reminiscent of the fertility cult, and the second one expressly refers to her attaining sexual powers. Moreover, Chatterjee: o.c., l.c. points out that in the hymn itself there is, so to say, no reference to any skin disease that Apālā could have had, an inference Śaunaka and Sāyaṇa have dragged in probably from the expression *sūryatvacam*. This last word caused a wrong signal for them and provoked them to fancifully imagine that Apālā had had a diseased skin before. Chatterjee also contests Sāyaṇa’s explanation (*sarvatra pūjārthe bahuvacanam*) by refuting that the plurals used in verse four are actually original singulars converted to honorific plurals. Whatever may be the case, it is proof enough that shows that Apālā was not alone in establishing a relationship of love with Indra, but belonged to a class of women who hated to have husbands, and preferring to remain virgins (i.e. singles) worshipped Indra as their lover instead. The hypothesis (which perhaps could lead to a sort of Immaculate Conception, if at all) may appear probable in view of the second line of the second verse and also verse three: Apālā wants the soma, and is pressing it with her teeth slowly, albeit very slowly, so as to get enough time to understand her lord fully. It is then during the pressing and flowing of the soma in her mouth that she has communion with her divine lover. All this might have given rise to the later Sanskrit, rather Indian, mystic literature.

Notes:

1. *romāṇi te santi na santi rājñi* BṛhD 4.2.
2. *ā gadhitā pari gadhitā/ yā kaśīkeva jaṅgahe| dadāti mahyaṃ yādurī/ yāśūnāṃ bhojyā śatā||* ṚV1.126.6.
3. Cf. Oldenberg: 1.128.
4. see no.2

5. *upopa me parā mṛśa mā / me dabhrāṇi manyathāḥ| sarvāham asmi romaśā/ gandhārīṇām ivāvikā*|| ṚV1.126.7.
6. *abhikramaṇavatī strī* Veṅkaṭamādhava.
7. Flussigheit, ergiessend beim Coitus, Grassman, s.v.
8. Sarasvati & Vidyalankar1977: 3.565 & BṛhD 4.57.

Bibliography

1. Chatterjee, Kshetres Chandra. **1976.** *Studies in Vedic and Indo-Iranian Religion and Literature*, vol. 1. Varanasi

2. Geldner, Karl Friedrich. **1951**. *Der Rig-veda: aus dem Sanskrit ins Deutsche übersetzt und mit einem laufenden Kommentar versehen*. Teil 1. Cambridge, Massachusetts-London-Wiesbaden. Harvard Oriental Series vol. 33

3. Grassmann. **1873**. *Wörterbuch zum Rig-Veda*. Wiesbaden: Otto Harassowitz.

4. Griffith, Ralph T.H. **1896-97**. *The Hymns of the Rigveda*: tr. with a popular commentary. 2 vols. Benares [first publ. 1889-92 in 4 vols.]

5. Lassen, Christian. **1836**. *Die Altpersischen Keilinschriften von Persepolis:* Entzifferung des Alphabets und Erklaerung des Inhalts. Bonn

6. Oldenberg, Hermann. **1912**. *Rigveda*. Textkritische und exegetische Noten. 2 Bde. Berlin.

7. Purani, A.B. **1963**. *Studies in Vedic Interpretation*: on the lines of Sri Aurobindo. Varanasi

8. Sarasvati, Svami Satya Prakash and Vidyalankar, Satyakam. **1977**, **1982**.

Ṛg-veda Saṃhitā. Vols. 1 & 3. Veda Pratishthan, New Delhi.

ध्वन्यालोककारस्यार्थतत्त्वम्

प्रो. धर्मानन्दराउत[1]

ध्वनिसिद्धान्तस्य प्रतिष्ठापकपरमाचार्यः श्रीमानानन्दवर्द्धनः स्वोपज्ञे ध्वन्यालोकग्रन्थे प्रथमां कारिकां समुपन्यस्यति -

> ‘काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्व-
> स्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये।
> केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयम्
> तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम्’।। (*ध्वन्यालोकः*, १.१)

अनया कारिकया सामान्यतो वक्ष्यमाणस्याशेषविषयस्योद्देशपरिचयः प्राप्यते। तथा हि ध्वनेः पूर्वाचार्यसम्मततत्त्वम्, तदभावसम्भावना, लक्षणादिवृत्त्यन्तरेण गतार्थत्वकल्पना, ध्वनेरनाख्येयत्वम्, सम्भाव्यमानसकलविप्रतिपत्तिनिरासेन ध्वनिप्रतिष्ठापनं चेत्येवंरूपेण निष्कृष्टार्थसूचिकेयं कारिका। तदनु वृत्तिग्रन्थेन ध्वनेरभाववादिनां विकल्पप्रदर्शनं भाक्तः ध्वनिरिति लक्षणायां ध्वनेरन्तर्भावसम्भावनाव्युदासम् अनाख्येयत्वादिनिरासञ्च संक्षेपेण निरूप्य युक्त्या च ध्वनेर्लक्षणप्रतिपादनात्पूर्वं वाच्यव्यङ्ग्यरूपेणार्थविभागप्रदर्शनाय द्वितीयां कारिकामवतारयामास ध्वनिकारः -

> ‘योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः।
> वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ’।। इति (*ध्वन्यालोकः*, १.२)

तत्रापि वाच्यस्य सकलवादिसम्मततया प्राचीनालंकारिकाणां तत्रैव सविशेषसंरभशालितया न विशेषतो विचारगोचरत्वम्, व्यङ्ग्यार्थस्य तु विप्रतिपत्तिविषयतया विवेचनमवशिष्यत इत्यभिप्रायेणोक्तम् तत्र वाच्यः प्रसिद्धो यः प्रकारैरुपमादिभिः। बहुधा व्याकृतः सोऽन्यैः काव्यलक्षणविधायिभिः।। इति

प्रतीयमानस्य तु ध्वनिसिद्धान्तजीवातुभूततया प्राधान्यमस्तीति सकलावयवाभिव्यङ्ग्य-रमणीलावण्यसौन्दर्यत्वं तदीयमित्थं निरूपितम् -

> ‘प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
> यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु’।।
> (*ध्वन्यालोकः*, प्रथमोद्योतः)

एवं सामान्यतया प्रतीयमानस्य माहात्म्यमुपवर्ण्य तत्रापि रसध्वनेरेव कवितात्पर्यविषयत्वमस्तीति उपपादनाय प्राचीनतमसंवादानुसारेण प्रकृतोऽर्थः परिपोष्यते यथा –

---

[1] आचार्यः विभागाध्यक्षश्च, साहित्यविभागः, साहित्यसंस्कृतिसंकायः, श्रीलाल-बहादुर-शास्त्री-राष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली।

‘काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः’।। इति

(*ध्वन्यालोकः*, १.५)

अत्र प्रसङ्गे विश्वनाथादीनामियं खलु शङ्का यत् -'काव्यस्यात्मा ध्वनिरिति-' पूर्वं प्रतिज्ञाय पश्चात् 'अर्थः सहृदयश्लाघ्य' इत्यनया कारिकया वाच्यव्यङ्ग्ययोः सव्येतरविषाणयोरिव समशीर्षिकया काव्यात्मभावेन परिगणनात् ध्वनिकारस्य मतं स्ववचनविरोधादेव पराहतं भवति। तत्रेदं विचार्यते - न तावत् कारिकेयं ध्वनेर्लक्षणत्वेन निर्दिष्टा, ध्वनिनिरूपणात् प्राक् भूमिकारूपा। तथा च वृतावुक्तम् - 'ध्वनेर्लक्षयितुमारब्धस्य भूमिकां रचयितुमिदमुच्यते' इति । अभिनवगुप्तेनापि ध्वन्यालोकस्य लोचनटीकायामुक्तम् -'ननु ध्वनिस्वरूपं ब्रूमः' इति प्रतिज्ञाय वाच्यप्रतीयमानाख्यौ द्वौ भेदावर्थस्येति व्याख्याभिधाने का सङ्गतिः कारिकाया इत्याशक्य सङ्गतिं कर्तुमवतरणिकां करोति ‘तत्रेति’।

एवमेवाग्रेऽपि 'भूमिरेव भूमिका; यथा पूर्वनिर्माणे चिकीर्षिते पूर्वं भूमिरेव विरच्यते तथा ध्वनिस्वरूपे प्रतीयमानाख्ये निरूपयितव्ये निर्विवादसिद्धवाच्याभिधानं भूमिः तत्पृष्ठेऽधिकप्रतीयमानांशलिङ्गनात्। वाच्येन समशीर्षिकया गणनं तस्याप्यनपह्नवनीयत्वं प्रतिपादयितुमिति। एतावता अनया कारिकया वाच्यार्थस्य काव्यात्मत्वं सिद्ध्यतीति ज्ञायते। किन्तु वाच्यपृष्ठभावी प्रतीयमानो नाम काव्यजीवातुभूतोऽर्थः स एव काव्यस्यात्माऽस्तीति सूच्यते।

यथा च भूमिकां विना प्रासादोऽपि न स्थितिं लभते; तद्वदेव वाच्याधारेण व्यङ्ग्यार्थस्य स्थितिरिति स्फुटमेतावता सन्दर्भेण। परं प्रासादस्य शिल्पिशतैरुपकल्पितस्य तस्य यद्रमणीयकं तत् तु न भूमिकायाः; तथैव कविकल्पनाविश्रामधामताप्रासादसम्बन्धः प्रतीयमानस्यैवार्थस्य न तु वाच्यार्थस्य। पुनश्च कारिकासु 'समाम्नातपूर्वः' ‘स्मृतौ' इत्यादिभिः शब्दैः पूर्वाचार्यसम्मतिप्रदर्शनेन स्ववचनस्य प्रामाणिकत्वमपि ग्रन्थकारेणानन्दवर्धनेन साधितम्।

पुनश्च - ‘सहृदयश्लाघ्यः' 'काव्यात्मा' इति विशेषणद्वयमप्यर्थसामान्यपरतया संयोज्य तस्य द्वौ भेदाविति यथा स्थितान्वययोजन एवाऽभिनिवेशः केषांचित् शेमुषीजुषां तत्रापि सुगमः पन्था विचारणानाम्। तथा हि शब्दार्थशरीरमयमपि काव्यं प्राणायमानस्य प्रतीयमानस्य परिस्पन्दं विना न चमत्करोतीति निर्विवादसिद्धम्। शब्दशरीरस्येव तद्विहीनस्य काव्यस्य सुतरां हेयत्वात् । तथापि काव्यव्यवहारे काचित् अर्थकल्पना विविधरूपा क्रियते साऽपि प्रकृते विवेचनीयैव। ध्वनिभेदप्रकरणे तावदर्थस्थितिस्त्रिविधा कश्चिदर्थे स्वतःसम्भवी, कश्चित् कविप्रौढोक्तिसिद्धः, कश्चित् कविनिबद्धवक्तृप्रौढोक्तिसिद्धश्चेति। कविनिबद्धवक्तृप्रौढोक्तेः कविप्रौढोक्त्या गतार्थत्वात् रसगङ्गाधरकारस्तु न श्रद्धेयः, वाकोवाक्यप्रसङ्गे पात्रोपनिबद्धानामुक्तीनां समधिकचमत्कारजनकतया रसाभिव्यञ्जनोपकारकत्वस्य स्फुटमनुभवात् ।

एवं त्रिविधोऽप्ययमर्थो विवक्षितान्यपरवाच्यध्वनौ वाच्यरूपोऽपि व्यङ्ग्यनिष्ठो भवतीति स्वीक्रियते, एवं वाच्यस्यापि सहृदयश्लाघ्यतया काव्यात्मभावोन्मुखतया च काव्यात्मरूपेण व्यवहारोऽपि नाऽसङ्गतः प्रतिभाति ।

अन्यच्च ध्वनिकारेणानन्दवर्द्धनेन स्थलान्तरे उक्तम्- 'व्यङ्ग्यव्यञ्जकाभ्यामेव सुप्रयुक्ताभ्यां महाकवित्वलाभो महाकवीनां न वाच्यवाचकमात्रेण' इति तत्र वाच्योऽपि व्यञ्जकदशायां काव्यात्मरूपतामारोढुं क्षमत इति तदभिप्रायः स्फुटीभवति । एतदभिप्रायेण चित्रमपि काव्यप्रभेदरूपेण परिगण्यते, तत्रापि परम्परया प्रतीयमानार्थस्पर्शवत्तानियमात् । केवलं प्रधानतया व्यङ्ग्यतात्पर्यं नास्तीति तस्य चरमकोटिनिवेशः स्वीकृतो न त काव्यस्वरूपाद् बहिर्भावः। अतएव 'शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्' इति काव्यप्रकाशोद्धृतकारिकायां अव्यङ्ग्यपदेन न सर्वथा व्यङ्ग्यस्याभावोऽङ्गीकृतष्टीकाकारैः, किन्तु कवितात्पर्यविषयीभूतव्यङ्ग्यस्याभावोऽनुमतः। ध्वनिकारस्य सर्वत्र कविवाङ्मये प्रतीयमानचमत्कारमेव प्रमाणयतो भणितिरियमपि द्रष्टव्या – 'सर्वथा नास्त्येव सहृदयहृदयहारिणः काव्यस्य स प्रकारः यत्र न प्रतीयमानार्थसंस्पर्शेन सौभाग्यम्' इति। इत्थं प्रतीयमानार्थसंस्पर्श- शालितयाऽपि स्पर्शमणिवत् सौवर्णी प्रक्रियामासाद्य वाच्योऽप्यर्थः काव्यात्मभावं भजेदेव । अन्यत्र कोषकारेणोक्तम् -

'आत्मा कलेवरे यत्ने स्वभावे परमात्मनि।
चित्ते धृतौ च बुद्धौ च परव्यावर्तनेऽपि च।।'

इति दिशा व्यङ्ग्यस्य कलेवरतया तदुपपादनयत्नवत्तया वा वाच्योऽर्थः 'काव्यात्मा' इत्युक्तिर्न विरोधं लम्भनीया। किं बहुना, विशुद्धमपि वाच्यं काव्यस्वभावनिर्वाहकतया नानात्वं भजमानं काव्यस्वरूपं निर्वहतीति स्वयं ध्वनिकारः संमनुते। यदुक्तं ध्वनिकारेण -

‘अवस्थादेशकालादिविशेषैरपि जायते।
आनन्त्यमपि वाच्यस्य शुद्धस्यापि स्वभावतः’।। इति।

(*ध्वन्या.*, चतुर्थोद्योतः)

'शुद्धस्य अनपेक्षितव्यङ्ग्यस्यापि वाच्यस्याऽऽनन्त्यमेव जायते स्वभावतः इति च। केवलस्य अनपेक्षितव्यङ्ग्यस्यापि वाच्यार्थस्य स्वभावोक्तिमात्रेण काव्यस्वरूपनिर्माणकत्वं भवतीति तदभिप्रायः। एकस्यैव वस्तुनस्तत्तदवस्थाभेदभिन्नतया नवनवायमानतया चमत्कृतिजनकता सहृदयहृदयसाक्षिणी परिस्फुरत्येव। यथा कुमारसम्भवे आदौ भगवतीं शैलाधिराजतनयां वर्णयन् महाकविः –

'सर्वोपमाद्रव्यसमुच्चयेन यथा प्रदेशं विनिवेशितेन।
सा निर्मिता विश्वसृजा प्रयत्नादेकस्थ सौन्दर्यदिदृक्षयेव।।' (*कुमारसम्भवम्,* १.४९)

इत्येवमुपसंहरति । पुनरपि वसन्ताविर्भावकाले तामेव प्रकारान्तरेण कविरुपवर्णनाञ्चकार-

'आवर्जिता किञ्चिदिवस्तनाभ्यां वासो वसाना तरुणार्करागम्।
पर्याप्तपुष्पस्तवकावनम्रा सञ्चारिणी पल्लविनी लतेव'।।इति।

(*कुमा.स.* ३.५४)

पुनरपि परिणयावसरे महाकविरन्यथैव तामुपश्लोकयितुं वर्णयति –

'तां प्राङ्मुखीं तत्र निवेश्य तन्वीं क्षणं व्यलम्बन्त पुरो निषण्णाः।
भूतार्थशोभाह्रियमाणनेत्रा : प्रसाधने सन्निहितेऽपि नार्यः'।। इति।

(*कुमा.स.* ७.१३)

तदेवं वाच्यार्थमात्रस्य रामणीयकनिर्वाहसमर्थतया काव्यात्मभावो न सुदुर्घटः स्वीकृतश्च ध्वनिकारादिभिः। एवंप्रकारेण विविधेषु स्थलेषु अचेतनपदार्थेषु चेतनव्यवहारसमारोपकौशलं, चमत्कारविशेषं जनयत्येव। किमधिकेन - स्तम्भकुम्भादिः पदार्थोऽपि कमनीयकामिनीबाहुवल्लीवलयितः, सद्यो नायकदशामक्लेशलेशमनुभवति। स्वभावतश्च कविव्यवहारगोचरस्य वाच्यस्याप्यर्थस्य प्रतीयमानार्थसंस्पर्शशालिता सुप्रतिष्ठिता। प्राचीना आलङ्कारिका अपि रीति-वृत्ति-गुणालंकारादिनिरूपणव्याजेन कथञ्चिदस्फुटतया ध्वनितत्त्वमेवानुजग्मुरिति सिद्धान्तः। यथा ध्वनिकारेण प्रतिपादितम् -

'अस्फुटस्फुरितं काव्यतत्त्वमेतद्यथोदितम् ।
अशक्नुवद्भिर्व्याकर्तुं रीतयः संप्रवर्तिताः'।। इति ।

इत्थमेव शब्दतत्त्वाश्रया उपनागरिकाद्याः वृत्तयः, अर्थतत्त्वाश्रयाश्च कैशिक्याद्याः परम्परायाः प्रतीयमानमेवार्थं परिपुष्णन्तीति न विवादः। अतएव 'वृत्तयो काव्यमातृका' इति भरतोऽपि ब्रूते । तदेवं वाच्यस्याऽप्यर्थस्य काव्यस्वभावनिर्वाहकतया काव्यात्मभावो न खण्डनीयः केनापि। शब्दार्थविचारे पूर्वापरिभावविधौ च वाच्यस्य प्रथमोपस्थितिगोचरत्वं, लक्ष्यव्यङ्ग्यादेस्तदुत्तरं प्रतिपत्तिश्चेत्यत्र न कस्यापि विचिकित्सावसरः। घटप्रदीपन्यायेन वाच्यस्य व्यञ्जकत्वं प्रतीयमानस्य व्यङ्ग्यत्वमपि सिद्धमेवेति न कश्चित् विरोधः। सहृदयश्लाघ्यता काव्यस्वरूपनिर्वाहकत्वं तूभयोरर्थयोः स्वभावसिद्धमित्यनया दिशा 'काव्यात्मा' इति पदनिर्वचने न केषाञ्चित् वैमत्यम् ।

ग्रन्थानुक्रमणी

ध्वन्यालोकः (आनन्दवर्धनः) – (सम्पा.) के. कृष्णमूर्तिः, मोतिलाल बनारसीदास, दिल्ली, १९८२ (द्वितीयसंस्करणम्).

……….. (आनन्दवर्धनः) – (सम्पा.) सत्यनारायण चक्रवर्ती, संस्कृत पुस्तक भाण्डार, कलकाता, २०१०.

De, S.K. – *History of Sanskrit Poetics,* Firma K L M Pvt. Ltd., Calcutta, 1988. (Second Revised Edition).

मायावादविदारणे श्रीजीवगोस्वामिमतवैशिष्ट्यम्

सेख-साविर-आलि:[1]

कमपि राद्धान्तमज्ञानध्वान्तहन्तारं संसारपारवारतारं प्रेप्सूनां पुंसां शेमुषीजुषां चेत:सु शमं कारं कारं शाङ्करं मतं तमोपहं राजतेतराम्। तेन च लौकिकप्रत्यक्षसिद्धो जीवब्रह्मणोर्भेदोऽ**भेदि।** निरस्ताशेषभेदमद्वितीयमेकं तत्त्वं प्रत्यपादीत्यद्वैतवेदान्तमतं प्रत्यष्ठापि। पुरश्च प्रतिभासमानं जगदखिलं मायाप्रसूतमिति मायावाद: प्रतिष्ठामाप। अद्वैतवेदान्तमते त्रिविधा सत्ताऽङ्गीक्रियते- प्रातिभासिकी व्यावहारिकी पारमार्थिकी चेति। रज्जौ सर्पप्रतीतौ सर्पस्य प्रातिभासिकी, ब्रह्मणि जगत्प्रतीतौ जगत: व्यावहारिकी ब्रह्मणश्च क्वापि बाधितत्वाभावात् पारमार्थिकी सत्ता। यथा रज्जौ सर्पप्रतीति: अज्ञानकार्यं, तद्वद् ब्रह्मणि जगद्धीरपि तत्कार्यम्। एतदज्ञानमेव मायेति मतमितीयं कारणता मायावाद इति जगज्जगद्विदितम्। अयमेव मायावादो मायाविवर्तवादापरपर्यायः।

ननु कारणतायां त्रिविधो वादो विदां विदित: - असत्कार्यवाद:, विवर्तवाद: परिणामवादश्चेति। कोऽयं विवर्त:? ननु कोऽयमसत्कार्यवाद:? कोऽयं परिणामवाद:? “असदेव उत्पद्यते उत्पन्नं च निरुध्यति” इति न्यायसूत्रभाष्यानुसारम् असत्कार्यवादादिसिद्धान्तो न्यायवैशेषिकाणाम्। **“वस्तुनस्तत्समसत्ताकोऽन्यथाभाव: परिणाम:, तदसमसत्ताको विवर्त इति वा; कारणसलक्षणोऽन्यथाभाव: परिणाम:, तद्विलक्षणो विवर्त इति वा; कारणाभिन्नं कार्यं परिणाम:, तदभेदं विनैव तद्व्यतिरेकेण दुर्वचं कार्यं विवर्त इति वा विवर्तपरिणामयोर्विवेक:”** इति सिद्धान्तलेशसंग्रहे विवर्तपरिणामयोर्विवको विवेदितः। तत्र अद्वैतवेदान्तिनो विवर्तवादिन:, सांख्या: परिणामवादिन:, परिणामवादिनश्च श्रीब्रह्मरुद्रसनकादय: सम्प्रदाया एते सर्वेऽपि मायावादविमर्दनविलासा लसन्ते।

वस्तुतोऽभेदिनां मायाविवर्तवादे उपास्योपासकभावरूपस्य भेदसम्बन्धस्यालीकत्वाद् विवर्तवादो नादर्तव्य इति परवर्तिनि काले श्रीप्रभृतिप्रस्थानानुयायिभिर्विवर्तोऽवारि। श्रीमतं रामानुजाचार्यप्रणीतम्, ब्रह्ममतं च माध्वमतम्, रुद्रमतं च विष्णुस्वामिप्रणीतमपि शुद्धाद्वैतवादिभिर्वल्लभाचार्यै: प्रोपोद्वलितम्, निम्बार्कमतमेव सनकसम्प्रदायमतमिति सुप्रसिद्धम्। तत्रापि श्रीजीवमतमानन्यमयतीति मतिमतां मतम्। “निषेधश्च सजातीयस्य प्रसक्तस्यैव भवती”ति न्यायात् सजातीयत: श्रीप्रभृतिमतादेव वैशिष्ट्यमत्र प्राधान्येन विवक्षितम्। तदेव एतद्ग्रन्थप्रतिपिपादयिषितम्।

श्रीमतम् – श्रीरामानुजाचार्यमते विशिष्टाद्वैतवाद एव राजतेतराम्। अद्वैतपदेन “द्विधेतम् द्वैतम्” इत्येवं द्वैतस्याभाव एव सूचित:। तत्र ब्रह्मैव सदेकमेवाद्वितीयमिति एतेषां शाङ्करानुसारि मतम्। एवञ्चेत् शङ्करमतात् कोऽयं विशेष:? अत्रोच्यते केवलाद्वैतत्वाभावेऽपि विशिष्टाद्वैतत्वोपपत्ते: विशिष्टं ब्रह्मैकमेव सत्यमिति विशिष्टाद्वैतवादोपपत्तिरिति। केन विशिष्टम्? जीवजगद्विशिष्टमित्यङ्गीकृतम्। यथा नागरिकाणां कृते बाह्यावरणरहिततयैव नारिकेरफलमुपयोगीति तन्मात्रस्यैव तत्त्वम्, ग्रामौकसान्तु काष्ठादिना

---

[1] सहकारी अध्यापकः, संस्कृतविभागः, पश्चिमवङ्गराष्ट्रियविश्वविद्यालयः, पश्चिमवङ्गः।

चुल्ल्यादिसाध्यपाककार्येऽपि सावरणस्यैव नारिकेरफलस्योपयोग इति तद्वदेव वैलक्षण्यं केवलविशिष्टाद्वैतवादयोरिति विभावनीयम्। ततश्च श्रीमते जीवजगदादेरपि विशेषणविधया पारमार्थिकत्वमस्तीति युज्यते।

ननु "नेह नानास्ति किञ्चन" इत्यादिश्रुतीनां का गति:? अत्रोच्यते नानात्वं नाम भेदवत्त्वम्; भेदश्च सप्रतियोगिक:; तत्र च प्रतियोगि न केवलं ब्रह्म। अपि तु जीवजगद्विशिष्टमेव ब्रह्म। ततो नाना भिन्नमिह संसारे नास्तीति श्रुतेस्तात्पर्यम्। किञ्च भेदाभेदस्थल एवाभेदस्याङ्गीकारान् "नीलो घट:" इत्यत्र यथा समानाधिकरणयोर्नीलत्वविशिष्टघटत्वविशिष्टयोरभेदान्वयस्तद्वत् "तत्त्वमस्या"दौ अपि तत्त्वविशिष्टत्वम्त्वविशिष्टयो: समानाधिकरणयोरेवाभेदान्वय इति जीवादे: सत्यत्वाङ्गीकारेणैव एतत्सर्वं युज्यते। जगदिदं च ब्रह्मण एव रूपम्। तथाच "उभयव्यपदेशात्त्वहिकुण्डलवत्" (३/२/२७) इति ब्रह्मसूत्रश्रीभाष्ये भाषितम् – "...तस्याचिद्वस्तुनो ब्रह्मरूपत्वमहिकुण्डलन्यायेन? उत प्रभाप्रभावतोरिव एकजातियोगेन? उत जीवस्य विशेषणविशेष्यतया अंशांशिभावेन? इति विशेषणविशेष्यभावमङ्गीकृत्य "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपराधात्" "तदनन्यत्वमारम्भणशब्दादिभ्य:" इत्यत्र सूक्ष्मचिदचिद्वस्तुविशिष्टब्रह्मण: स्थूलचिदचिद्विशिष्टस्य उत्पत्तिरनन्यत्वं चोक्तम्" इति। -----"किं युक्तम्? अहिकुण्डलवदिति कुत:? उभयव्यपदेशात् "ब्रह्मैवेदं सर्वम्" "आत्मैवेदं सर्वम्" इति तादात्म्यव्यपदेशात्। "हन्ताहमिमास्तिस्रो देवता अनेन जीवात्मनाऽनुप्रविश्य" इत्यादिभेदव्यपदेशाच्च। अहे: कुण्डलभाव-ऋजुभाववत् तस्यैव ब्रह्मण: संस्थानविशेषा अचिद्" इति। यथा प्रकाश: मणिं विना, व्यक्तिं विना जाति:, गुणिनं विना गुणो न स्थातुमर्हति, तद्वदेव ब्रह्म विना जीवजगदंशो न स्वातन्त्र्येण स्थातुमर्हतीति रामानुजमतम्।

रुद्रमतम् – वल्लभाचार्यप्रणीते शुद्धाद्वैतावादे शुद्धस्यैव ब्रह्मणो जगत्कारणत्वमस्ति। ननु किं नाम शुद्धत्वम्? मायासम्बन्धरहितत्वमेव शुद्धत्वम्। ततश्च मायासंबलितं ब्रह्म न जगत्कारणमपि तु शुद्धमेव तथेति तात्पर्यम्। सिद्धान्ते तु माया भगवच्छक्तिरेव "माया दुरत्यया" इति स्मृते:। प्रपञ्चस्य यदि मायिकत्वं , तदा नश्वरत्वमिति मायावादनिरासार्थं निबन्धे निरटङ्कि – "प्रपञ्चो भगवत्कार्य:" इति। तत्प्रकाशे च प्रकाशितम् - "अयं प्रपञ्चो न प्राकृत: नापि परमाणुजन्य:। नापि विवर्तात्मा। नाप्यदृष्टादिद्वारा जात:। नाप्यसत: सत्तारूप:। किन्तु भगवत्कार्य:। परमकाष्ठापन्नवस्तुकृतिसाध्य:। अत: शुद्धस्यैव ब्रह्मणो जगत: कारणत्वमिति" सिद्धान्त:" इति।

एतेषां च मते न विवर्तवाद:, अपि तु अविकृतपरिणामवाद: स्वीकृत:। कनकमृत्कामधेनुकल्पतरुचिन्तामणिवत् स्वयमेवाविकृतं ब्रह्म जगद्रूपेण परिणमत इति तत्त्वम्। एकस्मादेव विचित्रजगत्परिणामवशादेव "एकविज्ञानेन सर्वविज्ञानमि"ति श्रुतिरपि सार्थवती सम्पद्यते। तथाच "आत्मकृते: परिणामात्" (१.४.२६.) इति सूत्रभाष्ये भाषितं वल्लभाचार्यै: - "ननु स एव सर्वं सृजति स एवावति हन्ति च इति कर्तृत्वप्रतीतेराकाशादिवाक्यमौपचारिकं भविष्यतीति तन्निराकरणायाह आत्मकृते: "तदात्मानं स्वयमकुरुत" इति स्वस्यैव कर्मकर्तृभावात् सुकृतत्ववचनाच्च अलौकिकत्वम्। तथापि ज्ञानार्थमुपपत्तिमाह –परिणामात्। परिणमते कार्यकारणेति। अविकृतमेव परिणमते सुवर्णम्। सर्वाणि च

तैजसानि। वृद्धेश्चालौकिकत्वाद् ब्रह्मकारणत्व एव घटते पूर्वावस्थान्यथाभावस्तु कार्यश्रुत्यनुरोधादङ्गीकर्तव्य:। वक्ष्यति च "श्रुतेस्तु शब्दमूलत्वात्" इति।

माध्वमतम्(ब्रह्ममतम्)- पञ्चविधो भेद एतेषां मत अङ्गीकृत: - जीवेश्वरादिभेदेन। ननु कथं भेद: स्वीकर्तुं शक्येत इति चेन्न प्रमाणत्रयसद्भावात्। तथाहि प्रत्यक्षमनुमानं तथाऽऽगम इति प्रमाणत्रितयबलाद् भेद: सेत्स्यति। तथाचानुमानम् – "परमेश्वरो जीवाद्भिन्न:, तं प्रति सेव्यत्वात्; यो यं प्रति सेव्य: स तस्माद्भिन्न: यथा भृत्याद्राजा" इति। एवं चात्र श्रुतिरपि मानम् – "सत्य आत्मा सत्यो जीव: सत्यं भिदा सत्यं भिदा सत्यं भिदा मैवारुण्यो मैवारुण्यो मैवारुण्य:" इति।

न च तत्त्वमस्यादिश्रुतिविरोधोऽत्र शङ्क्य:, "आदित्यो यूप" इत्येवमुपचारेण तादृशव्यवहारस्य उपपत्ते:, लुप्ताकारप्रश्लेषस्वीकाराच्च। किञ्च "घातयन्ति हि राजानो राजाऽहमिति वादिन" इति न्यायेन जीवेश्वरभेद: सुतरामेव सेत्स्यतीति बोध्यम्। ततश्चैतेषां मते ब्रह्मण इव जीवजगदादेरपि भूतार्थत्वेन समसत्ताकत्वात् कथमपि विवर्तवादोऽ ङ्गीकर्तुं न युज्यते।

तथा च सर्वदर्शनसंग्रहे आहतम् – "एकविज्ञानेन सर्वविज्ञानं च प्रधानकारणत्वादिना युज्यते। न तु सर्वमिथ्यात्वेन। न हि सत्यज्ञानेन मिथ्याज्ञानं सम्भवति यथा प्रधानपुरुषाणां ज्ञानाज्ञानाभ्यां ग्रामो ज्ञातोऽज्ञात इत्येवमादिव्यपदेशो दृष्ट एव। यथा च कारणे पितरि ज्ञाते जानात्यस्य पुत्रमिति; यथा वा सादृशादेकस्त्रीज्ञानादन्यस्त्रीज्ञानमिति तदेव सादृश्यमत्रापि विवक्षितम्। यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातमित्यत्र एकपिण्डशब्दौ वृथा प्रसज्येयाताम्। मृदा विज्ञातमित्येतावतैव वाक्यस्य पूर्णत्वात्" इति।

अभ्यङ्करे चाहतम् – "सादृश्यार्थत्वे पुन: एकपिण्डशब्दौ सार्थकौ यत्र एकविज्ञानेन सर्वविज्ञानं सादृश्येन चिकीर्षितं तत्र लाघवात् काचिदेकां व्यक्तिं प्रदर्श्य एवमितरे इत्येवमन्या ज्ञाप्यन्ते। तथाच तदनुसारेण एकशब्द: सार्थक:। तथा मृन्मयघटादिनिष्ठसादृश्यप्रतियोगित्वं मृदन्वितत्वेन रूपेण मृत्पिण्डस्येति पिण्डशब्द: सार्थक:। उपादानोपादेयभावस्य कारणत्वे तु एकशब्दं पिण्डशब्दं च विनापि विवक्षितार्थप्रतिपादनस्य पूर्णत्वात्तयोर्वैयर्थ्यं स्पष्टम् " इति।

निम्बार्कमतम् - निम्बार्कमते ब्रह्मैव जगत उपादाननिमित्तोभयकारणम्। कुत:? प्रकृत्यधिकरणे श्रुतीनां तत्रैव तात्पर्यमिति ब्रह्मसूत्रे वादरायणेन प्रपञ्चितत्वात्। तथाच वेदान्तकौस्तुभप्रभायामावेदितम् – "**किंस्विद्वनं क उ स वृक्ष आसीद् यतो द्यावापृथिवी निष्टतक्षुर्मनीषिणो मनसा, पृच्छ्यते एतद्यदध्यतिष्ठद् भुवनानि धारयन्निति जगदुपादाननिमित्तादिप्रश्ने "वनं ब्रह्म स वृक्ष आसीद्यतो द्यावापृथिवी वो ब्रह्माध्यतिष्ठद् भुवनानि धारयन्निति" साक्षादुभयं निमित्त्वमुपादानत्वं च ब्रह्मण आम्नायतेऽतस्तदेवोभयरूपम्"**" (१.४.२५.) इति। ब्रह्मण: निमित्तत्वं श्रीमद्भगवन्निम्बार्काचार्यैर्वेदान्तपारिजातसौरभे परिष्कृतं श्रुतिद्वारा – "ब्रह्मैव निमित्तकारणम्। कुत:? "तदात्मानं स्वयमकुरुत" इत्यात्मकृते:"(१.४.२६.) अत्र तदिति कर्तृत्वमात्मानमिति कर्मत्वं चोभयमेव निमित्तत्वमुपादानत्वञ्च ब्रह्मण: कीर्तितम्।

न च एकस्यैवोभयरूपत्वं विरुद्धत्वेनासिद्धमिति वाच्यम्। तत्राव्यक्तरूपेण कर्तृत्वस्य व्यक्तनामरूपत्वेन कर्मत्वस्य उपादानत्वस्य च प्रतिपिपादयिषितत्वात्। तदुक्तं वेदान्तकौस्तुभप्रभायाम् – **"तत्राव्यक्तरूपेण कर्तृत्वं व्यक्तनामरूपत्वेन च कर्मत्वं कार्यकारणयोस्तादात्म्यात्"** इति **।**

अत्र चैतदवधेयं यत्, ब्रह्मणो जगदुपादाननिमित्तोभयकारणत्वेऽपि निम्बार्कमतानुयायिन: परिणामवादिन:, न तु अद्वैतिन इव विवर्तवादिन:। परिणामवादे तु कार्यकारणयो: समसत्ताकत्वमपेक्षितम्। ततश्च एतेषां नये ब्रह्मण इव जगत: सत्यत्वमस्त्येव**।** ततश्च परिणामवादविषये मानमोहन-अगर्व्यालमहोदयानामत्र मतम् – "Parinama means modification or transformation or actual change or production of an effect that having equal reality with the material cause or production of an effect that the same kind of (either real or unreal) existence as that of its material cause." इति। परिणामोऽपि द्विविध: स्वरूपशक्तिविक्षेपलक्षणभेदाच्च। तत्राद्य:, ब्रह्मानधिष्ठितस्वतन्त्रप्रकृतिस्वरूपपरिणाम: सांख्यानां सिद्धान्त:। द्वितीयश्चौपनिषदाम्। द्वितीय एव परिणामवाद:, निम्बार्काचार्याभिसम्मत:। परमात्मा सर्वज्ञ: सर्वशक्तिमान् हि अप्रच्युतस्वरूप: सन्नेव स्वात्मकस्वाधिष्ठितनिजशक्तिविक्षेपेण जगदाकारं स्वात्मानं परिणामयतीत्येवंभूत: शक्तिविक्षेपपरिणामवाद: स्वीक्रियते। तत एव तस्यैव निमित्तत्वमुपादानत्वं च इत्युभयमेव संगतं भवति। ततश्चवेदान्तपारिजातसौरभे आहतम् – "सर्वज्ञं सर्वशक्ति ब्रह्म स्वशक्तिविक्षेपेण जगदाकारं स्वात्मानं परिणमय्य अव्याकृतेन स्वरूपेण शक्तिमता कृतिमता परिणतमेव भवति" (१.४.२६.) इति। किन्तु तन्मते इयं च शक्ति: स्वाभाविकी एवेति वेदान्तकौस्तुभे श्रीनिवासाचार्यैरुपपादितम् – "पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च विचित्रशक्ति: पुरुष: पुराणो न चान्येषां शक्तयस्तादृशा: स्यु:। शक्तय: सर्वभावानामचिन्त्यज्ञानगोचरा: शतशो ब्रह्मणस्तु सर्गाद्या भावशक्तय: भवन्ति। तपतां श्रेष्ठ ! पावकस्य यथोष्णता इत्यादिश्रुतिस्मृतिप्रतिपादिता अनन्ता: स्वाभाविक्यस्तस्य शक्तय: सन्ति। तासां सृष्ट्यादौ विक्षेपं करोतीति श्वेताश्वेतरोपनिषदां मन्त्रवर्योऽस्य सृष्ट्यादौ अन्यनिरपेक्षत्वं समानातिशयशून्यत्वं च प्रतिपादयति - "न तस्य कार्यं करणञ्च विद्यते न तत् समश्चाभ्यधिकश्च दृश्यते" इति सर्वशक्तिविक्षेपरूपपरिणामश्च "यथोर्णनाभि: सृजति गृह्णते च प्रधानं पुरुषं चापि प्रविश्यात्मेच्छया हरि:। क्षोभयामास सम्प्राप्ते सर्गकाळे व्ययव्ययौ। प्रसार्य च यथाङ्गानि कूर्म: संहरते पुन: तद्वद्भूतानि भूतात्मा सृष्टानि ग्रसते पुन:" (१.४.२६.) इति।

न चात्र सांख्यीय: परिणामवाद: आश्रेय:। यदि चोच्यते श्रुत्यर्थोपवृंहणाय एव स्मृतिराद्रियते। ततश्च सांख्यस्मृत्यनुसारमचेतनप्रधानकारणतावाद एव आश्रेय:। स चापि श्रुत्यर्थ एव, सर्वज्ञेन वेदार्थज्ञेन कपिलेन प्रणीत इति। तत्र एवमुच्यते, तथात्वेऽन्यासां मन्वादिस्मृतीनामपि श्रुतीनामपि बाधितत्वमापद्येत। श्रुतिस्मृतिषु च चेतनस्यैव जगत्कारणत्वप्रतिपादनात्। तथाच मनुरपि मनुते - "महाभूतादिवृत्तौजा: प्रादुरासीत्तमोऽनुद: सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधा: प्रजा:। अप एव ससर्जादौ तासु वीर्यमवासृजत्। इति। भारते च – "नारायणो जगन्मूर्त्तिरनन्तात्मा सनातन:। तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम।। इति। श्रीमद्भगवद्गीतायां च – "अहं सर्वस्य प्रभव: मत्त: सर्वं प्रवर्ते। अहं कृत्स्नस्य जगत: प्रभव:

प्रलयस्तथा।।"इति। मनुना च वेदबाह्यस्मृतीनामादरो न कर्तव्य इति अभ्यधायि – "”या वेदबाह्या: स्मृतयो याश्च काश्च कुदृष्टय: ता: सर्वा निष्फलं प्रेत्य तमोनिष्ठा हि ता: स्मृता:।।" इति

न च कारणगता धर्मा: कार्येषु उपलभ्यन्ते इति सुवर्णकुण्डलादौ दृष्टत्वात् , प्रकृते च निम्बार्कमते ब्रह्मणश्चेतनत्वशुद्धत्वसर्वज्ञत्वादिधर्मस्य अचेतनत्वाशुद्धत्वावच्छिन्ने कार्ये जगति अनुवृत्त्यदर्शनात्, सुतरामेव वैलक्षण्यान्न जगत्कारणत्वं ब्रह्मण इति वाच्यम्, सादृश्यस्य उपादानोपदेयभावव्यापकत्वस्य असम्भवात् वृश्चिकादौ व्यभिचारस्य दर्शनात्। तथाचोक्तं "दृश्यते तु" (२.१.६.) इति सूत्रव्याख्याने वेदान्तपरिजातसौरभे – "तत्रोच्यते पुरुषाद्विलक्षणस्य केशादेर्गोमयाद्विलक्षणस्य वृश्चिकस्योत्पत्तिर्दृश्यतेऽतो ब्रह्मविलक्षणत्वाज्जगतो न तत्प्रकृतिकत्वमिति न वक्तव्यम् " (२.१.६.) इति।

श्रीलश्रीजीवगोस्वामिमतम् – अद्वैतिनां नये स्थूलसूक्ष्माख्यं जगज्जगदेवाविद्याकल्पितम्। अनादिभूतेनाविद्यापरपर्यायेणाज्ञानेन जीवस्य विषयीभूतं ब्रह्म जगद्रूपेण विवर्तते। अतत्त्विकोऽन्यथाप्रथा विवर्त्त:। यथा शुक्तौ रजतप्रतीति:। शुक्तौ रजतत्वप्रकारकप्रतीतावपि शुक्तिकास्वरूपं न हीयते। एवमेव ब्रह्म जगद्रूपेण विवर्तते। तथाच सर्वसम्वादिनीग्रन्थे विगुम्फितम् – "शुक्तिरजतरूपेण विवर्त्तश्चाविकृतस्यैव सतोऽविद्याया रूपान्तरापत्ति:" इति नीरूपस्य ब्रह्मणो रूपान्तरापत्तिर्विरुद्धेति अन्यथा विवर्तस्वरूपं समुदीरितम्। तथाचोदितम् – "कोऽयमध्यासो नाम ? स्मृतिरूप: परत्र पूर्वदृष्टावभास:" इति। अत्रेदं प्रतिविधीयते यत्, **प्रथमत:** न चैवम्विध: साधारणधर्म: ब्रह्मण: निर्विशेषस्य अस्ति, यद्बलात्तत्र सविशेषस्य जगतो भानं स्यात्। शुक्तौ रजतज्ञाने च शुक्लत्वादिविशेषणं बुद्धावधिरूढं भवतीति तथा अन्यथा ज्ञानं भवतीति दृष्टान्तवैषम्यम्। एतदभिप्रायेणैव सर्वसम्वादिनीग्रन्थे विगुम्फितम् – "सविशेषं ज्ञानं न कदापि शुद्धं ब्रह्म विषयीकरोतीति सम्प्रतिपन्नम्। तर्हि कथमज्ञानेन तद्विवर्तताम् ? सर्पगन्ध इव केतकीगन्ध इत्यादावपि केनचिदौग्र्यशैत्यादिवैशिष्ट्येनैव साम्यं मन्तव्यम् " इति।

द्वितीयत: - ननु अज्ञानमन्यथाज्ञानम्। तच्चान्यस्य पदार्थस्य सद्भावेऽसद्भावे वा ? सद्भावे सुतरामेव द्वैतापत्ति:। असद्भावे च कथं कल्पना जायते ? तथात्वेऽलीकस्याप्यारोपे दधिनि खपुष्पप्रतीतेरापत्ति:। तथाचोदितम् – "किञ्च तदन्यथाज्ञानमन्यस्य सद्भावेऽसद्भावे वा? सद्भावे स्वत: सिद्धमेव द्वैतम्, किं कल्पनान्तरेण? असद्भावे दध्नि खपुष्पापत्ति: स्यात् " इति (सर्वसम्वादिन्याम्)।

तृतीयत: - संस्कारजन्यो भ्रम: पूर्वप्रतीतिमात्रमपेक्षते, न तु प्रतीयमानवस्तुन: सत्त्वमपीति भामतीकारमतम्। जगत्तदुत्तरजायमानं भ्रमज्ञानं प्रति कारणम्। एतद्भ्रान्तिज्ञाने यच्चेदं जगत् प्रतीयते तत् कथं सिध्यति ? स्वत इति न वक्तव्यम्। तथात्वे द्वैतापत्ति:, जगतोऽपि मिथ्याज्ञानविषयीभूतत्वाभावं विना सत्त्वस्वीकारात् द्वैतापत्तिरिति भाव:। यदि च तत्रापि जगदज्ञानविषयतयैव सिध्यति, तदा अन्योन्याश्रयदोषापत्ति:। तथाचोक्तम् – "अथ अज्ञानं जगच्च परम्परयानादिसिद्धम् - तदसत्, अज्ञानेन जगत्, जगता अज्ञानमिति परस्पराश्रयादोषप्रसङ्गात्" इति (सर्वसम्वादिन्याम्)।

चतुर्थत:- किञ्च शुक्तिकायां रजतत्वप्रकारकप्रतीतौ जायमानायामपि पश्चात्तत्त्वज्ञानेन तस्यां बाधितायामपि शुक्तिकाज्ञानकालेऽपि रजतज्ञानं तिष्ठति। यथा निद्राभङ्गादनन्तरमपि स्वापविषयानुभवोऽनुवृत्तो भवति

तथैव। ततश्च ज्ञानद्वयस्योत्तरकालेऽपि अनुवर्तनात् अद्वैतप्रतीतिः क्वापि न स्यात्। तिमिरादिदोषवशाद्यदिदं शुभ्रेऽपि शङ्खे पीतत्वधीः जायते "पीतः शङ्खः" इति। तत्र च तिमिरदोषोऽपि भ्रान्त इति अद्वैतिभिरपि नाङ्गीक्रियते। एवं न मायाकार्यमपि तु जागरितवत् स्वापसुषुप्तिदशयामपि सृष्टिरीश्वरस्य सत्यसङ्कल्पशक्तिबलादेव इत्यङ्गीक्रियताम्। तदुक्तं सर्वसम्वादिनीग्रन्थे – "स हि कर्ता। तस्य सत्यसङ्कल्पस्य आश्चर्यशक्तेः तादृशं कर्तृत्वं सम्भवतीत्यर्थः" इति।

"य एष सुप्तेषु जागर्त्ति कामं कामं पुरुषो निर्म्मिमाणः। तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते। तस्मिल्लौँकाः श्रिताः। सर्व्वे तदु नान्येति कश्चन"(कठोपनिषदि २/५८) इति च। सूत्रकारोऽपि "मायामात्रन्तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्" (ब्रह्मसूत्रे ३/२/३) इत्यादिना जीवस्य कार्त्स्न्येनानभिव्यक्तस्वरूपत्वादीश्वरस्यैव सत्यसङ्कल्पशक्तिविलासमात्रमिदं स्वाप्निकवस्तु ज्ञातमिति व्याचष्टे' 'तस्मिन् लोकाः' इत्यादिश्रुतेः" इति।

परिणामवादप्रतिष्ठा- तत्त्वतोऽन्यथाप्रथा परिणामः इति परिणामलक्षणम्। यथा दुग्धं बाह्यसाधनान्तरमनपेक्ष्य एव दधि सम्पद्यते। यथा वा जलं बाह्यसाधनान्तरनिरपेक्षतया हिमानी भवति, तद्वत् एकमेवाद्वितीयं ब्रह्म विचित्रशक्तिमत् साधनान्तरनैरपेक्ष्येण जीवजगदादिरूपेण विपरिणमत इति जगत् ब्रह्मणः परिणाम एव, न तु विवर्त इति रहस्यम्।

न चेदं निष्प्रमाणमिति मन्तव्यम्, श्रुतेरेव मानत्वात्। तथाच सम्वादिनीग्रन्थे प्रतिपादितम् – "उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि" (ब्रह्मसूत्रे २/१/२४) इति। "देवादिवदपि लोके" (ब्रह्मसूत्रे २/१/२५) इत्यादिषु सूत्रेषु तन्मतव्याख्यानेऽपि स एव हि दृश्यते। पुनश्च तदनन्तरमेव "कृत्स्नप्रसक्तिर्निरवयवत्वशब्दप्रकोपो वा" (ब्रहसूत्रे २/१/२६) इत्यनेन स्थूलावर्त्तमेव परिणामं चालयित्वा "श्रुतेस्तु शब्दमूलत्वत्" (ब्रह्मसूत्रे २/१/२७) इत्यनेन स्थापयति " इति।

ननु ब्रह्मणः निरवयवत्वात् विवर्तवाद एव रम्यः, न तु परिणामवादः। तथात्वे तु मूले एव कुठार इति चेन्न। श्रुतौ तस्य सावयवत्वेनापि आम्नातत्वात्। तथाहि यथा "निष्कलं निष्क्रियं शान्तम्" (श्वेताश्वेतरोपनिषदि६/१२) निरवयवत्वविषयिणी श्रुतिः दृश्यते, तद्वत् "तदेतद्ब्रह्म चतुष्पादष्टादशफलं षोडशकलम्" (छान्दोग्योपनिषदि १३/१८/२) इत्यादि च सावयवत्वप्रतिपादनी श्रुतिः समासाद्यते।

ननु सावयवत्वे च सावयवत्वस्य अनित्यत्वव्याप्यत्वेन ब्रह्मणः अनित्यतापत्तिः स्यादिति प्रथमः दोषः। सावयवत्वे च निरवयवत्वप्रतिपादकानां श्रुतीनां व्याकोपप्रसङ्ग इति द्वितीयः दोषः। दुग्धस्य दधिनि स्वस्वरूपच्युतिर्दृश्यते , तथा ब्रह्मणः जगद्विकारे तस्य सविकारत्वप्रसङ्ग इति तृतीयः दोष इति दोषगणग्रासाद्विवर्तवाद एव रम्यताम् इति चेन्न। अत्रोच्यते नास्माकं पक्षे एकोऽपि दोषाय। एते च दोषा विषयान्तरे पदार्थान्तरे स्युश्चेत् स्युः। किन्तु ब्रह्मणि नैते दोषाः। यथाहि स्रगादिकं कामिनीनामेव कामोद्वेगकरं भवति, न तु निर्विकाराणां न्यासिनां धीराणां वा इति तासामेव कामदोषप्रोपोद्वलकमस्तु न तु न्यासिनां चैते दोषाः। एवमेव दुग्धादेर्विकारित्वमापद्यत इत्यापद्यताम्, न तु ब्रह्मणोऽपि।

मायावादविदारणे श्रीजीवगोस्वामिमतवैशिष्ट्यम्

ननु कथमेतत् ? ब्रह्मणश्चास्माभिः सावयवत्वेन निरवयवत्वेनोभयथाऽङ्गीकारात् ब्रह्मणश्चोभयथा स्वीकारे सावयवत्वप्रतिपादकश्रुतिवत् निरवयवत्वप्रतिपादकश्रुतिरपि संगता , अन्यथा श्रुतावेव एवं कथं कथयेत् ? किञ्च सावयवत्वश्रुतीनां सावयवत्वपक्षे एव, निरयवत्वश्रुतीनां निरवयवत्वपक्ष एव स्वीकारेण मुख्यार्थत्वरक्षासम्भवात् जघन्याया लक्षणायाश्चाप्रवृत्तेर्वेदस्य पौरुषेयत्वरक्षाऽपि सम्भवति। एवमेव निर्विकारमपि ब्रह्म जगद्रूपेण परिणमत इति विशेषः। यदि च परिणामे स्वरूपप्रच्युतिरवश्यम्भाविनी स्यात्, तदा साक्षात् "तत्त्वस्यान्यथाभावः परिणामः" इति पठेत्, न तु "तत्त्वतोऽन्यथाभावः" इति। वृक्षतः पतनमित्युक्ते वृक्षस्य पतनं नाशङ्कनीयम् वृक्षस्य इत्युक्ते तु वृक्षस्यापीति इति गम्यते तद्वत् ब्रह्मणश्च तत्त्वस्य न अन्यथाभाव इति आयातमेव। एवं च "अजायमानो बहुधा विजायते" इत्यपि सार्थक्यं याति वचः।

ननु एवम् एतावतां विरुद्धधर्माणां कथंकारमेकस्मिन्नीश्वरे स्वीकारः युक्त इति चेन्न। तदीयाचिन्त्यशक्तिप्रभावात्। तदुक्तं "तस्मादचिन्त्यया शक्त्या निरवयवत्वं सावयवत्वञ्च ब्रह्म तयैव परिणममानमपि निर्विकारमेव तिष्ठतीति श्रौतसिद्धान्तः" इति (सर्वसम्वादिन्याम्)। न च कथं तस्या अचिन्त्यत्वमिति चिन्त्यम्, चिन्ताविषयत्वे अचिन्त्यत्वस्यैवाभावात्। न हि स्वभावः पर्यनुयोज्यार्हः तद्वत् अचिन्त्यः कथमिति न चिन्त्यम्। लोकेऽपि कथञ्चिद् दृष्टान्त एवम्विषयकोऽस्ति एव। तथाहि मणिमन्त्रमहौषधीनां सामर्थ्यं तर्कालभ्यम् किन्तु शास्त्रैकगम्यम्। तदुक्तं – "दृश्यते चापि मणिमन्त्रमहौषधिप्रभृतीनां तर्कालभ्यं शास्त्रैकगम्यमचिन्त्यशक्तित्वम्" इति। परमात्मसन्दर्भेऽपि एवमुक्तम्। यथा वा लोके चिन्तामणिः स्वतः अविकृतः सन्नेव नानाद्रव्याणि प्रसूत इति तद्वत्। तदुक्तं – "प्रसिद्धिश्च लोकशास्त्रयोश्चिन्तामणिः स्वयमविकृत एव नानाद्रव्याणि प्रसूत" इति। ततश्च "दृश्यते चापि मणिमन्त्रमहौषधिप्रभृतीनां तर्कालभ्यं शस्त्रैकगम्यमचिन्त्यशक्तिकत्वम्" इति वचसा सर्वसम्वादिनीग्रन्थेन "तर्कालभ्यत्वे सति शास्त्रमात्रैकगम्यत्वमचिन्त्यत्वम्" इति अचिन्त्यलक्षणं शक्यवचम्।

न केवलमेतदेव, अचिन्त्यशक्तिकत्वं ब्रह्मणः श्रुतिन्यायप्रस्थानसिद्धमपि। तथाच ब्रह्मसूत्रम् – "आत्मनि चैवं विचित्राश्च" (ब्रह्मसूत्रे २/१/२८) एतत्सूत्रतात्पर्यनिर्णये श्रीमाध्वाचार्यैराहतम् – "विचित्रशक्तिः पुरुषः पुराणो न चान्येषां शक्तयस्तादृशाः स्युः एको वशी सर्वभूतान्तरात्मा सर्वान् देवानेक एवानुशिष्टः" (श्वेताश्वेतरोपनिषदि) इति।

ननु ब्रह्मणः मायाकार्यवत् जगतदस्तु "इन्द्रो मायाभिः पुरुरूप ईयते" (बृहदारण्यकोपनिषदि२/५/१९) इति चेन्न। तत्रत्यमायाशब्दस्य शक्तिमात्रवाच्यत्वात्। ततश्च श्रीजीवगोस्वामिसर्वस्वमेतेदेव अचिन्त्यशक्तिकल्पनाद्वारकपरिणामवादस्थापने।

किञ्च न्यायादिदर्शने प्रत्यक्षादीनामपि यथा प्रामाण्यमङ्गीकृतं तथा आगमस्यापि। किन्तु तत्र प्रमाणशक्तेस्तारतम्यम् उत्कर्षापकर्षरूपं न तादृशं स्वीकृतम् तत्त्वनिर्णये। अत्र तु आगमस्यैव बलीयस्त्वमङ्गीकृतमिति गोस्वामिवैशिष्ट्यम्। तदुक्तं सर्वसम्वादिनीग्रन्थे – "तुशब्देन पर्वपक्षं परिहरति। न खल्वस्मत्पक्षे कश्चिद्दोषः। श्रुतिसिद्धान्तिनो हि वयम्। श्रुतिश्च स्वशब्दैरेव यदुच्यते, तदेव मूलत्वेन वहति न तु तर्केण यत् सेत्स्यति अपौरुषेत्त्वेन स्वतः प्रामाण्यात्। तथाच पौराणिकाः पठन्ति – अचिन्त्याः खलु ये भावा

न तांस्तर्केण योजयेत् प्रकृतिभ्य: परं यच्च तदचिन्त्यस्य लक्षणम् ” इति। श्रुतिश्च – “पराञ्चि खानि व्यतृणत् स्वयम्भूस्तस्मात् पराङ्गश्यति नान्तरात्मन्” (कठोपनिषदि २/१/१) न चक्षुर्न श्रोत्रं न तर्को न स्मृतिर्न वेदो ह्येवैनं वेदयति” इति------ इदं तत्त्वसन्दर्भे च विस्तारितमस्ति’’ इति (सर्वसम्वादिन्याम् आहतम्)। ततश्चापि भक्तिलुत्वं प्रतिपद्यते गोस्वामिन एतत्तात्पर्यात्।

तृतीयत: - कथमेवं परिणामवादस्य प्रतिपादनम्? विवर्तवादस्यैव प्रतिपादने का हानिरिति तेषामपि मतस्य श्रुतित: पर्यवसानसम्भवात् इति चेन्न। विवर्तवादपक्षे “अहमेव ब्रह्म” इति धीप्रसङ्गात् भक्तिहानात्। भक्तेरेवात्र पुरुषार्थत्वात्। ततश्चोक्तम् सर्वसम्वादिनीग्रन्थे – “न च परिणामप्रतिपादने फलं नास्तीति वाच्यम्। परमात्मनस्ताद्दशमहिमज्ञानोत्थभक्त्या एव परमपुरुषार्थतासम्प्रतिपत्ते: “यं वै देवा नमन्ति मुमुक्षवो ब्रह्मवादिनश्च” (नृसिंह प: भा: २/४) इत्यादौ” इति।

“वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्” (छान्दग्योपनिषदि ६/१/४) इति श्रुते: परिणमवादे एव तात्पर्यम्। “विकारो नामधेयम् विकार एव” नामैव नामधेयं स्वार्थे धेयट्। स च घटादिविकारो मृत्तिकैव। मृत्तिकादिकमेव दण्डादिना निमित्तेनाविर्भूताकारविशेषं घटादिव्यवहारमापद्यते इति ततो न पृथगित्यर्थ इत्येव सत्यमिति। न तु शुक्तिरजतादिवद्विवर्त्त:” इति।

ततश्च रामकृष्णदेवैरभ्यधायि- “भक्ता: शर्करां प्रीणयति केवलम्, न तु शर्करात्वमपि प्रतिपत्तुमिच्छन्ति” इति। ततश्च भक्तिमिच्छता गोस्वामिना एव परिणामवादप्रतिपादनव्याजेन खलु भक्तिरेव गरीयसीति दर्शितम्। न च तत्रापि श्रीप्रभृतिमतेऽपि तथेति क्वेतो वैशिष्ट्यमिति वाच्यम् अत्र अचिन्त्यभेदाभेदवादे जगत्कारणतादेरचिन्त्यत्वघटितत्वादेव, अचिन्त्यत्वस्य च भक्तिप्रोपोद्बलकत्वादेव भक्तितत्त्वं समुचितसुलभं सम्पद्यते श्रीजीवगोस्वामिमत एवेति युक्तवैशिष्ट्यं शिष्टशेमुषीनिष्ठं सद्धर्षवर्षं वर्षतादिति शम्।

<u>ग्रन्थसूची</u>

१. *कथामृतम्*, मुमुक्षानन्दमहाभागै: सम्पादितं कलिकातास्थेन उद्बोधनकार्यालयेन २०११ इतीशवीयवर्षे प्रकाशितम्।

Ambiguity is an integral part of any natural language. When a language is used for communication, a speaker always encounters a tension between precision and brevity. The precision in linguistic expressions bring in clarity. But the natural tendency of a human being is to go for brevity. Brevity leads to overloading at the lexical level as well as at structural level. In the process of interpretation, a reader or a listener uses various clues both linguistic as well as extra-linguistic to decipher the ambiguities.

Aim of this research is to identify various sources of the disambiguation at the structural level. In particular we focus on the disambiguation of the semantic relations marked by the dative case suffix and the disambiguation of the meaning of verbs. The language we focus on is Sanskrit. Pāṇini has given an almost full-fledged grammar for Sanskrit. We take advantage of this and look for the clues for disambiguation in the grammar itself.

In the following section we describe the treatment we followed for structural level disambiguation with focus on the dative case suffix.

2. Structural level Disambiguation

Sanskrit being a free word order language, the semantic relations between the words are marked through the nominal and verbal suffixes. Very rarely the information for disambiguation is in the position. The semantic relations used in the Indian theories of verbal cognition are compiled and classified by K.V. Ramakrishnamacharyulu(2009) from the computational point of view. He had presented around 100 such relations. It was found that this repository consists of fine grained relations. Kulkarni(2013) identified a subset of this fine grained relations that are suitable from computational point of view. This subset contained around 30 relations. Most of these relations are marked by the nominal and verbal suffixes. Since the nominal suffixes are only eight in number and the relations expressed by them are more than eight, there are one-many mappings. One suffix represents more than one relations. In this paper we discuss the dative case suffix, and the clues from the grammar and ontology for the disambiguation of this suffix.

---

[1] Research Scholar, Department of Sanskrit Studies, University of Hyderabad. Telengana.

2.1 Dative Case Marker

The dative case in Sanskrit is used to mark the *kāraka* relation – *Sampradānam*(beneficiary) predominantly. In addition it also marks the non *kāraka* relations of *prayojana* (purpose) and *tādarthya*(being a thing for the sake of that). In some rare cases we also find it being used to mark the relations of *kartā*(agent), *karma*(goal), *karaṇa*(instrument) and *hetu*(reason).

2.1.1 *Sampradānam*(beneficiary)

Pāṇini in his grammar of Sanskrit–*Aṣṭādhyāyī* has stated ten *sūtras* that provide the semantics of *sampradānam* followed by some exceptional case which are extensions of the semantic definition of the *sampradāna kāraka*. The first *sūtra* is:

***Karmaṇā yamabhipraiti sa sampradānam* 1.4.32**

[The item which one has in view through the karman is called *sampradāna* when it becomes instrumental in bringing about an action.] [2]

Here is an example:

Skt: Rāmaḥ brāhmaṇāya dhanaṃ dadāti.

Gloss: Rama{m, sg, nom} Brahmin{m, sg, dat} money{n, sg, acc} give{pr, sg, 3p}

Eng: Rama gives brahmin money.

Pāṇini further lists several exceptional cases where a verb assigns a dative case suffix to a noun it governs, however it is not obvious that the relation is that of beneficiary. For example; consider the Pāṇini's *sūtra-*

***Rucyarthānāṃ prīyamāṇaḥ* 1.4.33**

[With (verbal base) having the meaning of *ruc* - "to please" the one who is being pleased is called *Sampradāna*, when he becomes instrumental in bringing about the action.]

The example sentence is;

Skt: Devadattāya modakaḥ rocate.(1)

Gloss: Devadatt{m, sg, nom} modaka{m, sg, nom} please{p, sg, 3p}

Eng: Modaka pleases Devadatta.

In *sūtra* from 1.4.34 till 1.4.39, Pāṇini covers few more special case of verbs that assign dative case to the nouns with a specific semantic condition, and he terms all such relations as *Sampradānam*. Thus, Pāṇini provides either a list of all the verbs which assign dative case to its noun is the sense of beneficiary or specifies the

---

[2]The English translations are borrowed from The *Aṣṭādhyāyī Of Pāṇini with Translation and Explanatory Notes*, S D Joshi and J.A.F. Roodbergen., Sahitya Akadamy, 1998 -Vol. 4,7

meaning of the verbs (leaving the discretion of inclusion of a verb into this list to the speaker) that assign dative case to the noun in the given semantic sense.

2.1.2 *Prayojana* (purpose)

Barring these verbs, in all other cases the relation is that of *prayojana*(purpose). For example;

Skt: randhanāya sthālī asti(2)
Gloss: cooking{n, sg, dat} pot{f, sg, nom} be{p, sg, 3p}
Eng: The pot is for cooking.

Here is another example.

Skt: pākāya vrajati. (3)
Gloss: cooking{m, sg, abl} go_out{pr, sg, 3p}
Eng: (He) goes out in order to cook.

2.1.3 *Tādarthya* (Thing for the sake of that)

The third use of dative case suffix is to mark a relation of a noun with another noun when the first one is for the sake of the second one. The stock example of this relation is

Skt: yūpāya dāruḥ asti.(4)
Gloss: sacrificial post{m, sg, dat} wood{m, sg, nom} be{pr, sg, 3p}
Eng: The wood is for the sacrificial post.

Here the relation of *yūpa* is with *dāru*. But in this case also, there is an underlying verb viz for the construction (of a sacrificial post), and then with this verb, *yūpāya* becomes a purpose.[3] Therefore, in such cases also we mark the relation of *yūpāya* with the finite verb(*asti*) as a prayojana, and do not mark it as a relation between *yūpa* and *dāru*, as the tradition does. We have taken this decision for the following reasons.

1. As shown above, with every relation of *tādarthya*, there is an underlying action associated with, which acts as a purpose(*Proyojana*) for the main action.
2. Secondly, from the computational point of view, this brings in coarseness in the analysis resulting in the better performance.

There is however one more exceptional case that is the use of dative case with the motion verbs, as in *sūtra*:-

***Gatyarthakarmaṇi dvitīyacaturthyau ceṣṭāyām anadhvan*i -2.3.12**

[3] vā. Tādarthye caturthī vācyā - *siddhāntakaumudī*, vol-I.

[The second or the fourth case endings are added after a *prātipadika* in the sense of *karman* "(direct) object" of verbs of going, provided that movement actually occurs, except the object is the word adhvan "road".]
For example:

Skt: Saḥ grāmāya vrajati.(5)
Gloss: He{m, sg, nom} Village{m, sg, dat} proceed{pr, sg, 3p}
Eng: He proceeds to the village.

In this case there is a condition that the action should be physical and not mental. Thus the following sentence is ungrammatical.

Skt: manasā saḥ pāṭaliputrāya gacchati(6)
Gloss: Mind{n, sg, inst} He{m, sg, nom} Pāṭaliputra{m, sg, dat} go{pr, sg, 3p}
Eng: He goes to Pāṭaliputra in his thoughts.

2.1.4 Implementation

With the availability of Pāṇini's *sūtra*s which provide a list of verbs or the meanings of the verbs that have an expectancy of *sampradāna*, we get an almost complete list of all the verbs that have a *sampradāna* expectancy. If a verb does not belong to this list, then it does not have any expectancy for a *sampradāna*, and safely we can say that any word in the dative case represents the *prayojana*. So the only challenge is with the verbs having an expectancy for *sampradāna*. In such cases we will have to decide whether the word in dative case is a *prayojana* or a *sampradāna* with respect to the given verb. With the above condition that a *kāraka* should necessarily be a *dravya*, in sentence (7), one can correctly assign a relation of *prayojana* to the dative word *paṭhanāya*.

Skt: rāmaḥ paṭhanāya pustakaṃ dadāti. (7)
Gloss: Rama{m, sg, nom} study{n, sg, dat} book{n, sg, acc} give{ pr, sg, 3p}
Eng: Rama gives a book for study.

Of course this condition is just a necessary and not a sufficient one. For example, consider a sentence

Skt: rāmaḥ pustakāya dhanaṃ dadāti. (8)
Gloss: Rama{m, sg, nom} Book{n, sg, dat} money{n, sg, acc} give{ pr, sg, 3p}
Eng: Rama gives money for book.

Here *pustaka* is a matter(*dravya*) and hence it will be marked as a *sampradāna*. But we know that in this sentence *pustaka* is not a beneficiary. A

beneficiary should be an object that has an ability to receive. The living beings have an ability to receive. But imposing this restriction can handle only sentences with *abhidhārtha*. It is possible that a word is used in a metaphoric sense as in-

Skt: Rāmaḥ pāṭhaśālāyai dhanaṁ dadāti. (9)
Gloss: Rama{m, sg, nom} school{n, sg, dat} money{n, sg, acc} give{ pr, sg, 3p}
Eng: Rama gives money to a school.

In this sentence, the noun in dative case (*pāṭhaśālāyai)* is used in the sense of an institution and not in the sense of a building. Though an institution is not a living body, it still shares some properties of a living body such as an institution grows. Until a good model for *lakṣaṇā* is developed, we decided to keep the condition of mutual congruity as wide as possible so that the recall is closer to 100%. Thus, instead of allowing only living beings to be candidates for *sampradāna* we allow any *dravya* or a *guṇavacana* to be a possible *sampradāna*.

Sentence (8) was an example of ellipsis. The complete sentence without ellipsis would be something like

Skt: rāmaḥ mohanāya pustakāya dhanaṃ dadāti. (10)
Gloss: Rama{m, sg, nom} Mohana{m, sg, dat} book{n, sg, dat} money{n, sg, acc} give{ pr, sg, 3p}
Eng: Rama gives money to Mohana for book.

Now the parser with an extra condition that if there are two *dravyas* with dative case then the one which refers to a living being is preferred to be a *sampradāna*, would yield a correct result. The flowchart for deciphering the dative case is given below.



Figure no. 1 : Algorithm for Dative case suffix.

3. Conclusion

In this paper we have discussed the problems in disambiguation of dative case suffix. There is always a trade-off between precision and recall. Since our aim is to provide complete access to the original text and not merely a translation system, recall is more important for us. This implies, we need to consider both the primary and the secondary meanings of the words for checking the meaning congruity for establishing the relations. The *mīmāṁsā* texts very clearly advocate the use of primary meaning first, and only in the absence of any appropriate primary meaning, they advocate the use of secondary meaning. However, since the task of framing rules for meaning congruity is a gigantic task, and our aim is to increase the recall, we decided to use *yogyatā* as an absence of non-congruity. This reduces the precision, but helps

in using some simple ontological properties to rule out the non-players. With the help of only two classes viz *dravya* and *guṇa*, and occasionally words denoting *śabda*, and animity, we could get satisfactory results.

We are aware of the fact that the sample on which the parser was tested is very small, and belongs to a specific domain. In order to test it on better corpus, we still do not have annotated corpus of large size.Improving the performance of this parser would help in its use for building a tree bank for Sanskrit semi-automatically, at the same time making it useful for those who would like to access the original text with the help of these tools.

References

Vaman Sivaram Apte. *Sanskrit-Hindi Kosha*. Motilal Banarasidas Varanasi, 2012.

Akshar Bharati and Amba Kulkarni. Information coding in a language: Some insights from paninian grammar. Second International Symposium on Sanskrit Computational Linguistics, 15th - 17th May 2008, Brown University, USA, 2008.

Nagesh Bhatta. *Laghuśabdenduśekharaḥ*. Chowkhamba Sanskrit Sanshthan, Varanasi, 1987.

Nagesh Bhatta. *Paramalaghumañjūṣā*. Chowkhamba Surabharati prakashan, Varanasi, 2006.

K A Subramania Iyer. Bhartṛhari: *A Study of Vākyapadīya in the light of Ancient commentaries*. Deccan College, Poona, 1969.

K A Subramania Iyer. *The Vākyapadīya of Bhartṛhari*. Deccan College, Poona, 1971.

Jinendrabuddhi. *Nyāsa*. Sanskrit Parishat, Osmania University, Hyderabad, 1981.

S D Joshi and J.A.F. Roodbergen. *Patañjali's Vyākaraṇa Mahābhāṣya Kārakāhnikam* (P 1.4.23– 1.4.55). Center of Advanced Study in Sanskrit, Pune, 1975.

S D Joshi and J.A.F. Roodbergen. *The Aṣṭādhyāyī Of Pāṇini with Translation and Explanatory Notes*. volume 7. Sahitya Akadamy, Rabindra Bavan, Ferozshah Road, New Delhi 01. 1998.

András Kornai. *Semantics*. Springer, 2020.

Daniel Jurafsky & James H. Martin. *Speech and Language Processing: An introduction to natural language processing, computational linguistics, and speech recognition*. 2007.

Harekanta Mishra, editor. *Bṛhaddhātukusumākaraḥ*. Chowkhamba Sanskrit Pratishthan, New Delhi, 2016.

M. Monier-Willaiams. *Sanskrit-English Dictionary*. Indica Books, Godowlia, Varanasi, 2008.
Gopal Dutt Pande. *Vaiyākaraṇa-Siddhāntakaumudī of Bhattojidikshita.* Chowkhamba Surabharati Prakashan, Varanasi, 2012, Reprint Edition.
Patanjali. *Pāṇīnīyavyākaraṇamahābhaṣyam*. Chowkhamba Sanskrit Pratishthan, New Delhi, 1987.
K Kunjunni Raja. *Indian Theories of Meaning*. Adayar Library and Research Center, Madras, 1963.
Vijaypal Vidhyavaridhi. *Kāśikā*. Ramlal Kapur Trast, Sonipat, Hariyana. 1969.

गदाधरदिशा चतुर्दशलक्षण्याः प्रथमस्वलक्षणस्थाभावघटकतयावत्पदप्रयोजनविचारः

ड. सन्तु-सिंहः[1]

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः।।

उपोद्घातः -

चतुर्विधेषु नैयायिकसम्मतप्रमाणेष्वन्यतममनुमानम्। प्राचां नैयायिकानां नये परामर्शस्य नव्यानां च नये व्याप्तिस्मृतेरेव अनुमानप्रमाणत्वम्। यद्वा भवतूभयत्रैव व्याप्तेरुपयोगित्वं सर्वैः समस्वरेण स्वीकृतम्। तदर्थमेव नव्यनैयायिकैर्गङ्गेशैर्महताडम्बरेण व्याप्तिस्वरूपं प्रतिपादितम्। तत्रोपाध्यायैः पूर्वपक्षिमतमुपस्थाप्य निराकृत्य च स्वकीयं सिद्धान्तलक्षणं लक्षितम्। तेषु व्यधिकरणधर्मावच्छिन्नाभावघटितव्याप्तिलक्षणं कुर्वतां मतमपि खण्डितमुपाध्यायैः। तथाहि प्रसिद्धानां साध्याभाववदवृत्तित्वादीनां पञ्चनां लक्षणानां **इदं ज्ञेयं वाच्यत्वादि**त्यादौ साध्याभावस्य वाच्यत्वाभावस्याप्रसिद्ध्या सर्वत्र केवलान्वयिन्यसङ्गतेर्लक्षणानामव्याप्त्यापत्तौ सत्यां कैश्चिद् व्यधिकरणधर्मावच्छिन्न-प्रतियोगिताकाभावं लक्षणघटकमादाय लक्षणानां सङ्गतिर्दर्श्यते। तेषां च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावमङ्गीकुर्वतां मतं तिरस्कर्तुमुपाध्यायैरुक्तम् – **प्रतियोग्यवृत्तिश्च धर्मो न प्रतियोगितावच्छेदकः तद्विशिष्टज्ञानस्याभावधीहेतुत्वात्**[2] इति। ननु अव्यभिचरितत्वरूपसाध्याभाववदवृत्तित्वादिलक्षणेषु साध्याभावपदेन साध्यतावच्छेदकावच्छिन्न-प्रतियोगिताकाभावग्रहणनियमात्तेनैव व्यधिकरणधर्मावच्छिन्नाभावस्य लक्षणघटकत्ववारणेन तादृशाभावनिवारणसम्भवात् स्वातन्त्र्येण तन्मतखण्डनप्रयासो निष्फल इति शङ्कायामुच्यते यन्न व्यभिचारितत्वम् अव्यभिचरितत्वम् इति योगे अङ्गीकृते एव व्याप्तेर्व्यभिचाराभावरूपत्वेन यद्यपि व्याप्तिलक्षणे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभावप्रवेशान्न व्यधिकरणधर्मावच्छिन्नाभावस्य न लक्षणघटकत्वं तथापि पारिभाषिकाव्यभिचरितत्वाङ्गीकारे साध्यतावच्छेदकावच्छिन्न-प्रतियोगिताकसाध्याभावाप्रवेशेन व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकसाध्याभावस्य लक्षणघटकत्वात् तेन केवलान्वयिनि साध्याभावाप्रसिद्धिनिबन्धाव्याप्तिवारणसम्भवेन व्यधिकरणधर्मावच्छिन्न-प्रतियोगिताकाभावः प्रसिद्ध एव। तादृशव्यधिकरणधर्मावच्छिन्न-प्रतियोगिताकाभावनिराकरणायैवोपाध्यायानां प्रवृत्तिरिति मन्वानो दीधितिकारः तादृशपारिभाषिकाव्यभिचरितत्वस्वरूपं प्रतिपिपादयिषुराह – **ननु पारिभाषिकमेवाव्यभिचरितत्वम्। तथाहि**

---

[1] विभागाध्यक्षः सहकारी अध्यापकश्च, संस्कृतविभागः, बाँकुड़ाविश्वविद्यालयः, पश्चिमवङ्गः।

[2] *तत्त्वचिन्तामणिः* (अनुमानखण्डः) (कामाख्यानाखसम्पादितः) पृष्ठाङ्कः - 54

यत्समानाधिकरणाः साध्यतावच्छेदकावच्छिन्न-साध्यव्यापकतावच्छेदकप्रतियोगिताका यावन्तः अभावाः प्रतियोगिसमानाधिकरणास्तत्त्वम्।[3] इति। अत्र दीधितिकृता लक्षणमिदमुपस्थाप्य स्वेनैव लक्षणस्थपदानां व्यावृत्तिरपि प्रादर्शि। तन्मार्गमनुसृत्य तर्कालङ्कारैर्भट्टैश्च सयुक्ति दीधितिः व्याख्याता। तत्र लक्षणस्थयावत्पदप्रयोजननिरूपणे अत एवेत्यादिदीधितिग्रन्थमुपजीव्य तर्कारलङ्कारभट्टयोर्मतवैमत्यमपि सुलभम्। तत्सर्वं स्वज्ञानतननार्थं यथाग्रन्थमुपस्थाप्यते विदुषां पुरः।

<u>**लक्षणसमन्वयः -**</u>

यत्समानाधिकरणाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका यावन्तोऽभावाः प्रतियोगिसमानाधिकणास्तत्त्वम् इति लक्षणे यत्पदं यद्धर्मावच्छिन्नपरं तथा तत्-पदं तद्धर्मावच्छिन्नपरं बोध्यम्। तेन यत्समानाधिकरणा हेतुसमानाधिकरणा हेत्वधिकरणवृत्तय इति यावत्। साध्यतावच्छेदकावच्छिन्न-व्यापकतावच्छेदकप्रतियोगिताकाः साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठाभाव-प्रतियोगितानवच्छेदकप्रतियोगिताका इति यावत्। प्रतियोगिसमानाधिकरणाः प्रतियोग्यधिकरणवृत्तय इति। लक्षणसमन्वयस्त्वित्थं बोध्यम् – **वह्निमान् धूमात्** इत्यत्र हेतुसमानाधिकरणाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका यावन्तः अभावाः – घटत्वेन वह्न्यभावीयप्रतियोगितावान् नास्ति, पटत्वेन वह्न्यभावीयप्रतियोगितावान् नास्ति इत्यादयः। ननु कथं घटत्वेन वह्न्यभावीयप्रतियोगितावान् नास्ति इत्येतेषां तादृशाभावत्वमिति चेदुच्यते, साध्यतावच्छेदकावच्छिन्न-साध्यवन्निष्ठाभावः वह्नित्वावच्छिन्नवह्निमत्पर्वतादिनिष्ठाभावः घटो नास्ति, पटो नास्ति इत्यादिः, न तु वह्न्यभावीयप्रतियोगितावान् नास्ति इत्यभावः। तादृशघटपटाद्यभावीय-प्रतियोगितावच्छेदकानि घटत्वपटत्वादीनितथा तादृशाभावीयप्रतियोगितानवच्छेदिका वह्न्यभावीयप्रतियोगिता। तथा च साध्यतावच्छेदकावच्छिन्न-साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकप्रतियोगाका यावन्तः अभावाः यथा वह्निसामान्याभावः तथा घटत्वेन वह्न्यभावीयप्रतियोगितावान् नास्ति, पटत्वेन वह्न्यभावीयप्रतियोगितावान् नास्ति इत्यादयः व्यधिकरण-धर्मावच्छिन्नप्रतियोगिताका अभावा अपि। परं हेतुसमानाधिकरणाः साध्यतावच्छेदकावच्छिन्न-व्यापकतावच्छेदकप्रतियोगिताका यावन्तः अभावा हि प्रकृते घटत्वेन वह्न्यभावीयप्रतियोगितावान् नास्ति, पटत्वेन वह्न्यभावीयप्रतियोगितावान् नास्ति इत्यादयः व्यधिकरणधर्मावच्छिन्नप्रतियोगिताका अभावाः, न तु वह्निर्नास्ति इति वह्निसामान्याभावः। एतादृशानामभावानां व्यधिकरणधर्मावच्छिन्नानां केवलान्वयित्वेन पर्वतादिहेत्वन्तर्भावेण प्रतियोगि-समानाधिकरण्यसम्भवाद् यत्पदोपात्ते धूमत्वावच्छिन्ने लक्षणसमन्वयः।

तथा च **धूमवान् वह्नेः** इत्यत्रासद्धेतुस्थले लक्षणासमन्वयान्नातिव्याप्तिः। धूमवान् वह्नेरित्यत्र वह्निसमानाधिकरणाः वह्न्यधिकरणायोगोलकवृत्तयो धूमत्वावच्छिन्न-व्यापकतावच्छेदकप्रतियोगिताका

---

[3]. *चतुर्दशलक्षणी* (ताताचार्यसम्पादिता), पृष्ठाङ्कः - 48

गदाधरदिशा चतुर्दशलक्षण्याः प्रथमस्वलक्षणस्थयावत्पदप्रयोजनविचारः

यावन्तः अभावा हि धूमसामान्याभावः, घटत्वेन धूमाभावीयप्रतियोगितावदभावादयश्च। तादृशयावदभावान्तर्गतस्य धूमसामान्याभावस्य हेत्वधिकरणायोगोलकान्तर्भावेण प्रतियोगिसामानाधिकरण्याभावात् नात्र लक्षणसमन्वय इति नातिव्याप्तिः।

<u>लक्षणस्थयावत्पदप्रयोजनविचारे पौर्वापर्यक्रमभङ्गबीजनिरूपणम् -</u>

इत्थं सद्धेतुस्थले असद्धेतुस्थले च लक्षणस्य सङ्गतिं तथासङ्गतिं च प्रदर्श्य लक्षणस्थपदप्रयोजनं निरूपितं गादाधर्याम्। दीधितौ च साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदक-प्रतियोगिताकपदमतिक्रम्योत्तरस्थ**यावत्प**दप्रयोजनविचार उपस्थापितः। गदाधरभट्टैरपि दीधितिमनुसरद्भिः लक्षणस्थपदार्थविचारे पौर्वापर्यक्रमभङ्ग आश्रितः। ननु कथं प्राग्वर्ति साध्यतावच्छेदकावच्छिन्नसाध्यव्यापकतावच्छेदक-प्रतियोगिताकपदमतिक्रम्य यावत्पदप्रयोजनविमर्श उपस्थापित इति शङ्कायां भट्टैरेव समाधिर्गदितः –**यावत्पदासत्त्वे साध्यतावच्छेदकेत्यादिविशेषणस्य व्यावृत्तिर्न सङ्गच्छते। यत्किञ्चिदभावमादायैव लक्षणसमन्वयसम्भवात्। अतश्चरमोक्तस्यापि तत्पदस्य व्यावृत्तिं प्रथमतो दर्शयति – सर्वत्रेति।**[4] इति।

अत्रेदं तत्त्वं यल्लक्षणे यावत्पदाभावे तु साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदक-प्रतियोगिताकपदमेव निष्प्रयोजनम्। तथाहियावत्पदाभावे तथा साध्यतावच्छेदकावच्छिन्न-व्यापकतावच्छेदकप्रतियोगिताक-पदाभावे **यत्समानाधिकरणः अभावः प्रतियोगिसमानाधिकरणस्तत्त्वम्** इति लक्षणं स्यात्। तथा सति **वह्निमान् धूमात्** इत्यत्र धूमसमानाधिकरणस्य घटत्वेन वह्न्यभावीयप्रतियोगितावदभावस्य प्रतियोगिसामानाधिकरण्यसम्भवात् लक्षणसमन्वय इति नाव्याप्तिः। यावत्त्वस्याभावविशेषणत्वे तु **यत्समानाधिकरणा यावन्तः अभावाः प्रतियोगिसमानाधिकरणास्तत्त्वम्** इति लक्षणम्। तथा सति **वह्निमान् धूमात्** इत्यत्र धूमसमानाधिकरणा यावन्तः अभावा नाम गोत्वाभावादयोऽपि, तेषां हेत्वधिकरणपर्वताद्यन्तर्भावेण प्रतियोगिसामानाधिकरण्याभावान्न लक्षणसमन्वय इत्यसम्भवदोषापत्तिर्लक्षणस्य। तद्वारणाय **यत्समानाधिकरणाः साध्यप्रतियोगिका यावन्तः अभावाः प्रतियोगिसमानाधिकरणास्तत्त्वमि**ति वक्तव्यम्। तेन गोत्वाभावस्य न लक्षणघटकत्वं साध्यप्रतियोगिकत्वविरहात्। किञ्च, तथा सति नानाव्यक्तिसाध्यके वह्निमान् धूमात् इत्यादौ महानसीयवह्न्याद्यभावस्य लक्षणघटकत्वेनाव्याप्तिरिति तद्वारणार्थं साध्यतावच्छेदकेत्यादिविशेषणं निवेश्यं लक्षणे। इत्थं लक्षणघटकाभावे यावत्त्वविशेषणविरहात् न लक्षणस्याव्याप्तिर्न वासम्भवः। वस्तुतस्तु यावत्पदाभावे वह्निमान् धूमादित्यत्र हेत्वधिकरणपर्वतनिष्ठं यं कञ्चिदभावं घटत्वेन वह्न्यभावं स्वीकृत्य तस्य हेत्वधिकरणान्तर्भावेण प्रतियोगिसामानाधिकरण्यसत्त्वाल्लक्षणसमन्वय इति नाव्याप्तिः। परं लक्षणे यावत्पदे सति गोत्वाभावस्यापि यावदन्तर्गतत्वात्तस्य प्रतियोगिसामानाधिकरण्यविरहादव्याप्तिरिति तद्वारणार्थं

---

[4]. *चतुर्दशलक्षणी* (ताताचार्यसम्पादिता), पृष्ठाङ्कः - 59

साध्यतावच्छेदकेत्यादिविशेषण-निवेशः सार्थकः। अतो हि दीधिकृता साध्यतावच्छेदकेत्यादेः क्रमप्राप्तस्यापि विशेषणस्य प्रयोजनमनुक्त्वा परवर्तिनो यावत्त्वस्यादौ सार्थक्यं प्रादर्शीति युक्तम्।

<u>लक्षणस्थयावत्पदप्रयोजनविचारः -</u>

मूललक्षणे यावत्पदाभावे तु व्यभिचारिसामान्ये अतिव्याप्तिः। तथाहि धूमवान् वह्नेः इत्यत्र हेतुसमानाधिकरणो वह्निसमानाधिकरणः साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठाभावप्रतियोगितानवच्छेदक-प्रतियोगिताकः अभावः घटत्वेन वाच्यत्वाभावः। साध्यतावच्छेदकधूमत्वावच्छिन्नसाध्यधूमवन्निष्ठः महानसादिनिष्ठः वाच्यत्वाभावीयप्रतियोगितावान् नास्ति इति न, वाच्यत्वाभावीयप्रतियोगितावतः वाच्यत्वस्य सत्त्वात्। तेन वाच्यत्वाभावीयप्रतियोगिता साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठाभावप्रतियोगितानवच्छेदिका। अतः घटत्वेन वाच्यत्वाभावः साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठाभावप्रतियोगितानवच्छेदक-प्रतियोगिताकाभावो लक्षणघटकः। तस्य स्वविशिष्टयावद्धेत्वधिकरणायोगोलकान्तर्भावेण प्रतियोगिसामानाधिकरण्यसत्त्वादतिव्याप्तिः। एतादृशातिव्याप्तिवारणाय लक्षणे यावत्पदोपादानम्। साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिकाभावत्वे यावत्त्वस्य विशेषणत्वे तु लक्षणघटकयावदभावान्तर्गतो धूमसामान्याभावोऽपि। तस्य तु स्वविशिष्टयावद्धेत्वधिकरणायोगोलकान्तर्भावेण प्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिः। तेन लक्षणे यावत्पदप्रयोजनं व्यभिचारसामान्येऽतिव्याप्तिवारणम् इति सिद्धम्। तथा च दीधितिकृन्मतं - **सर्वत्र वाच्यत्वाद्यभावस्य तथात्वाद् यावत्त्वोपादानम्।**[5] इति। गादाधर्याञ्चोक्तम् –**तथा च यावत्पदादाने व्यभिचारमात्रे एवातिव्याप्तिरिति भावः।**[6] इति।

<u>लक्षणे यावत्पदं विनापि रीत्यन्तरेण दोषवारणनिरूपणम् -</u>

ननु धूमवान् वह्नेः इत्यादौ व्यभिचारिणि अतिव्याप्तिवारणार्थं यावत्पदोपादानं निष्फलं यावत्पदाभावेऽपि अभावे साध्यतावच्छेदकावच्छिनव्यापकतावच्छेदकप्रतियोगिताकत्वस्थाने साध्यतावच्छेदक-व्याप्यप्तियोगिताकत्वविशेषणनिवेशेनैव तादृशातिव्याप्तिवारणसम्भवात्। तथाहि **वह्निमान् धूमात्** इत्यत्र धूमसमानाधिकरणस्य वह्नित्वव्याप्यप्रतियोगिताकाभावस्य घटत्वेन वह्न्यभावस्य स्वविशिष्टयावद्धेत्वधिकरण-महानसाद्यन्तर्भावेण प्रतियोगिसामानाधिकरण्यसत्त्वाद्धमरूपहेतौ लक्षणसमन्वयः। न च वह्निमान् इत्यत्र धूमसमानाधिकरणानां साध्यतावच्छेदकव्याप्यप्रतियोगिताकानां वह्नित्वव्याप्यप्रतियोगिताकानां महानसीयवह्न्यभावादीनां स्वविशिष्टयावद्धेत्वधिकरण-पर्वताद्यन्तर्भावेण प्रतियोगिसामानाधिकरण्याभावाद् अव्याप्तिरिति वाच्यम्, लक्षणे यावत्पदाभावात् यं कञ्चिदभावमादाय लक्षणसङ्गतेः।

---

5. *चतुर्दशलक्षणी* (ताताचार्यसम्पादिता), पृष्ठाङ्कः - 59

6. तदेव

गदाधरदिशा चतुर्दशलक्षण्याः प्रथमस्वलक्षणस्थयावत्पदप्रयोजनविचारः

तथा च, **धूमवान् वह्नेः** इत्यत्र वह्निसमानाधिकरणाः साध्यतावच्छेदकव्याप्यप्रतियोगिताकानां धूमत्वव्याप्यप्रतियोगिताकानां घटत्वेन धूमाभावादीनां स्वविशिष्टयावद्धेत्वधिकरणायोगोलकान्तर्भावेण प्रतियोगिसामानाधिकरण्यासत्त्वान्नातिव्याप्तिः। न चात्र पूर्ववद्घटत्वेन वाच्यत्वादीनामभावमादाय लक्षणस्यातिव्याप्तेस्तद्वारणाय यावत्पदमावश्यकमिति वाच्यम्, वाच्यत्वाद्यभावीयप्रतियोगिताया धूमत्वाभाववति वाच्यत्वे सत्त्वाद् धूमत्वव्याप्यप्रतियोगिताकत्वविरहेण वाच्यत्वाद्यभावस्य लक्षणाघटकत्वात्तमादाय अतिव्याप्त्यभावात्। इत्थं यावत्पदाभावेऽपि धूमवान् वह्नेरित्यत्रातिव्याप्त्यभावाल्लक्षणे यावत्पदमनुपादेयमेवेत्याशङ्क्य दीधितिकृता व्यभिचारविशेषे अतिव्याप्तिवारणरूपं प्रयोजनं निरूपितं यावत्पदस्य। तथाहि उक्तं तेन – **अत एव भूतत्वमूर्तत्वोभयवान् मूर्तत्वात् इत्यादौ द्वित्वावच्छिन्नाभावस्य प्रतियोसामानाधिकरण्येऽपि भूतत्वमनोऽन्यत्वाभावस्यातथत्वान्नातिप्रसङ्गः।** इति। दीधितिं व्याख्यातुकामैर्भट्टैरगादि – **ननु यावत्पदानुपादाने साध्यतावच्छेदकावच्छिन्नव्यापकताव्नछेदकप्रतियोगिकत्वं परित्यज्य साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वेनैव अभावो विशेषणीयः। वह्निमान् धूमात् इत्यादौ तत्तद्वह्न्याद्यभावानां साध्यतावच्छेदकव्याप्यप्रतियोगिताकानां यथाविवक्षणीयसामानाधिकरण्यविरहेऽपि घटत्वादिना वह्न्याद्यभावमादायैव लक्षणसङ्गतिः। इत्थञ्च धूमवान् वह्नेः इत्यादौ वाच्यत्वद्यभावमादाय नातिव्याप्तिसम्भवः। तस्य धूमत्वाद्यव्याप्यप्रतियोगिताकत्वेन लक्षणघटकताविरहात्।**[7] इति।

ननु यावत्पदाभावेसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदक-प्रतियोगिताकत्वस्थाने साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वविवक्षणे तु **धूमवान् वह्नेरि**ति व्यभिचारिण्यतिव्याप्त्यभावेऽपि लक्षणस्थस्य यत्समानाधिकरणा इति पदस्य निष्फलत्वापत्तिरिति चेदिष्टापत्तिरिति पूर्वपक्षः। तथाहि मूललक्षणे यत्समानाधिकरणा इति पदाभावे **अयमात्मा ज्ञानादि**त्यादौआत्मत्वावच्छिन्न-प्रतियोगिताकात्मत्वाभावस्यापि लक्षणघटकत्वात्तस्य च प्रतियोगिसामानाधिकरण्याभावादव्याप्तिरिति **यत्समानाधिकरणा** इति पदमुपादेयमिति निरूपितम्। लक्षणे यावत्पदाभावे तु यं कञ्चनाभावं घटत्वेनात्मत्वाभावादिकमादाय तस्य प्रतियोगिसामानाधिकरण्याल्लक्षणसङ्गतेर्नाव्याप्तिरिति तद्वारणार्थं यत्समानाधिकरणा इति पदनिवेशोऽपि व्यर्थः। अतोयावत्पदानिवेशेऽव्याप्तिविरहात्साध्यतावच्छेदक-व्याप्यप्रतियोगिताकः अभावः स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेण प्रतियोगिसमानाधिकरणस्तत्त्वम् इति लघुभूतं लक्षणमेव ग्राह्यम्।

परमेतन्न युक्तं व्यभिचारविशेषे अतिव्याप्तेः। तथाहि साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वस्य अभावविशेषणे स्वीकृते यावत्त्वस्य चानिवेशे **धूमवान् वह्नेः** इत्यत्रातिव्याप्त्यभावेऽपि **भूतत्वमूर्तत्वोभयवान् मूर्तत्वात्** इत्यत्र व्यभिचारिणि हेतावतिव्याप्तिर्ध्रुवा। तथा च,

---

7. *चतुर्दशलक्षणी* (ताताचार्यसम्पादिता), पृष्ठाङ्कः - 63

भूतत्वमूर्तत्वोभयवान् मूर्तत्वात् इत्यसद्धेतुस्थलं भूतत्वमूर्तत्वोभयाभाववति मनसि मूर्तत्वहेतोर्वृत्तेः। अत्र यत्समानाधिकरणस्य साध्यव्याप्यप्रतियोगिताकाभावस्य भूतत्वमूर्तत्वोभयाभावस्य स्वविशिष्टयावद्धेत्वधिकरणान्तर्भाविण मनोऽन्तर्भाविण प्रतियोगिसामानाधिकरण्यसत्त्वादतिव्याप्तिः। न च भूतत्वाभावादेरपि लक्षणघटकत्वात्तेषां च प्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्त्यापत्तिरिति वाच्यं, लक्षणे यावत्त्वस्याभावविशेषणत्वाभावाद्यं कञ्चिदमभावमादायातिव्याप्तिदर्शनसम्भवात्। तथा च, लक्षणे यावत्पदाभावे **भूतत्वमूर्तत्वोभयवान् मूर्तत्वादि**त्यसद्धेतुस्थले अतिव्याप्तिः। तद्वारणार्थं च नूनं लक्षणे यावत्पदमुपादेयम्।

यावत्पदनिवेशे **यत्समानाधिकरणाः साध्यतावच्छेदकव्याप्यप्रतियोगिताका यावन्तः अभावाः प्रतियोगिसमानाधिकरणास्तत्त्वम्** इति लक्षणे स्वीकृते तु **भूतत्वमूर्तत्वोभयवान् मूर्तत्वात्** इत्यत्र नातिव्याप्त्यापत्तिः। तथाहि भूतत्वमूर्तत्वोभयवान् इत्यत्र यत्समानाधिकणस्य साध्यतावच्छेदकव्याप्य-प्रतियोगिताकयावदभावान्तर्गतस्य भूतत्वाभावस्य स्वविशिष्टयावद्धेत्वधिकरणमनोऽन्तर्भाविण प्रतियोगिसामानाधिकरण्याभावात् नातिव्याप्तिः। तथाहि उक्तम् **–यावत्पदसत्त्वे यादृशाभावमादाय अतिव्याप्तिवारणं तादृशाभावं दर्शयति - भूतत्वमनोऽन्यत्वाभावस्येति।**

किञ्च, लक्षणे यावत्पदानिवेशे **यत्समानाधिकरणः साध्यतावच्छेदकव्याप्यप्रतियोगिताकः अभावः प्रतियोगिसमानाधिकरणस्तत्त्वम्** इति लक्षणे स्वीकृते **भूतत्वमूर्तत्वोभयवान् मूर्तत्वात्** इत्यत्रातिव्याप्तिस्तथा यावत्पदनिवेशे **यत्समानाधिकरणाः साध्यतावच्छेदकव्याप्यप्रतियोगिताका यावन्त अभावाः प्रतियोगिसमानाधिकरणास्तत्त्वम्** इति लक्षणे स्वीकृते **वह्निमान् धूमादि**त्यत्राव्याप्तिः। तथाहि **वह्निमान् धूमात्** इत्यत्र यत्समानाधिकरणस्य साध्यतावच्छेदकव्याप्यप्रतियोगिताकयावदन्तर्गतस्य महानसयीवह्न्याद्यभावस्य स्वविशिष्टयावद्धेत्वधिकरणपर्वतान्तर्भाविण प्रतियोगिसामानाधिकरण्याभावाद् अव्याप्तिः। तादृशाव्याप्तिवारणाय लक्षणे साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वस्थाने साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वं निवेश्यम्। तेन **यत्समानाधिकरणाः साध्यतावच्छेदकावच्छिन्नसाध्यव्यापकतावच्छेदकप्रतियोगिताका यावन्तः अभावाः प्रतियोगिसमानाधिकरणास्तत्त्वम्** इति निष्कृष्टं लक्षणमेव स्वीकार्यम्। तथाहि गादाधर्यामुक्तम् - **यावत्पदे दत्ते साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वनिवेशने वह्निमान् धूमात् इत्यादौ तादृशयावदन्तर्गतमहानसीयवह्न्याद्यावमादाय अव्याप्तिः स्यादिति यथोक्तविशेषणस्यैवोपादयेतया तादृशाभावयोरपि लक्षणघटकत्वात् इति भावः।**[8] इति।3

[8] *चतुर्दशलक्षणी* (ताताचार्यसम्पादिता), पृष्ठाङ्कः - 64

गदाधरदिशा चतुर्दशलक्षण्याः प्रथमस्वलक्षणस्थयावत्पदप्रयोजनविचारः

<u>अत एवेत्यादिदीधितौ जगदीशमतम्</u> –

गदाधरभट्टैः **अत एव भूतत्वमूर्तत्वे**त्यादिदीधितिपङ्क्तिः यद्यपि यावत्पदाभावेऽपि साध्यतावच्छेदकावच्छिन्नसाध्यव्यापकतावच्छेदकप्रतियोगिताकाभावस्थाने साध्यतावच्छेदक-व्याप्यप्रतियोगिताकाभावनिवेशेन **धूमवान् वह्नेरि**त्यत्रातिव्याप्तौ निवृत्तावपि **भूतत्वमूर्तत्वोभयवान् मूर्तत्वादि**ति व्यभिचारिविशेषे अतिव्याप्तिरिति तद्वारणफलिकेति व्याख्यातं तथापि जगदीशतर्कालङ्कारैः सैव **अत एव भूतत्वमूर्तत्वे**त्यादिदीधितिरन्यथा व्याख्याता। तथाहि साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदक-प्रतियोगिताकाभावस्थाने साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावस्य निवेशेनैव**धूमवान् वह्ने**रित्यादौ अतिव्याप्तिवारणसम्भवात् लाघवाच्च **यत्समानाधिकरणाः साध्यतावच्छेदकव्यापक-प्रतियोगिताका यावन्तः अभावाः स्वविशिष्टयावद्धेत्वधिकरणान्तर्भाविण प्रतियोगिसमानाधिकरणास्तत्त्वम्** इत्येव लक्षणं स्वीकार्यम्। ननु तथा सति**भूतत्वमूर्तत्वोभयवान् मूर्तत्वादि**त्यत्रातिव्याप्तिः। तथाहिभूतत्वमूर्तत्वोभयवान् मूर्तत्वात् इत्यत्र साध्यतावच्छेदकं भूतत्वमूर्तत्वोभयत्वं, साध्यतावच्छेदकव्यापकप्रतियोगिता भूतत्वमूर्तत्वोभयाभावीयप्रतियोगिता। तादृशप्रतियोगिताका यावन्तः अभावा हि घटत्वेन भूतत्वमूर्तत्वोभयाभावीयप्रतियोगिताकाभावादयो यथा तथा तादृशोभय-सामान्याभावावादयः। तेषां समेषां हि मूर्तत्वहेत्वधिकरणमनोऽन्तर्भाविण हेतुसामानाधिकरण्याल्लक्षणघटकत्वम्। तेषां च समेषां स्वविशिष्टयावद्धेत्वधिकरणान्तर्भाविण प्रतियोगिसामानाधिकरण्यमप्यस्ति। व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकानां घटत्वेन तादृशोभयाभावादीनां केवलान्वयित्वात् स्वविशिष्टयावद्धेत्वधिकरणपृथिव्यप्तेजोवाय्वन्तर्भाविण उभयप्रतियोगिसामानाधिकरण्यं, मनोऽन्तर्भाविण मूर्तत्वरूपप्रतियोगिसामानाधिकरण्यं चास्ति। समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य तादृशोभयाभावस्य तु स्वविशिष्टहेत्वधिकरणं मन एव, तदन्तर्भाविण तस्य मूर्तत्वरूपप्रतियोगिसामानाधिकरण्यमस्तीति लक्षणघटकानां सर्वेषामभावानां स्वविशिष्टयावद्धेत्वधिकणान्तर्भाविण प्रतियोगिसामानाधिकरण्यसत्त्वाद् अतिव्याप्तिः। एवं मूललक्षणे साध्यतावच्छेदकावच्छिन्न-व्यापकतावच्छेदकप्रतियोगिताकाभावस्थाने साध्यतावच्छेदकव्यापकप्रतियोगिताक-अभावनिवेशे भूतत्वमूर्तत्वोभयावान् मूर्तत्वादिति व्यभिचारिण्यतिव्याप्तिरिति तद्वारणार्थं साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावे एव यावत्त्वविशेषणं देयम्, न तु साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावेइति ज्ञापयितुमेव दीधितिकृता अत एव भूतत्वमूर्तत्वोभयवान् मूर्तत्वादित्यादिग्रन्थः अवतारित इति जगदीशतर्कालङ्कारमतम्। तथाहि **भूतत्वमूर्तत्वोभयवान् मूर्तत्वादि**त्यत्र यत्समानाधिकरणा मूर्तत्वाश्रयमनोवृत्तयः, साध्यतावच्छेदकभूतत्वमूर्तत्वोभयत्वावच्छिन्नाधिकरणं पृथिव्यादिचतुष्टयं, तद्वृत्तिर्योऽभावः भूतत्वाभावीयप्रतियोगितावान्नास्तीत्यभावो न, भूतत्वाभावीयप्रतियोगितावतो भूतत्वस्यैव तत्र सत्त्वात्। किञ्च, मनोऽन्यत्वाभावीयप्रतियोगितावान्नास्तीत्यभावोऽपि नायाति तत्र, मनोऽन्यत्वाभावीयप्रतियोगितावतो मनोऽन्यत्वस्यैव तत्र सत्त्वात्। एवं साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वं

भूतत्वाभावीयप्रतियोगितामनोऽन्यत्वाभावीय-प्रतियोगितयोरायातीति तादृशप्रतियोगितानिरूपकयावदभावेषु भूतत्वाभावो मनोऽन्यत्वाभावश्च लक्षणघटकौ। तयोः स्वविशिष्टयावद्धेत्वधिकरणमनोऽन्तर्भावेण नास्ति प्रतियोगिसामानाधिकरण्यमिति न लक्षणस्यातिव्याप्तिः। इत्थं मूललक्षणे साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावस्थाने साध्यतावच्छेदकव्यापक-प्रतियोगिताकाभावनिवेशे भूतत्वमूर्तत्वोभयावान् मूर्तत्वादिति व्यभिचारिण्यतिव्याप्तिरिति तद्वारणार्थं साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदक-प्रतियोगिताकाभावे एव यावत्त्वविशेषणं देयम्, न तु साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावे इति ज्ञापयितुमेव दीधितिकृता अत एव भूतत्वमूर्तत्वोभयवान् मूर्तत्वादित्यादिग्रन्थः अवतारित इति जगदीशतर्कालङ्कारमतम्।

<u>जगदीशमतखण्डनम्</u> –

उक्तप्रकारेण अत एवेत्यादिग्रन्थव्याख्यानं जगदीशमतसम्मतमसङ्गतम्। तथाहि यावत्त्वपदप्रयोजननिरूपणावसरे साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वस्थाने साध्यतावच्छेदक-व्यापकत्वं न निवेश्यमतिव्याप्त्यापत्तेरिति साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वप्रयोजननिरूपणम् असङ्गतं यावत्त्वप्रयोजननिरूपणावसरे तत्प्रयोजनजिज्ञासानुदयात् पश्चात्तत्प्रयोजननिरूपणात् चेति तदनुकूलम् अत एवेत्यादिदीधितिग्रन्थव्याख्यानमप्यसमीचीनमिति भट्टाः।

उपसंहारः -

एवं हि लक्षणे यावत्त्वस्याभावविशेषणत्वाभावेसाध्यतावच्छेदकावच्छिन्न-व्यापकतावच्छेदक-प्रतियोगिताकत्वस्थाने साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वनिवेशेन धूमवान् वह्नेरित्यादौ व्यभिचारसामान्येऽतिव्याप्तिविरहसम्भवेऽपि भूतत्वमूर्तत्वोभयवान् मूर्तत्वादिति व्यभिचारविशेषेऽतिव्याप्तिरिति यावत्पदं लक्षणे नूनमुपादयेमिति तदनुकूलैव अत एवेत्यादिदीधितिरिति भट्टमतमेव युक्तम् इति दिक्।

सहायकग्रन्थाः

चतुर्दशलक्षणी (गादाधरी व्याख्यानत्रयुता) प्रथमभागात्मिका, सन्तानशर्मसम्पादिता, अड्यार् ग्रन्थालयः, अड्यार्, 1942.

चतुर्दशलक्षणी, एन्-एस्-रामानुजताताचार्यसम्पादिता, मोतिलालवनारसीदासः, कोलकाता, 1999.

तत्त्वचिन्तामणिः (अनुमानखण्डः) (कामाख्यानाखसम्पादितः) चौखम्बा संस्कृत प्रतिष्ठान, नवदेहली, 1990.

व्यधिकरणम् (जगदीशतर्कालङ्कारकृतम्) गङ्गाख्यव्याख्योपेतम्, ढुण्ढिराजशास्त्रिसम्पादितम्, चौखम्बा संस्कृत सीरिज आफिस, वाराणसी, 1931.

अजातिवादे बौद्धप्रभावस्तथा दर्शनान्तरसमीक्षा

ड. अभिजित् मण्डलः[1]

तदानीन्तनब्राह्मण्यधर्मस्य प्रतिवादिमूर्तिरूपेण जघन्यात्याचारेण अत्याचारितनिरीहजनेषु शान्तिदूतरूपेण च जनिं लेभे नरावतारो गौतमबुद्धः। बुद्धदेवेन प्रवर्तितः धर्मः बौद्धधर्मः। तस्योपदेशस्य भाषासीत् पाली, प्राकृतं च। अत्र मूलविचार्यविषयस्तु बौद्धप्रभावः। मन्मते तु प्रभावो द्विविधो भवितुमर्हति। प्रथमतः तस्य महामानवस्य जीवनं विलोक्य तादृशजीवनस्य चयनम्, द्वितीयतः तस्य महापुरुषस्य वाण्यनुसारेण जीवनस्य निर्वहनम्। भगवान् बुद्धः महापुरुषो बभूव इत्यत्र नास्ति कस्यचित् सन्देहावकाशः। तस्य च महापुरुषस्य भावधारायाः प्रभावः नितरामेव परिलक्ष्यते तत्परवर्तिसंस्कृतसाहित्ये। अत्र मे प्रधानसहायको ग्रन्थः वरेण्य-बुद्धाचार्य-शान्तिदेवेन प्रणीतः संस्कृतकाव्यग्रन्थः **बोधिचर्यावतारः।** वस्तुतः बुद्धदेवस्य नास्ति स्वकीयः कोऽपि रचितग्रन्थः। यदेव खलु प्राप्यते तत्तु तेषामुपदेशरूमेव। अस्मिन् सम्पूर्णग्रन्थे बुद्धदेवस्य भावधारायाः प्रभावः दृश्यते पदे पदे। तत्रत्य-नवमपरिच्छेदः **प्रज्ञापारमिता,** तत्रैव विद्यते अजातिविषये चर्चा। विषयेऽस्मिन् माध्यमिकबौद्धानां[2] मतं प्रणिधानयोग्यम्।

तत्र बौद्धदर्शने प्राप्यते – "ते च बौद्धाः चतुर्विधया भावनया परमपुरुषार्थं कथयन्ति। ते च माध्यमिक-योगाचार-सौत्रान्तिक-वैभाषिक-संज्ञाभिः प्रसिद्धा बौद्धा यथाक्रमं सर्वशून्यत्व-बाह्यार्थशून्यत्व-बाह्यार्थानुमेयत्व-बाह्यार्थप्रत्यक्षत्वावादानातिष्ठते"[3] इति। अजातिवादो नाम अनुत्पत्तिवादः। अस्य जगतः उत्पत्तिः शून्यतः एवाभवत्। नागार्जुनेन तदीयायां माध्यमिककारिकायां प्रोक्तम् –

"न स्वतो, नापि परतो, न द्वाभ्यां, नाप्यहेतुतः।
उत्पन्ना जातु विद्यन्ते भावाः क्वचन केचन[4]" इति।।

कारिकायाः आशयो हि – जगत्यस्मिन् प्रतीत्यसमुत्पन्नता हेतुप्रत्ययसापेक्षता वेति नियमद्वारा सर्वेषां कार्याणां परिनिष्पत्तिर्जायते इति तु प्रायः सर्वेषामेव दार्शनिकसम्प्रदायानां मतं, परन्तु बौद्धमतावलम्बिनः

---

[1] सहकारी अध्यापकः, संस्कृतविभागः, कोचविहार-पञ्चानन-वर्मा-विश्वविद्यालयः, पश्चिमवङ्गः।

[2] गुरोरुपदेशस्वीकरणाय एते उत्तमाः शिष्याः, गुरुं प्रति किमपि प्रश्नं न कुर्वन्ति स्म ते अतः अधमाः शिष्यास्ते। स्वभावस्य सहावस्थानत्वात् मध्यमा एते। अतः माध्यमिकाः बौद्धाः।
किञ्च, भिन्नमतमपि प्राप्यते – माध्यमिकशास्त्रे उक्तं –
"अस्तीति शाश्वतग्रहो नास्तीत्युच्छेददर्शनम्।
तस्मादस्तित्वनास्तित्वे नाश्रीयेत विचक्षणः।।१५-१०।" इति कारिकायाः चन्द्रकीर्तिना प्रसन्नपदाटीकायामुक्तं – "अस्तीति काश्यप अयमेकोऽन्तः। नास्तीति काश्यप अयमेकोऽन्तः। यदेनयोरन्तयोर्मध्यम्, तद्रूप्यम्, अनिदर्शनम्, अप्रतिष्ठम्, अनाभासम्, अनिकेतम्, अविज्ञप्तिकम् इयमुच्यते काश्यप मध्यमा प्रतिपत्, भूतानां भूतप्रत्यवेक्षा।" इति।

[3] माधवाचार्यकृत-*सर्वदर्शनसंग्रहे बौद्धदर्शन ओ जैनदर्शन* (बङ्गभाषया), सम्पा. सञ्जित् कुमार साधुखाँ, कलिकाता, सदेश, पृष्ठा – ११।

[4] नागार्जुनप्रणीत-*माध्यमिककारिका* – १-१।

माध्यमिकबौद्धाः मतमिदं निराकुर्वन्ति। तेषां मते पदार्थस्य उत्पत्तिध्वंसयोर्मध्ये नास्ति कश्चित् कार्यकारणभावः। न पदार्थस्योत्पत्तिर्भवति न वा ध्वंसः। अयमेवाजातिवादः। मतस्यास्य स्थापनाय बुद्धमतमवलम्ब्य दर्शनान्तरमतस्य खण्डनञ्चकार शान्तिदेवः तदीये बोधिचर्यावतारे।

चार्वाकमते जगतोऽस्याः विचित्रतायाः कारणं न हि चेतनम्। चेतनकार्ये सति प्रत्यक्षगोचरं स्यात् घटादिकार्यवत्। न च चेतने साध्यं कमलमयुयपङ्कााद्यद्भूतकार्यम्।

अस्य विपक्षमतस्य खण्डनपूर्वकमतं प्रस्तौति माध्यमिकबौद्धः – सर्वे एव जनाः प्रत्यक्षतया सर्वेषां कार्याणां कारणं पश्यन्ति। यथा आम्रबीजतः आम्रस्योत्पत्तिः। वस्तुतः हेतोः भेदत्वादेव कार्यस्य भेदो दृश्यते। परन्तु किञ्च कारणं हेतुभेदस्य? उच्यते परहेतुभेदस्य कारणं हि पूर्वहेतुभेदः। तदुच्यते –

"किं कृतो हेतुभेदश्चेत् पूर्वहेतुप्रभेदतः।
कस्माच्च फलदो हेतुः पूर्वहेतुप्रभावतः।।"इति।।

अतः जगतः उत्पत्तिः स्वाभाविकी एव इति मतं तु मिथ्या एव।

नैयायिकमते तु जगतः उत्पत्तेः कारणं भवति सर्वशक्तिमान् ईश्वरः। मतमिदं निराकृत्य बौद्धाः कथयन्ति यत् –

"ईश्वरो जगतो हेतुर्वद कस्तावदीश्वरः।
भूतानि चेत् भवत्वेवं नाममात्रेऽपि किंश्रमः।।[5]" इति।।

अयं भावः पञ्चभूतानि एव यदि ईश्वरः स्यात् तर्हि जगतः कारणं कथं न पञ्चभूतानि ? यदि च पञ्चभूतानि एव स्यात् जगतः कारणानि तर्हि अनुपपत्तिः भवेत्। पृथिव्यादिमहाभूतानि तु अनित्यानि, ईश्वरस्तु नित्य एव। भूतानि तु अचेतनानि, ईश्वरस्तु सचेतन एव। भूतानि न देवता, देवता खलु ईश्वरः[6]। अतः ईदृशः ईश्वरः कस्य सृष्टिं करिष्यति? किम् आत्मनः सृष्टिः? आत्मा तु नित्य एव, तस्य नास्ति उत्पत्तिः न वा ध्वंसः। एवं परमाणुरूपपृथिवी अपि नित्या, स्वयम् ईश्वरोऽपि नित्यः। अतः न पृथिव्यादेः स्रष्टा भवति, न वा स्वस्य, नित्यत्वात्। पुनश्च बौद्धा ईश्वरस्य ईश्वरताविषयेऽपि शंकां दर्शयन्ति –

"करोत्यनिच्छन्नीशश्चेत् परायत्तः प्रसज्यते।
इच्छन्नपीच्छायत्तः स्यात् कुर्वतः कुतः ईशता।।[7]" इति।

एवम्प्रकारेण दर्शनान्तरमतखण्डनपुरःसरं बौद्धाः स्वकीयमतस्य अजातिवादस्य प्रतिष्ठां कुर्वन्ति। **बौद्धमते तु पदार्थः शून्य एव**। जगतः उत्पत्तेः परं नास्ति किमपि कारणम्। सर्वमेव आकाशवत् शून्यम्। तद्धि उच्यते – "सर्वमाकाशसकाशं परिगृह्णन्तु" इति। तेषां मते शून्यमेव मूलतत्त्वम्। तच्च सदात्मक-असदात्मक-सदसदात्मक-सदसद्-भिन्नात्मकविकल्परहितं शून्यतत्त्वम्।

---

5 *बोधिचर्यावतारः*, नवमपरिच्छेदः प्रज्ञापारमिता – ११९ संख्यककारिका।

6 "अपि त्वनेकेऽनित्याश्च निश्चेष्टा न च देवताः।
लंघ्याश्चाशुचयश्चैव क्ष्मादयो न स ईश्वरः।।" *बोधिचर्यावतारः*, नवमपरिच्छेदः प्रज्ञापारमिता – १२० संख्यककारिका।

7 तत्रैव, १२६ संख्यककारिका।

बौद्धमतेन प्रभावितः शान्तिदेवः तदीये संस्कृतकाव्ये कथयति – यदि च पदार्थः सन् भवेत्, तर्हि तस्य हेतोः किं प्रयोजनम्? असच्चेत् तथापि तस्य हेतोः किं प्रयोजनम्? उक्तं च –

"विद्यमानस्य भावस्य हेतुना किं प्रयोजनम्।
अथाप्यविद्यमानोऽसौ हेतुना किं प्रयोजनम्।।"[8] इति।

शून्यवादविषये यत्तु बौद्धमतं तेन सम्यक्तयैव प्रभावितोऽभवत् शान्तिदेवः। बौद्धदर्शने उच्यते –

"एवं शून्यं शून्यमित्यपि भावनीयम्। स्वप्ने जागरणे च न मया दृष्टमिदं रजतादीति विशिष्टनिषेधस्योपलम्भात्"[9] इति।

तात्पर्यं तावत् शुक्तौ रजतमिति भ्रान्तज्ञानं न कदापि सत् भवति। यद्दृष्टं तत्सद्भवेच्चेद् अधिष्ठानेन सह रूपत्वादेः समवायसम्बन्धः सन् स्यात्। तन्न। आरोपितव्यापारे आरोपस्य अधिष्ठानं, तेन सह सम्बन्धः, दर्शनक्रिया चेत्यादयः यदि असन्तः भवेत् तर्हि निषेधस्य विषयत्वात् सर्वमेव असत् भवति। एवम्प्रकारेण दृश्यते यत् शून्यवादविषये भगवतः बुद्धस्य मतं शान्तिदेवेन तदीये बोधिचर्यावतारे संस्कृतभाषया काव्यझङ्कारेण उपस्थापितम्।

किञ्च, बुद्धदेवस्य चरमसिद्धान्तो हि **परनिर्वाणं शून्यरूपम्।** वस्तुतः सर्वेषामेव दार्शनिकसम्प्रदायानां चरमराद्धान्तो हि मोक्षलाभः। मोक्षलाभस्तु –

"रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषाम्" इत्येवम्प्रकारः। स च मोक्षः बौद्धमते निर्वाणम्। तत्तु शून्यरूपम्। मानवाः वासनाद्वारा परिचालिताः सन्तः घटपदादीनां जागतिकविषयाणां विद्यमानत्वविषये अविद्यमानत्वविषये च काल्पनिकज्ञानसम्पन्नाः। परन्तु, "असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते" इति वचनानुसारं सत्यमेव वासनायाः निवृत्तौ तु परनिर्वाणस्य शून्यरूपस्य ज्ञानं जायते। तदा तु निरुद्धं नास्ति किमपि, नास्ति च क्लेशः। ननु भावपदार्थानां स्वभावोऽस्ति इति मन्तव्यं चेत्। तत्रोच्यते माध्यमिकैः आस्तिकदार्शनिकानाम् अस्ति अस्ति इति भावः, नास्तिकानां च नास्तीति भावस्तु कल्पना एव। यदा च एतस्याः कल्पनायाः दूरीभूतं भविष्यति, तादृशीमानसिक्यवस्था एव निर्वाणतया वक्तुं शक्यते। चन्द्रकीर्तिना प्रोक्तं मध्यमशास्त्रस्य वृत्तौ – **"निरवशेषकल्पनाक्षयरूपमेव निर्वाणम्"** इति। बौद्धमते तु अस्य निर्वाणस्य प्राप्तेरुपायो हि – **भावनाचतुष्टयम्। तानि च १. सर्वं क्षणिकं क्षणिकम्। २. सर्वं दुःखं दुःखम्। ३. सर्वं स्वलक्षणं स्वलक्षणम्। ५. सर्वं शून्यं शून्यम्।।** इति। अयमेव भावः शान्तिदेवेन बोधिचर्यावतारे उपन्यस्तः –

"एवं च न विरोधोऽस्ति न च भावोऽस्ति सर्वदा।
अजातमनिरुद्धं च तस्मात्सर्वमिदं जगत्"।।इति।[10]

---

[8] *बोधिचर्यावतारः*, नवमपरिच्छेदः प्रज्ञापारमिता, १४६ संख्यककारिका।

[9] बौद्धदर्शनस्य सर्वशून्यत्ववादस्य मूलांशः।

[10] *बोधिचर्यावतारः*, नवमपरिच्छेदः प्रज्ञापारमिता – १५० संख्यककारिका।

उपसंहृतिः –

"बहुजनहिताय बहुजनसुखाय यत्किञ्चित्सुभाषितं सर्वं तद्बुद्धभाषितम्" इति मनसि निधाय बुद्धप्रवर्तितं मतं यत् खलु संस्कृतभाषया विद्यते, मतमिदं समाश्रित्य आचार्यशान्तिदेवेनापि बोधिचर्यावतारे संस्कृतकाव्यमयेन स्वकीयचिन्तनेन यदुपस्थापितं तद्बौद्धप्रभावः इत्यत्र नास्ति सन्देहावकाशः। एतत्तु सत्यं यत् बुद्धस्य प्रधानभाषासीत् पाली प्राकृतं च, तथापि इदानीन्तनकाले संस्कृतभाषया बौद्धमतचर्चा दृग्गोचरीभूयते।

अन्तिमे वक्तुं शक्यते यत् भगवतो बुद्धदेवस्य प्रभावः न केवलं तच्छिष्येषु माध्यमिकाचार्येषु अपि तु शान्तिदेवः बौद्धप्रभावेण प्रभावितः सन्नेव संस्कृतसाहित्ये काव्यग्रन्थं रचितवान्, ततश्च बौद्धधर्मधारा अस्माभिरपि निरवच्छिन्नतया प्रवहति अद्यावधि।

सहायकग्रन्थसूची

Gangopadhyaya, Dilip Kumar. *Bhārat-Itihāser Sandhāne.* Kolkata: Sāhityaloka. 2016. 4th Edition. Print.

Jayantabhatta. *Nāyamanjarī***.** Ed. Prabal Kumar Sen. Kolakta: Sanskrit Book Dipo. 2013. Second Edition. Print.

Kane, P.V. *History of Dharmaśāstra (Vol. 1)*, Govt. Oriental series Class B NO. 6. Pune: Bhanderkar Oriental Research Institute. 1997. Print.

Mādhvācārya. *Sarvadarśanasaṃgra.- Cārvakadarśana.* Ed. Amit Kumar Bhattacharya. Kolkata: Sanskrit Pustak Bhandar. 2005. Second Edition. Print.

Mādhvācārya. *Sarvadarśanasaṃgra*. Ed. Satyaranjana Bandyopadhyaya. Kolkata: Sadeś. 2005. First Edition. Print.

Mādhvācārya. *Sarvadarśanasmgrahe Bauddhadarśan O Jainadarśana*. Ed. Sanjit Kumar Sanhukha. Kolkata: Sadeś. 2005. First Edition. Print.

Parāśara. *Parāśarasmṛti*. Translated into English by Manmatha Nath Dutta. Edited & Revised by K. L. Joshi. Delhi: Parimal Publication. 2009. Print.

Śāntideva. *Bodhicaryāvatāraḥ*. Translated Śāntibhikşuśāstri. Lakhnou: Buddhavihar. 1983. Second Edition. Print.

धर्मशास्त्रे पारिवेशिकं मूल्यम्

ड. सुरजित् व्यानार्जी[1]

सनातना आर्यास्तु प्रकृतिक्रोडे एव लालिताः पालिताश्च सन्तः प्रकृतिमेव आत्मनां मातृरूपेण पूजितवन्तः। यद्यपि प्रकृतेरनिर्वचनीयतां सौन्दर्यं भयावहताञ्च अवबोद्धुमसमर्था मनुष्याः प्रकृतेरेतादृशीम् अतीन्द्रियसत्तामेव सन्तोषयितुं प्रवर्तितवन्त इति तु सत्यम्। परन्तु मनुष्यैः अनियन्त्रितां प्रकृतिं ते कदापि न त्यक्तवन्तः। अपि च, प्रकृत्या साकमेव आत्मनोऽविच्छेद्यं सहसम्पर्कं प्रतिस्थापितवन्तः। अतिन्द्रियग्राह्यायां प्रकृत्यां ते दैवत्वमेव आरोपितवन्तः। तदर्थमेव वैदिकसाहित्येषु प्रायो देवोद्दिश्य मन्त्रोच्चारणेन प्रकृतेरेव कीर्त्तनं कीर्त्तितम्। उपनिषत्सु एव प्राप्यते एतद् यद् इदं विश्वमेव भवति पृथिव्यादिपञ्चभूतानां समाहारेणैव सृष्टम्[2]। प्रकृतिरेव एतेषां पञ्चभूतानामेव साम्यावस्थितिं सूचयति, येन एते परस्परभावयिताः सन्तः प्रकृतेरेवाभ्युदयं साधयन्ति। यदि वा समानुपातदृष्ट्या एते न सेविता भवन्ति तर्हि प्रकृतेः स्वाभाविकावस्थितिर्भवति विकृता। प्रकृतेरयं तुल्यसामर्थस्थितेर्यो विकारः स प्राणीजातानामेव हानिं सम्पादयति। प्रकृत्या साकं मनुष्यस्य यत् सहसम्पर्कं तत्तु स्वाभाविकमेव, यतः प्रकृतिं विना मनुष्यो जीवितुमपि नालम्। उत्पत्तिलग्नतो मनुष्यः प्रकृतेरन्तर्निहिततत्त्वमेव विज्ञातुं सततं चेष्टितवन्त आत्मानां रक्षार्थं तथा अभ्युदयाय च।

ऋतं यद्भवति प्रकृतेर्यथानियमस्वरूपमेव तत् प्रकृतेर्विकारमेव प्रशम्य संहतिजननरीत्या ब्रह्माण्डस्थितिं (Universal Order) सूचयति। प्राकृतिकं सौष्ठवं तथा ऐक्यमेव संसाधयति ऋतमिदम्। प्रकृत्यवस्थितौ इदं भवति नियामकम् उद्वर्तकञ्च येन यो भवति सर्वेषां प्राणीजातानां प्राणस्वरूपः स आदित्योऽपि भवति प्रतिष्ठितः[3]। ब्रह्माण्डोऽयं ऋतेनैव नियमितो भवति। ब्रह्माण्डस्यास्य प्रातिभासिकसत्ताया यथानियमेन व्यवस्थितिः अनेनैव भवति साध्या। प्रतिबोध्यमिदं विश्वं भवति चलमानं परिवर्तनशीलञ्च, परन्तु तेषां यथानियमावस्थितिं सूचयन्तमिदम् ऋतन्तु भवति शाश्वतम् अपरिवर्तनीयञ्च[4]। वस्तुतः प्रकृतेर्यथानियमानामनुपालनमेव अस्माभिः करणीयम्।

---

[1] Assistant Professor, Department of Sanskrit, Ramakrishna Mission Residential College, Narendrapur, Kolkata

[2] "इमानि पञ्चमहाभूतानि पृथिवी वायुः आकाशः आपज्योतिषी"।– *ऐतरेयोपनिषत्*-3/3.

[3] 'ऋतेनादित्यास्तिष्ठन्ति'- *ऋग्वेदः* -10/85/1.

[4] "The phenomena of the world are shifting and changeable, but the principle regulating the periodical recurrence of phenomena is constant; fresh phenomena are continually reproduced, but the principle of order remains the same".-H.W. Wallis. *The Cosmology of the Rigveda.* New Delhi: Cosmo Publications, 1999. p.-94.

अधुना तु परिवेशविज्ञानमेव शैक्षिकपाठ्यक्रमे स्वातन्त्र्येण विद्यते यतोऽधुना मानवायनदृष्ट्या प्रकृतेः संरक्षणन्तु नितरामेव आवश्यकं भवति। तदर्थमेव भारतसर्वकारेण परिवेशसंरक्षणार्थमेव एका विधिः स्थिरीकृता (Environmental Protection Act-1986)। प्राचीनाः शास्त्रकारा अपि तु मनुष्यस्य प्रात्यहिकजीवने प्रकृतेर्यदवदानं तदेव स्वीकृतवन्तः। तदर्थमेव ते प्रकृतेः संरक्षणमेव धर्मत्वेन स्वीकृतवन्तः। तदानीन्तु प्रकृतिदूषणं न स्यादिति तु न। यदि न स्यात् तर्हि सचेतनतायाश्चापि उपयोगो न विद्यते। परन्तु एतत्तु सत्यं यत्तत्र प्रकृतेः संरक्षणविषये यानि मूल्यानि आरोपितानि तानि तु कुत्रापि प्रवृत्त्यात्मकोपदेशयोग्यानि कुत्रापि च प्रतिकारात्मकोपदेशयोग्यानि। धर्मशास्त्रादिषु दृश्यते यत् पारिवेशिकमूल्यानामननुपालने पापः सञ्जायते। तदर्थमेव प्रायश्चित्तस्य प्रसङ्गोऽपि सुतरामापतति। धर्मशास्त्रादिषु परिवेशसंरक्षणविषये यानिचन नैतिकनियमानि प्रतिस्थापितवन्तस्तानि कर्तव्यापराधप्रतिकारदृष्ट्या त्रिधा विभज्यन्ते। अभ्युदयाभिलक्षिणो मनुष्याः सततं पञ्चमहायज्ञैः ऋषिप्रभृतीभ्यरात्मनो यद् ऋणं तदेव परिशोधयन्ति। एतैः पञ्चमहाभूतानि च तृप्यन्ति। पित्र्यादियज्ञेषु यदा पितृपैतामहा जलादिभिस्तर्प्यन्ते तदा तु भूमौ प्रदत्तेयं वारि तरुणां संवर्द्धनायालम्।

भूतयज्ञस्य 'भूत' इति पदेनैव तु अन्तःसंज्ञाविशिष्टानां संज्ञारहितानाञ्च बोध आपतति। अतो भूतयज्ञेन चेतनाचेतनां प्रकृतिं प्रति संवेदकस्य याजकस्य श्रद्धा स्वजीवनधारणाय प्रकृतिनिर्भरता च प्रकटिता। अतः संक्षेपेण इदं तु प्रकृत्या पुरुषस्य सहसम्पर्कस्य सूचकमिति वक्तुं शक्यते। जीववैचित्र्यं (Bio-diversity) वास्तुतन्त्रञ्च (Ecology) रक्षितं भवति अनेन सत्रेण। प्रकृतेः संरक्षणेन आत्मरक्षणमपि साधारणानां कृते तु नीतिस्वरूपा। अधुनेदं तत्वन्तु 'ethico-eco-bio-anthrocentism' इति नाम्नाभिहितं मनोवैज्ञानिकैः[5]। ये तु देवभावनया प्रकृतेः संरक्षणविषये भवन्ति उद्युक्ता आत्मसन्तुष्टास्ते वात्मोपलब्धिमात्मप्रतिष्ठां लभते। तत्वमिदं प्रकृतेश्वरपुरुषसहसम्पर्कादुपर्य्येव (Nature-Divive-Human interaction) भवति प्रतिष्ठितम्। यज्ञाग्नौ सम्प्रदत्तैर्धूमायितैः हवनद्रव्यैः प्रकृतेर्दूषणनियमनं शुद्धिकरणं वा भवति। चिकित्सकवदियं प्रकृतिः खलु ऋतसंरक्षणार्थं निरामयति प्रकृतिपुरुषसहसम्पर्कान्तरम्।

मनुष्ययज्ञेऽपि परिदृश्यते एतत् यन्मानविकगुणसम्पन्नानामस्माकं मनुष्याणां सनातनधर्मन्तु जीवितदेववाचिनां परिवेशस्य अन्यतमोपदानानां मनुष्येतराणां सेवनम्। सामाजिकसेवनन्तु (Social-Service) मनुष्ययज्ञपदेनाभिधीयते। 'अतिथिदेवो भव' इति वेदवचनमनुस्मृत्य अनाहूतस्य अकस्मात् अनाकाङ्क्षितस्य जनस्य अन्नोदकदानादिभिस्तथा गुर्वादीनां पदसेवनद्वारेण सन्तुष्टिसाधनमेव आलोचितमत्र। व्यष्टिस्वार्थं परित्यज्य सामाजिकीभवनं (Socialization) तु साध्यते अनेन। प्रकृत्या सम्पृक्तं जीवनविज्ञानन्तु (Science of living) केषाञ्चन मूल्यानामेव आश्रयभूतं वर्त्तते। तत्र तु अन्यतमानि

[5] M.L. Gupta. *The Cosmic Yajña.* Jaipur : Samhita Books Store, 1999. p.-46-47.

भवन्ति पारस्परिकं सहसम्पर्कं परसेवनं सामाजिकीभवनमित्यादीनि। अनेनैव भवति आत्मशुद्धिः, या खलु आत्मप्रतिष्ठाया जनकभूता।

यथा मातृगर्भस्थः शिशुः नाभिकया मातृशरीरात् पुष्टिवर्धकानि उपादानानि प्राप्य वर्द्धते तद्वत् यज्ञ एव भवति प्रकृतेः स्थावरजङ्गमात्मकानामुपादानानां संवर्द्धकः[6]। यज्ञो यद्भवति श्रेष्ठतमः कर्म तद् दानादानैरेव भवति प्रतिष्ठितम्। यज्ञकर्मसु उपादानत्रयमेव वर्तते द्रव्यं देवस्त्यागश्चेति। अनेनैव यज्ञ एव भवति समग्रस्यास्य विश्वस्य विनिर्माता विनियन्ता च। प्रकृतौ उपादानानि सर्वाणि एव परस्परसंवद्धानि परस्परप्रभावकानि च। उदाहरणतया वक्तुमेतच्छक्यते यत् सूर्य आत्मनः किरणैः पृथिवीपृष्ठतो जलं वाष्परूपेण परिगृह्णाति, तदेव वाष्पं घनीभूतं सत् पयोधरमेव विनिर्माति, यत् पुनः वर्षणद्वारेण शस्यादीनामभिवृद्धये भवति अलम्। पत्रपुष्पशोभिता इमे वृक्षाः फलादीनां दानैरेव प्राणीजातान् संरक्षन्ति संवर्धयन्ति च। प्राणीजाता अपि प्रकृतेस्तासामेव उद्भिज्जातानामेव संरक्षणे तथा संवर्धने यत्नवन्तो भविष्यन्ति, अत्र न सन्देहलेशावसरः। वस्तुतः अनेनैव दानादानं भवति प्रतिष्ठितं यत् परस्परभावकत्वेन यज्ञमेव अनुकरोति। ततः प्रकृतेरियं या दानादानप्रक्रिया सा यज्ञकर्मणो न भिन्ना कापि। यज्ञो न केवलं वैयक्तिकमभ्युदयं साधयति, अपि च परस्पराश्रयत्वेनायं परिवेशस्यापि अभ्युदयाय भवति अलम्। शतवर्षमेव जीवितुकामानां मनुष्याणामभिलाषस्तदा एव पूरितो भवति यदा प्रकृतिरपि भवति शुद्धा अदूषिता शान्ता च। यज्ञ एव भवति फलाभिलाषयोः द्वयोः भिन्नमार्गयोः संयोजकः।

अभिलाषः	यज्ञः	प्राप्तिः
Desire	Bridge	Fulfillment

अतो धर्मशास्त्रकृतामभिप्रायस्तु स्पष्ट एव, यतः परिवेशो भवति सर्वेषामेव प्राणीजातानामाश्रयस्थलस्ततस्तस्य संरक्षणं संवर्द्धनञ्चावश्यकं वर्तते। एतेन वैयक्तिकाभ्युदयेन साकं समग्रस्य परिवेशस्यापि स्वाभाविकोऽभ्युदयो भवति संसाधितः। अतः परस्परभावनद्वारेण दानादानैरेव प्रतिष्ठितो भवति एतादृशोऽभ्युदयः।

प्रकृत्या सह मनुष्यस्य सम्पर्कं त्वविच्छेद्यम्। सनातना भारतीयाः प्रत्यहं प्रातः उदिते सूर्ये सूर्यवन्दनं सायञ्च रवावस्तमिते कुर्वन्ति सन्ध्यावन्दनं गायत्रीमन्त्रेण। चरकसंहितायां वनविनाशनं समाजस्य मानवजीवनस्य कृते चाभिशाप इति वर्णितम्। धर्मशास्त्रादिषु चारण्यच्छेदनं कर्म गर्हितमित्युक्तम्। चतुराश्रमस्य विविधेषु पर्यायेषु अरण्यस्य प्रयोजनीयता अनस्वीकार्या[7]। ब्रह्मचर्याश्रमे अध्ययनार्थं

---

[6] “अयं यज्ञो भुवनस्य नाभिः”। *-ऋग्वेदः* -1/164/35.
“अयं यज्ञो विश्वस्य भुवनस्य नाभिः”। *-अथर्ववेदः* -13/62.

[7] गृहस्थस्तु सदा पश्येद्वलीपलितमात्मनः
अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत्।

वनयापनम्, गार्हस्थाश्रमे क्षुन्निवृत्त्यर्थं कृषिकार्यं वानप्रस्थाश्रमे पुनः वनगमनं सन्न्यासदशायां फलमूलैस्तनुधारणं काष्ठैर्यज्ञादिसम्पादनं वा। तरवो न कदापि केनापि छेदनीयाः, यतः सन्ति वृक्षाणामपि प्राणा यत एते अन्तःसंज्ञासमन्विताः सुखदुःखसमन्विताश्च भवन्ति। रात्रौ वृक्षस्याधः न शयनीयमिति मनुना यदुक्तं तदेवाधुनिकैर्वैज्ञानिकैः प्रमाणितम्। मनुष्यवृक्षयोरन्योन्यत्वं स्वीकृतं धर्मशास्त्रकृद्भिः।

फलपुष्पपत्रशोभितो वृक्षस्तु प्रकृतिजातानां सर्वेषामेव पुण्यतमो भवति। ततोऽस्य पत्राणि तु अविच्छेद्यानि पुष्पाणि च घ्राणयोग्यानि भवन्ति। आत्मनो विशुद्ध्यर्थञ्चापि एतेषामेव ग्रहणं नोचितं भवति। यदि वा औषधीवृक्षाणामेव रोगनिरामयार्थं प्रयोजनमपि भवति तथापि उपयोगदृष्ट्या तेषां ग्रहणमावश्यकम्। तदनन्तरञ्च एतेषां यत्र तत्र निक्षेपणन्तु गोष्ठीगतस्वास्थस्य परिमलस्य कृते अशुभकरं भवति, इदमेव परिवेशं दूषयति[8]। वस्तुत एवंविधानां निर्देशानां तात्पर्यन्तु सचेतनात्मकस्य इतिकर्तव्यकर्मणः प्रतिस्थापनं येन प्राकृतिकनीतिनियमा मूल्यदृष्ट्या भवन्ति प्रतिष्ठिताः। वृक्षस्य कोऽपि अङ्गो न छेदनीयः। यदि वा स्वाभाविकतया अङ्गानां च्युतिरेव परिदृश्यते तर्हि तेषामेवाङ्गाणां स्वीकरणन्तु शास्त्रसम्मतम्। विष्णुधर्मशास्त्रे तु प्रकृत्या साकं मनुष्यस्य सहसम्पर्कोऽयं वैशद्येन वर्णितः। सुतजननद्वारेण मनुष्यो यथा आत्मनामेव संजनयति तथा वृक्षरोपणद्वारेण अपि च कोऽपि मनुष्यः सुतजननसुखमनुभूय आत्मनोऽनागतं भविष्यञ्च दृढीकरोति। अत्र एतत् कथने नैव कोऽपि दोषो भवति यद् विष्णुस्तरुसुतयोः कमपि आन्तर्य्यं न स्वीकृतवान्[9]। न केवलम् ऐहिकफललाभाय अपि तु आमुष्मिकफललाभार्थमपि च पुत्रमेवापेक्षते मनुष्यस्तद्वत् वृक्षस्य रोपणं जलसिञ्चनेन वा तस्य वर्द्धनमेव केवलमिहजन्मनि फलादीनां ग्रहणेन आत्मनः शरीरधारणार्थमेव न, अपि च परजन्मनि सुखप्राप्त्यर्थमेव च प्रवर्त्तते। वृक्षादीनां संरक्षणेन मनुष्यो देवानपि प्रीणाति।

मनुष्याणां यत् कर्मफलतत्त्वं तस्य प्रतिफलनमेव वृक्षादिष्वेवोपलभ्यते[10]। वृक्षादिषु यः फलागमः स तु न वृक्षस्यैव भोगाय प्रवर्त्तते। वृक्षः स्वयमेव पत्रपुष्पफलैः आत्मानम् अलंकरोति परन्तु तेषां

सन्त्यज्य ग्राम्यमाहारं सर्वञ्चैव परिच्छदम्
पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत् सहैव वा॥ - *मनुसंहिता* – 6.2.

[8] आपस्तम्बधर्मसूत्रम् II.30.24, गौतमधर्मसूत्रम्-I.9.41 as quoted in B.K. Swain. "Plant Ecology and the law of Action and Resulst". *Dharmaśāstra : A Link between Tradition and Modernity.* Varanasi : Chaukhambha Sanskrit Bhawan, 2003. p.-20-23.

[9] *विष्णुधर्मसूत्रम्*-89.4.

[10] ".....the connection between the fruit of the tree and the fruit of actions…". B.K. Swain, "Plant Ecology and the law of Action and Resulst". *Dharmaśāstra : A Link between Tradition and Modernity.* Varanasi : Chaukhambha Sanskrit Bhawan, 2003. p.-13.

भोगो न समश्नुते। मनुष्यैश्च तादृशं कर्तव्यं येन कर्मणि एव तेषां प्रवृत्तिः स्यात् न कर्मफलभोगे[11]। मनुष्याणां कश्चन दायो वर्तते पूर्वार्जितानां संस्काराणामात्तीकरणेन भाविनि काले इतिकर्तव्यतानिर्धारणाय। ततो मनुष्यजन्मनि कर्तव्यकर्मणः अकरणे तस्य यः प्रत्यवायो भवति तस्यैव निराकरणं भवति तदा, यदा वृक्षरूपेणैवावतीर्य्य स फलाकाङ्क्षां विहाय पत्रपुष्पफलादीनां समुत्पत्तिं विधास्यति परहितायैव। अदत्तानामुपादानमिति विधिवाक्यस्य तात्पर्यमेव भवति अत्र मनुष्यो न केवलं भोगदृष्ट्या आत्मनः प्रीत्यर्थमपि च इतिकर्तव्यकर्माणां समाश्रयणेन तदुपरि न्यस्तानां दायानामेवानुपालनदिशा नैतिकदृष्ट्या च प्रकृतेः सर्वभूतानामेव च हिताय प्रवर्तते। अनेनैव कार्यकारणसम्बन्धः सर्वत्र भवेत् प्रवर्तितः। अतो मनुष्यैः साकं प्रकृतेरयं यः सम्बन्धः स तु न तात्कालिकः आपातदृष्ट्या च न प्रवर्तितः। अयं सम्बन्धस्तु प्रकृतेः कार्यकारणभावान्वितो भवति। तदर्थमेव प्रकृत्या सह मनुष्यस्य एकमविच्छेद्यं सहसम्पर्कं तु कर्तव्यापराधप्रतिकारविध्यात्मदृष्टिभिः प्रवर्तते इति धर्मशास्त्रकृन्मतम्। अतः पारिवेशिकं मूल्यं तदा एव भवति उद्भूतं यदा सचेतना मनुष्याः प्रकृतेः संवर्धनाय संरक्षणाय च उद्भूताया दैनन्दिनपारिवेशिकसमस्यायाः सरलीकरणाय प्रयत्नं कुर्वन्ति, येन प्रकृत्यैरेकात्मतामेववानुभवन्ति च ते। प्रकृतिक्रोडे एव स्थित्वा प्रकृतिहिताय एव प्रकृत्या सह सहबन्धमिदन्तु नितरामावश्यकं वर्तते। सभ्यताया विवर्तनमभिलक्ष्य मनुष्यस्य यद्वैयक्तिकं विवर्तनं तत्तु प्रकृतिमतिरिच्य नैव स्थातुं शक्नोति। यावन्तो मनुष्या विश्वायनप्रभावात् प्रकृतेरुपयोगं विस्मृत्य प्रकृतिमेव अवमानयति, तामेव च दूषयति तावदेव परिवेशसंरक्षणस्य तात्पर्यं भूयो भूयोऽनुभूयते। इदानीमेव तदर्थं भूरिशाः विधय एव प्रणीताः। प्रतिकारात्मकदृष्ट्या च यदि जीववैचित्र्यं भवति न रक्षितं तदा अपराधप्रशमनार्थं दण्डस्यैव प्रयोगः स्वीक्रियते संविधानप्रणेतृभिः। अतो धर्मशास्त्रकाराणां प्रकृतेः संरक्षणार्थं या खलु विधयस्तास्तु अधुनापि समधिकाः प्रासङ्गिकाः भवन्ति।

जीववैचित्र्यसंरक्षणाय तथा आत्मनो जीवनधारणार्थं वृक्षं न कदापि छेदनीयम्। वृक्षस्याच्छेदनं हि विश्वोष्णतायाः प्रतिबन्धकं भवति। न केवलमेतद् गोष्ठीगतस्वास्थस्य परिमलस्य च मूल्यं सोदात्तेनोद्घोषितं धर्मशास्त्रकृद्भिः। 'नाप्सु मूत्रपुरीषं कुर्यात्'[12] इत्यतः पानीये जले मूत्रपुरीषवर्जनमिष्ठीवनं नैवोचितं, यतस्तेन जलं भवति दूषितम्। दन्तैर्नखच्छेदनमपि न करणीयं यतस्तेनैव वपुर्गदानामाश्रयो भवेदिति नाधुनिकानामपि धर्मशास्त्रकृतामभिप्रायः केवलम्। अधिकलाभार्थं दूषितद्रव्येणादूषितद्रव्यस्य विक्रयणन्तु पापजनकं दण्डार्हञ्च[13], यतः दूषितद्रव्यस्य भोजनं सुस्वास्थस्य प्रतिबन्धकं भवति। सुस्वास्थ्यं विना धर्माचरणमपि न भवति सम्यगित्याधुनिकानामपि मतम्। पारिवेशिकस्य मूल्यस्यावक्षये प्रकृतिदूषणं

---

[11] "कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥"-*श्रीमद्भगवद्गीता*-2.47.

[12] *मनुसंहिता* – 4.56.

[13] तत्रैव – 9.286.

भग्नस्वास्थ्यं नैतिकमवक्षयञ्च परिदृश्यन्ते। अतः परिवेशेनास्माकमन्योन्यत्वमविभाज्यत्वं यत् तत्त्ववश्यमेव स्वीकार्यम्।

सहायकग्रन्थसूची

Altekar, A.S. *Education in Ancient India*. Banaras: Nand Kishore & Bros., 1951 (4th Ed.), 1944 (1st Ed.).

Auboyer, J. *Daily Life in Ancient India.* New Delhi: Munshiram Manoharlal Publishers Pvt. Ltd., 1994, 1961 (1st ed.).

Aurobinda. *Foundations of Indian Culture*. Kolkata: Aurobinda Publication, 1971 (3rd Revised Edition).

Ayer, P.S.S. *Evolution of Hindu Moral Ideals*. Delhi: Nag Publishers, 1976. Reprint, 1935.(1st Ed.).

Banerjee, S.C. *Dharma-sūtras- A study in their Origin and Development.* Calcutta: Puthi Pustak, 1962.

Banerjee, S.C. *Society in Ancient India.* New Delhi: Abhinav Publications, 1993.

Basham, A.L. *The Wonder that was India*. London: Sidgwick and Jackson, 1985 (rpt.). 1967(1st ed.).

Buch, M.A. *The Principles of Hindu Ethics.* Delhi: Bharatiya Kala Prakashan, 2003 (Rev. ed.), 1921 (1st ed.).

Choudhuri, U. & Choudhuri, I.N. *Hinduism- A Way of Life and a Mode of Thought.* New Delhi: Niyogi Books, 2012.

Creel, A.B. *Dharma in Hindu Ethics.*Calcutta: Firma KLM, 1977.

Crowford, S.C. *The Evolution of Hindu Ethical Ideals.*Hawaii: University of Hawaii. 1982 (2nd Ed.).

Das, A.C. *An Introduction to the study of Society.* Varanasi: Motilal Banarsidass, 1972.

De, S. *Indian Life Culture and Value in the Śukla yajurveda: A study.* Kolkata: Sanskrit Book Depot, 2010 (2nd & enlarged ed.).

Gupta, M.L. *The Cosmic Yajna.* Jaipur: Samhita Book Store, 1999.

Hiriyanna, M. *Indian Conception of Value.* Mysore: Kavyalaya Prakashan, 1975(Reprint).

Kane, P.V. *History of Dharmaśāstra*. Vol. II. Part 1. Pune: Bhandarkar Oriental Research Institute, 1997 (3rd Ed.), 1941 (1st Ed.).

Kapani, L. *The Philosophical Concept of Saṃskāra.* Delhi: Motilal Banarsidass Publishers Private Limited, 2013.

Krishnamurti, J. *Education and the Significance of Life.* California: Krishnamurti Foundation of America, 1953 (e-book).

Kulkarni, C. *Vedic Foundations of Indian Culture.* Bombay: Sri Dvaipayana Trust, 1973.

Mangal, S.K. *Essentials of Educational Psychology*. New Delhi: Prentice Hall of India Private Limited, 2008.

Manu. *Manusamhitā*. Ed. M. Banerjee. Kolkata: Sanskrit Pustak Bhandar, 2003.

Mckenzie, J. *Hindu Ethics- A Historical and Critical Essay*. New Delhi: Oriental Reprint, 1992 (2nd Ed.), 1920 (1st Pub. by Oxford University Press, London).

Olivelle, P. *Dharmasūtra Paralles.* New Delhi: Motilal Banarsidass Publishers Private Limited, 2005.

Pande, G.C. *Consciousness Value Culture.* Allahabad: Raka Prakashan, 2006.

Pande, G.C. *Mūlyamīmāṃsā.* Allahabad: Raka Prakashan, 2005 (2nd ed.).

Sarvabhutananda, S.(Ed.). *The Perennial Values of Indian Culture.* A Collection of Surendra Paul Lectures. Kolkata: Ramakrishna Mission Institute of Culture, 2008.

Sengupta, P. *Everyday Life in Ancient India*. London: Oxford University Press, 1950. (e-book).

Stanford, C. *Studies in Ancient Society, Culture and Religion.* Delhi: Caxton Publications, 1988 (1st reprint).

Swain, B.K. *Dharmaśāstra- A Link between Tradition and Modernity.* Varanasi: Chaukhambha Sanskrit Bhawan, 2003.

Swain, B.K. *Manu- An Introductory Analysis.* Varanasi: Chaukhambha Sanskrit Sansthan, 2013.

Swain, B.K. *Smṛtimīmāṃsā.* Delhi: Akshaya Prakashan, 2006.

Swain, B.K. *The Dharmaśāstra- An Introductory Analysis.*Delhi: Akshaya Prakashan, 2004.

Swami, C.S. *Hindu Dharma- The Universal Way of Life.* Ed. S. Ramakrishnan. Trans. R.G.K. Mumbai: Bharatiya Vidya Bhavan, 2008 (5th ed.), 1995 (1st ed.).

Urban, W.B. *Valuation its nature and Laws- Being an Introduction to General Theory of Value.* London: George Allen and Unwin, 1929.

Vijoyananda, S. (Ed.). *The Ideals of Indian Education and Culture.*Acharya Swami Pranavananda Memorial Volume. Calcutta: Bharat Sevashram Sangha, 1962.

भवभूतेः उत्तररामचरितमिति रूपके अद्भुतरसस्य प्रयोगवैचित्र्यम्

ड. सोमनाथचट्टोपाध्यायः[1]

शब्दार्थमयस्य काव्यस्य मुख्यं तावत् प्रयोजनमस्ति आनन्दलाभः। उपनिषत्सु ऋषयः परमात्मानमेव रसत्वेन स्वीकृतवन्तः। तैत्तिरीयोपनिषदि आम्नातम् - 'रसो वै सः'। विश्वनाथेन काव्यलक्षणनिरूपणप्रसङ्गेनोक्तं 'वाक्यं रसात्मकं काव्यम्'[2]। काव्यस्य आस्वादनमेव रसः। आलंकारिकाणां मते रस एव काव्यस्यात्मा। रसं विना न कोऽपि पदार्थः प्रतिपद्यते – 'न हि रसादृते कश्चिदर्थः प्रवर्तते'।

नृत्यगीतादीनां सर्वेषां कलासाधनानां मुख्यं लक्ष्यं तावद्रसनिष्पत्तिः। दार्शनिकेन हेगेलमहोदयेन रसविषये कथितम् - 'The beautiful is the manifestation of idea' इति। रसास्वादनप्रसङ्गेन भरतेनोक्तम् – यथा हि नानाव्यञ्जनसंस्कृतमन्नं भुञ्जाना रसान् आस्वादयन्तः सुमनसः पुरुषाः हर्षादीन् चाधिगच्छन्ति, तथा नानाभावाभिनयव्यञ्जितत्वाद्वागङ्गसत्त्वोपेतान् स्थायिभावानास्वादयन्तः प्रेक्षका हर्षादींश्चाधिगच्छन्तीति कृत्वा ते नाट्यरसाः[3]। भोज्यपदार्थरसो नाट्यरसापेक्षया स्थूलः। पक्षान्तरेण नाट्यरसो लौकिकरसापेक्षया सूक्ष्मः। स खलु रसः सामाजिकैरन्तरिन्द्रियैरेव गृह्यते।

आलंकारिकः आनन्दवर्धनो नाट्यरसमेव काव्यरसमिति मन्यते। ध्वन्यालोकस्य लोचनटीकायाम् अभिनवगुप्ताचार्यः प्राह - 'शब्दसमर्प्यमान-हृदयसंवादसुन्दर-विभावानुभावसमुचितप्राग्विनिविष्ट-रत्यादिवासनानुराग-सुकुमारस्वसंविदानन्द-चर्वणाव्यापाररसनीयरूपो रसः'[4]। आत्मसंविदः प्रतीतिरेव रसः। रसस्य कोऽपि स्वरूपभेदो नास्ति।

रससंख्यासन्दर्भे वैमत्ये सत्यपि संख्यागरिष्ठानां काव्यतात्त्विकानां मते, काव्ये नव रसाः सन्ति। शान्तरसस्याभिनयायोग्यत्वान्नाट्यरसास्त्वष्टावेव। शान्तस्य रोमाञ्चादिविरहेन अभिनेयत्वात्काव्यमात्र-गोचरत्वमिति अभिधानान्नाट्यम् इत्युक्तम्।

संस्कृतवाङ्मये शृङ्गार एव सारभूतः रस इत्यत्र नास्ति संशयः। तेनोक्तम्, 'शृङ्गार एको रसः'। विश्वनाथस्तु अद्भुतरसं मूलीभूतं रसं प्रवदति। आचार्यस्य भरतस्य मतानुसारेण आदिरसाश्चत्वारः। तद्यथा शृङ्गार-वीर-रौद्र-वीभत्साश्च। वीररसाज्जायते अद्भुतरसः -

"शृङ्गारादि भवेद् हास्यो रौद्राच्च करुणो रसः।
वीराच्चैवाद्भुतोत्पत्तिर्वीभत्साच्च भयानकः"॥

---

[1] सहकारी अध्यापकः, श्यामपुरसिद्धेश्वरीमहाविद्यालयः, हावडा, पश्चिमवङ्गः।

[2] *साहित्यदर्पणः* (सम्पा. सत्यनारायण चक्रवर्ती,१.३)

[3] तत्रैव (प्रथमः खण्डः, पृः - २८९-२९०)

[4] *ध्वन्यालोकः* (सम्पा. विमलाकान्त मुखोपाध्याय, वृत्तिः, १.४)

केचिदालंकारिका अद्भुतरस एवापरेषां सकलरसानामुत्सः इति कथयन्ति। दर्पणकारेणोक्तं – रसो लोकोत्तरचमत्कारप्राणः। अत्र चमत्कारस्यार्थो विस्मयः। तेनोक्तम् - 'चमत्कारश्चित्तविस्ताररूपो विस्मयपरपर्य्यायः'[5]। अद्भुतरस एव रस इत्यालंकारिकस्य नारायणस्य नयः।

नाटकेषु साधारणतयायमद्भुतरसोऽङ्गरसरूपेण विराजते। कालिदासस्य नाटकानि सामाजिकानां मनसि श्रृङ्गाररसस्य नाटकरूपेण प्रतिष्ठितानि। भवभूतिना विरचितम् उत्तररामचरितं नाटकं करुणरसप्रधानम्। कृष्णमिश्रस्य प्रबोधचन्द्रोदयं नाटकं शान्तरसप्रधानम्। श्रीहर्षस्य नागानन्दे नाटके शान्तरसस्य प्राधान्यं दृश्यते। शूद्रकस्य मृच्छकटिकं श्रृङ्गाररसस्य प्रकरणम्। विशाखदत्तस्य मुद्राराक्षसं वीररसप्रधानम्। नाट्यतत्त्वानुसारतः श्रृङ्गार-करुण-हास्य-वीररसाः अङ्गिरसरूपेण संस्कृतनाटकेषु विराजन्ते। एतत्सत्त्वेऽपि संस्कृतनाट्यतत्त्वे अद्भुतरसस्य विशिष्टं स्थानं दृश्यते। भरत-धनञ्जय-विश्वनाथ-प्रमुखाः आलंकारिका रसस्यास्य गुरुत्वं स्वीकुर्वन्ति। ते मन्यन्ते 'कार्यं निर्वहणेऽद्भुतम्'। अर्थात् नाटकस्यान्तेऽद्भुतरसस्यावस्थितिर्नाट्यकौशलदृष्ट्या आवश्यिकी। परन्तु केवलम् अद्भुतरसमङ्गीकृत्य किमपि नाटकं न रचितम्।

अग्निपुराणे अतिशयत्वेनार्थदर्शनकारणाच्चित्तस्य विस्तारोऽद्भुतो रसः कथ्यते। वीरत्वेनाद्भुतरसस्य निष्पत्तिर्भवति। अग्निपुराणे दृश्यते - "वीराच्चाद्भुतनिष्पत्तिः"[6]। अपि च दृश्यते - "विस्मयोऽतिशयेनार्थदर्शनाच्चित्तविस्मृतिः"[7]।

यद्यपि 'कारुण्यं भवभूतिरेव तनुते' इत्याभाणकः संश्रूयते, तथाप्यद्भुतरसस्य व्यवहारे भवभूतेर्नैपुण्यं लक्ष्यते। अत्रोत्तररामचरिते भवभूतेरद्भुतरसस्य व्यवहारः पर्यालोच्यते। दिङ्मात्रमुदाहरणं तावत्

"सीता – अहो! दलन्नवनीलोत्पलश्यामलस्निग्धमसृण-शोभमानमांसलदेहसौभाग्येन विस्मयस्तिमित-तातदृश्यमान-सुन्दरश्रीः अनादरखण्डितशंकरशरासनः शिखण्डमुग्धमुखमण्डल आर्यपुत्र आलिखितः[8]।

किञ्च, सीता – एते खलु तत्कालकृतगोदानमङ्गलाश्चत्वारो भ्रातरो विवाहदीक्षिता यूयम्। अहो! जानामि तस्मिन्नेव प्रदेशे तस्मिन्नेव काले वर्ते"[9] इति ।

गर्भावस्थायां स्त्रीणां योऽभिलाषो भवति सोऽवश्यमचिरात् सम्पादयितव्य इति सामाजिकोपचारः। आसन्नप्रसवायाः सीताया अभिलाषं सम्पादयितुं यदेव प्रयोजनं तदेवावश्यकर्तव्यतया

---

[5] *साहित्यदर्पणः* (सम्पा. पि.भि.काने, तृतीयः परिच्छेदः)

[6] *अग्निपुराणम्*, ३३९।८

[7] तत्रैव, ३३९।१५

[8] *उत्तरामचरितम्* , अङ्कः - १

[9] तत्रैव

रामचन्द्रेणादिष्टम्। सीतायाः इच्छानुसारतो रामचन्द्रेण तज्जीवनचरितस्यैकञ्चित्रफलकं विनिर्मितम्। चित्रफलकमालोक्य सीता विस्मितास्ति। अस्मिन्नालेख्ये चित्रकरेण रामचन्द्रस्य चरितमपूर्वमालिखितम्। अपूर्ववस्तुदर्शनात् सीताया मनसि विस्मयो जायते। राजसभायां चत्वारो भ्रातरः समुपस्थिताः तदानीम्। काहिनीमिमां विचिन्त्य सा तस्मिन् काले अवर्ततेति तया चिन्तितम्। एतेन सीताया मनसि विस्मयभावः सञ्जातः। अत्र 'अम्महे' इति शौरसेन्यादिभाषायां विस्मयसूचकमव्ययम्, संस्कृते तु तादृशशब्दाभावात् 'अहो' शब्देनानुवादः कृतः। विस्मयः अद्भुतरसस्य स्थायिभाव इति कृत्वा विभावानुभावव्यभिचारिसंयोगात् अद्भुतरसनिष्पत्तिर्भवतीति।

उत्तररामचरितमिति नाटकस्य द्वितीयेऽङ्के अद्भुतरसप्रयोगवैचित्र्यं दृश्यते यत् –

"आत्रेयी – तस्य भगवतः केनापि देवताविशेषेण सर्वप्रकारोऽद्भूतं स्तन्यत्यागमात्रके वयसि वर्तमानं दारकद्वयमुपनीयतम्। तत् खलु न केवलमृषीणामपितु सचराचराणां भूतानामान्तरानि तत्त्वान्युपस्नेहयति।

वनदेवता – अपि तयोर्नामसंविज्ञानमस्ति ?

आत्रेयी – तयैव किल देवतया तयोः कुशलवाविति नामनी प्रभावश्चाख्यातः।

वनदेवता – कीदृशः प्रभावः ?

आत्रेयी – तयोः किल सरहस्यानि जृम्भकास्त्रान्याजन्मसिद्धानीति।

वनदेवता – अहो नु भोश्चित्रमेतत्।

आत्रेयी – तौ च भगवता वाल्मीकिना धात्रीकर्म वस्तुतः परिगृह्य पोषितौ परिरक्षितौ च, वृत्तचौडकर्मणोश्च तयोस्त्रयीवर्जिमितरा विद्याः सावधानेन परिनिष्ठापिताः। समनन्तरं च गर्भैकादशे वर्षे क्षात्रेण कल्पेनोपनीय तौ त्रयीविद्यामध्यापितौ। न ह्येताभ्यामति-प्रदीप्तप्रज्ञाभ्यामस्मदादेः महाध्ययनयोगोऽस्ति। यतः –

'वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे
न खलु तयोः ज्ञाने शक्तिं करोत्यपहन्ति वा ।
भवति च पुनर्भूयान् भेदः फलं प्रति तद्यथा
प्रभा भवति शुचिविम्बोद्ग्राहे मणिर्न मृदां चयः'।।[10]

अपि च, "आत्रेयी – अपरश्च।

– अथापरः कः?

---

[10] *उत्तररामचरितम्,* अङ्कः - २

आत्रेयी – अथ स ब्रह्मर्षिरेकदा माध्यन्दिनसवनाय नदीं तमसामनुप्रपन्नः। तत्र युग्मचारिणोः क्रौञ्चयोरेकं व्याधेन विध्यमानं ददर्श। आकस्मिकप्रत्यवभासं च देवीं वचनमनुष्टुभेन च्छन्दसा परिणतामभ्युदैरयत् –

मा निषाद! प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।

यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्" ।।[11]

महर्षेर्वाल्मीकेः शिष्यासीदात्रेयी। सा वेदाध्ययनार्थं वाल्मीकिपार्श्वात् इह दण्डकारण्ये अगस्त्यमुनिसमीपम् आगतवती। आत्रेयीमुखाल्लवकुशयोश्च महावीरत्वसूचिकां गाथां वनदेवी श्रुतवती। तयोः किल सरहस्यानि जम्भृकास्त्राणि आजन्मसिद्धानीति वार्त्तामिमां श्रुत्वा वनदेवी विस्मितासीत्। तयोक्तम् - 'अहो न भोश्चित्रमेतत्'। अत्रैव अहोनुभीरित्येकमेव विस्मयविशेषद्योतकमव्ययम्। अपि च, आत्रेयी उक्तवती यत्तत्र भवान् वाल्मीकिर्धात्रीकर्म परिगृह्य तौ बालकौ पोषितवान् परिरक्षितवान् च। ताभ्यां त्रयीविद्यां ददाति महर्षिः। अतः परं ब्रह्मर्षिरेकदा माध्यन्दिनसवने तमसानदीमनुपपन्नः। तत्र भवान् युग्मचारिणोः क्रौञ्चयोरेकं व्याधेन विध्यमानं दृष्ट्वा व्यथितोऽभूत् । अनुष्टुभा छन्दसोकः श्लोकः समुच्चारितस्तेन - 'मा निषाद! प्रतिष्ठाम्' – । श्लोकमिमं श्रुत्वा वनदेवी आश्चर्यान्विताभूत्। अत्र 'चित्रम्' इति शब्दः आश्चर्यार्थद्योतक इति कृत्वा अद्भुतरसः इति निश्चप्रचम्।

पुनश्च तृतीयाङ्के दृश्यते –

"(नेपथ्ये)

विमानराज ! अत्रैव स्थीयताम्।

सीता – अहो जलभृतमेखस्तनित गम्भीरमासंला कृतोनु एषा भारती निर्घोष भ्रियमाण कर्णविवरां मामपि मन्दभागिनीं झटिति उच्छ्वासयति"।

आश्रमस्थानं खलु सुखस्थानम्। तत्रैव परमस्नेहेन सर्वे कथयन्ति। उच्चैः कोऽपि न कथयति। एकदा रामचन्द्रः कस्यचित् शूद्रस्य दण्डविधानार्थं पञ्चवटीम् आगतः। तत्र सारथये पुष्पकाय आदिशति रामचन्द्रः - 'अत्र इव स्थीयताम्'। इदं वाक्यं जलभूतमेघस्तनितगम्भीरशब्द इव श्रूयते। इमे शब्दाः तपोवने सहसा न श्रूयन्ते। रामचन्द्रस्येदं गम्भीरपूर्णं वाक्यं सहसा श्रुत्वा सीता स्वयमेव विस्मयान्विता जाता। अयं प्रकारचमत्कारो विस्मयजः। अयम्प्रकारो विस्मयोऽद्भुतरस एव।

अङ्केऽस्मिन् पुनश्च दृश्यते यत् –

"तमसा – अहो! संविधानकम्

---

[11] *उत्तररामचरितम्* ,अङ्कः – २, श्लोकः – ५

एको रसः करुण एव निमित्तभेदाभिन्नः पृथक् पृथगिवाश्रयते विवर्त्तान्।
आवर्त्तवुद्वुदतरङ्गमयान् विकारा नम्भो यथा सलिलमेव तु तत् समग्रम्"[12]।

अस्मिन् चराचरे शोकोऽस्ति। स्वल्पमपि सुखस्थानमिति। इदमेव विधातुः विचित्रविधानम्। सीता-रामयोः परस्परं विच्छेदे रामचन्द्रस्य दर्शनाकाङ्क्षायाः सीतायाः नयनं भर्त्तरि रामे एकान्ततो निहितम्। मर्मपीडाकरैरपि आयासैः दृष्टेराकर्षणं न समाप्तिं भजते। सीतायाश्चक्षुस्तावत् अश्रुभाराक्रान्तम् इति दृष्ट्वा तमसा विस्मितास्ति। तया चिन्तितं यत् यथा एकमेव जलम् केनचित् पदार्थेन वेगरोधे सति धारयति। तथा एक एव स्थायिभावः शोकः परस्परवियोगे विषादरूपेण, मूर्च्छान्तरस्पर्शे हर्षरूपेण, स्मृतिरूपेण स्तम्भरूपेण, धृतिरूपेण च परिणमते। एक एव करुणः रसः अवस्थाभेदात् रतिहासशोकनिर्वेदादिरूपेण प्रतीयते, परमार्थतस्तु स एक एव रसः।

चतुर्थाङ्के पुनः अद्भुतरसस्य प्रयोगवैचित्र्यं संदृश्यते यत् –

'कौशल्या – सुलभसौख्यं तावत् बालत्वं भवति।

अहो ! एतेषां मध्ये कः एष रामभद्रलक्ष्मीपरिशोभितैः सावष्टम्भमुग्धललितैरङ्गैः अस्माकमपि लोचनानि शीतलयति।

कौशल्यया क्रीडारतानां वटूनां कोलाहलः श्रूयते। एतेषां वटूनां मध्ये रामभद्रलक्ष्मीपरिशोभितैः सावष्टम्भमुग्धललितैः एको बालकः कौशल्या दृष्टवती इति कृत्वा क एषः बालकः इति चिन्तयित्वा सा विस्मिताभूत्।

अङ्केऽस्मिन् पुनश्च दृश्यते यत् –

"जनकः – (चिरं निर्वण्य) भोः! किमप्येतत्।

महिम्नामेतस्मिन् विनयशिशुतामौग्ध्यमसृणो
विदग्धैर्निग्राह्यो[13] न पुनरविदग्धैरतिशयः ।
मनो मे सम्मोदः[14] स्थिरमपि हरत्येष बलवान्
अयोधातुं यद्वत् परिलघुरयस्कान्तशकलः"।।[15]

---

12 *उत्तररामचरितम्*, अङ्कः – ३, श्लोकः – ४७

13 निर्ग्राह्य इति पाठान्तरम्।

14 सम्मोह इति भिन्नपाठः।

15 *उत्तररामचरितम्*, अङ्कः - ४

भवभूतेः उत्तररामचरितमिति रूपके अद्भुतरसस्य प्रयोगवैचित्र्यम्

अपरिचितस्य लवस्य दर्शनेनैव तस्य माहात्म्यं चित्ताकर्षकत्वमनुभूय च जनको विस्मितोऽभवत्। तेनोक्तं भोः एतत् किमपि। अत्र 'किमपि' इति शब्दः आश्चर्यार्थद्योतकमव्ययम्। लवस्य शिशुसुलभं सारल्यं नम्रस्वभावः उत्कर्षश्च केवलम् अनुभवनिपुनैः जनकादिभिरेव बोद्धव्यानि, न तु अनिपुनैः, लौहाकर्षकायस्खण्डो यथा लौहम् आकर्षति तथैव लवदर्शनजनितानन्दः योगाभ्यासेन स्थिरमपि जनकचित्तमाकर्षतीति।

उत्तररामचरितस्य पञ्चमाङ्के अद्भुतरसस्य प्रयोगशैली अस्माकं विस्मयमावहति –

"चन्द्रकेतुः – आर्य सुमन्त्र! पश्य पश्य

किरति कलित किञ्चित्कोपरज्यन्मुखश्रीरविरतगुणगुञ्जत्कोटिना कार्मुकेण।
समरशिरसि चञ्चत्पञ्चचूडश्चमूनामुपरि शरतुषारं कोऽप्ययं वीरपोतः[16]।।

आश्चर्यमाश्चर्यम्।

मुनिजनशिशुरेकः सर्वतः सैन्यकाये नव इव रघुवंशस्याप्रसिद्धः प्ररोहः।
दलितकरिकपोलग्रन्थिटङ्कारघोरम् ज्वलितशरसहस्रः कौतुकम् मे करोति"[17]।।

वाल्मीकेराश्रमपदे सुमन्त्रेण सारथिना सह रथेन चन्द्रकेतुः प्रविष्टवान्। तस्मिन्नाश्रमपदे तत्रभवान् चन्द्रकेतुः मुनिबालकस्य लवस्य वाणनिक्षेपनैपुण्यमवलोक्य विस्मयविमुग्धोऽभवत्। लवस्य वाणवर्षणनैपुण्यं दृष्ट्वा लक्ष्मणात्मजश्चन्द्रकेतुः सारथिं सुमन्त्रमुद्दिश्य वर्णयति यत् लोके अख्यातोऽपि रघुवंशस्य नवीनाङ्कुर इव एकाकी मुनिबालकः धनुष्टंकारेण सकलसैन्येषु वाणवर्षणेन च अद्वितीयवीररूपेण समरे आत्मानं प्रकाशितवानिति। मुनिबालकस्यैतादृशं महावीरत्वं दृष्ट्वा चन्द्रकेतुः स्वयं विस्मितोऽभवदिति हेतोरद्भुतरसः।

पुनश्च दृश्यते यत् –

"चन्द्रकेतुः – आर्य! दृश्यतां द्रष्टव्यमेतत्

दर्पेण कौतुकवता मयि वद्धलक्ष्यः पश्चादवलैरनुसृतोऽयमुदीर्णधन्वा ।
द्वेधा समुद्धतमरुत्तरलस्य धत्ते मेघस्य माघवतचापधरस्य लक्ष्मीम्।।[18]

सुमन्त्रः – कुमार एवैनं द्रष्टुमपि जानाति। वयन्तु केवलं परवन्तो विस्मयेन"।

---

[16] *उत्तररामचरितम्,* अङ्कः – ५, श्लोकः २

[17] तत्रैव, अङ्कः ५, श्लोकः ३

[18] तत्रैव, अङ्कः ५, श्लोकः १

चन्द्रकेतुः सुमन्त्रमुद्दिश्य लवस्यापूर्वं रणकौशलं शोभां वर्णितवान्। पूर्वदिगुत्थितवायुना पश्चिमायां दिशि एकवारं चलितः द्वितीयवारञ्च पश्चिमदिगुत्थितवायुना पूर्वस्यां दिशि चलितः इन्द्रधनुर्धारी मेघो यादृशीं शोभां धत्ते नवजलधरश्यामशरीरेऽयं बालकवीरः लवोऽपि सन्मुखवर्त्तिनं चन्द्रकेतुम् एकवारं धनुरुत्तोलयन् पुनः पृष्टदेशादाक्रमणकारिणः सैनिकान् प्रति धनुरुत्तोलयन् पश्यति। तादृशीं शोभां चन्द्रकेतुमुखाच्छ्रुत्वा सुमन्त्रो विस्मितोऽभवदिति अद्भुतरसः।

अङ्केऽस्मिन् पुनश्च दृश्यते यत् –

"लवः – (स्वागतम्) अहो पुणानुभावदर्शनोऽयं महापुरुषः।

आश्वासस्नेहभक्तीनामेकमालम्वनं महत् ।
प्रकृष्टस्येव धर्मस्य प्रसादो मूर्त्तिसंचरः।।

आश्चर्यम् –

विरोधो विश्रान्तः प्रसरति रसो निर्वृतिघन-
स्तदौद्धत्यं क्वापि वव्रति विनयः प्रह्वयति माम् ।
झटित्यस्मिन् दृष्टे किमिव परवानस्मि यदि वा
महार्घस्तीर्थानामिव हि महतां कोऽप्यतिशयः"।।[19]

महापुरुषो रामचन्द्रः सान्त्वनास्नेहभक्तीनामद्वितीयः आधारभूतरूपो धर्माचरणेन जायमानश्चित्तप्रसादमूर्तिमाश्रित्य स आर्विभूतः। रामस्य महान् प्रभावो मनसा लवेनानुभूतः इति रामं दृष्ट्वा विगलितमस्यात्माभिमानम्। जातं तच्चितमानन्दाप्लुतम्। दूरीभूतश्च विवादो लवस्य मनसि। रामं प्रति श्रद्धाशीलत्वात्तीर्थमाहात्म्यतुल्यं राममहिमानमिति सम्यगनुभूतवान् लवः। रामचन्द्रदर्शनसंजातमेतादृशं प्रभावं दृष्ट्वा लवस्य मनसि स्वयमपि विस्मयोऽजायत इति कृत्वा विस्मयादेव अद्भुतरसस्योत्पत्तिरिति।

सप्तमाङ्के अद्भुतरसस्य प्रयोगवैचित्र्यं दृश्यते यत् –

"लक्ष्मणः – (विलोक्य)

मन्थादिव क्षुभ्यति गाङ्गमम्भो व्याप्तं च देवर्षिभिरन्तरिक्षम् ।
आश्चर्यमार्या सह देवताभ्यां गङ्गामहीभ्यां सलिलादुदेति"।।[20]

---

[19] *उत्तररामचरितम्*, अङ्कः – ६, श्लोकः १०-११

[20] तत्रैव, अङ्कः – ७, श्लोकः – १६

मन्थनदण्डेन क्षुभ्यति गङ्गायाम् अम्भः। देवर्षिभिश्च परिव्याप्तमन्तरिक्षम्। आश्चर्यदर्शनाय देवा ऋषयश्च गगनतले समागताः। आर्या सीता गङ्गामहीभ्यां देवताभ्यां सह सलिलाद् उदेतीति आलोक्य लक्ष्मणः स्वयमपि विस्मितोऽभवत्। अयम्प्रकारो विस्मयोऽद्भुतरस एव।

परिशेषे वक्तव्यं यत्, साहित्यसंसारे करुणरसप्रयोक्तृत्वेनाद्वितीयो भवभूतिः अद्भुतरसस्य व्यवहारे समानं स्वच्छन्दः प्रदर्शितवानिति सत्यम्।

परिशीलिता ग्रन्थानुक्रमणी

1. Bharatamuni. *Nāṭyaśāstra*. Ed. R.S. Nagar. Vol.1. Delhi : Parimal Publications, 1981.
2. Viśvanātha. *Sāhityadarpaṇa*. Ed. P.V. Kane. Delhi : MLBD, 1974. (Edn-VI)
3. Jagannātha. *Rasagaṅgādhara*. First Ānana. Ed. Sri Madhusudan Shastri with Commentary of *Marmaprakāśa* by Nāgeśa Bhaṭṭa. Varanasi : Banaras Hindu University, year not found.
4. Ānandabardhana. *Dhvanyāloka.* Ed. Bimolakanto Mukhopadhyay. Kolkata : Sanskrit Pustak Bhandar, Rpt-2008.
5. Daṇdin. *Kāvyadarśa*. Ed. Chinmoyi Chattapadhyay. Kokkata: Pascimbanga Rajya Pustaka Parst, 1994.
6. Kālidāsa. *Abhijñānaśakuntala*. Ed. Satyanarayana Chakrobarty with Commentary *Arthodyotanikā* of Rāghavbhṭṭa. Kolkata: Sanskrit Pustak Bhandar, 1988.
7. Bhavabhūti. *Uttara-Charita.* Ed. Saradaranjan Ray with Sanskrit Commentary, English Translation, Critical and Explanatory Notes and Introduction. Kolkata: Name of Publisher not found, Sept. 1924. Seventh revised and enlarged Edn. On 1966 Kumudranjan Ray.

साहित्यशास्त्रे सन्धितत्त्वस्योपयोगः

सौम्यदीप्तसेनः[1]

शिष्यतेऽनुशिष्यतेऽपूर्वोऽर्थो बोध्यते अनेनेति शास्त्रम्। तेन शास्त्रपदेन वेदस्मृतिपुराणादीनां ग्रहणम्। शासनात् शंसनात् शास्त्रमिति व्युत्पत्त्या शास्त्रं नाम धर्मशास्त्रम्। पुनः शासनात् शास्त्रमिति व्युत्पत्त्या शास्धातोः "सर्वधातुभ्यः ष्ट्रन्" इति उणादिसूत्रेण ष्ट्रन्प्रत्यये निष्पन्नस्य शास्त्रशब्दस्य अनुशासनरूपोऽर्थो भवति। शिष्यन्ते धर्माः अनेनेति शास्त्रम्। वस्तुतस्तु अदृष्टपुरुषार्थलाभोपायभूतं हि शास्त्रम्। मोक्षरूपचरमपुरुषार्थज्ञानाय नः शास्त्रज्ञानेन प्रयोजनं भवति। उच्यते च न्यायमञ्जर्याम् "इह खलु प्रेक्षापूर्वकारिणः पुरुषार्थसम्पदमभिवाञ्छतः तत्साधनाधिगमोपायमन्तरेण तदवाप्तिममन्यमानाः तदुपायावगतिनिमित्तमेव प्रथममन्वेषन्ते। दृष्टादृष्टभेदेन च तद् द्विविधः पुरुषार्थस्य पन्थाः। तस्य दृष्टे विषये रुचिः प्ररूढवृद्धव्यवहार सिद्धान्वयव्यतिरेकाधिगतसाधनभावे भोजनादावनपेक्षितशास्त्रस्यैव भवति प्रवृत्तिः। न हि मलिनः स्नायाद् वुभुक्षितो वाऽश्नीयादिति शास्त्रमुपयुज्यते। अदृष्टे तु स्वर्गापवर्गमात्रे नैसर्गिकमोहान्धतमसविलुप्तालोकस्य शास्त्रमेव प्रकाशः। तदेव सकलसदुपायदर्शने दिव्यं चक्षुरस्मदादेः, न योगिनामिव योगसमाधिजज्ञानाद्युपायान्तरमपीति। तस्मादस्मदादेः शास्त्रमेवाधिगन्तव्यम्।" इति। तेन श्रुतिस्मृतिसाहित्यादीनां समेषां शास्त्रत्वेन ग्रहणम्। माधवाचार्येण सर्वदर्शनसंग्रहे उक्तम्-

"शास्त्रं च वेदाः स्मृतयः पुराणं च तदात्मकम् ।
इतिहासः पञ्चरात्रं भारतं च विदुर्बुधाः।।
ऋग्यजुः सामाथर्वाख्या भारतं पञ्चरात्रकम् ।
मूलरामायणं चैव शास्त्रमित्यभिधीयते"।। इति।

ननु किं नाम साहित्यमिति चेदुच्यते सहितयोर्भावः साहित्यम्। सहितशब्दात् ष्यञ्प्रत्यये साहित्यशब्दस्य निष्पत्तिः। उच्यते च कुन्तकाचार्येण "सहितौ सहितभावेन साहित्येनावस्थिते" इति। अत्र सहितौ नाम शब्दार्थौ सहितौ। साहित्यस्य शास्त्रं साहित्यशास्त्रम्। साहित्यस्वरूपप्रतिपादकं शास्त्रमित्यर्थः। तेन अलंकारछन्दसां तदङ्गत्वेन साहित्यशास्त्रे अन्तर्भावः।

सन्धिः नाम संश्लेषः। वर्णानां संश्लेष एव सन्धिपदेन बुध्यते। वर्णविकारविशेष इति तात्पर्यार्थः। पाणिनिना अष्टाध्याय्यां सन्धिसंज्ञाविषये तथा किमपि नोक्तं केवलं 'परः सन्निकर्षः संहिता[2]' इति सूत्रितम्। परः प्रकृष्टो यः सन्निकर्षः संश्लेषः, परस्परेण स्वराणां स्वराधिरूढानां च व्यञ्जनानां सा संहितेत्युच्यते। भट्टोजिदीक्षितेन सिद्धान्तकौमुद्यां सूत्रस्यास्य वृत्तौ कथ्यते वर्णानामतिशयितः सन्निधिः

---

[1] सहकारी अध्यापकः, संस्कृतसंकायः, राजा-राममोहन-महाविद्यालयः, पश्चिमवङ्गः।

2 'परः सन्निकर्षः संहिता'. *अष्टाध्यायी* (१/४/१०९)

संहितासंज्ञः स्यात्। अत्र सन्निकर्षो नाम सामीप्यम्।प्रस्तुतस्य सूत्रस्य व्याख्याने काशिकायामुच्यते "परशब्दोऽतिशये वर्तते। सन्निकर्षः प्रत्यासत्तिः। परो यः सन्निकर्षः वर्णानामर्द्धमात्राकालव्यवधानम्, स संहितासंज्ञो बोध्यः।" दध्यत्र, मध्वत्र इत्यादीनि उदाहरणानि। न्यासकारेण सन्निकर्षस्य अर्थद्वयं स्वीकृतं प्रत्यासत्तिः, संश्लेषश्च। परन्तु अत्र प्रत्यासत्तिरूपः अर्थो गृहीतः। संश्लेषस्तु न गृह्यते, तस्य वर्णेष्वसम्भवात्। प्रत्यासत्तिस्त्वपेक्षाकृतभेदात् प्रकर्षाप्रकर्षाभ्यां प्रयुज्यमानापरग्रहणेन विशिष्यत इति युक्तं तस्य विशेषणम्। न्यासकारमते संहिता हि 'पदस्य पदान्तरेण यदानन्तर्यं तत्रैव लोके संहिताशब्दः प्रसिद्धः'इति। महाभाष्ये सूत्रस्य व्याख्यानवेलायां प्रदीपकारेण उच्यते 'पूर्ववर्णोच्चारणानन्तरमेव यद्वर्णान्तरमुच्चार्यते न तु तच्छुन्यान्तरालसद्भावः स परः उत्कृष्टः सन्निकर्षः प्रत्यासत्तिलक्षणः संहितासंज्ञः'इति। शौनकविरचिते ऋक्प्रातिशाख्ये प्रसङ्गेऽस्मिन् सूत्रद्वयं प्रणीतम्। ते च 'संहिता पदप्रकृतिः[3]', 'पदान्तान् पदादिभिः सन्दधदेति यत् सा कालाव्यवायेन[4]'चेति। संहितायाः पदानि प्रकृतिभूतानीत्युक्तम्। पदान्तान् पदादिभिः यत् एकीकुर्वन्नेति ग्रन्थमनुसरति सा संहितोच्यते इति उवटभाष्ये कथितम्। वस्तुतस्तु वर्णानां पारस्परिकसन्निधिरेव संहिता कथ्यते। तेन संहितायां कृतायां प्रायो वर्णानां विकृतिः भवति। पूर्वोत्तरवर्णानामव्यवधानेन परस्परेण सन्धानं संश्लेषः सन्धिरिति कातन्त्रव्याकरणे कथ्यते। अक्षराणाम् अन्योन्यं सन्धानं मेलनं सन्धिरिति सारस्वते कथ्यते। हरिनामामृते व्याकरणे सन्धिविषये उच्यते –

"सर्वप्रकरणव्यापी वर्णमात्रनिमित्तकः।
वार्णो विकारः सन्धिः स्याद्विषयापेक्षकः क्वचित्"।। इति।

- **अलंकारशास्त्रे सन्धितत्त्वज्ञानस्योपयोगः**

<u>शब्दालंकारे सन्धितत्त्वस्योपयोगः</u>

अलंकारशास्त्रे श्लेषालंकारालोचनाकाले सभङ्गाभङ्गोभयात्मकभेदेन श्लेषालंकारस्य त्रिधा विभागः कृतः। तत्रोदाहरणरूपेण कथितं –

"येन ध्वस्तमनोभवेन वलिजित्कायः पुरा स्त्रीकृतो
यश्चोद्वृत्तभुजङ्गहारवलयो गङ्गां च योऽधारयत्।
यस्याहुः शशिमच्छिरोहर इति स्तुत्यञ्च नामामराः
पायात् स स्वयमन्धकक्षयकरः त्वांसर्वदोमाधवः[5]"।।इति।

---

3 *ऋग्वेदप्रातिशाख्यम्*, (द्वितीयपटलम्. १)
4 तत्रैव (२)
5 *साहित्यदर्पणः*, (दशमः परिच्छेदः. पृ- ३१)

द्व्यर्थकेन श्लोकेन सभङ्गाभङ्गोभयात्मकरूपः त्रिविधः श्लेषः प्रतिपादितः। श्लोकस्य विष्णुपक्षे एकः अर्थः तथा शिवपक्षे एकः अर्थः भवति। तत्र श्लोके वर्तमानस्य “सर्वदोमाधवः”इति पदस्य सन्धिविच्छेदभेदेन अर्थद्वयं भवति। सर्वदः माधवः इत्येवं विच्छेदे सति पदेनानेन विष्णुं बोधयति। अपरतः सर्वदा उमाधवः इत्येवं विच्छेदे तु उमापतिं शिवं बोधयति। सन्धिज्ञानादेव अर्थद्वयस्य बोधः सम्भवति।

साहित्यदर्पणकारेण पुनरुक्तवदाभासरूपशब्दालंकारस्य व्याख्यानवेलायां “भाति सदानत्यागः” इति उक्तम्। अत्र दानत्यागयोः पुनरुक्तवदाभासो भवति। दानत्यागाभ्यां सह वर्तते इति पौनरुक्त्यावभासः। सदा सर्वदा अनत्या अनमनेन अगः पर्वतः इत्यत्र पर्यवसानम्। न द्वयोर्दानत्यागयोः। अर्थपरिवृत्तिसहत्वासहत्वाभ्यां क्वचित् परिवृत्यसहत्वादर्थालंकारत्वम् क्वचित् तत् सहत्वाच्छब्दालंकारत्वम्। सन्धिज्ञानादेव पुनरुक्तवदाभासः स्पष्टो भवति।

<u>अर्थालंकारे सन्धितत्त्वस्योपयोगः -</u>

उपमालंकारस्यालोचनाकाले विश्वनाथेनोक्तं-

“साधर्म्यमुपमा भेदे पूर्णा लुप्ता च साग्रिमा।
श्रौत्यार्थी च भवेद्वाक्ये समासे तद्धिते तथा”।। इति।

साधर्म्यमुपमाभेदे इति पदस्य पृथक्तया पाठः संस्करणभेदात् दृश्यते। साधर्म्यं हि उपमालंकारस्य वैशिष्ट्यम्। साधर्म्यं नाम सादृश्यम्। तेन सादृश्यं सर्वत्रैव अस्ति। परन्तु उपमा भेदे तथा उपमाभेदे इति पदद्वयेन भेदाभेदप्राधान्यं सादृश्यं बुध्यते। साधर्म्यं त्रिप्रकारकं भेदप्रधानं साधर्म्यम्, अभेदप्रधानं साधर्म्यम्, भेदाभेदप्रधानं साधर्म्यञ्चेति।एतैरेव त्रिभिः प्रकारैः साधर्म्याश्रयः समग्र एवालंकारवर्गः संगृहीतः। तेन भेदप्राधान्यं व्यतिरेकादिवत्, अभेदप्राधान्यं रूपकादिवत्। यदाहुः “यत्र किञ्चित्साम्यं कश्चिच्च विशेषः स विषयः सदृशतायाः”इति। एवमत्र सन्धिज्ञानेनैव उपमाया भेदज्ञानं स्पष्टं भवति। एतद्विहायापि अलंकारशास्त्रेषु बहुत्र सन्धितत्त्वज्ञानादेव अर्थपरिष्कारस्य निदर्शनं दृश्यते।

- **छन्दश्शास्त्रे सन्धितत्त्वज्ञानस्योपयोगः**

छन्दश्शास्त्रमपि सन्धितत्त्वज्ञानादृते अपूर्णतां भजते। छन्दश्शास्त्रोपरि विरचितेषु ग्रन्थेषु गङ्गादासविरचिता छन्दोमञ्जरी अन्यतमा। तत्र यतिस्थाननिर्देशविषये उच्यते-

“क्वचिच्छन्दस्यास्ते यतिरभिहिता पूर्वकृतिभिः
पदान्ते सा शोभां व्रजति पदमध्ये त्यजति च।
पुनस्तत्रैवासौ स्वरविहितसन्धिः श्रयति तां
यथा कृष्णः पुष्णात्वतुलमहिमा मां करुणया”।। इति।

वस्तुतस्तु यतिभिःपद्ये शोभा बर्धते। किन्तु यत्र तत्र यतिनिर्देशः शोभां हरति। सा यतिः यदि पदमध्ये स्थिता भवति तर्हि शोभां त्यजति, पदमध्यस्थिता यतिरतिदुःश्रवेति भावः। किन्तु पदमध्ये एव असौ यतिः स्वरविहितसन्धिः सती शोभां श्रयति। उदाहरणरूपेण प्रस्तुतश्लोकस्य अन्तिमः पादः कथ्यते।

अत्र शिखरिणी नाम वृत्तम्। तल्लक्षणं कथ्यते- रसैः रुद्रैश्छिन्ना यमनसभला गः शिखरिणी इति। क्रमेण य-म-न-स-भ-ल-ग-गणैः एकेन गुरुणा च घटिता, रसै षड्भिः रुद्रैः एकादशभिश्च अक्षरैः छिन्ना कृतयतिः शिखरिणी नाम वृत्तं भवेत्।शिखरिणीवृत्ते प्रथमतः षड्भिरक्षरैर्यतिः कार्या, उदाहृते यथेत्यादिपादे पूष्णेतिपर्य्यन्तं प्रथमा यतिः सा च पदमध्ये स्थिता दुःश्रवेति। पूष्णात्वतुलेति स्वरसन्धिवशतोऽपि शोभाभावः। वस्तुतस्तु छन्दोनिर्णयः सन्धिज्ञानादृते न सम्भवति। छन्दोलक्षणानुसारं गणविभागः सन्धिज्ञानम्अपेक्षते।

- **काव्यशास्त्रे सन्धितत्त्वज्ञानस्योपयोगः**

(1) नान्दीश्लोके सन्धितत्त्वस्योपयोगः

स्वप्नवासवदत्तनाटके नान्दीश्लोक उच्यते-

"उदयनवेन्दुसवर्णावासवदत्ताबलौ बलस्य त्वाम्।
पद्मावतीर्णपूर्णौ वसन्तक्रमौ भुजौ पाताम्[6]"।। इति।

"आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्" इति वचनात् श्लोकेनानेन आशीर्वचनपूर्वं नाट्यवस्तु प्रस्तौति। उदयनवेन्दुसवर्णौ आसवदत्ताबलौ पद्मावतीर्णपूर्णौ वसन्तक्रमौ बलस्य भुजौ त्वां पातामिति अन्वयः। उदयकालस्य यो नवेन्दुः नूतनश्चन्द्र इत्यर्थः। तस्य सवर्णौ समानवर्णौ तुल्यवर्णौ उदयकालीनचन्द्रतुल्यवर्णविशिष्टौ इत्यर्थः। तथा दत्तः आसवः मद्यं यसौ सा आसवदत्ता। "वाहिताग्न्यादिषु" इत्यतो दत्तशब्दस्य परनिपातः। आसवदत्ता अवला याभ्यां तौ आसवदत्तावलौ। पुनश्च पद्माया श्रिया अवतीर्णेनावतारेण पूर्णौ। वसन्त इव क्रमौ मनोज्ञौ इत्यर्थः। अत्र कविना श्लेषेण प्रधानपात्राणां नामनिर्देशः कृतः। किञ्च, पत्रावली नान्दी अत्र कविना प्रयुक्ता। एवं पत्रावलीनान्दीसूचनाय तथा श्लेषरक्षार्थं सन्धितत्त्वज्ञानमावश्यकं भवति। किञ्च, वाणभट्टविरचितकादम्बर्या अर्थावबोधः कदापि सन्धितत्त्वज्ञानेन विना न सम्भवति।

(2) प्रस्तावनायां सन्धितत्त्वस्योपयोगः

उद्घात्यकप्रस्तावनाविषये कथनकाले उदाहृतं – "क्रूरग्रहः सकेतुश्चन्द्रमसम्पूर्णमण्डलमिदानीम् अभिभवितुमिच्छति बलात्" इति। अस्याः पङ्क्तेः प्राकृतिक एकः अर्थो भवति। स च – सकेतुः क्रूरग्रहः राहुः पूर्णमण्डलं चन्द्रमसम् इदानीं बलाद् अभिभवितुमिच्छति। अत्र चन्द्रमसं पूर्णमण्डलमित्येवं च्छेदः। परन्तु मुद्राराक्षसे नाटके चाणक्यः मनोगतमर्थं चन्द्रं चन्द्रगुप्तम् असम्पूर्णमण्डलम् असम्पूर्णसाम्राज्यं मत्वा रङ्गमञ्चं प्रविष्टः। अत तत्परमुच्यते –"आः, क एष मयि जीवति चन्द्रगुप्तमभिभवितुमिच्छति।" इति। तत्र च चन्द्रम् असम्पूर्णमण्डलमित्येवं च्छेदः। उद्घात्यकस्योदाहरणमिदम्। तल्लक्षणं हि –

---

6 *स्वप्नवासवदत्तम्* (नान्दी)

"पदानि त्वगतार्थानि तदर्थगतये नराः।
योजयन्ति पदैरन्यैः स उद्घात्यक उच्यते"।। इति।

सन्धितत्त्वज्ञानेनैव अत्र द्वौ अर्थौ प्राप्तौ।

(3) गुणरीत्योरालोचनप्रसङ्गे सन्धितत्त्वस्योपयोगः

"रीतिरात्मा काव्यस्य"[7] इति वचनात् काव्यस्य आत्मा हि रीतिः। रीतीनां मध्ये वैदर्भीरीतेः सर्वोत्कृष्टत्वं प्रतिपादितं समस्तगुणोपेतत्वात्। तत्र गुणसन्निवेशः तु सन्धिज्ञानम् अपेक्षते। पण्डितराजेन जगन्नाथेन माधुर्यगुणस्य लक्षणं कृतं - "संयोगपरह्रस्वातिरिक्तवर्णघटितत्वे सति पृथक् पदत्वं माधुर्यम्"इति। एवं सन्धितत्त्वज्ञानेनैव काव्ये कुत्र माधुर्यगुणस्य सन्निवेशः कविना कृतः इति बुध्यते पाठकैः। वैदर्भीरीतेरुदाहरणं कथितं

"गाहन्तां महिषाः निपानसलिलं शृङ्गैर्मुहुस्ताडितम्
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु।
विस्रब्धं क्रियतां वराहततिभिर्मुस्ताक्षतिः पल्वले
विश्रान्तिं लभतामिदं च शिथिलज्यावद्धमस्मद्धनुः[8]"।।इति।

अत्र श्लोके समस्तगुणाः उपन्यस्ताः कालिदासेन। शृङ्गैर्मुहुस्ताडितमिति पदे पृथक्पदत्वात् माधुर्यगुणः। माधुर्यसौकुमार्ययोरभावात् समासबहुला अत्युल्वनपदा च भवति गौडी। पुनः केवलं माधुर्यसौकुमार्योपपन्ना ओजःकान्त्यभावात् समासविरला भवति पाञ्चाली। तेन समस्तगुणानां सन्निवेशनं वैदर्भीरीतेः तथा काव्यस्य उत्तमत्वे मूलम्। तच्च सन्धिज्ञानमृते न सम्भवति। किञ्च, काव्यानां चमत्कारित्वे तथा अर्थनिरूपणे सन्धितत्त्वज्ञानस्योपयोगो वर्तते। दण्ड्यादीनां कवीनां लेखस्य बोधः न स्यात् सन्धिज्ञानादृते।

(4) काव्यपङ्क्तौ सन्धितत्त्वस्योपयोगः

कवीनां सुकौशलेन प्रयोगः अत्र प्रमाणम्। उदाहरणस्थलमेकं प्रदर्श्यते। तथाहि भारविना किरातार्जुनीये प्रथमे सर्गे उच्यते—

"कथाप्रसङ्गेन जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः।
तवाभिधानाद्व्यथते नताननः सुदुःसहान्मन्त्रपदादिवोरगः[9]"।। इति।

अत्र कथाप्रसङ्गेन इति पदस्य द्विधा अर्थावबोधः भवति। कथाप्रसङ्गेन गोष्ठीवचनेन जनैः तत्रत्यैरित्यर्थः। अन्यत्र तु कथाप्रसङ्गेन विषवैद्येन इत्यर्थः। विषविध्वंसिनीः कथाः प्रसञ्जयतीति क्रियायोगाद्

---

7 *काव्यालंकारसूत्रवृत्तिः*.(प्रथमाधिकरणम्, द्वितीयोऽध्यायः सूत्रसंख्या- ६)

8 *अभिज्ञानशकुन्तलम्*.(द्वितीयः अङ्कः, श्लोकसंख्या- ६)

9 *किरातार्जुनीयम्* (प्रथमसर्गः, श्लोकसंख्या-२४)

विषवैद्यस्याभिधानं कथाप्रसङ्ग इति। इनशब्दोऽधिपतिवचनः, जनशब्दो वर्गवाची। कथाप्रसङ्गेनजनैः विषवैद्यस्याधिपतिवर्गैरित्यर्थः।

टीकाकृतः काव्यस्य सूक्ष्मेक्षिकतया आलोचनाकाले पाठकानां सविधे बहून् अर्थान् उत्थापयन्ति। तेन पाठकाः अपि समृद्धा भवन्ति। एवं कुत्रापि काव्यस्य समालोचनायां मूलमर्थं व्यतिरीच्य अर्थान्तरस्वीकारे सन्धितत्त्वज्ञानम् एक उपायभूतो भवति। तत्र उच्यते नैषधचरिते – रसैः कथा यस्य सुधावधीरणी नलः स भूजानिरभूद्गुणाद्भुतः।

“सूवर्णदण्डैकसितातपत्रितज्वलत्प्रतापावलिकीर्तिमण्डलः[10]”।। इत्यत्र “सुधावधीरणी” इति पदस्य द्विधा अन्वयो भवति। यस्य कथा नवभिः शृङ्गादिभिः रसै षड्रसां सुधामवधीरयति तिरस्करोतीत्येवंशीला सुधावधीरणी। यस्य कथा रसैः कृत्वा सुधाया अवधिम्। उत्कृष्टां सुधामिति यावत्। तामीरयति क्षिपतीत्येवंशीला। सुधावधिः रणी इत्येवं च्छेदे पाठे सति भिन्नोऽर्थो भवति। यस्य कथा रसैर्हेतुभिः सुधाया अवधिः। एतत्परममृतं नास्तीत्यर्थः।“रसैः” इत्यत्रापि च्छेदे सति भिन्नोऽर्थो भवति। रसा एः इति च्छेदः। यस्य कथा एः कामस्य रसा भूः स्थानम्। सर्वाभिलाषजनिकेत्यर्थः। एवमत्रापि सन्धितत्त्वज्ञानेन प्रयोजनं भवति।

<u>(5) **आधुनिके काव्ये सन्धितत्त्वस्योपयोगः**</u>

आधुनिकेऽपि काव्ये सन्धितत्त्वस्योपयोगो वर्तते। उच्यते च बालकृष्णभट्टविरचिते ‘विद्वद्भूषणम्’ इति काव्ये -

“विद्वज्जनैः सहास्योपक्रममतिरागतश्रीकः।
चातुर्यविरहितः स्याद्येनसदोपासितागुरवः”॥ इति।

श्लोकस्य अन्तिमे पादे उल्लिखितस्य सदोपासिता इति पदस्य द्विधा अन्वयो भवति। एकस्मिन् पक्षे सदा उपासिता सदोपासिताः। सर्वदा सेविता इत्यर्थः। यैर्जनैः सर्वदा गुरवः सेविता भवन्ति ते सज्जना इति वक्तुं शक्यते। विद्वज्जनैः साकं एषां स्थितिः वर्तते। अपरतः, सदः अपासिता सदोपासिताः। सदसः सभायाः दूरीकृता इत्यर्थः। ये गुरवः सभायाः अपाकृताः भवन्ति स सदोपासित इति प्रतिभाति। ईदृशः सदोपासितः जनः विद्वज्जनैः हसनयोग्यः इति परिचीयते। एवमर्थद्वयस्वीकारे सन्धितत्त्वज्ञानेन प्रयोजनं भवति।

वस्तुतस्तु व्याकरणविषयीभूतं सन्धितत्त्वं न केवलं काव्यशास्त्रेऽपि तु सर्वेषु शास्त्रेषु अर्थावबोधे एकम् उपायभूतं भवति। सन्धितत्त्वनिर्देशिका एका कारिका कथ्यते -

“संहितैकपदे नित्या नित्या धातूपसर्गयोः।
समासेऽपि च नित्या स्यात् सा चान्यत्र विभाषिता”।। इति।

---

10 *नैषधचरितम्* (प्रथमसर्गः, श्लोकसंख्या-२)

अत्र एकपदे, धातूपसर्गयोः तथा समासे सन्धेरवश्यकर्तव्यत्वेन निर्देशोऽस्ति। अन्यत्र यद्यपि विभाषिता इति कथितं तथापि सर्वत्र सन्धियुक्तः पाठः श्रुतिसुखदो भवति। काव्येषु दण्ड्यादयः कवयः शब्दानां चमत्कारित्वं प्रतिपादयन्ति। तच्च चमत्कारित्वं यथायथं सन्धितत्त्वज्ञानं विना कदापि न भवति। अतः काव्यस्य उत्तमत्वे तथा रसात्मकत्वे सन्धितत्त्वस्य गुरुत्वमनस्वीकार्यमिति शम्।

ग्रन्थानुक्रमणी

अभिज्ञानशकुन्तलम्. सम्पा. सत्यनारायण चक्रवर्ती, कलकाता : संस्कृत पुस्तक भाण्डार. 1988.

आदर्श अलङ्कार विचिन्ता. सम्पा. विपदभञ्जन पाल, कलकाता : सदेश. 1419.

ऋग्वेदप्रातिशाख्यम्. अमरकुमार चट्टोपाध्याय, कलकाता : संस्कृत पुस्तक भाण्डार, 2016.

छन्दोमञ्जरी. सम्पा. गुरुनाथ विद्यानिधि, कलकाता, संस्कृत पुस्तक भाण्डार, 1411. (वङ्गाब्दः)

दि काशिकावृत्ति. सम्पा. द्वारकानाथदासशास्त्री, कलिकाप्रसादशुक्लः, वाराणसी : प्राच्य भारती प्रकाशन. 1965.

न्यायमञ्जरी. सम्पा. अमित भट्टाचार्य, कलकाता : संस्कृत वुक डिपो. 2006.

लघुशब्देन्दुशेखरः. सम्पा. विश्वनाथमिश्रः, वाराणसी : चौखम्बा संस्कृत प्रतिष्ठान. 2012.

वैयाकरणसिद्धान्तकौमुदी. सम्पा. गिरिधरः शर्मा परमेश्वरानन्दशर्मा च. दिल्ली : मोतिलाल बनारसीदास. 1961.

व्याकरणमहाभाष्यम्. सम्पा. शिवदत्त शर्मा. वनारसी : चौखम्बा संस्कृत प्रतिष्ठान. 1988.

साहित्यदर्पणः. सम्पा. अशोककुमार वन्द्योपाध्याय, कलकाता : सदेश. 2005.

नैयायिकानुमतधातुधात्ववयवप्रत्ययार्थान्वयः

विमलरक्षितः[1]

जगत्यस्मिन् सर्वव्यावहारासाधारणं कारणं हि ज्ञानम्। तत्र नैयायिकानुमतेषु चर्तुषु यथार्थानुभवेषु शाब्दबोधो ह्यन्यतमः। स च शाब्दबोधः शब्दाख्यप्रमाणाज्जायते इति प्राचीननैयायिकाः। तथाहि न्यायसूत्रकारः गौतमः शब्दप्रमाणलक्षणमाह – 'आप्तोपदेशः शब्दः' (1.1.7)[2] इति। एवञ्च, आप्तवक्तृक उपदेश एव शब्द इति लभ्यते,आप्तवक्तृकत्वाच्च तत् प्रमाणम्। स च उपदिश्यते अनेनेति व्युत्पत्या वाक्यात्मक एव। तच्च वाक्यमाकांक्षायोग्यतासन्निधिमत्पदसमूहात्मकमेव। अतो भाष्यकारः "न सामयिकत्वाच्छब्दादर्थसम्प्रत्ययस्य" (2.1.55) इति सूत्रस्य भाष्ये वाक्यस्वरूपमाह - "पदसमूहो वाक्यमर्थपरिसमाप्तौ"[3] इति। अत्र समर्थमिति शेषः। अर्थपरिसमाप्तौ सामर्थ्यञ्चाकांक्षायोग्यतासन्निधिमत्त्वे एव पदसमूहस्य सम्भवति नान्यथेति वाक्यार्थप्रमाकरणत्वेनाकांक्षायोग्यतासन्निधिमत्पदसमूहात्मकं वाक्यमेव शब्द इति प्राचीनोक्तं शब्दप्रमाणम्। तस्माद्वाक्याद्यः पदार्थसंसर्गात्मकोऽर्थोऽवधार्यते तद्विषयको बोध एव शाब्दबोधः संसर्गबोधः वाक्यार्थबोधो वेत्युच्यते।

नव्यास्तु तादृशपदज्ञानमेव शब्दत्वेन स्वीकुर्वन्ति मौनिश्लोकादौ पदाभावेऽपि ततः शाब्दबोधोदयेन व्यभिचारात्। अतः पदज्ञानमेव नव्यमते शब्दप्रमाणम्। तथाह्युक्तं कारिकावल्ल्यां विश्वनाथन्यायपञ्चाननमहोदयैः-

"पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी"।।[4] इति।

अत्रेदमवधेयं यत् पदज्ञानं नाम पदयोः पदानां वा ज्ञानम्,पदैकविषयकज्ञानेन शाब्दबोधस्यासम्भवात्, शाब्दबोधस्य वृत्तिज्ञानसहकृतपदज्ञानजन्यपदार्थस्मृतिविषय-पदार्थसंसर्गविषय-कयथार्थानुभवत्वेन एकेन पदेन च एकदा एकस्यैवार्थस्योपस्थितेः ततस्तादृशसंसर्गस्यासम्भवात् संसर्गस्यानुयोगिप्रतियोगनियामकत्वात् तयोश्चात्रानुपस्थितेः, प्रकृत्यादिसार्थकशब्दानां सार्थकशब्दान्तरं सहकृत्यैव स्वार्थान्वयबोधजनकत्वाच्च। अतः पदज्ञानं नाम वाक्यज्ञानमेवेति ध्येयम्। तत्र पदात्पदार्थोपस्थितौ वृत्तिश्च शाब्दबोधानुकूलः पदपदार्थयोः शक्तिलक्षणान्यतरात्मकः सम्बन्धः। एवं तादृश्या वृत्त्योपस्थितानाम् अर्थानामेवाकांक्षादिसहकारिकारणवशात्परस्परम् अन्वयो वाक्यार्थतामेति, अन्यथा एकसम्बन्धिज्ञानविधया घटशब्दादाकाशस्याप्युपस्थितेस्तस्यापि शाब्दबोधविषयतापत्तेः। एवञ्च, वाक्यार्थो

---

[1] सहकारी अध्यापकः, आसाननगरमदनमोहनतर्कालङ्कारकलेज्, नदीया, पश्चिमवङ्गः।

[2] *न्यायदर्शनम्*, सम्पा. फणिभूषणतर्कवागीशः (प्रथमभागः, कलिकाता, 1981), पृ.158

[3] तत्रैव, पृ.293

[4] *कारिकावली*, सम्पा. आत्मारामशर्मा, (राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, 2002), पृ.356

नाम वृत्तिज्ञानसहकृतपदज्ञानजन्यपदार्थस्मृतिविषयीभूतानां पदार्थानामाकांक्षादिसहकारिकारणवशान्मिथः संसर्ग एवेति नव्यनैयायिकाः। अतः तादृशसंसर्गविषयकानुभवः एव शाब्दबोध इति नैयायिकराद्धान्तः। स च पदवृत्त्योपस्थितपदार्थसंसर्गात्मकः वाक्यार्थः संसर्गमर्यादयैवानुभाव्यते न तु पदवृत्त्या वाक्यार्थस्यापूर्वत्वात्। तथाह्युच्यते गदाधरभट्टाचार्येण व्युत्पत्तिवादे- [5]"शाब्दबोधे चैकपदार्थे अपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते।" इति। संसर्गमर्यादा चाकांक्षापरपर्यायानुपूर्वीविशेषः।

तत्र शाब्दबोधे संसर्गेसंसर्गत्वं नाम विशेष्यत्वविशेषणत्वान्यधीविषयत्वम्। तथाहि विशिष्टज्ञाने विशेष्यविशेषणभावप्रयोजकः विषय एव संसर्गः। यथा दण्डी पुरुष इत्यत्र दण्डपुरुषयोः विशेषणविशेष्यभावनिरूपकः गुणपदार्थः संयोगः संसर्गपदवाच्यः, तदभावे च तयोर्विशेष्यविशेषणत्वप्रतीतिर्नैव सम्भवेत्। तथा च विशिष्टबुद्धिमात्रं विशेष्यविशेषणसम्बन्धविषयं भवति। अत एव तादृशविशिष्टबुद्धिनिरूपितविषयता त्रिविधा विशेष्यताविशेषणतासंसर्गताभेदात्। तत्र तादृशविशेष्यत्वविशेषणत्वाभ्यामन्या या धीनिरूपिता विषयता सैव संसर्गताख्या। तद्वान् संसर्गः। तज्ज्ञानं हि विशिष्टबुद्धिप्रयोजकम्। तदुक्तं मुक्तावल्ल्यां समवायस्य सम्बन्धत्वे प्रमाणप्रदर्शनकाले विश्वनाथवर्यैः-" तत्र प्रमाणं तु गुणक्रियादिविशिष्टबुद्धिर्विशेष्यविशेषणसम्बन्धविषया विशिष्टबुद्धित्वाद्दण्डी पुरुष इति विशिष्टबुद्धिवदित्यनुमानम्।"[6] इति। शाब्दबोधे च पदवृत्त्यलभ्यः अपि आकांक्षाभास्यः स सम्बन्धरूपः विषयःसंसर्गपदेनैव व्यवह्रियते इति ध्येयम्। स च क्वचिद्भेदात्मकः क्वचिच्चाभेदात्मक इति विशेषः।

तत्र तादृशपदार्थानुयोगिप्रतियोगिकत्वात् संसर्गस्य तादृशपदार्थज्ञानपूर्वकत्वाच्च तादृशसंसर्गज्ञानस्य पदार्थसंसर्गविषयकबोधविषयपदार्थरूपेण यथा धात्वर्थःकारणं भवति तथैव प्रत्ययार्थोऽपि, वाक्यस्य धातुतिङ्कृत्सनादिपदावयवकत्वात्तयोश्चशक्ताभ्यां धातुप्रत्ययरूपपदाभ्यां वृत्त्योपस्थितत्वात्। तयोश्चमिथोऽन्वयबोधाभावे नैव निराकांक्षो वाक्यार्थोऽवबुध्यते, प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वात् धातोश्च धातूत्तरविहितप्रत्ययप्रकृतित्वात्। अतः शाब्दबोधाय धातुप्रत्ययार्थान्वय अपेक्षित एव। तत्रापि शास्त्रकारैः बहुत्र सामान्यतो विशेष्यविशेषणभावेनैव तादृशसंसर्गस्य निर्देशात् विशेषतः तत्स्वरूपस्य प्रतिपादनाभावात् कीदृशः स संसर्ग इति विवेचनीयम्।

तत्र धातुप्रकृतिकप्रत्ययेषु धात्ववयवप्रत्यया ह्यन्यतमाः। अत्रेदमवधेयं यत् धात्ववयवप्रत्ययास्तावत् द्विविधाः सुबन्तप्रकृतिकाः क्यजादयो धातुप्रकृतिकाश्च णिजादयः। धातुघटकत्वेन धात्ववयव इति अन्वर्थता तेषाम्। तदुच्यते जगदीशतर्कालङ्काराचार्यैः शब्दशक्तिप्रकाशिकायाम् - "अस्तु वा सान्वर्थसंज्ञानुरोधेन धात्वन्तावयवरूप एव प्रत्ययो धात्वंशप्रत्ययः, पिपक्षादिधात्वन्तभागत्वात् सनादिप्रत्ययस्य।"[7] इति। सूत्रितञ्च पाणिनिना 'सनाद्यन्ता धातवः' (3.1.32) इति। तत्र चोभयविधप्रत्यययोर्मध्ये

---

[5] *व्युत्पत्तिवादः*, सम्पा. अयनभट्टाचार्यः (कलिकाता,2008), पृ. 03

[6] *कारिकावली*, सम्पा. आत्मारामशर्मा, (राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, 2002), पृ.87

[7] *शब्दशक्तिप्रकाशिका*, सम्पा. दुण्ढिराजशास्त्री,(वाराणसी, 2013), पृ. 440

धातुप्रकृतिकधात्वंशप्रत्ययार्थैः सह धात्वर्थस्यान्वय एवात्र विचारविषयः, न तु सुबन्तप्रकृतिकधात्वंशप्रत्ययार्थैः, प्रत्यासत्तेः। ते च धातुप्रकृतिकधात्वंशप्रत्ययाः पाणिनिना 'सन्', 'यङ्', 'णिच्', 'ईयङ्', 'णिङ्' तथा 'आय' इति षडेवाष्टाध्याय्यामनुशिष्टाः। तत्रादितः त्रयाणां सार्थकत्वेन ततस्त्रयाणां स्वार्थिकत्वेनादितः त्रयाणां प्रत्ययानामर्थैः सह धात्वर्थस्यान्वयोऽत्र विचारयिष्यते। तत्रापि च संसर्गस्यानुयोगिप्रतियोगिसापेक्षत्वेनात्र चानुयोगिप्रतियोगिरूपेण धात्वर्थधात्ववयवप्रत्ययार्थयोरुपस्थितत्वात् तेषामर्थपरिज्ञानं विना तेषामन्वयज्ञानस्यासम्भवात् नैयायिकनये धात्वर्थस्यधातुप्रकृतिकधात्ववयवप्रत्ययार्थस्य चस्वरूपनिर्णयपुरस्सरं तेषामन्वयप्रकारोऽत्र विवेचयिष्यते यथाक्रममधस्तात्।तत्र च सर्वेषां धात्ववयवप्रत्ययानां प्रकृतित्वेन धातोः, तदर्थ एवादौ निरूप्यते।

नैयायिकनये धात्वर्थः- धातुना स्वनिष्ठवृत्त्या शाब्दबोधानुकूलो योऽर्थ उपस्थाप्यते स एवार्थो धात्वर्थः। धातुत्वञ्च नैयायिकनयेयादृशानुपूर्व्यवच्छिन्नप्रकारताशालिनिश्चयत्वं स्वाश्रयोत्तरतृजर्थधर्मिकस्वाश्रयविषयक-धीजन्योपस्थितिव्यापारेण स्वाश्रयप्रतिपाद्यार्थ-प्रकारताकशाब्दत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदक-तात्पर्याख्यधिकरणं तादृशानुपूर्वीमच्छब्दत्वम्। स्वशब्देनात्रतादृशी विशिष्टा आनुपूर्वी ग्राह्या।तथाहि पक्ता इत्यत्र पच् इत्यस्य तृजर्थे कर्तरि प्रकारतयोपस्थितविक्लृत्यनुकूलव्यापारस्य स्वनिष्ठवृत्त्या उपस्थापकत्वेनपूर्वोक्तस्वरूपत्वात् तादृशे पकारोत्तराकारोत्तरचकाररूपानुपूर्वीमच्छब्दे पचि धातुत्वं सङ्गतं भवति। तदुच्यते जगदीशतर्काचार्यैः शब्दशक्तिप्रकाशिकायाम्-

"यो यत्स्वार्थस्योत्तरस्थतृजर्थे बोधनक्षमः।
स तादृशार्थकः शब्दो धातुस्त्रिविध ईरितः"।।[8] इति।

एवमेतादृशधातुना उपस्थाप्यः अर्थः हि प्राचीननवीनमतभेदात् भिद्यते। प्राचीना हि व्यापारमात्रमेव धात्वर्थत्वेनाङ्गीकुर्वन्ति। व्यापारफलञ्च ते कर्मत्ववाचकप्रत्ययवेद्यत्वेन स्वीकुर्वन्ति। परन्तु एवं स्वीकृते गमित्यज्योः समानार्थकतापतेदिति तद्दोषनिराकरणपरा नव्याः फलावच्छिन्ने व्यापारे अथवा फले व्यापारे वा खण्डशः शक्तिं स्वीकुर्वन्ति। तथा च गमित्यज्योः फलभेदाद्भेदः सिध्यति। तदुच्यते गदाधरभट्टाचार्यपादैः व्युत्पत्तिवादे- "अनायत्या फलव्यापारयोः खण्डशः शक्तिद्वयमेव धातोः स्वीकरणीयम्।"[9] इति।

अत्रेदमवधेयं यदत्र धात्वर्थव्यापारशब्देन क्रियामात्रं न ग्राह्यं नैयायिकैः ज्ञानादीनामपि ज्ञादिधात्वर्थरूपेणाङ्गीकारात् तेषां क्रियात्वाभावात्। तदुच्यते न्यायमञ्जर्यां जयन्तभट्टपादैः- " ननु क्रियावचनो धातुरिति जानातेरपि क्रियैव वाच्या स्यात्, सा च क्रिया ज्ञानात्मा पुरुषव्यापारः। नायं नियमः क्रियावचनो धातुरिति, गडि वदनैकदेशे इत्यपि दर्शनात्। अपि च घटमहं जानामीत्यत्र भवतः किं प्रत्यवभासते? घटमिति तावद्विषयः, अहमित्यात्मा, जानामीतितु चिन्त्यम्, किमत्र प्रकाशते इति। न व्यापारः परोक्षत्वात्।

---

[8] *शब्दशक्तिप्रकाशिका*, सम्पा. ढुण्ढिराजशास्त्री,(वाराणसी, 2013), पृ. 279

[9] *व्युत्पत्तिवादः*, सम्पा. हरेरामत्रिपाठी (नवदेहली, 2011), पृ. 317

फलं तु यद्यप्यत्र प्रकाशते तदेव तर्हि धातुवाच्यमभ्युपगतं भवति। तस्मान्न क्रियात्मकं ज्ञानम्। यदि च क्रियात्मकं ज्ञानमभविष्यन्न भाष्यकारः क्रियातः पृथगेनं निरदेक्ष्यत। निर्दिशति च 'बुद्धिकर्मणी अपि हि प्रत्यभिज्ञायेते, ते अपि नित्ये प्राप्नुत।' इति। तस्मादन्यज्ज्ञानमन्या च क्रियेति।"[10] इति। एवं नैयायिकनये फलं व्यापारश्च धात्वर्थ इति फलति। इदानीमधस्तात् धात्वर्थेन सह धात्ववयवप्रत्ययार्थस्यान्वयप्रकारो तेषामर्थनिर्देशपुरःसरं निर्णीयते।

धात्वर्थणिजर्थान्वयः- धातोरुत्तरं विहितःणिजपि अन्यतमः धात्वंशप्रत्ययः। स च णिच् द्विविधः सार्थकः निरर्थकश्च। तथाहि चोरयति इत्यादौ चुरादिधातुभ्यो विहितः णिच् हि नैयायिकनये निरर्थकः तथा 'हेतुमति च ' (पा.सू. 3.1.26) इति पाणिनिनानुशिष्टः णिच् च सार्थकः।तथा च नैयायिकनये सार्थकस्य तस्य णिच्प्रत्ययस्यार्थो हि हेतुकर्तृनिष्ठः व्यापारः। तत्र केचनानुकूलव्यापारार्थकत्वेनापि णिच्प्रत्ययं स्वीकुर्वन्ति, गमयति इत्यादौ गमनानुकूलव्यापारानुकूलकृतेर्बोधोदयेन गमनव्यापारस्य धात्वर्थतया कृतेश्चाख्यातार्थत्वेन पारिशेष्यात् अनुकूलव्यापारस्यैव णिजर्थत्वात्। परन्तु जगदीशतर्कालङ्कारादीनां नात्राभिरुचिः, धात्वर्थेन सह णिजर्थस्य व्यापारस्य अनुकूलतासम्बन्धस्य संसर्गमर्यादया लाभात्, तत्र शक्तिकल्पने गौरवात्। तदुच्यते जगदीशतर्कालङ्काराचार्यैः शब्दशक्तिप्रकाशिकायाम्- " चैत्रं भावयति , आत्मानं गमयति इत्यादौ धातुप्रकृतिकस्य णेरप्यनुकूलव्यापारो व्यापारमात्रं वाऽर्थः, तत्र धात्वर्थस्यानुकूलतायाः संसर्गविधयापि भानसम्भवात्।"[11] इति । 'हेतुमति च ' (पा.सू. 3.1.26) इत्यनुशासनेऽपि हेतुः स्वतन्त्रकर्तृप्रयोजकः आधारतयास्यास्तीति व्युत्पत्या हेतुमच्छब्देन प्रयोजकनिष्ठो व्यापार एव उच्यते। तथा च, णिच्प्रत्ययप्रकृतिभूतधात्वर्थकर्तुः प्रयोजकस्य कर्तुर्व्यापार एव णिजर्थः। स च व्यापारः अत्र प्रेषणाध्येषणादिरूप एव। तदुच्यते वाक्यपदीये साधनसमुद्देशे–

"प्रेषणाध्येषणे कुर्वन् तत्समर्थानि चाचरन्।
कर्तैव विहितः शास्त्रे हेतुसंज्ञां प्रपद्यते" ।।[12] इति।

तत्र कर्त्राख्यातस्थले अनुकूलतासम्बन्धेन धात्वर्थव्यापारस्यान्वयः । तथा च, 'रामो गमयति' इत्यत्र गम्धातोः संयोगावच्छिन्नव्यापारः, णिच्प्रत्ययस्य व्यापारः, आख्यातस्य संख्या वर्तमानकालः, कृतिश्चार्थाः। तत्र धात्वर्थस्य संयोगानुकूलव्यापारस्य णिजर्थे व्यापारे अनुकूलतासम्बन्धेन, णिजर्थव्यापारस्याख्यातार्थे कृतौ अनुकूलता-सम्बन्धेन,वर्तमानकालस्य च कृतौ कालिकसम्बन्धेन, कृतेःसंख्यायाश्च समवाय-सम्बन्धावच्छिन्नाश्रयतया प्रथमान्तार्थे रामे अन्वये सति संयोगावच्छिन्न-व्यापारानुकूलव्यापारानुकूलवर्तमानकालिककृतिमान् एकत्वाश्रयः रामः इति शाब्दबोधो भवति, नैयायिकैः सामान्यतः प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधस्यैव स्वीकारात्।

---

[10] *न्यायमञ्जरी*, सम्पा. गौरीनाथशास्त्री (वाराणसी, 2017), पृ. 31

[11] *शब्दशक्तिप्रकाशिका*, सम्पा. दुण्ढिराजशास्त्री (वाराणसी, 2013), पृ. 446

[12] *वाक्यपदीयम्*, सम्पा. हरिनारायणतिवारी (वाराणसी, 2015), पृ.175

अत्रेदवधेयं यत् स्वार्थिकणिजन्तचुरादिधातुभ्योऽपि प्रोक्तव्यापारार्थे पुनः णिजपि साधुः। तथा च, "देवदत्तः यज्ञदत्तेन धनं चोरयति।" इत्यादौ चौर्यक्रियाया अनुकूलः व्यापार एव णिजर्थः। अन्यत्र च, 'चौरः धनं चोरयति।' इत्यादौ णिचः स्वार्थिकत्वेन न तत्र धात्वर्थानुकूलव्यापारबोधः।

किञ्चात्र ध्येयं यत् णिजन्तधातुस्थले कर्त्राख्याते परे सति प्रयोजककर्तृनिष्ठसंख्याया आख्यातेनाभिहितत्वात् प्रयोजककर्तृवाचकपदात् प्रथमायां सिद्धायामपि णिच्प्रकृतिधात्वर्थकर्तृवाचकपदात् तृतीयैव तादृशकर्तृनिष्ठसंख्याया आख्यातेन अनभिहितत्वात्। तेन च 'चैत्रेण अन्नं पाचयति मैत्रः।' इति प्रयोगः सिध्यति। तस्य हि मुख्यभाक्तसाधारणस्य कर्तृत्वस्य निरूपकतया णिच्प्रकृतिधात्वर्थे अन्वयः, कर्तृत्वस्य हि णिच्प्रकृतिधात्वर्थव्यापारनिरूपितत्वात्।

अत्रायं विशेषो यत् 'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णौ' (1.4.52) इत्यादिपाणिनीयसूत्रानुशिष्टणिच्प्रकृतिधात्वर्थनिरूपितकर्तृत्वाश्रयबोधकात् पदात् द्वितीयैव भवति, अन्यथा तत्सूत्रविषयणिच्प्रत्ययप्रकृतिभूत-धात्वर्थनिरूपितकर्तृत्वाश्रयस्य कर्मत्वातिदेशवैयर्थ्यापत्तेः। तथा च णिजन्तस्य अपि धातुत्वेन धात्वर्थतावच्छेदकस्य णिच्प्रकृतिभूतधात्वर्थस्य णिजर्थव्यापारनिष्पाद्यत्वेन फलत्वेन, फलाश्रयस्य च कर्मत्वेन स्वतः एव गत्यर्थकधातुप्रकृतिकणिजन्तधातुप्रयोगे प्रयोज्यकर्तृवाचकात् द्वितीयाया सिद्धौ, गतिबुद्धीत्यादिसूत्रानुशासनस्य वैयर्थ्यापपत्तौ, तदपाकरणाय तस्य नियामकत्वम् अवश्यमभ्युपेयम्। तथा च, तादृशकर्तरि कर्मत्वातिदेशात्केचन नैयायिका गत्याद्यर्थकणिच्प्रत्ययप्रकृतिधात्वर्थकर्तृवाचकपदात् द्वितीयाया एव तदन्यत्र च तादृशप्रयोज्यकर्तृवाचकात् पदात् तृतीयाया एव साधुतामङ्गीकुर्वन्ति। तथा च, "मैत्रः चैत्रं ग्रामं गमयति।" इतिवत् 'मैत्रः चैत्रम् अन्नं पाचयति।' इति प्रयोगो नैव भवति, अपि तु 'मैत्रः चैत्रेण अन्नं पाचयति।' इत्येव प्रयुज्यते। तदुच्यते गदाधरभट्टाचार्यमहोदयैः व्युत्पत्तिवादे- "गत्यर्थादिभ्योऽन्यत्र णिच्प्रत्ययप्रकृतिधात्वर्थकर्तृवाचकपदान्न द्वितीया, तादृशकर्तुः कर्मातिदेशविषयत्वात्, तेन 'पाचयत्योदनं सहायेन।' इत्यादय एव प्रयोगाः भवन्ति, न तु 'पाचयत्योदनं सहायम्।' इत्यादयः।"[13] इति।

अन्ये च केचन नैयायिकाः णिजर्थं व्यापारमेव स्वीकुर्वाणाः णिच्प्रकृतिभूतधात्वर्थस्य तत्र स्वकर्तृत्वनिर्वाहकत्वं संसर्गं स्वीकुर्वन्ति, प्रयोज्यकर्तृ-प्रयोजकत्वेन हेतुकर्तुः प्रयोज्यनिष्ठकर्तृत्वनिर्वाहकव्यापारवत्त्वाच्च, तत्र च व्यापारार्थे णिचो विधानात्। तथा च एषां नये णिच्प्रकृतिधात्वर्थस्य णिजर्थव्यापारनिर्वाह्यत्वाभावेन णिजन्तधात्वर्थतावच्छेदकफलत्वाभावात् तत्सम्बन्धिनः प्रयोज्यकर्तुः कर्मत्वानुपपत्तौ तेषां कर्मत्वं विधीयते प्रोक्तसूत्रेण। तथा च, प्रयोज्यकर्तृवाचकपदात् गत्याद्यर्थप्रकृतिक-णिजन्तधातुप्रयोगे द्वितीयैव भवति, तदन्यत्र च अनभिहितकर्तृत्वबोधकत्वेन तृतीयैव। अत्रापि द्वितीयायाः कर्तृत्वमेवार्थः, कर्तर्येव कर्मत्वातिदेशात्। तदुच्यते व्युत्पत्तिवादे गदाधरभट्टाचार्यपादैः- " ये तु 'गतिबुद्धि.' इत्यादिसूत्रस्य संज्ञाविधायकत्वं वर्णयन्ति, तेषामयमाशयः, व्यापार एव णिजर्थस्तत्र

---

[13] *व्युत्पत्तिवादः*, सम्पा. हेरामत्रिपाठी (नवदेहली, 2011), पृ. 349

धात्वर्थक्रियायाः स्वकर्तृत्वनिर्वाहकत्वं संसर्गः, अतो न कर्तुः कर्मत्वं सूत्रान्तरप्राप्तम्।"[14] इति। एवञ्चास्मिन् मते 'मैत्रः चैत्रं ग्रामं गमयति।' इत्येव प्रयुज्यते, तदन्यत्र च 'मैत्रः चैत्रेण अन्नं पाचयति।' इत्यपि, न तु द्वितीयान्तम्। तथा च, 'मैत्रः चैत्रं ग्रामं गमयति।' इत्यस्मिन् वाक्ये गम्धात्वर्थस्य णिजर्थव्यापारे स्वकर्तृत्वनिर्वाहकत्वसंसर्गेण, गम्धात्वर्थे च चैत्रनिष्ठकर्तृत्वस्य निरूपकत्वसंसर्गेण, ग्रामस्य द्वितीयार्थे आधेयत्वे स्वाश्रयत्वसंसर्गेण, आधेयत्वरूपस्य द्वितीयार्थस्य धात्वर्थैकदेशे खण्डशः शक्तिमते च धात्वर्थेवा फले स्वरूपसम्बन्धेन, णिजर्थव्यापारस्याख्यातार्थे कर्तृत्वे अनुकूलतासम्बन्धेन, आख्यातार्थकर्तृत्वस्य च प्रथमान्तार्थे मैत्रे आश्रयत्वसंसर्गेण विशेषणता। तथा चात्र 'ग्रामनिष्ठसंयोगजनकः चैत्रनिष्ठकर्तृत्वनिरूपको यो गमनव्यापारः तादृशव्यापारकर्तृत्वनिर्वाहकव्यापारानुकूल-कृत्याश्रयो मैत्र' इति बोधो जायते।

अत्रापि यादृशकर्तृत्वं णिच्प्रकृतिधातूत्तराख्यातेन बोध्यते, तादृशमेव प्रयोज्यनिष्ठकर्तृत्ववाचकद्वितीयातृतीयाभ्यां बोध्यते इति ध्येयम्। एवं 'मैत्रः चैत्रेण अन्नं पाचयति।' इत्यत्र प्रागुक्तस्थलीयद्वितीयार्थस्य प्रयोज्यकर्तृत्वस्य 'चैत्रेण' इत्यत्र तृतीयार्थत्वेन द्वितीयार्थस्यान्वय इव तस्य तृतीयार्थस्यान्वयः धात्वर्थे बोध्यः। तथा चात्र, चैत्रनिष्ठकर्तृत्वनिरूपकः अन्ननिष्ठविक्लृत्यनुकूलः यः पाकः तादृशपाककर्तृत्वनिर्वाहक-व्यापारानुकूलकृतिमान् मैत्रः इति शाब्दबोधः फलति।

ननु एवं सति अगत्याद्यर्थक-णिच्प्रत्ययप्रकृतिभूतधात्वर्थनिरूपित-कर्तृत्वाश्रयवाचकात् पदात् सर्वत्र तृतीयायाः साधुत्वे 'अजिग्रहत्तं जनको धनुस्तत्' इति भट्टिप्रयोगे ण्यन्तग्रहधात्वर्थकर्तृत्वाश्रयवाचकात् पदात् द्वितीयाया असाधुतापद्येत, ग्रहधातोः प्रागुक्तपाणिनीयानुशासनपरिगणितधातुभ्यो भिन्नत्वात्। न चैतदिष्टमिति 'हेतुमति च' (पा.सू. 3.1.26) इति सूत्रप्रतिपाद्यस्य णिचो कर्तृत्वं व्यापारञ्चार्थं स्वीकुर्वन्ति केचन नैयायिकाः, हेतुकर्तुः स्वतन्त्रकर्तृप्रयोजकत्वात्। तत्र कर्तृत्वस्य व्यापारे निर्वाहकत्वसंर्गेण अन्वयो भवति। उक्तञ्चैतत् गदाधरभट्टाचार्यपादैरेव व्युत्पत्तिवादे- "वस्तुतः कर्तृत्वं व्यापारश्च पृथगेव णिजर्थः, विशिष्टलाभोऽन्वयबलात्।"[15] इति । तथा च, कर्तृत्वञ्चात्र णिच्प्रकृतिधातूत्तरविहितकर्त्राख्यातेन यादृशं बोध्यते तादृशमेव मुख्यभाक्तसाधारणं कर्तृत्वमत्र स्वीक्रियते। अतएव 'ज्ञापयति' इत्यत्र आश्रयत्वमेव कर्तृत्वम्, ज्ञाधातूत्तरविहितकर्त्राख्यातस्याश्रयत्वरूपस्यैव कर्तृत्वेन स्वीकारात्, ज्ञानाश्रयस्यैव ज्ञानकर्तृत्वात्। एतच्च भाक्तं कर्तृत्वम्। एवं " मैत्रः चैत्रेण पाचयति।" इत्यत्र च यत्न एव णिजर्थकर्तृत्वेन स्वीक्रियते, पचधातूत्तरविहितकर्त्राख्यातेन यत्नस्यैव बोधनात्। एतच्च मुख्यं कर्तृत्वम्। एवं 'रामः घटं नाशयति।' इत्यादौ ध्वंसाभावार्थकधात्वर्थस्थले ध्वंसाभावप्रतियोगित्वमेव कर्तृत्वं णिजर्थरूपेण स्वीक्रियते तादृशधातूत्तरविहितकर्त्राख्यातेन तादृशकर्तृत्वस्यैव बोधनात्, नाशप्रतियोगिताश्रयस्यैव नाशकर्तृत्वात्। एवञ्च, तादृशस्य णिजर्थस्य अपरणिजर्थेन यः संसर्गः निर्वाहकत्वं प्रयोजकत्वं वा तन्न जनकत्वमेव,अपि तु तद्भिन्नः स्वरूपसम्बन्धविशेषः, 'घटो नश्यति।' इत्यत्र नाशप्रतियोगित्वस्य तादृशणिजर्थव्यापाराजन्यत्वात्। अत्र

---

[14] *व्युत्पत्तिवादः*, सम्पा. हेरेरामत्रिपाठी (नवदेहली, 2011), पृ. 357

[15] तत्रैव पृ. 349

कर्तृत्वनिर्वाहकव्यापारस्तु प्रेरणादय एव। तथा च, णिजन्तधात्वर्थव्यापारस्य कर्तृत्वनिर्वाहकत्वेन निर्वाह्यस्य च फलत्वेन तदाश्रयतया च यदा कर्ता विवक्षितो भवति तदा कर्तुः कर्मत्वेन तद्वाचकपदात् द्वितीया सिध्यति। तदा च, 'मैत्रः चैत्रं पाचयति।' इति प्रयोगः सम्पद्यते। यदा च, तादृशणिजर्थव्यापारे न कर्तृत्वान्वयः अपि तु निरूपकतासम्बन्धेन णिच्प्रकृतिधात्वर्थे अन्वयो विवक्षितो भवति, भवति तदा कर्तृत्वस्य फलत्वाभावात् तत्सम्बन्धिनः कर्मत्वाभावेन कर्तृतयैव कर्तृवाचकपदात् तृतीया सिध्यति। तदा च, भवति ' मैत्रः चैत्रेण अन्नं पाचयति' इति प्रयोगः। एवं गत्याद्यर्थकधातुप्रकृतिकणिजन्तधातुप्रयोगे तु उभयत्र द्वितीयैव सिध्यति, तस्य नियामकतया कर्तरि कर्मत्वातिदेशस्य नियतत्वात्। तथा च, 'मैत्रः चैत्रेण अन्नं पाचयति ' इति प्रयोग इव न ' मैत्रः चैत्रेण ग्रामं गमयति ' इति प्रयोगः सम्भवति, अपि तु 'मैत्रः चैत्रं ग्रामं नयति' इत्येव प्रयुज्यते।एवं प्रागुक्तस्थले "मैत्रः चैत्रं अन्नं पाचयति" इत्यत्र चैत्रस्य द्वितीयार्थे कर्तृत्वे आधेयत्वेन , द्वितीयार्थस्याभेदेन णिजर्थकर्तृत्वे, धात्वर्थस्यापि अनुकूलतया तादृशकर्तृत्वे, तादृशकर्तृत्वस्य निर्वाहकत्वसंसर्गेण णिजर्थव्यापारे णिजर्थव्यापारस्य च आख्यातार्थे कृतौ अनुकूलतया , तादृशकृतेश्च प्रथमान्तार्थे आश्रयतया, अन्नस्य च द्वितीयार्थे आधेयत्वे निरूपिततया, द्वितीयार्थस्य धात्वर्थैकदेशे विक्लृतौ आश्रयतया अन्वेति। तथा च, अन्ननिष्ठविक्लृत्यनुकूल-व्यापारजनकचैत्रनिष्ठकर्तृत्वाभिन्न-कर्तृत्वनिर्वाहकव्यापाराश्रयः मैत्रः इति शाब्दबोधो भवति। 'मैत्रः चैत्रेण अन्नं पाचयति' इत्यत्र च चैत्रस्य तृतीयार्थे कर्तृत्वे आधेयतया, कर्तृत्वस्य धात्वर्थे पाके निरूपकतया , पाकस्य च णिजर्थे कर्तृत्वे अनुकूलतया, तादृशकर्तृत्वस्य च णिजर्थव्यापारे निर्वाहकतया , व्यापारस्य च आख्यातार्थे कृतौ अनुकूलतया, तादृशकृतेश्च प्रथमान्तार्थे मैत्रे आश्रयतया , अन्नस्य च द्वितीयार्थे आधेयत्वे निरूपिततया, द्वितीयार्थस्य धात्वर्थैकदेशे विक्लृतौ आश्रयतया च अन्वेति। तथा च, अन्ननिष्ठविक्लृतिजनकः चैत्रकर्तृकः यादृशपाकः तादृशपाकानुकूलकर्तृत्वनिर्वाहक-व्यापारानुकूलकृतिमान् मैत्र इति शाब्दबोधः फलति।

ननु एवं सति यन्निष्ठकर्तृत्वस्य णिच्प्रकृतिधात्वर्थे विशेषणत्वे तादृशकर्तृवाचकपदात्तृतीयायाः साधुत्वे यत्र रामश्यामोभयकर्तृक एक एव पाको भवति, तत्र श्याममात्रं प्रयोजयति यज्ञदत्ते "यज्ञदत्तः रामेण अन्नं पाचयति" इति प्रयोगरूपानिष्टापत्तिः स्यात्, अत्र रामकर्तृत्वे यज्ञदत्तनिष्ठव्यापारनिर्वाह्यत्वाभावेन रामनिष्ठकर्तृत्वस्य च पाके विशेषणत्वेन तद्वाचकपदात् तृतीयाया एव साधुतापत्तेरिति चेदत्रोच्यते नैयायिकैर्यत् यन्निष्ठणिजर्थव्यापारविशेषणीभूतकृतौ पारतन्त्र्येणापि पाकादिविशेषणीभूतकृतेरभेदान्वयो भवति तद्वाचकचैत्रादिपदादेव तृतीयाया साधुता, अन्यत्र च कर्तृत्वस्य णिजर्थकृतौ साक्षादेवाभेदेन विशेषणतया णिजर्थकृतेश्च णिजर्थव्यापारनिर्वाह्यतया फलत्वेन फलाश्रयस्य च कर्मत्वेन तादृशकर्मवाचकात् पदात् द्वितीयाया एव साधुता इति विषयविभागो भवति। प्रकृते च रामनिष्ठकर्तृत्वस्य पाकविशेषणीभूतस्य न णिजर्थकृतौ पारतन्त्र्येण न वा साक्षात् अभेदेन अन्वयो भवति यज्ञदत्तस्य मैत्रनिष्ठकर्तृत्वप्रयोजकत्वात्, रामनिष्ठकर्तृत्वात् णिजर्थव्यापारनिर्वाह्यकर्तृत्वस्य च भेदात्। अतः न तादृशानिष्टापत्तिरापद्यते। अतएव तादृशस्थले ' यज्ञदत्तः रामेण रामं वा अन्नं पाचयति । ' इति प्रयोगो न भवति। तदुच्यते गदाधरभट्टाचार्यैः व्युत्पत्तिवादे-'अगत्या तत्र पाकादिविशेषणकृतेः पारतन्त्र्येण व्यापारविशेषणीभूतणिजर्थ-

कृतावभेदान्वयमभ्युपगम्योक्तातिप्रसङ्गस्य वारणीयत्वात्, पदार्थैकदेशे कृतौ पाकादेरिव कृतेरप्यन्वयो व्युत्पत्तिवैचित्र्यात्।'[16] इति। एवं गत्याद्यर्थकधातुप्रकृतिकणिजन्त-धातुप्रयोगस्थले प्रयोज्यकर्तरि द्वितीया, तदन्यत्र च तृतीया, द्वितीया वेति नैयायिकसमयः।

एवं नैयायिकनये णिजर्थः कर्तृत्वम् व्यापारश्च। तत्र कर्तृत्वे णिच्प्रकृतिभूतधात्वर्थव्यापारस्य अनुकूलतया, तादृशकर्तृत्वस्य च णिजर्थव्यापारे निर्वाहकत्वसंसर्गेण अन्वय इति ध्येयम्।

कर्माख्यातस्थले च कर्मत्वस्यैव प्रथमान्तार्थे अन्वयौचित्यात् प्रकृते चाणिकर्तरि एव कर्मत्वोपचारात् तादृशकर्मत्वाभिन्नकर्तृत्वमेव कर्माख्यातवाच्यम्। तथा च, णिच्प्रकृतिधात्वर्थस्य णिजर्थे कर्तृत्वे जनकतासंसर्गेण, कर्तृत्वस्याख्यातार्थे कर्तृत्वे अभेदेन, तादृशकर्तृत्वस्य चाश्रयतासंसर्गेण प्रथमान्तार्थे , प्रयोजकनिष्ठकर्तृत्वस्य णिजर्थव्यापारे निरूपकतासंसर्गेण, णिजर्थव्यापारस्य च अपरणिजर्थे कर्तृत्वे निर्वाह्यत्वसंसर्गेणान्वयो भवति। तथाहि 'चैत्रेण रामो ग्रामं याप्यते।' इत्यत्र चैत्रस्याधेयत्वेन तृतीयार्थे कर्तृत्वे , कर्तृत्वस्य च तृतीयार्थस्य निरूपकतया णिजर्थव्यापारे, व्यापारस्य चापरणिजर्थकर्तृत्वे निर्वाह्यत्वसंसर्गेण, ग्रामस्य द्वितीयार्थे आधेयत्वे निष्ठत्वसम्बन्धेन , द्वितीयार्थस्याधेयत्वस्य धात्वर्थैकदेशे संयोगे आश्रयतया, संयोगस्य चानुकूलतया गम्धात्वर्थव्यापारे,तस्य च णिजर्थे कर्तृत्वे अनुकूलतया, कर्तृत्वस्याख्यातार्थे तादृशकर्तृत्वे अभेदेन , तादृशकर्तृत्वस्य चाश्रयतासंसर्गेण प्रथमान्तार्थे रामे अन्वयोभवति। तथा च, चैत्रनिष्ठकर्तृत्वनिरूपक-व्यापारनिर्वाह्यं यत् ग्रामवृत्तिसंयोगानुकूलव्यापारानुकूलं कर्तृत्वं तादृशकर्तृत्वाश्रयः राम इति प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधो जायते।

धात्वर्थयङर्थान्वयः- पाणिनीयतन्त्रे धातुप्रकृतिकधात्वंशप्रत्ययेषु अन्यतमो हि यङ्। पाणिनिना 'धातोरेकाचो हलादेः क्रियासमभिव्याहारे यङ्' (3.1.22) इति सूत्रेण यङ्प्रत्ययो विहितः। तथा चास्मिन् सूत्रे क्रियासमभिव्याहारे अर्थे धातुविशेषेभ्यो यङो विधानात् स एव यङर्थः। क्रियासमभिव्याहारश्च पौनःपुन्यम्। तच्च नैयायिकनये प्रकृतधात्वर्थजातीयक्रियोत्तरतादृशक्रियानन्तर्यरूपम्। तथाहि यादृशधातूत्तरं यङ्प्रत्ययो विहितो भवति तद्धात्वर्थजातीया या क्रिया , तत्क्रियाया अव्यवहितोत्तरत्वेन निष्पन्नायाः क्रियाया आनन्तर्यं नामाव्यवहितोत्तरत्वमेव यङर्थः।स च यङर्थः तत्प्रकृत्यर्थे धात्वर्थे स्वरूपसम्बन्धेन विशेषणतया अन्वेति। तथाहि 'रामः पापच्यते' इत्यत्र यङ्प्रकृतिपच्धात्वर्थजातीया क्रिया हि पाकक्रिया, तथा तादृशपाकक्रियाया उत्तरवर्तिन्याः क्रियाया अपि पाकक्रियात्वे तादृशपाकक्रियानन्तर्यमेव पाकक्रियासमभिव्याहारो नाम पाकस्य पौनःपुन्यमित्युच्यते। तथाच, तादृशपाकक्रियान्तर्यस्य स्वरूपसम्बन्धेनोत्तरवर्तिन्यां प्रकृतधात्वर्थक्रियायामन्वयो भवति, तादृशक्रियायाश्च अनुकूलतासम्बन्धेन प्रकृते आख्यातार्थे कर्तृत्वे, तस्य च प्रथमान्तार्थे रामे आश्रयतासम्बन्धेन अन्वयो भवति ।

यत्तु सारमञ्जर्याः सारदीव्याख्यायां कालिपदतर्काचार्यमहोदयैः "अत एव पाकक्रिया एव उत्तरोत्तरप्रवृत्तौ पापच्यते इत्यादिव्यवहारसिद्धिः, उक्तमानन्तर्यञ्च पाककृतौ अन्वेति।"[17] इत्युक्तं तत्तु

[16] *व्युत्पत्तिवादः*, सम्पा. हरेरामत्रिपाठी (नवदेहली, 2011), पृ. 353-354

चिन्त्यम्, पाकोत्तरपाकानन्तरं पाककृतौ जातायामपि पाकक्रियाभावे सति पापच्यते इति प्रयोगापत्तेः, क्रियासमभिव्याहारे च क्रियात्वस्यैव साजात्यनिरूपकधर्मत्वात्, क्रियाशब्दस्य च कृत्यर्थकत्वे क्रियानुकूलकृतित्वस्यैव शक्यतावच्छेदकत्वे क्रियाघटितत्वेन गौरवात्, कृतित्वमात्रस्य च शक्यतावच्छेदकत्वे पचति इत्यादावपि तादृशकृतीनामव्यवहितोत्तरत्वेन क्रियानुकूलतया पापच्यते इति प्रयोगापत्तेः। क्रियात्वस्य सजातीयत्वनिरूपकत्वे तादृशक्रियात्वावच्छिन्नसमूहालम्बन-बुद्धिविषयैकक्रियायां एव पुनः पुनः क्रियमाणायां पापच्यते इति प्रयोगो युज्यते। न च भवति पचति इत्यत्र पापच्यते इति प्रयोगः, तत्र तादृशक्रियाया एव सकृत् क्रियमाणत्वात्। तथाह्युच्यते जगदीशतर्कालङ्काराचार्यैः शब्दशक्तिप्रकाशिकायाम् - "पापच्यते इत्यादौ यङः पौनःपुन्यमर्थः, तच्च प्रकृतधात्वर्थजातीयक्रियोत्तर-तादृशक्रियानन्तर्यरूपं प्रकृत्यर्थे विशेषणत्वेनान्वेति।" इति[18] ।

अत्रेदमवधेयं यत् यङ्कृतिधात्वर्थक्रियाजातीयक्रियाणामुत्तरत्वसम्बन्धवतां समानकर्तृकत्वे एवायं यङ्गत्ययः पौनःपुन्यार्थे विधीयते। अन्यथा, रामपाकानन्तरजातात् श्यामपाकादानन्तर्येण यज्ञदत्तेन पाके क्रियमाणे 'यज्ञदत्तः पापच्यते' इति प्रयोगापत्तेः। तथा च, समानकर्तृकप्रकृतधात्वर्थजातीयपाकोत्तरपाकान्तर्यमेव यङर्थ इति पर्यवसितम्। तस्य च यङ्कृतिधात्वर्थे स्वरूपेणान्वयो भवति।

अत्रायं विशेषो यत् गत्यर्थकधातुभ्यो विहितस्य यङः पौनःपुन्यमिव शब्दशक्तिस्वभावात् कौटिल्यमपि अर्थः। तथा च पाणिनिना 'नित्यं कौटिल्ये गतौ' (3.1.23) इति सूत्रितम्। तच्च कौटिल्यं यङ्कृत्यर्थे धात्वर्थे एव स्वरूपेण विशेषणतया अन्वेति। तथाहि 'रामो जङ्गम्यते' इत्यस्यार्थः समानकर्तृकगमनोत्तर-गमनानन्तर्यवत्कुटिलगमनानुकूलकृत्याश्रय इति। तथाह्युक्तं जगदीशतर्कालङ्काराचार्यैः शब्दशक्तिप्रकाशिकायां - "जङ्गम्यते, चङ्क्रम्यते इत्यादौ धात्वर्थगतं पौनःपुन्यमिव कौटिल्यमपि यङोऽर्थः।"[19] इति। एवमन्यत्रापि बोध्यम्।

लुम्पादिभ्यो धातुभ्यस्तु विहितस्य यङः पौनःपुन्यमिव गर्हितत्वमपि अर्थः। तच्च यङ्कृतिधात्वर्थे विशेषणतया अन्वेति। तथाहि 'रावणो लोलुप्यते' इत्यतः समानकर्तृकगर्हितलुम्पनोत्तरकालवर्ति-तादृशलुम्पनान्तर्यवद्गर्हितलुम्पनानुकूलकृत्याश्रयो रावण इति शाब्दबोधो जायते।

धात्वर्थसनर्थान्वयः - धातुभ्यो विहितः सन् अपि पाणिनीयतन्त्रे एको धात्ववयवः प्रत्ययः। नैयायिकनये 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' (पा.सू-3.1.7) इति पाणिनीयानुशासनात् इच्छायामेव इच्छासमानकर्तृकेभ्यः इच्छाकर्मभ्यः स्वार्थपरेभ्यः धातुभ्यः सन् विधीयते। तस्याञ्च सन्नर्थे इच्छायां प्रकृतिभूतधात्वर्थस्य समानकर्तृकत्वसम्बन्धेन स्वविषयताकत्वसम्बन्धेन च अन्वेति। तथा च 'रामः पिपक्षति' इत्यत्र पाकविषयिणी पाकसमानकर्तृका या इच्छा तदाश्रयः राम इति बोधो जायते। अत्र

---

17 *सारमञ्जरी* (सारदीसहिता), सम्पा. कालीपदतर्काचार्यः(कलिकाता, 2008), पृ. 10

18 *शब्दशक्तिप्रकाशिका*, सम्पा. ढुण्ढिराजशास्त्री(वाराणसी, 2013), पृ. 449

19 तत्रैव, पृ. 450

कर्त्राख्यातस्याश्रयत्वरूपं भाक्तकर्तृत्वमेवार्थः। तत्र च इच्छा निरूपितत्वसम्बन्धेनान्वेति तथा तादृशाश्रयत्वस्य प्रथमान्तार्थे आश्रयतयान्वयो भवति।

ननु स्वविषयताकत्वसंसर्गेण धात्वर्थस्य इच्छायामन्वये सति "रामेण ओदनः पिपक्ष्यते।" इत्यत्र कर्मप्रत्ययस्थले शाब्दबोधानुपपत्तिः, ओदनस्य पचिक्रियाकर्मत्वेन तत्र चाख्यातवाच्ये कर्मत्वे इच्छायाः सम्बन्धाभावेनेच्छाविशेषणीभूतस्य पच्धात्वर्थस्यापि अन्वयाभावात्, एकत्र विशेषणतयान्वितस्यान्यत्र अन्वयस्याव्युत्पन्नत्वादिति चैदत्र नैयायिकाश्चोदयन्ति यत् कर्मप्रत्ययस्थले यथा वैपरीत्येन धातोः व्यापारावच्छिन्नं फलमेवार्थो भवति तद्वदत्रापि कर्त्राख्यातस्थलीयधात्वर्थसन्नर्थयोः कर्मप्रत्ययस्थले वैपरीत्येनान्वयात् इच्छाया एव तत्प्रकृतिभूतधात्वर्थे विशेषणात् तस्याः पाकक्रियायाश्चापरधात्वर्थे फले अनुकूलतया फलस्य च कर्मप्रत्ययार्थे निरूपितत्वेनआश्रयतायाम्, आश्रयतायाश्च स्वरूपेण प्रथमान्तार्थेओदने अन्वयाद्भवत्येव शाब्दबोधः। अत्रापि इच्छायाः स्वसमानकर्तृकत्वस्वविषयतासंसर्गाभ्यां धात्वर्थे अन्वयो भवति। तथा च, इच्छासमानकर्तृक इच्छाविषयः यः पाकः, तादृशपाकजन्यविक्लृत्याश्रय ओदन इति शाब्दबोधो जायते।

अत्रापि एतद्ध्येयं यत् कर्मप्रत्ययस्थलेऽपि सन्प्रकृतिभूतधात्वर्थस्यापि व्यापारविशिष्टफलमेवार्थो भवति। तस्य फलस्यैव प्रकृते विक्लृतेरेवकर्मप्रत्ययार्थे कर्मत्वे आश्रयतायां निरूपकत्वेनान्वयो भवति पूर्ववत्।

एवं कर्त्राख्यातस्थले 'चैत्रः अन्नं पिपक्ष्यति।' इत्यादौ तु अन्ननिष्ठकर्मत्वस्य नामाधेयत्वस्य सन्प्रकृतिधात्वर्थैकदेशे धात्वर्थे वा विक्लृतौ स्वरूपेणान्वयः। तस्य च धात्वर्थव्यापारे अनुकूलतासम्बन्धेन, धात्वर्थव्यापारस्येच्छायां सन्प्रत्ययार्थे स्वसमानकर्तृकत्वस्वविषयताकत्वोभयसंसर्गेणान्वयो भवति। तस्या चेच्छायाः कर्त्राख्यातार्थे भाक्तकर्तृत्वे आश्रयतायां निरूपितत्वसम्बन्धेन, आश्रयतायाश्च प्रथमान्तार्थे चैत्रे स्वरूपेण अन्वये सति अन्ननिष्ठविक्लृत्यनुकूलपाकविषया तादृशपाकसमानकर्तृका या इच्छा, तादृशेच्छाश्रयश्चैत्र इति बोधो भवति।

ननु एवमपि यत्र ओदनस्य भोजनम् अप्राप्तं तत्रापि ओदनभोजनेच्छासत्त्वे 'चैत्रेण ओदनो बुभुक्ष्यते।' इति प्रयोगात् तथा गगनस्य दर्शनायोग्यत्वे अपि तद्दर्शने आहार्येच्छासत्त्वे सति 'गगनं दिदृक्ष्यते।' इति प्रयोगसत्त्वात् प्रागुक्तान्वयरीत्यनुसरणे च न शाब्दबोधो भवति, तत्र दृश्धात्वर्थेन सह कर्माख्यातार्थस्य कर्मत्वस्य अन्वयाभावात्, तत्र च सन्प्रकृतिधात्वर्थे सन्नर्थस्य इच्छाया विशेषणत्वेन तस्या एकत्र विशेषणतया अन्विताया अन्यत्र विशेषणतयान्वयस्याव्युत्पन्नत्वेन कर्मत्वे अन्वयाभावरूपदोष एव समापतति। तद्दोषोद्धाराय गदाधरभट्टाचार्यप्रभृतिभिः कर्त्राख्यातस्थले इव कर्माख्यातस्थले अपि सन्प्रकृतिधात्वर्थविशिष्टा इच्छा एव सन्नन्तस्थले स्वीक्रियते। तथा च तत्र कर्मप्रत्ययार्थस्य न केवलं विषयत्वमर्थः अपि तु सन्प्रकृतिधात्वर्थकर्मत्वेन इच्छाविषयत्वमेवार्थः। सा चेच्छा प्रकृते 'ओदनकर्मकं भोजनं भवतु' इत्येव। तादृशविषयत्वे इच्छाया निरूपितत्वसम्बन्धेनान्वयः स्वीक्रियते। तथा च, चैत्रनिष्ठा स्वसमानकर्तृकभोजनविषया या इच्छा,तादृशेच्छानिरूपितभोजनकर्मत्वावच्छिन्नविषयताश्रय ओदन इति

शाब्दबोधो फलति। तदुच्यते गदाधरभट्टाचार्यपादैः व्युत्पत्तिवादे- "इदन्तु तत्त्वम्- कर्मप्रत्ययस्थलेऽपि धात्वर्थविशेष्यतयैवेच्छा सन्प्रत्ययेन प्रत्याय्यते, तत्कर्मत्वमेव कर्माख्यातार्थः, तच्च धात्वर्थकर्मतया तद्विषयत्वम्।"[20] इति ।

ननु एवं सति सर्वत्र धात्वर्थविशिष्टाया इच्छाया एव सन्नन्तस्थले बोधे जाते 'रामः ओदनं पिपक्षति' इत्यादावपि कर्त्राख्यातस्थले धात्वर्थविशिष्टाया इच्छाया सन्नन्तधातुना प्रत्यायनात् तत्र च द्वितीयार्थस्य कर्मत्वस्य अन्वयासम्भवः, तादृशकर्मत्वस्य इच्छाविषयधात्वर्थे एवान्वयात् एकत्र विशेषणतया अन्वितस्य अन्यत्र विशेषणतयान्वयस्याव्युत्पन्नत्वात्, धात्वर्थपारतन्त्र्येणापि इच्छायामन्वये सत्यपि विषमिश्रितौदनभोजनस्थले 'रामः ओदनं बुभुक्षते' इति प्रयोग इव 'रामः विषं बुभुक्षते।' इति प्रयोगापत्तेः, विषस्य भोजनेच्छाऽविषयत्वे अपि भोजनकर्मत्वात् इति चेदत्र नैयायिकैरुच्यते यत् कर्त्राख्यातस्थले अपि सन्प्रकृतिधात्वर्थकर्मत्वेन इच्छाविषयत्वमेव द्वितीयार्थः।एवं धात्वर्थकर्मत्वावच्छिन्नेच्छाविषयत्वमेव सन्नन्तधातुप्रयोगे द्वितीयार्थः। तथा च, तादृशविषयत्वस्य द्वितीयार्थस्य निरूपकतासम्बन्धेनेच्छायामन्वयः सम्भवति। तेन च न भवति 'रामः ओदनं बुभुक्षते' इति प्रयोग इव 'रामः विषं बुभुक्षते।' इति प्रयोगः, विषस्य भोजनकर्मत्वे अपि तादृशेच्छाविषयत्वाभावात्, ओदनस्यैव तादृशविषयतावत्त्वात्। तथा च प्रकृते ओदननिष्ठभोजनकर्मत्वावच्छिन्नविषयत्वनिरूपिका भोजनसमानकर्तृका भोजनविशेष्यिका या इच्छा तादृशेच्छाश्रयः रामः इति शाब्दबोधो भवति। 'रामः ओदनं पिपक्षति' इत्यत्रापि ओदननिष्ठपाककर्मत्वावच्छिन्नविषयत्वनिरूपिका पाकसमानकर्तृका पाकविशेष्यिका या इच्छा तादृशेच्छाश्रयः राम इति शाब्दबोधः फलति।

एवं सर्वत्र धात्वर्थविषयिणी इच्छा एव सन्प्रत्ययार्थ इति नैयायिकसमयः। न चैवं सति 'रामः गृहं तिष्ठासति' इति प्रयोगापत्तिरापद्येत, गृहस्याप्यत्र तादृशेच्छाविषयत्वादिति वाच्यम्, प्रकृतस्थले ष्ठाधातोरकर्मकत्वेन सन्प्रकृतिधात्वर्थकर्मत्वस्यैवासम्भवात्। 'गगनं दिदृक्षते' इत्यत्र तु दर्शनस्य सकर्मकत्वेन भवति तथा प्रयोगः। अतएव यदा गृहस्य स्थित्याधारत्वेन इच्छाविषयत्वं भवति, भवति तदा 'रामः गृहे तिष्ठासति' इति प्रयोगः, न तु 'रामः गृहं तिष्ठासति' इति प्रयोगः।

न चैवमपि 'पिपक्षति' इत्यत्र धात्वर्थस्य इच्छाविषयतयैवान्वये 'रामः अन्नं पिपक्षति' इत्यादिप्रयोगसिद्धौ धात्वर्थस्य इच्छायां तादृशविषयितैव संसर्गः अस्तु किं पुनः स्वसमानकर्तृकत्वसंसर्गेण गुरुणेति वाच्यम्, तादृशसंसर्गाभावे हि परकर्तृकसन्प्रकृतिधात्वर्थगोचरेच्छायामपि सन्प्रवृत्त्यापत्तेः। तथा सति रामकर्तृकपाकगोचरायां मैत्रेच्छायामपि 'मैत्रः अन्नं पिपक्षति' इत्यनिष्टप्रयोगापत्तिरापद्यते। अतः समानकर्तृकत्वमपि संसर्गतया स्वीक्रियते। अतः समानकर्तृत्वमपि धात्वर्थस्य सन्नर्थे

[20] *व्युत्पत्तिवादः*, सम्पा. हरेरामत्रिपाठी(नवदेहली, 2011), पृ. 440

इच्छायामवश्यमङ्गीकर्तव्यं संसर्गतया। तथा च रामकर्तृकपाकविषयकरामेच्छायामेव सत्यां 'रामः अन्नं पिपक्षति' इत्यादिप्रयोगो युज्यते।

ननु समानकर्तृकत्वस्य संसर्गत्वे 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' (पा.सू 3.1.7) इत्यनुशासनविरोधः समानकर्तृकत्वस्य धात्वर्थविशेषणत्वेनानुशिष्टत्वात् इत्यतः तस्य संसर्गत्वेन भानमस्वीकृत्य सन्वाच्यतामेव स्वीकृत्य धात्वर्थे अन्वयो विधेय इति वाच्यम्, तत्रानुशासनेन इच्छासमानकर्तृकात् स्वार्थपरात् धातोरेव सन्प्रत्ययानुशिष्टत्वात्, प्रकारतयान्वयस्वीकारे च गौरवात्। अतः समानकर्तृकत्वं न सन्वाच्यमपि तु धात्वर्थसन्नर्थनिष्ठसंसर्ग एवेति नैयायिकसमयः। तदुच्यते गदाधरभट्टाचार्यपादैः व्युत्पत्तिवादे- "न च समानकर्तृकत्वस्य सम्बन्धत्वोपगमे तत्र शक्तिग्राहकानुशासनविरोधः, यतः 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' इति सन्विधायकं सूत्रं सनः समानकर्तृकत्वार्थकतां न प्रतिपादयति, तस्य हि 'इच्छाकर्मत्वेन तत्समानकर्तृकत्वेन च स्वार्थपराद्धातोरिच्छारूपार्थे सन् भवति' इत्येवार्थः।"[21] इति

एवञ्च, धात्वर्थेन सह धातुप्रकृतिकधात्ववयप्रत्ययार्थानां विशेषसंसर्गस्वरूपमत्र प्रतिपादितम्। तत्र च पूर्वाचार्यैः क्वचित्तादृशविशेषसंसर्गानिर्देशात् क्वचिच्च आचार्याणां मिथो मतभेदात् शाब्दबोधे संशयोदयात्तादृशसंसर्गनिर्णयायेयं चेष्टेति शम्।

परिशीलितग्रन्थसूची

गदाधरः. *व्युत्पत्तिवादः*, प्रथमभागः (2001), द्वितीयभागः(2001). सम्पादकः- सच्चिदानन्दमिश्रः. वाराणसीः भारतीयविद्याप्रकाशनम्।

गदाधरः. 2008. *व्युत्पत्तिवादः*. सम्पादकः- अयनभट्टाचार्यः. कलिकाताःसंस्कृत वुक् डिपो।

गदाधरः. *व्युत्पत्तिवादः*, प्रथमभागः (2011), द्वितीयभागः(2011). सम्पादकः- हरेरामत्रिपादठी. नवदेहलीः राष्ट्रियसंस्कृतसंस्थानम्।

गौतमः. *न्यायदर्शनम्.* प्रथमभागः(1981), द्वितीयभागः(1984), तृतीयभागः(1982), चतुर्थभागः(1988), पञ्चमभागः(1989). सम्पादकः- फणिभूषणतर्कवागीशः. कलिकाता- पश्चिमबङ्गराज्यपुस्तकपर्षद्।

जगदीशः. *शब्दशक्तिप्रकाशिका.* प्रथमभागः(1980), द्वितीयभागः(1981), तृतीयभागः(1985) . सम्पादकः- मधुसूदनन्यायाचार्यः. कलिकाताः संस्कृतकलेज्।

[21] *व्युत्पत्तिवादः*, सम्पा. हरेरामत्रिपाठी(नवदेहली, 2011), पृ. 445

जगदीशः. 2013. *शब्दशक्तिप्रकाशिका.* सम्पादकः- ढुण्ढिराजशास्त्री. वाराणसीः चौखम्बाप्रकाशनम्।

जयकृष्णः. 2008. *शब्दार्थसारमञ्जरी* (सारदीसहिता). सम्पादकः- कालीपदतर्काचार्यः. कलिकाता-सदेशः।

जयन्तभट्टः. *न्यायमञ्जरी.* प्रथमभागः (2017). सम्पादकः- गौरीनाथशास्त्री. वाराणसीः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।

पाणिनिः. (2000). *अष्टाध्यायी.* सम्पादकः- गोपालदत्तपाण्डेयः . वाराणसीः चौखम्बासुरभारतीप्रकाशनम्।

विश्वनाथः. 2002. *कारिकावली.* सम्पादकः– आत्मारामशर्मा. नवदेहलीः राष्ट्रियसंस्कृतसंस्थानम्।

भर्तृहरिः. *वाक्यपदीयम्.* चतुर्थभागः(2015) सम्पादकः- हरिनारायणतिवारी. वाराणसीः चौखम्बा संस्कृत सीरीज आफिस.

आधुनिकचिकित्सायां सांख्ययोगदर्शनयोरुपयोगः

ईश्वर आखुली[1]

धर्मार्थकाममोक्षेषु पुरुषार्थचतुष्टयेषु मनुजनूनां परमः चरमो वा पुरुषार्थः आत्मसाक्षात्कारजन्यो मोक्षोऽपवर्गो वा। इह खलु जगति दुःखमस्त्येव। दुःखस्य आत्यन्तिकतया विनाशार्थं तथा चिराय सुखलाभार्थं मानवाः मोक्षमार्गेषु धावन्ति। न हि तद्दुःखं नित्यं न वाशक्यसमुच्छेदम्। तद् दुःखं हि त्रिविधम् आध्यात्मिकम् आधिदैविकं आधिभौतिकञ्चेति। अतो विवेकिनस्तापत्रयपराहताः सन्तः तन्निवृत्तिनिदानमनुदन्दधाना आत्मसाक्षात्कारमेव तदुपायमित्याकलयामासुः।तत्र 'आत्मा वा अरे मैत्रेयि द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य[2]' इति श्रुतेः आत्मैव दर्शनक्रियायाः कर्मत्वेन ग्राह्य इति आत्मसाक्षात्कारसाधनत्वं दर्शनत्वमिति दर्शनलक्षणं फलति।दर्शनस्य बहुधा विभागे सत्यपि तत्र मुख्यतः प्रथमं द्वौ विभागौ वैदिकानि अवैदिकानि च दर्शनानि। तत्र अवैदिकानि नास्तिकपदेन वैदिकानि चास्तिकपदेन व्यवह्रियन्ते।षड् आस्तिकदर्शनानि इति प्रथन्ते। तत्रापि च सांख्ययोगौ पूर्वोत्तरमीमांसे न्यायवैशेषिकेति चेति त्रितयो मिथुनीकृतो व्यवहारः प्राधान्येन भवति। चार्वाकं जैनं बौद्धं चेति त्रीणि नास्तिकदर्शनानि प्रसिद्धानि।

वाक्यार्थबोधे पदार्थबोधस्य कारणत्वात् "आधुनिकचिकित्सायां सांख्ययोगशास्त्रयोरुपयोग" इति वाक्यात्मकबन्धाशयोऽपि तदन्तर्गतप्रत्येकपदार्थ-बोधसापेक्षः। तत्र या क्रिया रोगहारिणी सा हि चिकित्सा। उक्तञ्च शब्दकल्पद्रुमे - "या क्रिया व्याधिहरणी सा चिकित्सा निगद्यते । दोषधातुमलानां या साम्यकृत् सैव रोगहृत्[3] ॥इति। व्याधिर्ह्रियतेऽनयेति व्याधिहरणी । व्याधिः रोगो वात्र कर्म। तत्र रोगस्तु दोषवैषम्यं दोषशाम्यमरोगता। आधुनिकचिकित्सायामित्यत्र विषयत्वं सप्तम्यर्थः। अर्थात् आधुनिकचिकित्साविषये सांख्ययोगशास्त्रयोः उपयोगित्वमत्र वर्ण्यते।

द्वैतवादिनां सांख्यिनां योगाचार्याणामपि नये जडप्रपञ्चस्य आमूलं मूलतत्त्वं हि प्रकृतिः। सा च प्रकृतिः सांख्यानां योगाचार्याणां नये च सत्त्वरजस्तमसां साम्यावस्था एव। तथाहि सांख्यसूत्रम् - सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः[4] इति। योगसूत्रञ्च – प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं

---

[1] सहकारी अध्यापकः, संस्कृतविभागः, श्रीचैतन्यमहाविद्यालयः, पश्चिमवङ्गः।

[2] *बृहदारण्यकोपनिषद्* - २.४.१५

[3] *शब्दकल्पद्रुमः,* चतुर्थ खण्डः पृ. १८३

[4] *सांख्यसूत्रम्* –१.६१

भोगापवर्गार्थं दृश्यम्[5] इति। तत्र दृश्यं हि बुद्धितत्त्वम्। तच्च प्रकृतेः न्यूनपरिमाणमेव। तच्च सत्त्वरजस्तम इति त्रिगुणात्मकम्। सांख्यकारिकायामपि व्यक्ताव्यक्तयोः साधर्म्यं प्रदर्शयता ग्रन्थकृता यदुक्तं –

"त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान्"।।[6] इति

अत्र तेन प्रधानस्य त्रिगुणात्मकमेव स्वीकृतम्। त्रयो गुणाः यस्य तत्त्रिगुणम्। त्रिगुणं व्यक्तं महदादि। तेन प्रधानमपि त्रिगुणम्, कारणानुगतत्वात् कार्यस्य। यथा कृष्णतन्तुः कारणं पटकार्यस्य तेन पटकार्यमपि कृष्णमेव भवति। त्रिगुणेन कार्येण अस्य कारणमपि त्रिगुणं भवतीति प्रधानमपि त्रिगुणम्। प्रकृतेः एवं त्रिगुणात्मकत्वं शंकराचार्येण गीताभाष्ये सुष्ठु समर्थितम्। उक्तञ्च तेन – प्रकृतिं त्रिगुणात्मिकामपरां निकृष्टां यान्ति।मामिकां मदीयां कल्पक्षये प्रलयकाले।[7]इति।

सांख्याचार्याणां नये प्रकृतिः गुणत्रयान्न भिद्यते। सांख्यसूत्रकृता तु सुस्पष्टमेवोक्तं – सत्त्वादीनामतद्धर्मत्वं तद्रूपत्वात्[8] इति। किञ्च अन्ये गुणाः अन्यत् प्रधानमेवं विवेक्तुं न याति इति गौडपादभाष्याद्, इदं प्रधानममी गुणाः इति न शक्यते पृथक्कर्तुं इति च माठरवृत्तेरपि स्पष्टमेव प्रतीयते प्रकृतिगुणत्रययोरभेदः। अत एव सांख्ययोगाचार्याणामसाधारणं प्रतिपाद्यं हि त्रिगुणतत्त्वम्।

सांख्यकारिकायामीश्वरकृष्णेन गुणस्वरूपं प्रतिपादयतोक्तं– प्रीत्यप्रीतिविषादात्मकाः[9] इति। तत्र प्रीतिश्च अप्रीतिश्च विषादश्च प्रीत्यप्रीतिविषादाः, ते आत्मा स्वरूपं येषां गुणानां ते भवन्ति प्रीत्यप्रीतिविषादात्मकाः। तत्र प्रीतिरात्मा भावो येषां ते प्रीत्यात्मनः। एवं प्रीतिः सुखम्, प्रीत्यात्मकः सत्त्वगुणः।अप्रीतिः दुःखम्, अप्रीत्यात्मकः रजोगुणः।विषादो मोहः, विषादात्मकस्तमोगुणः।

तत्र प्रीतिरात्मा भावो येषां ते प्रीत्यात्मनः। एवं प्रीतिः सुखम्, प्रीत्यात्मकः सत्त्वगुणः। अत्र आत्मशब्दः स्वभावे वर्तते, आत्मा देहे धृतौ जीवे स्वभावे परमात्मनि इति विश्वकोशात्। तथा च प्रीतिः स्वभावः धर्मो यस्यासौ प्रीत्यात्मकः। ननु या च प्रीतिः तदेव सत्त्वमिति किम्? तन्नोपदद्यते सांख्ययोगशास्त्रे धर्मधर्मिणोः अभेदानङ्गीकारात्। सत्त्वगुणो हि प्रीतिधर्मकः। तेन च तयोर्नाभेदः। धर्मधर्मिणोः कार्यकारणत्वभावरूपसम्बन्धत्वात् अत्रापि प्रीतिसत्त्वयोः कार्यकारणभावरूपसम्बन्धः। यत् यस्मादुत्पद्यते तत्तस्य धर्मो भवति। यथा शब्दगुणकमाकाशमित्यत्र शब्दो हि आकाशधर्मः, तस्मादुत्पन्नत्वात्

---

5 *योगसूत्रम्* –२.१८

6 *सांख्यकारिका*, ११

7 *गीताभाष्यम्*, ९.७

8 *सांख्यसूत्रम्*, ६.३९

9 *सांख्यकारिका*, १२

समवायिकारणत्वाच्च। शब्दः समवायसम्बन्धेन आकाशे वर्तते इति तस्य आकाशं प्रति समवायिकारणत्वम्। किञ्च गन्धो हि पृथिवीधर्मः। तेन च तस्य समवायिकारणत्वम्। एवमात्मनः धर्मो ज्ञानम्, आत्मनः एव तस्योत्पत्तेः समवायिकारणत्वेन वा। अत्रापि च प्रीतिर्हि सत्त्वधर्मः। अत एव सत्त्वात् प्रीतिरुत्पद्यते इति बोध्यम्। सुखकारणं हि सत्त्वम्।अप्रीतिः दुःखम्, अप्रीत्यात्मकः रजोगुणः। एवं रजोगुणः अप्रीतिधर्मकः। अप्रीतिरजसोरप्यस्ति कार्यकारणभावरूपसम्बन्धः। अतो दुःखकारणं रजः। विषादो मोहः, विषादात्मकस्तमोगुणः। तमोगुणः विषादधर्मकः। विषादतमसोरपि कार्यकारणभाव-रूपसम्बन्धः। तमसो विषाद उत्पद्यते इति ज्ञेयम्। अतो मोहकारणञ्च तमः।

रोगा हि दुःखस्य दातारः भवन्ति। ते हि ज्वरप्रमृतयः। द्विविधा हि रोगाः मानसाः कायिकाश्च। तत्र रजस्तमश्चेति मानसौ दोषौ इत्युक्तम्। ताभ्यां जायमानाः हि कामक्रोधलोभमोहभयाभिमानदैन्य-पैशुन्यविषादेर्षासूयामात्सर्य्यप्रभृतयःमानसाः विकाराः। तेभ्यः च जाताः उन्मादापस्मारमूर्च्छाभ्रमतमःसन्न्यासप्रभृतयः रोगाः। तेन च मानसिकरोगनिर्णयविधिषु रजस्तमसां साक्षादुपयोगो विद्यते।

तत्र अपस्माररोगविषये चरकसंहितायां चिकित्सास्थाने उच्यते –

“चिन्ताकामभयक्रोधशोकोद्वेगादिभिस्तथा।
मनस्यभिहते नृणामपस्मार प्रवर्तते”।।[10] इति।

अर्थात् चिन्ताकामभयक्रोधशोकोद्वेगादिभिः मनसि अभिहते आहते सति अपस्मारः प्रवर्तते। तत्र चिन्ताकामभयक्रोधशोकोद्वेगाः रजोगुणाज्जायते। मोहस्तु तमोगुणात्। तथाहि अत्यन्तक्रोधाद् अत्यन्तभयाद् अत्यन्तमोहाद्वा कस्यचन अपस्माररोगो जायते। तस्माद् अपस्माररोगनिर्णयविधौ रजस्तमसामुपयोगस्तु साक्षादेव।

किञ्चोच्यते सुश्रुते -

“संज्ञावहेषु स्रोतःसु दोषव्याप्तेषु मानवः।
रजस्तमःपरीतेषुमूढो भ्रान्तेन चेतसा॥

विक्षिपन् हस्तपादौ च विजिह्मभ्रूर्विलोचनः।
दन्तान् वादन् वमन् फेनं विवृताक्षः पतेत् क्षितौ॥

अल्पकालान्तरञ्चापि पुनः संज्ञां लभेत सः।
सोऽपस्मार इति प्रोक्तः स च दृष्टश्चतुर्विधः[11]”॥ इति।

---

[10] *चरकसंहिता* (चिकित्सास्थानम्, १०.५)

अत्र साक्षादेव दृश्यते दोषव्याप्तेषु रजस्तमःपरीतेषु मूढ एव अपस्माररोगग्रस्तः भवति।

तत्चिकित्सा च मानसिकदोषविरहितत्वेनैव भवति। उक्तञ्च चरकसंहितायां –

"तैरावृतानां हृत्स्रोतोमनसां सम्प्रबोधनम्।
................अपस्मारमुपाचरेत्[12]"।। इति।

अत्र सम्प्रबोधनमित्यनेन दोषविरहितत्वेन सम्यक्स्वव्यापारकमिति बोध्यम्। अर्थात् रजस्तमोविरहितत्वेन अपस्मारचिकित्सा भवति।

किञ्च उन्मादहेतुर्भयहर्षपूर्वो मनोऽभिघात[13] इत्यादिना उन्मादरोगस्य हेतवः उक्ताः। अर्थात् भयहर्षाभ्यां उन्माद इति मानसिकरोगो जायते। अत्र भयहर्षौ इत्युपलक्षणौ। क्रोधादयोऽपि मनोऽभिघातका अत्र ज्ञेयाः। एते च भयहर्षक्रोधादयः रजस्तमसामेव विकारभूताः। उन्मादचिकित्सायां च उक्तं चरकसंहितायां –

"निवृत्तामिषमद्यो यो हिताशीः प्रयतः शुचिः।
निजागन्तुभिरुन्मादैः सत्त्ववान् न स युज्यते[14]"।। इति।

अर्थात् यः आमिषं मद्यं न खादति, यश्च कल्याणकरं भोजनमेव भुङ्क्ते स सत्त्ववान् पुरुषः कदापि निजागन्तुभिरुन्मादैः न युज्यते। अर्थात् आमिषं मद्यं चेत्यादिकं हि राजसिकं भोजनम्। उक्तञ्च गीतायां -

"कट्वम्ललवणात्युष्णतीक्ष्णरुक्षविदाहिनः।
आहाराः राजसस्येष्टा दुःखशोकामयप्रदाः[15]"।। इति।

अर्थात् कटुः अत्यम्लः अतिलवणाक्तः अत्यूष्णः अतितीक्ष्णः रुक्षः विदाहिनः – उग्रजातीयाः लसुनादयः इत्येते राजसिकानामिष्टाः आहाराः। ते खलु दुःखशोकामयप्रदाः भवन्ति। तस्मादेव उन्मादः रोगः भवति। तेषां वर्जने सात्त्विकाहारसेवने च उन्मादादीनां रोगाणां निवारणं सम्भवतीति सत्त्ववानेव उन्मादरोगेण न युज्यते इति तात्पर्यम्। तत्र आयुः बुद्धिः बलं आरोग्यं सुखम् इत्येतेषां वर्धकाः, ये च रसोपेताः स्निग्धाः

---

[11] *सुश्रुतसंहिता*, १५.४

[12] *चरकसंहिता*, चिकित्सास्थानम्, १०.१४

[13] तत्रैव, ९.४

[14] *चरकसंहिता*, चिकित्सास्थानम्, ९.९८

[15] *श्रीमद्भगवद्गीता*, १७.९

ओजःप्रभृतिरूपेण देहे चिरकालस्थायिनः हृदयप्रियः ते हि सात्त्विकजनानामीप्सिताः। अर्थात् ये हि सात्त्विकाः तेषां प्रियाः आहाराः ह्येते। उक्तञ्च गीतायां –

> “आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः।
> रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः[16]”।। इति।

कायिकाः रोगाः हि वातपित्तश्लेष्माणां वैषम्यनिमित्तभूताः पाण्डुरोगप्रभृतयः। उक्तञ्च वातः पित्तं कफश्चेति शारीरदोषसंग्रहः। इति। अर्थात् वातः पित्तः कफश्चेति त्रयाणां दोषाणां वैषम्यनिमित्तको हि शारीररोगः। कायिकरोगे गुणानां यद्यपि साक्षादुपयोगो न विद्यते तथापि परम्परया तेषामुपयोगोऽस्त्येव। मनसः स्वस्थ्ये सति कायिकः रोगः प्रायः न भवति। मनसि यदि सत्त्वगुणातिशय्यं तिष्ठति तर्हि मानवाः सात्त्विकप्रियान् आहारानेव गृह्णन्ति। तेन च रोगान्विमुक्ताः भवन्तीति गुणानामुपयोगोऽस्त्येव।

सर्वविधेषु रोगेषु ज्वरो हि सर्वरोगप्रधानः। ज्वरो हि मानसकायिकभेदेन द्विविधो भवति। उक्तञ्च – द्विविधो विधिभेदेन ज्वरः शारीरमानसः[17] इति। यो देहाश्रयी ज्वरः शरीरदोषेण बलवता प्रारब्धः स तद्दोषचिकित्सयैव चिकित्स्यः, मानसोऽपि मानसदोषचिकित्सयैव चिकित्स्यः। रजस्तमौ हि मानसदोषौ। तेन तद्विरहेण सत्त्वगुणप्राधान्याच्च मानसज्वरस्य उपशमो भवति।

साम्प्रतिके काले प्रसिद्धेषु रोगेषु अग्रगण्यो हि मधुमेहरोगः। ये तु सम्प्रति मधुमेहरोगाक्रान्ताः तेषु रजोगुणस्य प्राबल्यमासीदिति निरीक्षणाद् वक्तुं शक्यते। मया तु सम्प्रति मधुमेहरोगाक्रान्तेषु पञ्चाशत् जनेषु यथायथं निरीक्षणं विहितम्। तेषु केचन नगरस्थाः केचन च ग्राम्यजनाः। तेषां दैनिकाहारादिनियमाः मया पृष्टाः। ते दुश्चिन्ताग्रस्ताः तिष्ठन्ति न वा, जीवनयापनं कीदृशं चेत्यादिकं मया पृष्टम्। तेन दृष्टं यत् रोगाक्रान्तात्पूर्वं तेषु प्रायः नरगस्थाः नैके एव नियमपूर्वकमाहारं न गृह्णन्ति स्म। व्यस्ततमेऽस्मिन् समाजे वस्तुतः तेषां समय एव नास्ति सम्यक्तया आहारं कर्तुम्। प्रायः तैः राजसिकप्रियाः आहाराः एव भक्षिताः। अपरतः ये तु ग्राम्यजनाः तेषां नगरस्थजनापेक्षया व्यस्तताभावात् मधुमेहरोगः प्रायः न दृश्यते। तत्र श्रीचैतन्यकलेज्-इति महाविद्यालयस्य अध्यक्षचरणाः मया निरीक्षिताः। ते तु अधुना मधुमेहरोगाक्रान्ताः। रोगात्पूर्वं कर्मचाञ्चल्यात् रजोगुणप्राबल्यात् प्रायः राजसिकप्रियाः आहाराः खादन्ति स्म। किञ्च आहारादिनियमाः अपि अव्यवस्थिता। अपि च चाञ्चल्यकारणात् सम्यक्तया चर्वणं न विधाय शीघ्रं खादन्ति स्म। वस्तुतः सम्प्रति कर्मप्राबल्यात् येन तेन प्राकरेण खादन्ति एते कर्मव्यस्ताः मानवाः। एवं ये अनियन्त्रितजीवनाः ते सम्भाव्यन्ते मधुमेहरोगत्वेन।

---

[16] *श्रीमद्भगवद्गीता*, १७.८

[17] *चरकसंहिता*, चिकित्सास्थानम्, ३.३२

आधुनिकचिकित्सायां सांख्ययोगदर्शनयोरुपयोगः

चिकित्सायां पतञ्जलिप्रोक्तानां योगस्य अष्टाङ्गानामुपकार्यत्वं त्वनस्वीकार्यमेव। तत्र यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयोऽष्टाङ्गानि[18] इति। पतञ्जलिमुनिः अष्टाङ्गयोगस्य भागद्वयम् अकरोत्। बहिरङ्गः, अन्तरङ्गश्चेति। अष्टाङ्गयोगस्य बहिरङ्गभागे यम-नियम-आसन-प्राणायाम-प्रत्याहाराः अन्तर्भवन्ति। शरीरादीनां बाह्यलक्ष्यानि साधयितुम् बहिरङ्गयोगस्य साधना भवति।अष्टाङ्गयोगस्य अन्तरङ्गभागे चधारणा-ध्यान-समाधयः अन्तर्भवन्ति।

अहिंसासत्यमस्तेयब्रह्मचर्यमपरिग्रहा यमाः[19] इति पातञ्जलयोगसूत्रे यमाः प्रोक्ताः। अहिंसा, सत्यम्, अस्तेयं, ब्रह्मचर्यम्, अपरिग्रहः चेति यमाः।आसक्तिं परित्यज्य शरीरे विद्यमानेषु इन्द्रियेषु वैराग्यप्रदर्शनं यम इति कथ्यते। एतेन चित्तशुद्धिः जायते। तस्माच्च मानसरोगान्मुक्तो भवति मानवः।

शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः[20] इति पतञ्जलियोगसूत्रे प्रतिपादितं वर्तते । शौचम्, सन्तोषः, तपः, स्वाध्यायः, ईश्वरप्रणिधानं च नियमाः प्रोक्ताः।शौचम् त्रिविधं बौद्धिक-वाचिक-शारीरिकञ्चेति।काम-क्रोध-मोह-द्वेष-ईर्ष्या-अभिमान-कुविचारादीनां त्यागेन, दया-सहजता-नम्रता-अहिंसा-सत्यादीनां निरन्तरधारणेन च बुद्धिः शुद्धा भवति।कठोरवचन-निन्दा-छल-असत्यवचानानां त्यागः, सत्य-मधुरवचन-स्नेह-सान्त्वादीनां सेवनं च वाचिकशौचत्वेन परिगण्यते।मृत्तिका-गोमय-गाजनीमृत्तिका-उबटन-त्रिफला-रीठादीनां जलेन सह उपयोगं कृत्वा शरीरस्य निर्मलीकरणम् एव शारीरिक-शौचं भवत। आरोग्यदृष्ट्या रोगजन्तूनां निवारणार्थं जलेन मृत्तिकया वा इन्द्रियाणां प्रक्षालनं सावधानेन मनसा कुर्वन्ति स्म अस्माकं पूर्वजाः।

साधकः यदा उपविशति, तदा सः स्थिरतायाः, सुखस्य च अनुभवं करोति चेत्, तत् आसनम् उच्यते। स्थिरसुखमासनमित्येतत्सूत्रं पतञ्जलिमुनिना योगसूत्रे प्रतिपादितं वर्तते। तद्यथा पद्मासनम्, वीरासनं, भद्रासनं, स्वस्तिकं, दण्डासनं, सोपाश्रयं, पर्यङ्कं, क्रौञ्चनिषदनं, हस्तिनिषदनमुष्ट्रनिषदनं, समसंस्थानं, स्थिरसुखं, यथासुखं चेत्येवमादीनि आसनानि प्रोक्तानि ।

तत्र सर्वरोगनिरामयासनं हि पद्मासनम्। एतेन हृदयस्य फुसफुस-यन्त्रस्य च कर्मक्षमवृद्धिर्जायते। भुजङ्गासनेन च स्त्रीरोगनिरामयो भवति। उष्ट्रासनेन कोष्ठकाठिन्योपशमः, मेदह्रासः हृद्रोगस्य च उपशमो भवति। चक्रासनेन अपस्मारादीनां रोगाणामुपशमो भवति। पवनमुक्तासनेन उदरजानां समस्यानामम्वलादीनां समाधानं भवति। स्नायविकशक्तिवृद्धिः सक्रियरूपेण रक्तसञ्चालनं च गोमुखासनेन सिद्धासनेन च भवतः। पाचनक्षमतावृद्धिः चर्मरोगोपशमश्च मत्स्यासनगोमुखासनाभ्यां भवितुमर्हतः।

---

[18] *योगसूत्रम्*, २.२९

[19] *तत्रैव*, २.३०

[20] *तत्रैव*, २.३२

अतिरिक्तः भारः, उच्चतरः रक्तवाहः, अनियन्त्रितजीवनयात्रा, हानिकारकग्लुकोजसहनशीलता, मुत्रनिरोधकः (insulin resistance) चेत्यादिकं हि मधुमेहरोगस्य कारणम्। उक्तञ्च चरकसंहितायां –'बह्वबद्धं मेदो मांसं शरीरजक्लेदः शुक्रं शोणितं वसा मज्जा लसीका रसश्चौजःसङ्ख्यात इति दूष्यविशेषाः'[21]। इति। योगासनैस्तु एते दोषाः नियन्त्रिताः भवितुमर्हन्ति। योगासनैस्तु insulin – इत्यस्य ग्रहणक्षमतावृद्धिर्जायते। तत्र गोमुखासनेन सिद्धासनेन रक्तसञ्चालनं नियन्त्रितं भवति। हलासनादिभिः विविधैरासनैः insulin – glucose – चेत्येतयोः अनुपातस्य समतां विधाय मधुमेहरोगः नियन्त्रितः भवति। किञ्च नैकानि चतुरङ्गदण्डवीरभद्रासनादीनि आसनानि सन्ति यैः भारह्रासो जायते।एवं दृश्यते बहुविधैरेव आसनैः बहुविधानां रोगाणामुपशमो भवितुमर्हति।

तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः[22] इत्यनेन सूत्रेण पतञ्जलिमूनिना योगसूत्रे प्राणायामस्य निरूपणं कृतम् अस्ति । आसने स्थिरतायां प्राप्तायां सत्यां श्वास-प्रश्वासयोः स्वाभाविकगतेः नियमनं कृत्वा तयोः समनता स्थापनस्य प्रक्रिया एव प्राणायामत्वेन परिगण्यते । रेचक-कुम्भक-पूरकाणां प्रक्रिया एव प्राणायामत्वेन परिगण्यते। प्राणायामेषु अन्यतमो हि कपालभातिः। कपालभातिप्राणायामेन देहे वायुसञ्चालनवृद्धिकारणात् रक्तसञ्चालनं सम्यक्तया भवति। तेनापि मधुमेहरोगः नियन्त्रितो भवति। किञ्च प्राणायामेन हृद्रोगादिभ्यः मुक्ताः भवन्ति मानवाः। प्रत्याहार-धारणा-ध्यान-समाधिभ्यः प्रायः चित्तशुद्धिः जायते। तस्माद् मानसिकरोगान्मुक्ताः भवन्ति मानवाः।

पारिशेष्येण वक्तुं शक्यते यत् आधुनिकचिकित्सायां सांख्ययोगोक्तसिद्धान्तानाम् उपयोगः साक्षात् परम्परया वा विद्यत इत्यत्र नास्ति सन्देहावसर इत्यलं विस्तरेणेति शम्।

।।सहायकग्रन्थसूची।।

ईश्वरकृष्णः. *सांख्यकारिका*, श्रीविश्वनारायणशास्त्रिविरचितया सांख्यबोधिनीव्याख्यया तत्कृतटिप्पण्या च समलंकृता, वाचस्पतिमिश्रविरचितया सांख्यतत्त्वकौमुद्या च विभूषिता, चौखम्बा विद्याभवन, वाराणसी, २००२.

…………. *सांख्यकारिका*, सम्पा – पूर्णचन्द्रवेदान्तचञ्चु, पश्चिमवङ्गराज्यपुस्तकपर्षत्, द्वितीयप्रकाशनम्, कलिकाता, अगस्त – १९८३.

21 *चरकसंहिता*, निदानस्थानम्, ४.७

22 *योगसूत्रम्*, २.४९

…………. *सांख्यकारिका*, सांख्यतत्त्वकौमुदीसहिता, सम्पा – श्रीनारायणचन्द्रगोस्वामी, संस्कृतपुस्तकभाण्डारः, तृतीयप्रकाशः, कलिकाता, १४०६.

चरकः. *चरकसंहिता;* सत्यभामावाइ पाण्डुराङ्, वोम्वाइ, १९४१.

तर्कवाचस्पतिः. तारानाथः, *वाचस्पत्यम्*; कलिकाता, १८७३.

पतञ्जलिः. *पातञ्जलयोगदर्शनम्*, तत्त्ववैशारदीयोगवार्तिकटीकाद्वयोपेतं व्यासभाष्यम्, सम्पादिका विमला कर्णाटक, काशीहिन्दुविश्वविद्यालय एवं रत्नापाब्लिकेशन, वाराणसी, १९९२.

पतञ्जलिः. *योगदर्शनम् षट्टीकोपेतम्*; चौखम्बा संस्कृत सीरिज आफिस, बनारस, १९५१.

वसुः. हरिप्रसादः, *शब्दकल्पद्रुमः*; राष्ट्रियसंस्कृतसंस्थानम्, २००६.

सुश्रुतः. *सुश्रुतसंहिता*; पाण्डुराङ् जावाजी,वोम्वाइ, १९३१.

न्यायसिद्धान्तमुक्तावल्या आकाशग्रन्थे दिनकरी-प्रभाटीकयोः समीक्षणम्

सुव्रत-गायेनः[1]

प्रमाणप्रमेयादिपदार्थप्रपञ्चिते कर्कशतरतर्कप्रपञ्चे विश्वविश्रुतवैदुष्यवैदुर्य-शोभितस्य श्रीमद्गङ्गेशोपाध्यायस्य निखिलनिगमकृदादरणीयतमा निरतिशयवाङ्माधुरी-गुम्फिता तत्त्वचिन्तामणिरिति कीर्त्तिदीधितिः जागदीशगादाधरादिव्याख्यानसनाथिता नव्यन्यायमन्दाकिन्याः परमां स्फूर्त्तिं सम्पादयन्ती सर्व्वैरेव सबहुमानमुपजीव्यते। किन्तु क्रमेण तत्त्वचिन्तामणेस्तत्त्वावधारणं बालानां दुष्करमिति तदीयाशयनिचयमनुजीव्य काणादन्यायमतयोस्सङ्क्षेपरूपो भाषापरिच्छेदाख्यग्रन्थो ग्रथितः श्रीविश्वनाथसिद्धान्त-पञ्चाननैः। भवत्स्वपि प्रकरणग्रन्थान्तरेषु तर्कभाषा-तर्कसंग्रह-तार्किकरक्षा-न्यायसिद्धान्तदीपादिषु न्यायसिद्धान्तमुक्तावलीकीर्त्तिगरिमा ग्रन्थान्तरोपयोगितामतिशेते। तद्भाषापरिच्छेदनिगूढतत्त्वप्रकाशार्थं नैकैर्विद्वद्भिर्नैकाः टीकाः प्रणीताः। तासु महादेवदिनकरभट्टयोः दिनकरी, श्रीनृसिंहशास्त्रिणः प्रभा च सर्वा हि टीका अतिशय्य विद्योतेतेतमाम्। प्रकाशापरनामधेयो दिनकरीयः ग्रन्थो ग्रन्थग्रन्थिजालजटिलोऽपि अनायासतयाकरग्रन्थनिगूढार्थनिरूपणेन न्यायनयनिपुणमनआवर्जनकर इति निर्विवादविषयो विदुषाम्। परमनितरसाधारणी ग्रन्थकारतात्पर्यप्रकाशिनी प्रभा ग्रन्थान्तरापेक्षया विचारगाम्भीर्यमुद्वहन्ती तादृशेतरदुरूहग्रन्थग्रन्थिमोचनेन स्वप्रतिभया बन्धेतरमतमर्दनेन विरुद्धराद्धान्तच्छेदनेन च भृशं नर्त्तयति शास्त्रानुशीलनपरिशीलितधीषणानां सतां चेतांसि।

द्रव्यादिसप्तपदार्थास्तथा पृथिव्यादिनवद्रव्याणि विश्वनाथेन व्याख्यातानि प्रत्यक्षखण्डे। तत्राकाशग्रन्थे दिनकरीकृता नव्यन्यायनयानुसारं सयुक्ति न्यरूपि शब्दसमवायिकारणतया आकाशसिद्ध्यभावः। परं प्रभाकृता तत्सर्वं महताडम्बरेण निराकृतम्। एतत्सर्वमधस्तात् आलोच्यते यथामति –

दिनकरीकारः नव्यमतमित्थम् उपस्थापयति – '**नव्यास्तु शब्दनिमित्तकारणत्वेन क्लृप्तस्येश्वरस्यैव शब्दसमवायिकारणत्वम्। न चेश्वरस्य शब्दसमवायिकारणत्वं जीवस्य वेत्यत्र विनिगमनाविरहः। जीवस्य शब्दसमवायित्वे ज्ञानवच्छब्दस्यापि मानसत्वापत्ते-रदृष्टादिवत्प्रतिबन्धककल्पने चातिगौरवम्। न चैवं कर्णशष्कुलीविवरावच्छिन्नाकाशस्य कथं शोत्रत्वोपपत्तिरिति वाच्यम्। तथाविधस्येश्वरस्यैव श्रोत्रत्वोपपत्तेरित्याहुः।**'[2] इति।

आशयो ह्यस्यैवम्, अत्र दिनकरीकारा आकाशानङ्गीकर्तृणां नवीननैयायिकानां मतमुपस्थापयन्ति। तेषां नये, न शब्दसमवायिकारणत्वेन आकाशस्य सिद्धिः। किन्तु शब्दसमवायिकारणत्वेनेश्वरस्यैव सिद्धिः। ननु

---

[1] सहकारी अध्यापकः, संस्कृतविभागीयः, चन्दननगर-महाविद्यालयस्य, चन्दननगरम्, पश्चिमवङ्गः

[2] *कारिकावली*, सम्पा. श्रीशङ्कररामशास्त्री, पृ- 370

कार्यमात्रं प्रतीश्वरस्य निमित्तकारणत्वाच्छब्दनिमित्तकारणत्वमेव युक्तमीश्वरस्य, कथं समवायिकारणत्वमपीति चेदुच्यते एकस्यैव एककार्यनिरुपितनिमित्तकारणत्व-समवायिकारणत्वयोः सम्भवादीश्वरस्यापि शब्दरूपं कार्यं प्रति युगपन्निमित्तकारणत्वं तथा समवायिकारणत्वं युक्तियुक्तम्। न केवलं शब्दविषये एव ईश्वरस्य निमित्तसमवायित्वरूपोभयहेतुत्वम्, अपि तु ईश्वरघटसंयोगं प्रति ईश्वरस्यैव समवायिकारणत्वं निमित्तकारणत्वं च। एवं हि शब्दनिमित्तकारणस्य ईश्वरस्यैव शब्दसमवायिकारणत्वसम्भवाद् शब्दसमवायिकारणत्वेन अतिरिक्ततया आकाशस्वीकारे मानाभावः। न चेश्वरवज्जीवोऽपि विनिगमनाविरहाच्छब्दसमवायिकारणमिति वाच्यं, जीवस्य शब्दसमवायिकारणत्वे स्वीकृते शब्दस्य जीवसमवेतत्वेन जीवसमवेतज्ञानादिवज्जीवसमवेतस्य शब्दस्यापि मानसप्रत्यक्षविषयत्वापत्तेः। न च शब्दस्य मानसप्रत्यक्षत्वे प्रतिबन्धकं किञ्चिदस्तीति वाच्यं कल्पनागौरवात्। तथाहि रामरुद्यां निगदितम् – **अतिगौरवमिति। विनिगमनाविरहेण नानाजीवेषु शब्दसमवायिकारणताया अतिरिक्तप्रतिबध्यप्रतिबन्धकभावकल्पनायाश्चापत्तेरिति भावः।**[3] इति।

नन्वाकाशासिद्धौ कथं कर्णशष्कुल्यवच्छिन्नस्याकाशस्य श्रोत्रत्वोपपत्तिरिति चेदुच्यते आकाशाभावे कर्णशष्कुल्यवच्छिन्नस्य ईश्वरस्यैव श्रोत्रत्वमिति नव्यानामाशय इति दिनकरीकृन्मतम्।

प्रभाकृद्दिनकरभट्टोपस्थापितं नव्यमतं नाङ्गीकरोति। तथाहि तन्नये शब्दस्येश्वरगुणत्वाभावान्न शब्दसमवायिकारणत्वेनेश्वरसिद्धिः, अपि तु शब्दसमवायिकारणत्वेनाकाशस्यैव सिद्धिः। तथाहि शास्त्रिसरस्वती - **नव्यास्तु शब्दनिमित्तकारणत्वेन क्लृप्तस्येश्वरस्यैव शब्दसमवायिकारणत्वम्। न चेश्वरस्य शब्दसमवायिकारणत्वं जीवस्य वेत्यत्र विनिगमनाविरहः। जीवस्य शब्दसमवायित्वे ज्ञानवच्छब्दस्यापि मानसत्वापत्तेरदृष्टादिवत्प्रतिबन्धककल्पने चातिगौरवम्। न चैवं कर्णशुष्कलीविवरावच्छिन्नाकाशस्य कथं शोत्रत्वोपपत्तिरिति वाच्यम्। तथाविधस्येश्वरस्यैव श्रोत्रत्वोपपत्तेरित्याहुः। तन्न। नात्मविशषगुणो बहिरिन्द्रियग्राह्यत्वादित्यनुमानेनात्मसामान्य-विशेषगुणत्वाभावस्य साधितत्वेन शब्दस्य ईश्वरगुणत्वस्यात्यन्तासम्भावितत्वात्।**[4] इति।

प्रभाकारस्याशयस्त्वेवं यद्दिनकरेण नव्यानां यन्मतमुपस्थापितं शब्दनिमित्तकारणस्य ईश्वरस्यैव शब्दसमवायिकारणत्वान्नाकाशसिद्धिरिति तन्न युक्तम्। तथाहि शब्दो नात्मविशेषगुणो बहिरिन्द्रियग्राह्यत्वाद्रुपवदित्यनुमानेन मनोभिन्नेन्द्रियेण बहिरिन्द्रेयेण शब्दस्य ग्राह्यत्वात् प्रत्यक्षविषयत्वात् नात्मसामान्यगुणत्वं नाप्यात्मविशेषगुणत्वम्। एवं शब्दस्य आत्मसामान्यविशेषगुणत्वाभावाद् ईश्वरगुणत्वमसम्भवम्। तस्माच्च शब्दस्य ईश्वरसमवेतत्वाभावान्न शब्दसमवायिकारणत्वेन ईश्वरसिद्धिः, अपि तु शब्दसमवायिकारणत्वेन आकाश एवाङ्गीकार्यः इति प्रभाकृन्नयः।

---

[3] *कारिकावली*, सम्पा. श्रीशङ्कररामशास्त्री, पृ- 370

[4] तत्रैव, पृ- 370

पुनस्तत्र दिनकरणभट्टेन स्वतन्त्रनैयायिकानां मतं सयुक्ति उपस्थापितम्। तथाहि स्वतन्त्रानां नैयायिकानां नये शब्दः मृदङ्गानामेव गुणः न तु आकाशस्य। अतः शब्दसमवायिकारणम् मृदङ्गम्, न त्वाकाशम्। न च मृदङ्गादावनेकत्र शब्दसमवायिकारणत्वस्वीकारे गौरवाल्लाघवेन आकाशसिद्धिरिति वाच्यं प्राचीनानामनेकमृदङ्गादिषु मृदङ्गत्वादिरूपेण शब्दनिमित्तकारणत्वस्वीकारवन्मृदङ्गत्वादिरूपेण अनेकमृदङ्गादिषु शब्दसमवायिकारणत्वस्वीकारात्। किञ्च, मृदङ्गे शब्दः इति प्रतीत्यापि मृदङ्गादीनां शब्दसमवायिकारणत्वं सिद्ध्यति। न च मृदङ्गे शब्द इत्यत्र मृदङ्गस्य शब्दावच्छेदकत्वमेव प्रतीयते, न तु शब्दाश्रयत्वम् इति वाच्यम्, उक्तप्रतीतेः अवच्छेदकत्वविषयकत्वे प्रमाणाभावात्, घटे रूपम् इत्यादौ सप्तम्या समवायसम्बन्धावच्छिन्नाश्रयत्वं बोध्यते, मृदङ्गे शब्द इत्यादौ अवच्छेदकत्वं बोध्यत इति वैरूप्यकल्पनायां गौरवाच्च। तथा च, गुणगुणिनोः समवायसम्बन्धं स्वीकृत्य समवायसम्बन्धावच्छिन्नाधारताविषयकतया घटे रूपम् इत्यादिप्रतीतिवत् शब्दमृदङ्गयोः समवायं स्वीकृत्य मृदङ्गे शब्द इति प्रतीतेः शब्दनिरूपितसमवाय-सम्बन्धावच्छिन्नाधारताविषयकत्वं स्वीकरणीयम्। तथा च मृदङ्गस्य शब्दसमवायिकारणत्वमनस्वीकार्यमिति स्वतन्त्रनैयायिकनयः इति दिनकरीकारमतम्। तथाहि दिनकर्यां तेन न्यगादि – **स्वतन्त्रास्तु मृदङ्गादीनामेव गुणः शब्दः प्राचीनैरपि मृदङ्गत्वादिना निमित्तकारणतायास्स्वीकारात् मृदङ्गे शब्द इत्यादिप्रतीतेश्च। न च तत्रावच्छेदकत्वं विषयः मानाभावात् अन्यथा तत्रावच्छेदकताख्यस्वरूपस्य सम्बन्धस्यान्यत्र समवायस्य कल्पने गौरवादिति वदन्तीति।**[5] इति।

प्रभाकारस्तु स्वतन्त्रनैयायिकमतमपि नाङ्गीकरोति। तन्नये शब्दो न स्पर्शवद्विशेषगुणः अग्निसंयोगासमवायिकारणकत्वाभावे सति अकारणगुणपूर्वकप्रत्यक्षत्वात् सुखवत् इत्यनुमानेन शब्दस्य स्पर्शवन्मृदङ्गादिविशेषगुणत्वाभावः। तथाहि अत्र सत्यन्तस्य अपाकजत्वमित्यर्थः। अकारणगुणपूर्वकत्वप्रत्यक्षत्वात् इत्यस्य कारणगुणाजन्यत्वे सति प्रत्यक्षत्वात् इत्यर्थः। अत्र च कारणम् समवायिकारणत्वमिति यावत्। एवं च स्वाश्रयसमवायिकारणनिष्ठगुणाजन्यत्वे सति प्रत्यक्षविषयत्वं हेतुः। साध्यं च स्पर्शवत्पृथिव्यादिचतुष्टयगुणभिन्नत्वम्। अत्र शब्दो हि अपाकजः, अकारणगुणपूर्वकः प्रत्यक्षविषयश्चेति तत्र स्पर्शवत्पृथिव्यादि-चतुष्टयविशेषगुणभिन्नत्वं सिद्ध्यति। इत्थं प्रकृतानुमानेनैव शब्दस्य स्पर्शवन्मृदङ्गादिविशेषगुणत्वाभावान्मृदङ्गादीनां शब्दसमवायिकारणत्वमप्ययुक्तम्। तथाहि प्रभाकृतामुक्तिः – **स्वतन्त्रास्तु मृदङ्गादीनामेव गुणः शब्दः प्राचीनैरपि मृदङ्गत्वादिना निमित्तकारणतायास्स्वीकारात् मृदङ्गे शब्द इत्यादिप्रतीतेश्च। न च तत्रावच्छेदकत्वं विषयः मानाभावात् अन्यथा तत्रावच्छेदकताख्यस्वरूपस्य सम्बन्धस्यान्यत्र समवायस्य कल्पने गौरवादिति वदन्तीति। तन्न शब्दो न स्पर्शवद्विशेषगुण इत्याद्यनुमानेन शब्दस्य स्पर्शवद्विशेषगुणत्वाभावस्य साधितत्वात् मृदङ्गादिविशेषगुणत्वस्यात्यन्तासम्भावित-त्वादित्याकाशग्रन्थः।**[6] इति।

---

[5] *कारिकावली*, सम्पा. श्रीशङ्कररामशास्त्री, पृ- 370

[6] तत्रैव पृ- 371

अत्रेदं ब्रूमः, वस्तुतः दिनकरी-प्रभयोर्नास्ति मतवैमत्यम्। मन्ये स्वतन्त्रनैयायिकानां नये दिनकरीकारस्यापि नास्ति साम्मत्यम्। अतो दिनकरीकारेण 'वदन्ती'ति प्रयोगः कृतः। परं दिनकरीकारेण स्वग्रन्थे स्वतन्त्रनैयायिकानां मतविमर्दनं विशिष्य नाकारि। प्रभाकृता तु स्वतन्त्रनैयायिकानां सयुक्ति मतं निराकृतमित्येव विशेषः। अतः समन्वयं दर्शयितुमेतद्वक्तुं शक्यते यद्दिनकरीग्रन्थस्य परिपूरको हि प्रभाग्रन्थः अत्र। न च स्वतन्त्रनैयायिकमतखण्डनाकथनेन दिनकर्या न्यूनतादोष इति वाच्यम्, स्वतन्त्रनैयायिकमतखण्डनस्य पूर्ववर्तिना शब्दो न स्पर्शवद्विशेषगुण इत्याद्यनुमानग्रन्थेन गतार्थत्वात्। अतो दिनकरीकृतास्मिन् विषये मौनतावलम्बितेति न दोषः।

अपि चेदमपि ब्रूमः, शब्दस्य मृदङ्गादिगुणत्वे आश्रयादन्यत्रानुपलब्धिप्रसङ्गः, पृथिव्यादिगुणानां स्वाश्रयादन्यत्र ग्रहणाभावात्। परं शब्दस्य मृदङ्गादेः गुणिनः अन्यत्र कर्णशष्कुलीदेशे अपि ग्रहणं सर्वसम्मतमिति न मृदङ्गगुणः शब्दः इति स्वतन्त्रनैयायिकनयो हि सर्वथा हेय एवेति शिवम्।

सहायकग्रन्थग्रामाः

अन्नंभट्टः। *तर्कसंग्रहः* (दीपिका-अध्यापनासहितः)। सम्पा. श्रीनारायणचन्द्रगोस्वामी, कलिकाताः संस्कृत-पुस्तक-भाण्डारः, 1413 (तृतीयसंस्करणम्)।

.... *तर्कसंग्रहः* (नवटीकासहितः)। सम्पा. सात्करिशर्मा, वाराणसीः चौखम्बा-संस्कृत-प्रतिष्ठानम्, 2003 (चतुर्थसंस्करणम्)।

गौतमः। *न्यायदर्शनम्* (प्रथमखण्डात्मकम्)। सम्पा. फणीभूषणतर्कवागीशः, कलिकाताः पश्चिमवङ्ग-राज्य-पुस्तक-पर्षत्, 2014 (चतुर्थप्रकाशः)।

झाल्किकारः, भीमाचार्य्यः। *न्यायकोषः*। बोम्बेः गभर्न्मेन्ट्-सेन्ट्राल्-वुक-डिपो, 1893 (द्वितीयसंस्करणम्)।

न्यायपञ्चाननः, विश्वनाथः। *कारिकावली* (प्रभा-मञ्जूषा-दिनकरीय-रामरुद्रीय-गङ्गारामीय-सहिता)। सम्पा. शङ्कररामशास्त्री, वाराणसीः चौखम्बा-संस्कृत-प्रतिष्ठानम्, 2016 (पुनर्मुद्रणम्)।

न्यायपञ्चाननः, विश्वनाथः। *न्यायसूत्रवृत्तिः*। सम्पा. सेख-साविर-आलिः, कलिकाताः संस्कृत-पुस्तक-भाण्डारः, 2015 (प्रथमप्रकाशः)।

प्रशस्तपादाचार्यः। *प्रशस्तपादभाष्यम्* (पदार्थधर्मसंग्रहः) (खण्डद्वयात्मकम्)। सम्पा. ब्रह्मचारी मेधाचैतन्यः, कलिकाताः संस्कृत-पुस्तक-भाण्डारः, 2016 (पुनर्मुद्रणम्)।

भट्टाचार्य्यः, श्रीमोहनः तथा भट्टाचार्य्यः, दीनेशचन्द्रः। *भारतीय दर्शन कोष (प्रथम-खण्डात्मकः)*। कलिकाताः संस्कृत-कलेज्, 1958.

निरुक्तदिशा निपातज्ञानजन्यबोधे सादृश्यज्ञानस्योपयोगः

शम्पा-पालः[1]

'पद्यते गम्यतेऽनेनेति पदम्' इति पदनिरुक्तिः। 'नापदं शास्त्रे प्रयुञ्जीत' इति शास्त्रवचनात् पदज्ञानं नितान्तमावश्यकम्। ननु किं नाम पदमिति चेदुच्यते 'प्रकृतिविभक्तिसाधितत्वं पदत्वम्' इति। विभक्तियुक्तायाः प्रकृतिर्हि पदम्। सुप्तिङन्तं पदम्[2] इति पाणिनिः। पदं द्विधा विभज्यते सुबन्तं तिङन्तञ्चेति। हरिकारिकायामुक्तम् –

"द्विधा कैश्चित् पदं भिन्नं चतुर्धा पञ्चधापि वा।
अपोद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवत्[3]"।।

माधवाचार्येणोक्तम् – 'कर्मप्रवचनीयेन वै पञ्चमेन सह पदस्य पञ्चविधत्वमिति हेलाराजो व्याख्यातवान्। कर्मप्रवचनीयास्तु क्रियाविशेषोपजनितसम्बन्धावच्छेदहेतव इति सम्बन्धविशेषद्योतनद्वारेण क्रियाविशेषद्योतनादुपसर्गेषु एवान्तर्भवन्तीत्यभिसन्धाय पदचातुर्विध्यं भाष्यकारेणोक्तं युक्तमिति विवेक्तव्यम्'। यास्केन निरुक्ते पदस्य चातुर्विध्यमङ्गीकृतम् – 'पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति'[4]। दुर्गाचार्येणोक्तम् – 'यान्येतानि चत्वारि पदजातानि, या एताश्चतस्रः पदजातयः। लोके वेदे च। कतमानि तानि? नामाख्याते चोपसर्गनिपाताश्च। किन्तेषामिति? इमानि चत्वार्यपि पदजातानि सन्त्येतस्मिन् शास्त्रे'[5]। नामपदवाच्यार्थाश्रयक्रियोपलक्ष्यत्वाच्चाख्यातस्य पश्चान्निपातः उपसर्गनिपाता इति। आख्यातसहयोगित्वादुपसर्गाणाम् आख्यातानन्तरं पाठः, परिशेषाणां निपातानां पश्चात् अपरिमिताश्च निपाता इति। चतुर्षु पदेषु निपातोऽन्तिमः। 'ज्वलिति कसन्तेभ्यो णः'[6] इति सूत्रानुसारं निपूर्वकात् पद्धातोः णप्रत्ययेन निपातशब्दः सिद्धः। बालमनोरमाकृत् व्याख्याति – 'प्रातिस्विकविधिं विना सिद्धप्रक्रियस्य शब्दस्वरूपस्य निर्देशो निपातनम्'[7] इति। निपातलक्षणमलक्षि यास्केन – 'उच्चावचेष्वर्थेषु निपतन्ति'[8] इति। अर्थात् उच्चावचेषु अनेकप्रकारेष्वर्थेषु निपतन्तीति निपाताः। बहुष्वर्थेषु निपाता भवन्ति वृत्तिमन्तः। लौकिके वैदिके च प्रयोगे निपातार्थाः दृश्यन्ते। निपाताः साधारणतया उपमार्थे कर्मोपसंग्रहार्थे पदपूरणार्थे

---

[1] गवेषिका, संस्कृतविभागः, बाँकुड़ाविश्वविद्यालयः, पश्चिमवङ्गः।

[2] *अष्टाध्यायी*, सम्पा. तपनशङ्करभट्टाचार्यः, संस्कृतवुकडिपो, कलिकाता, 2006. (1.4.14)

[3] *वाक्यपदीयम्* , सम्पा. विष्णुपदभट्टाचार्यः, (3.1.)

[4] *निरुक्तम्* , सम्पा. ब्रह्मचारिमेधाचैतन्यः, दक्षिणेश्वर रामकृष्ण संघ, कलिकाता, 1987. (1.1.1)

[5] तत्रैव

[6] *अष्टाध्यायी* (3.1.140)

[7] *वैयाकरणसिद्धान्तकौमुदी*, (6.1.81), *बालमनोरमा*

[8] *निरुक्तम्* , सम्पा. ब्रह्मचारिमेधाचैतन्यः, दक्षिणेश्वर रामकृष्ण संघ, कलिकाता, 1987. (1.2.1)

च प्रयुज्यन्ते। यास्काचार्येण निरुक्तस्य नैघण्टुककाण्डे प्रसङ्गोऽयमालोचितः- 'अप्युपमार्थेऽपि कर्मोपसंग्रहार्थेऽपि पदपूरणाः'। तत्र ये खलु निपाता उपमार्थकास्ते निश्चप्रचमेव सादृश्यपरकाः।

अत्रेदम् उल्लेखार्हं यत् निपातजन्यज्ञानबोधाय क्षेत्रविशेषेषु सादृश्यज्ञानमपरिहार्यम्। ननु किं नाम सादृश्यज्ञानमिति चेदुच्यते सिद्धान्तमुक्तावल्याम् – 'तद्भिन्नत्वे सति तद्गतभूयो धर्मवत्त्वम् सादृश्यम्'। सादृश्यं नाम तुल्यत्वं समानरूपत्वं वेति। सादृश्यं यस्यास्ति स सदृशः। सदृशस्य भावः सादृश्यम्। सादृश्यं नियतत्वेन प्रतियोगिनम् अनुयोगिनञ्च अपेक्षते। सिद्धान्तमुक्तावल्याः सादृश्यलक्षणस्थेन तच्छब्देन सादृश्यस्य प्रतियोगी अवबुध्यते। 'चन्द्रन्मुखम्' इत्यत्र तच्छब्दार्थः तावत् चन्द्रः। मुखं चन्द्राद् भिन्नवस्तु परं मुखे चन्द्रगताह्लादकत्वादिधर्मो विद्यत इति कृत्वा तत्र चन्द्रसादृश्यम् अस्ति। यथैव प्रतिशास्त्रं प्रायेण सादृश्यतत्त्वं नियतत्वेन वर्तत एव, तथैव निपातज्ञानजन्यबोधे सादृश्यतत्त्वस्य महदुपयोगित्वं विद्यते। वस्तुतः, सादृश्यतत्त्वस्य मूलं बीजमविज्ञाय कथमपि उपमार्थकानां निपातानां विषये ज्ञानमसम्भवि।

'उपमीयतेऽनये'ति विग्रहे कर्तृभिन्ने वाच्ये उपपूर्वकात् माधातोरुत्तरम् 'आतश्चोपसर्गे' इति णप्रत्यययोगाच्च उपमेति शब्दो निष्पन्नः। टीकाकृता दुर्गाचार्येणोक्तम् – 'उपगम्यातथागुणैर्मीयत इत्युपमा'। 'उपमा नाम कस्मिंश्चिदर्थे यः प्रसिद्धो गुणस्तदन्यस्मिन्नप्रसिद्धस्तद्गुणेऽर्थे शब्दमात्रेण यदुपसंयोज्ये तद्गुणप्रकाशनं क्रियते सोपमा'।

आह – किमविशेषेण सर्वे एतस्मिन्नर्थे निपतन्ति? नेत्युच्यते। तेषामेते चत्वार उपमार्थे प्रयुज्यन्ते। तेषां सर्वेषां मध्ये एते चत्वारस्तावत् – 'इव', 'न', 'चित्', 'नु' च प्रायोवृत्त्या उपमार्थे भवन्ति। समासविस्ताराभ्यां हि शास्त्राणि प्रतीयन्ते। तत्रायं तावत् – 'इवेति भाषायाञ्च' उपमार्थीयः 'अन्वध्यायञ्च' छन्दसि चेत्यर्थः। कश्चित् छन्दसि एव भवति, न भाषायाम्। कश्चिद् भाषायामेव, न तु छन्दसि, क्वचिच्चोभयत्र इत्यतो विभागेन टीकाकृता दुर्गाचार्येण प्रदर्श्यते।

इवनिपातः उपमार्थे वेदे प्रयुज्यते, तत्रोदाहरणं तावत् 'अग्निरिवेन्द्र इवे'ति। ऋग्वेदाद् आकलितोऽयं मन्त्रः –

"**अग्निरिव** मन्यो त्विषितः सहस्व सेनानीर्न सुहुरे हूत एधि।
हत्वाय शत्रून् विभजस्व वेद ओजो विमानो विमृधो नुदस्व"[9]।।

द्वितीयश्च मन्त्रस्तावत् –

"इहैवैधि मापच्योष्टाः पर्वत इवाविचाचलिः।
इन्द्र इवेह ध्रुवः शाश्वतस्तिष्ठेह राष्ट्रमु धारय"[10]।।

---

[9] *ऋग्वेदसंहिता* (8.3.19.2)

अनया अनुष्टुभा ध्रुव आङ्गिरसो राजानमभिसिषेच। इहैव राष्ट्रे त्वम् 'एधि' भव। 'मा' चातस्त्वम्। 'अपच्योष्टाः'। 'पर्वत इव' 'अविचाचलिः'। 'इन्द्र इव' 'अविचाचलिः' अविचलनशीलः 'इन्द्र इव' च 'इह' 'ध्रुवः शाश्वतः तिष्ठ'। स्थित्वा चेदं 'राष्ट्रम्' 'इह' 'उ' एव विभूतियोगेन स्थितं 'धारय' इत्याशीः। वस्तुतः इन्द्र इव इत्युक्त्वा इन्द्रस्योपमा राजनि आरोपिता। अत्र इवशब्दः उपमाबोधकः। इन्द्रस्तावदुपमानम्, राजा चोपमेयम्। इन्द्राद् राजा भिन्नः परं राजनि इन्द्रगतशौर्यादिधर्माः विद्यन्त इति कृत्वा तत्र इन्द्रसादृश्यम्। सादृश्यसम्बन्धज्ञानं विहाय उपमार्थीयस्येवनिपातस्य कार्यकारित्वं व्याहन्येत।

भाषायां प्रसिद्धमेवेति कृत्वा नोदाहरणमुल्लिखितम्। 'अथवा एते एव। अग्निरिव तीक्ष्णः इन्द्र इव विक्रान्तः'इति दुर्गाचार्येणावेदितं वृत्तौ।

नेति प्रतिषेधार्थीयो भाषायाम् इति प्रसिद्धः। अत्रापि प्रतिषेधोऽर्थो यस्य स प्रतिषेधार्थः। प्रतिषेधार्थ एव इति विग्रहे स्वार्थे छप्रत्ययो भवति। छ-इत्यस्य स्थाने ईयो भवति। लौकिकसंस्कृते नेति निपातः निषेधार्थरूपेण प्रसिद्ध इति निरुक्तकृत्। तस्माद् दुर्गाचार्योऽपि अस्योदाहरणं न दत्तवान्। लौकिकभाषायां 'घटो नास्ति', 'जलं नास्ति' चेत्यादिना नेति निपातः घट-जलसत्तयोर्निषेधो बुध्यते।

परम् 'उभयमन्वध्यायम्' । अर्थात् प्रतिषेधार्थे उपमार्थे च नेति निपातस्य प्रयोगोऽस्माकं दृष्टिपथमेति। प्रसङ्गत उल्लेख्यं यत् अन्वध्यायशब्दो वेदपरकः। 'नेद्रं देवममसंतेति'[11] । नेन्द्रं देवमात्मनो दीपयितारममन्यन्ताऽऽदित्यरश्मयः इति।

आह – किं पुनर्लक्षणमिति? उच्यते, प्रतिषेधार्थीयः पुरस्तादुपचारस्तस्य – 'यत्प्रतिषेधति'। ननु निषेधार्थीयो निपातः कुत्र प्रयुज्यत इति चेदुच्यते निषेधार्थको निपातो निषेध्यं पदार्थं साधारणतया विबोधयति तथा च निषेध्यपदार्थस्य बोधकपदात्पूर्वं प्रयुक्तो भवति। पूर्वोक्ते वेदवाक्ये ('नेन्द्रं देवममसंतेति') 'अमंसत' अर्थात् ज्ञानक्रियाया निषेध उक्तो भवति नेति निपातेनेति कृत्वा अमंसतपदात् पूर्वं प्रयुज्यते नेति निपातः। यद्यपि नेति पदम् इन्द्रमिति पदस्य पूर्वमस्तीति हेतोः अन्वयं कृत्वा 'इन्द्रं न अमंसत' इत्येवं क्रमपरिवर्तनं करणीयमिति। देवदत्तो न जानातीति लौकिकप्रयोगः। इत्थं निषेध्यज्ञानक्रियाबोधकाज्जानातीति आख्यातात्पूर्वं नञः प्रयोगो विहितः।

छन्दसि उपमार्थीयस्य निपातस्योदाहरणं तावत् 'दुर्मदासो न सुरायाम्'[12] इति। उपमार्थीयः उपरिष्टादुपचारः तस्य येनोपमिमीते इति। येनार्थेन उपमेयमर्थमुपमिमीते। तद्यथा – 'दुर्मदासो न सुरायाम्'

---

[10] *ऋग्वेदसंहिता* (8.8.31.2)

[11] तत्रैव (8.3.29.1)

[12] 'हृत्सु पीतासो युध्यन्ते दुर्मदासो न सुरायाम्। ऊधर्न नग्ना ज्वरन्ते'।। (*ऋग्वेदः*, 8.2.12)

इति। अर्थात्, 'काण्वोमेधातिथिराङ्गिरसश्च प्रियमेध ऐन्द्रं सूक्तं ददृशाते। तत्रैषा गायत्री। हृत्सु पीतासः पीताः सन्तो हृदयेष्ववस्थिताः सोमा युध्यन्ते संप्रहारमिव कुर्वन्ति। अहं विशिष्ट इत्येवंस्पर्धमानाः। क इव? दुर्मदासो न दुर्मदासः 'आज्जसेरसुक्' इति सूत्रेण कुत्सितमदाः केचित् पुरुषाः सुरायां पीतायां सत्यां युध्येरन् इत्येवम्। किञ्च, तमेव यजमानं जरन्ते स्तुवन्तीव आत्मलाभपरितुष्टाः। कथं जरन्ते? ऊधर्न ऊधरिव रात्रिमिव नग्नाः भूत्वा स्त्रियं सम्प्रयोक्ष्यामहे इत्येवमभिप्राया इव। नग्नाः स्तोतारः। ते च ऊधर्न पयसा पूर्णं गवादेरूध इव सोमपूर्णं त्वां जरन्ते स्तुवन्ति इति सायणाचार्यः। केचिद्विशिष्टाः पुरुषाः'[13]।

अत्र 'दुर्मदासो न सुरायाम्' इत्यत्र नेति निपातः इवार्थद्योतकः। ऊधर्न इत्यत्र नेति उपमार्थीयो निपात इति वक्तव्यम्। प्रकृते स्थले सुरापाने मत्तजनेन समं सोमरसः उपमीयते। सुरापानासक्तो यथा युद्धोन्मत्तो भवति, तद्वत् सोमरसपायिनः सोमरसं पीत्वा अहंपूर्विकया परापतन्ति नाम स्पर्धां कुर्वन्तीत्यर्थः। अत्र दुर्मदासः नाम सुरापानासक्तो ह्युपमानम्, सोमरसस्तावदुपमेयम्। उपमार्थं पदं खलु नेति। अतः नेत्युपमार्थकं पदम् उपमानार्थकात् दुर्मदास इति पदात्परं प्रयुज्यते। अर्थात् सादृश्यसम्बन्धज्ञानं विहाय कथमपि उपमानोपमेय-साधारणधर्मेवादिवाचकशब्दानां मध्ये सम्बन्धो न स्फुटीभवतीति।

चिदित्येषोऽनेकार्थकोऽपि सन्नुपमार्थीयसंयोगात् यास्केनोदाहृतः – 'दधिचिदि'ति[14]। कथमयम् अनेकार्थक इत्युच्यते 'आचार्यश्चिदिदं ब्रुयादिति पूजायाम्'। आचार्य एवं ब्रुयात्, कोऽन्य एवं वक्ष्यतीति। 'दधिचिदि'ति दधिरूप ओदन इति। सूत्रोल्लेखादापातदृष्ट्या मन्यते उपमार्थे दधिचिदिति शब्दः प्रयुज्यते। परं नेतत्सत्यम्। 'चित्' इति प्रयुज्यते इत्यंशोऽध्याहर्तव्यः। अतः सम्पूर्णस्य सूत्रस्यार्थस्तावत् 'दधिचिदि'ति पदे चिदिति निपात उपमार्थे प्रयुक्तो भवतीति। अत्रापि सादृश्यतत्त्वं निहितं वरीवर्ति।

'नु' इत्यपि कश्चनोपमार्थीयो निपातः। परमत्रोल्लेख्यं यत् 'नु' इति निपातोऽनेककर्मा। उदाहरणं तावत् 'वृक्षस्य नु ते पुरुहूत वयाः, वृक्षस्येव ते पुरुहूत शाखाः[15] इति। मन्त्रस्यास्यार्थस्तावत् हे प्रकृष्ट वीर! त्वं द्यु-भूलोकयोः नेतासि। वृक्षस्य शाखा यथा प्रादुर्भूतास्तथैव भोः इन्द्र! रक्षाकार्याणि प्रादुर्भूतानि भवन्तीति। दुर्गाचार्येण व्याख्यातम्, 'हे शूर! इन्द्र! पुरुहूत! महानक्ष इव चक्रयोः परिरिचे प्रकर्षेणातिरिच्यते। तव मह्ना महत्त्वेन विभूतिः। कुतोऽतिरिच्यते? रोदस्योः द्यावापृथिव्योः। तथापि चैवं विभूतियुक्तस्य सतस्तव त्वद्भक्तानामेवास्माकं सतां वृक्षस्येव वयाः शाखाः पूर्वीरुतयः पूर्वास्मद्यज्ञागमनमार्गाः

---

13 *निरुक्तम्* , सम्पा. ब्रह्मचारिमेधाचैतन्यः, दक्षिणेश्वर रामकृष्ण संघ, कलिकाता, 1987. पृ.- 86

14 दधिचिदित्युपमार्थे। (*निरुक्तम्*, 1.2.2)

15 अक्षो न चक्र्योः शूर बृहन् प्रते मह्ना रिरिचे रोदस्योः। वृक्षस्य नुते पुरुहूत वयाः व्यूतयो रुरुहुरिन्द्रपूर्वीः (*ऋग्वेदः*, 6.24.3)

विरुरुहुः खिलीभूतास्तवात्रागमनात्' [16]। नु इति निपातस्यानेकेष्वर्थेषूपमार्थकोऽन्यतमः। मन्त्रेऽस्मिन् नु-निपातः उपमार्थद्योतकः। अत्रापि सादृश्यतत्त्वं विद्यते। सादृश्यं नाम समानरूपत्वमिति।

परिशेषे वक्तव्यं यत् निरुक्तकृता निपातस्य (इव, नु, चित्, न) उदाहरणेषु प्रत्यक्षतया सादृश्यतत्त्वं प्रायुजि। सादृश्यतत्त्वस्य स्वरूपज्ञानं विहाय कथमपि उपमार्थकनिपातानि न व्याख्यातव्यानि। सत्यमेतच्च यत्सादृश्यत्तत्वं नाम समानरूपत्वं सारूप्यं वेति उपमायां सदैव विलसतीति कृत्वा उपमार्थीयेषु निपातेषु सादृश्यज्ञानस्योपयोगित्वं वर्तत इति।

ग्रन्थपञ्जी

The Nighaṇṭu and the Nirukta. Ed. Laksman Sarup. Baranasi: Motilal Baransidass,1967(2nd Rep.).

Yāska. *Niruktam*. Ed. Amareswara Thakur, with Beng. Tr. & notes, Vols.-IV. Kolkata: Calcutta University Press, 2016(Rep.).

Yāska. *Nirukta*. Ed. Satyabrata Samsrami.Vols.-IV. Calcutta: Asiatic Society, 1891.

Yāska. *Nirukta*. Ed. Bra. Medhya Chaitanya, with Beng.Tr., Notes & Commentary of Durgacharya, Kolkata: Dakshineswar Ramakrishna Samgha. 1987 (1st Edition).

---

16 *निरुक्तम्* , सम्पा. ब्रह्मचारिमेधाचैतन्यः, दक्षिणेश्वर रामकृष्ण संघ, कलिकाता, 1987. पृ.- 101

अलंकारनिकाये वक्रोक्त्यलङ्कारस्य प्राणधर्माधायकत्वम्

ड. सञ्जय-भट्टाचार्य्यः[1]

काव्यसंसारेऽस्मिन् लोकोत्तरवर्णनानिपुणं कविकर्म काव्यम्। किन्तु काव्यस्यास्य आत्मा कः? काव्ये किमिदं वस्तु विद्यते यद्विद्यमाने काव्ये काव्यत्वं तिष्ठति, यद्रहिते काव्यस्यास्तित्वं नानुभूयते। काव्यात्मतत्त्वस्यान्वेषणे प्राचीनकालादेव विद्वांसः प्रयत्ना अकुर्वन्। केचन रसं, केचनालङ्कारतत्त्वं, केचन वा रीतिम्, अन्ये वक्रोक्तिं काव्यस्यात्मानं प्रत्यपादयन्। इत्थं काव्यगतानि विभिन्नानि तत्त्वान्येव काव्यात्मरूपेण प्रतिपादितान्यभवन् इति कृत्वा वाङ्मयकाव्यशास्त्रक्षेत्रे षड्सम्प्रदायानाम् आविर्भावो जातः। षड्सम्प्रदायाश्च तावत् रस-अलङ्कार-रीति-वक्रोक्ति-ध्वन्यौचित्याख्याः। साहित्यशास्त्रे विद्यमानेषु प्रसिद्धेषु षड्सम्प्रदायेषु द्वितीयस्थानं भजते अलंकारसम्प्रदायः । यस्य सम्प्रदायस्य प्रवर्तको खलु आचार्यो भामहः पोषकाश्च रुद्रटादयः।

सुविशाले महार्णवतुल्येऽलङ्कारसाहित्येऽलंकाररहितं काव्यं न प्रायो नयनपथे पन्थायते। कान्ताशरीरे वस्त्रादीनामलङ्काराणां महत्त्वं यथा, तथैवालंकारस्य महत्त्वमपि काव्ये। तथा चाग्निपुराणे - "अलंकाररहिता विधवैव सरस्वती"[2]। अलंकाराः कविप्रतिभावैचित्र्यनिष्पन्ना वाग्वैचित्र्यरूपाः। अतः सुष्ठूक्तमानन्दवर्धनेन - 'अनन्ता हि वाग्विकल्पास्तत्प्रकारा एवालंकाराः'। भामहसम्मतेऽलंकारलक्षणे वक्रोक्तितत्त्वस्य प्राधान्यं सुस्पष्टम्। काव्यालंकाराख्येऽलंकारशास्त्रेऽनेनाचार्येणोदितम् - ''वक्राभिधेयशब्दोक्तिरिष्टा वाचामलंकृतिः''[3] आचार्यस्यास्य नये, सर्वेऽलंकाराः खलु वक्रोक्तितः समुद्भूताः। वक्रोक्तियुक्ता भाषैव काव्यभाषा। ततस्तेन अष्टत्रिंशद्विधा येऽर्थालंकाराः स्वीकृतास्तेषां सर्वेषां विवेचने मूलीभूता हि वक्रोक्तिरिति मन्यते। दण्डिनोऽयमाशयस्तावत् - "वाचां वक्रार्थशब्दोक्तिरलङ्काराय कल्पते"। कुन्तकाचार्यस्य वक्रोक्तिर्हि सर्वव्यापकमेव काव्यतत्त्वम्। तन्मते, वक्रोक्तिरेवात्मा काव्यस्य। वक्रोक्तिर्वैदग्ध्यभङ्गिभणितिरूपेत्युक्तं कुन्तकेन। व्याख्यातञ्चेवम् – "वक्रोक्तिः प्रसिद्धाभिधानव्यतिरेकिणी विचित्रैवाभिधा। कीदृशी- वैदग्ध्यभङ्गिभणितिः[4]। वैदग्ध्यं विदग्धभावः कविकर्मकौशलं तस्य भङ्गीविच्छित्तिः, तया भणितिर्विचित्रैवाभिधा वक्रोक्तिरित्युच्यते"[5]।

---

[1] गवेषकचरः, संस्कृतविभागः, गौडवङ्गविश्वविद्यालयः, मालदा, पश्चिमवङ्गः।

[2] *अग्निपुराणम्* (३४३.१२)

[3] *काव्यालंकारः* (शर्मा) (१.३६)

[4] *वक्रोक्तिजीवितम्* (*कृष्णमूर्ति*). (१.१०)

[5] *वक्रोक्तिजीवितम्* (*सुशील*), (पृ.-२२)

वक्रोक्तिः समग्रेऽलंकारवर्गे जीवितत्वेन राजते। भामहः खलु आद्याचार्यः, यः काव्यस्य जीवनाधायकानाम् अलङ्काराणां मूलतत्त्वरूपेण वक्रोक्त्यलङ्कारं स्वीचकार। तन्मते अतिशयोक्तिरेव वक्रोक्तिः, वक्रोक्तिरेव अतिशयोक्तिः, उभयोर्मध्ये नास्ति प्रभेदः। यस्मिन्नलंकारे वक्रोक्तेः लेशमात्रमपि नास्ति, सोऽलंकारपदवाच्यो भवितुं नार्हति। वक्रोक्तितोऽन्येषामलंकाराणामुद्भवः, परं वक्रोक्तिं विना काव्यं नोत्पद्यते। अतिशयोक्त्यलङ्कारस्य लक्षणप्रसङ्गेन प्राचीनेनालङ्कारप्रास्थानिकेन भामहेनोदितम् -

"निमित्ततो वचो यत्तु लोकातिक्रान्तगोचरम्।
मन्यतेऽतिशयोक्तिं तामलङ्कारतया यथा"[6]।।इति।

अतिशयिता उक्तिर्वा अतिशययुक्ता उक्तिस्तावदतिशयोक्तिः। गुणातिशययोगादतिशयोक्तिश्चारुत्वातिशयोपेता भवति। अतएव कथ्यते – 'निमित्ततः' इति। निमित्ततः केनापि कारणेन लोकसीमातिवर्तिनं भावं योक्तिः प्रकाशयति, सैवातिशयोक्तिः। अस्यालङ्कारस्य सर्वालङ्कारजीवितायमानत्वम् उररीकृत्य तेनोदितम् -

"सैषा सर्वैव वक्रोक्तिरनयार्थो विभाव्यते।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना"[7]।।इति।

काव्यशरीरस्य प्रधानवैशिष्ट्यं यथा अलङ्कारस्तथा सर्वालङ्कारशरीरस्वीकरणयोग्यत्वेन अभेदोपचाराद् वक्रोक्तिः सर्वालङ्काररूपेति अयमेवार्थोऽवगन्तव्य इति ध्वनिकृतो नयः। स्वकीयकाव्यतत्त्वे वक्रोक्तिमूलं तत्त्वं सर्वेषामलङ्काराणां प्रकटीकृतं तद्रहितानाञ्च नालङ्कारत्वमङ्गीकृतमिति। तस्मादेव हेतु-सूक्ष्म-लेशाद्यलंकाराः न ह्यलंकाराः वक्रोक्तिशून्यत्वादिति भामहनयः-

"हेतुश्च सूक्ष्मो लेशोऽथ नालंकारतया मतः।
समुदायाभिधेयस्य वक्रोक्त्यनभिधानतः"[8]।।इति

अनया युक्त्या भामहनये स्वभावोक्तिर्ह्यलंकारबर्हिभूता वक्रोक्तिलेशत्वात्। तथाहि तेनोक्तम् - "स्वभावोक्तिरलंकार इति केचित्प्रचक्षते"[9]। अत एव वक्रोक्तिः काव्यस्य सर्वव्यापकतत्त्वरूपेण सर्वालंकाराणाञ्च मूलीभूतधर्मरूपेण प्रतिष्ठितेति भामहस्य राद्धान्तः।

नवमशताब्द्यां रुद्रटस्य काव्यालंकारेऽलंकारोऽयं स्थानं लेभे। परं भामह-दण्डि-वामनादिभिरालंकारिकैः शब्दालंकारातिरिक्तेन विशिष्टार्थद्योतकरूपेण वक्रोक्तिर्व्याख्याता। दण्ड्याचार्यस्य काव्यादर्शे वक्रोक्तिरियं काव्यस्य महिमानं प्रकाशयति। तेन स्वभावोक्ति-वक्रोक्तिभेदेन कविवाङ्मयं द्विधा

---

[6] *काव्यालंकारः (शर्मा)* (२.८१)
[7] तत्रैव, (२.८५)
[8] तत्रैव, (२.८६)
[9] तत्रैव, (२.९३)

विभक्तम् - ''भिन्नं द्विधा स्वभावोक्तिर्वक्रोक्तिश्चेति वाङ्मयम्"[10]। भामहस्य वक्रोक्तिरियं कुन्तकाचार्यस्य 'वक्रोक्तिजीवितम्' इति ग्रन्थे परिणतिं लभते-

''शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।
बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि''[11]।।

"शब्दार्थौ काव्यं वाचको वाच्यश्चेति द्वौ सम्मिलितौ काव्यम्। द्वावेकमिति विचित्रैवोक्तिर्हि वक्रोक्तिः। तेन यत्केषाञ्चिन्मतं कविकौशलकल्पितकमनीयातिशयः शब्द एव केवलं काव्यमिति। केषाञ्चिद्वाच्यमेव रचनावैचित्र्यचमत्कारकारि काव्यमिति, पक्षद्वयमपि निरस्तम्। तस्माद्द्वयोरपि प्रतितिलमिव तैलं तद्विदाह्लादकारित्वं वर्तते, न पुनरेकस्मिन्"। अतः, द्वयोः काव्यत्वे कदाचिदेकस्य मनाङ्मात्रन्यूनतायां सत्यां काव्यव्यवहारः प्रवर्तते इत्याह – 'सहिताविति'। अत्र 'विशिष्टमेवेह साहित्यमभिप्रेतम्'। ननु कीदृशमिति पृच्छायां 'वक्रता विचित्रगुणालंकारसम्पदां परस्परस्पर्धाधिरोहः'। वस्तुतः, विचित्रकविव्यापारोपेते काव्यतात्त्विकानामानन्दजनके यस्मिन् वाक्यविन्यासे नाम बन्धे शब्दार्थौ मिथः अन्वितौ सन्तौ विशेषरूपेण अवतिष्ठतः, तदेव काव्यमिति। कुन्तकस्य मते, वक्रता खलु 'शास्त्रादिप्रसिद्धशब्दार्थौपनिबन्धव्यतिरेकित्वम्'। वक्रोक्तिं विना काव्यस्यास्तित्वं नास्तीति अस्याचार्यस्याभिमतम्। तन्मते, सर्वेषामलंकाराणां वाक्यवक्रतायामेवान्तर्भावो भवति –

"वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा।
यत्रालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति"[12]।।इति

भोजराजेन 'सरस्वतीकण्ठाभरणे' वक्रोक्ति-रसोक्ति-स्वभावोक्तिभेदाद्वाङ्मयं त्रिधा विभक्तम् – 'वक्रोक्तिश्च रसोक्तिश्च स्वभावोक्तिश्च वाङ्मयम्'[13]। एवं ध्वनिप्रस्थानस्य राद्धान्तमनुसृत्य रस-भावादिप्रधानं वाक्यजातम् उपमादिसाधारणवक्रोक्तितः पृथक्कृत्य रसोक्तिसंज्ञकायास्तृतीयश्रेण्या अन्तर्भूक्तं भोजेन। तेनाप्युक्तम् – 'वक्रोक्तिरेव काव्यानां पराभूषेति भामहः'। परं व्यक्तिविवेककृता महिमभट्टेनोदितम् –

"प्रसिद्धं मार्गमुत्सृज्य यत्र वैचित्र्यसिद्धये।
अन्यथैवोच्यते सोऽर्थः सा वक्रोक्तिरुदाहृता"।। इति

अर्थाच्छास्त्रादिप्रसिद्धशब्दार्थोपनिबन्धव्यतिरेकि यद्वैचित्र्यं तन्मात्रलक्षणं वक्रत्वं नाम काव्यस्य जीवितम्"। इत्थं भामहस्य वक्रोक्तिदर्शनेन प्रभाविताः विवर्तिताश्च सन्तः परभाविनः काव्यतात्त्विका वक्रोक्तितत्त्वं प्रतिष्ठापितवन्तः।

उपर्युक्तयालोचनयैतद्वक्तुं शक्यते यद्वक्रोक्तिः काव्यस्य सर्वव्यापकतत्त्वरूपेण यथा प्रतिष्ठिता, तथैव सर्वालङ्काराणां मूलीभूतधर्मरूपेणापि कल्पिता। यद्यप्यस्य तत्त्वस्योद्गाता तावद्भामहाचार्यस्तथापि

---

10 *काव्यादर्शः (चिन्मयी)* (२.३६३)

11 *वक्रोक्तिजीवितम्* (सुशील). (१.७)

12 तत्रैव, (१.२०)

13 *सरस्वतीकण्ठाभरणम् (राघवन्).* (५.८)

आनन्दवर्धनस्य भावनायां, कुन्तकस्य दृष्टौ, अभिनवगुप्तस्य चिन्तायाञ्च वक्रोक्तिः सारस्वतीं स्वीकृतिं लभते। दण्ड्याचार्यस्य काव्यादर्शेऽपि वक्रोक्त्यलंकारस्य प्राणधर्माधायकत्वमुरीकृतमिति शम्।

<u>**परिशीलिता ग्रन्थानुक्रमणी**</u>

अग्निपुराणम् – (सम्पा.) श्रीपञ्चाननतर्करत्नः, नवभारत पावलिशार्स, प्रथमसंस्करणम्, १९९९.

काव्यमीमांसा (राजशेखरः) - (सम्पा.) सि.डि. दालालः तथा आर. ए. शास्त्री, (संशोधिता परिवर्धिता च) के. एस. रामस्वामी शास्त्री शिरोमणिः, ओरियेण्टाल इन्सटिटिउट, बडोदा, १९३४ (तृतीय संस्करणम्).

काव्यादर्शः (दण्डी) – (प्रेमचन्द्रतर्कवागीशकृतः मालिन्यप्रोञ्छनीटीकासमेतः) - (सम्पा.) चिन्मयीचट्टोपाध्यायः, पश्चिमवङ्ग राज्य पुस्तक पर्षद्, कलिकाता, १९९५.

काव्यालंकारः (भामहः) – (सम्पा.) वटुकनाथशर्मा वलदेव-उपाध्यायश्च, चौखाम्बा संस्कृत संस्थानम्, वाराणसी, १९८१ (द्वितीयसंस्करणम्).

काव्यालंकारसूत्रवृत्तिः (वामनः) – (सम्पा.) श्रीकृष्णसूरिः, श्रीवाणीविलास प्रेस, श्रीरङ्गम्, १९०९.

काव्यालंकारः (रुद्रटः) - श्रीनमिसाधुप्रणीतया संस्कृतटीकया समुपेतः, मोतीलाल बनारसीदास, वाराणसी, १९८३.

धन्यालोकः (आनन्दवर्धनः) – (सम्पा.) के. कृष्णमूर्तिः, मोतिलाल बनारसीदास, दिल्ली, १९८२ (द्वितीयसंस्करणम्).

वक्रोक्तिजीवितम् (कुन्तकाचार्यः) (स्वोपज्ञवृत्तिसमेतम्) – (सम्पा.) सुशीलकुमारदे, फार्मा. के. एल. मुखोपाध्याय, कलिकाता (अधुना कोलकाता), १९६१ (तृतीया अङ्कनावृत्तिः).

प्रबन्धसमुच्चयः – (सम्पा.) सीतानाथः आचार्यशास्त्री, संस्कृत पुस्तक भाण्डार, कलिकाता, २०१८.

De, S.K. – *History of Sanskrit Poetics*, Firma K L M Pvt. Ltd., Calcutta, 1988. (Second Revised Edition).

De, Sushil Kumar -*Some problems of Sanskrit poetics*, Firma KLM, Kolkata, 1981 (1st ed.).

आधुनिकालंकारशास्त्रे रसतत्त्वस्य नवानुसन्धानम्

अमितदासः[1]

जगन्नाथोत्तरवर्तिषु अलंकारशास्त्रेषु काव्यलक्षण-कारण-प्रयोजन-भेद-शब्दव्यापार-गुणालंकार-रीत्यादिभिः उपादानैः सह रसतत्त्वविषयेऽपि नवनवोन्मेषशालिन्याः प्रज्ञायाः स्फुरणं संलक्ष्यते। विशेषेण रसस्य स्वरूपोत्पत्तिसङ्ख्यादीनां पर्यालोचनायामर्वाचीना आलंकारिकाः समभावेन तत्पराः, परं जगन्नाथोत्तरवर्तिनि काले कस्यापि नवरसतत्त्वस्य स्थापनं नाभूत्।

पूर्वाचार्याणां मतान्यनुसृत्य आधुनिकाचार्याः विभावानुभावव्यभिचारिभाव-सात्त्विकभावादीनां स्वरूपं पर्यालोचितवन्तः। अतः पुनः नवीनालंकारग्रन्थानां प्रणयनेन किं तावत् प्रयोजनम् ? प्राचीनानां मतानां दुर्बोध्यस्थलानि परिहृत्य ते नवीनाः काव्यतात्त्विका अलंकारशास्त्रनिर्माणे प्रयत्नशीला आसन्। अस्मिन् समये येषां विशिष्टानामालंकारिकाणां ग्रन्थेषु रसविषयिणी आलोचना अस्मन्नयनयोरापतति, तेषां नाममात्रम् उल्लेखो विधीयते

१. चन्द्रकान्ततर्कालंकारस्यअलंकारसूत्राणि
२. कृष्णशर्मणःमन्दारमरन्दचम्पूः
३. चिरञ्जीवभट्टाचार्यस्य काव्यविलासः
४. अच्युतरायमोदककृतःसाहित्यसारः
५. भेङ्कटामात्यकृतःअलंकारमणिदर्पणः
६. बलदेवविद्याभूषणस्य काव्यकौस्तुभः
७. हरिदाससिद्धान्तवागीशकृता काव्यकौमुदी
८. छज्जुरामशास्त्रिणः साहित्यबिन्दुः
९. ब्रह्मानन्दशर्मणः काव्यसत्यालोकः
१०. रेवाप्रसादद्विवेदिकृताकाव्यालंकारकारिका
११. अभिराजराजेन्द्रमिश्रस्यअभिराजयशोभूषणम्
१२. राधावल्लभत्रिपाठिकृतम् अभिनवकाव्यालंकारसूत्रम्
१३. रहसविहारीद्विवेदीकृता नव्यकाव्यतत्त्वमीमांसा

---

[1] गवेषकः, संस्कृतविभागः, गौड़वङ्गविश्वविद्यालयः, मालदा, पश्चिमवङ्गः।

पूर्वोक्तान् आचार्यान् ऋते सप्तदशशतकोत्तरकाले बहुषु काव्यतत्त्वविषयकासु टीकासु रसतत्त्वविषये सामूहिकं पर्यालोचनं परिलक्ष्यते ।

रसस्वरूपम् :-

आधुनिककाव्यतात्त्विकोऽच्युतरायमोदको जगन्नाथस्य रसलक्षणमनुसृत्य आधुनिकदृष्ट्या रसस्वरूपं व्याख्यातवान्- 'विभावाद्यैरपाज्ञानचिद्वेद्यः स्थाय्यसौ रस:'[2]। ननु रसोपलब्धिः कस्य भवतीति चेदुच्यते रामादौ ऐतिहासिकचरित्रे, न तु नायके नटे, न तु सहृदये इत्यस्मिन् विषयेऽपि प्राचीनानामनुवर्तनं भवति जगन्नाथोत्तरवर्तिषु अलंकारशास्त्रेषु। अस्मिन् विषये बलदेवविद्याभूषणेनोक्तम्- "लौकिकत्वादिहेतुविरहादिः अनुकार्य्यादिष्वपि रसः"। पण्डितकृष्णावधूतो मन्यते - सहृदय एव रसास्वादनस्याश्रयः, परन्तु रसस्याश्रयो न सहृदयः। अर्वाचीना ये चालंकारिकाः रसस्य सुनिर्दिष्टं लक्षणं निरूपितवन्तः, ते सर्वे प्राचीनलक्षणानुसारिणः एव-

क). 'व्यभिचारिविभावानुभावैर्भावैश्च सात्त्विकैः।
एतैः समुल्लासितोऽयं भावं स्थायी रसो मतः।।

अनुभावविभावाद्यैर्यत्र चित्तस्य विश्रमः।
रसं तं ब्रुवतेऽन्येऽन्ये प्रबुद्धस्थायिवासनाम्'[3]।।

ख). 'आनीयमानः स्वादुत्वं स्थायीभावः रसः स्मृतः'[4]।।

ग). 'आनीयमान उत्कर्षं स्थायीभावः रसः स्मृतः'[5]।

घ). 'रसो वै स रसं लब्ध्वानन्द्ययं स्यादिति श्रुते।
पक्षश्चरम एवात्र परमः परमास्पदम्'।। (*साहित्यसारः*)

ङ). 'यद्वा तत्संयुक्तिव्यक्तस्थाय्युपाधिश्चिदेव सः'। (*साहित्यसारः*)

च). 'विभावादिकृतश्चमत्कारानन्दमयः सहृदयानुभवो रसः'[6]।

---

[2] *साहित्यसारः*, पृ. ८७

[3] *मन्दारमरन्दचम्पूः*, पृ. १००

[4] *नञ्जराजयशोभूषणम्*, पृ. ३७

[5] *रसदीर्घिका*,पृ. ०२

[6] *काव्यकौमुदी*, पृ. ४७

छ). 'वासनारूपो रत्यादिरेव रस:। रत्याद्यवच्छिन्नं चैतन्यं वा रस:'[7]।

ज). 'आनन्दरूपप्रकाशमानं स्थायिभावावच्छिन्नं चैतन्यं रस:'[8]।

झ). 'आस्वादविषयको व्यापारो रस:'[9]।

विश्वनाथस्य मतमाश्रित्य वेणीदत्तशर्मणापि रसकौस्तुभे प्रोक्तम् रत्यादिस्थायिभाव एव रसः - 'विभावाद्यैः प्रतीतैश्च हृदयेषु सभासदाम् अभिव्यक्तो दधिन्यायात् स्थायी रत्यादिको रस:'[10]। हरिदाससिद्धान्तवागीशेनाप्युक्तम्- 'बीजं यथा क्षितिजल-पवनाद्यनुगृहीतं सत् पादपरूपतां भजते, तथा रागादयो दश स्थायिनो भावा विभावादिभिर्भावै: परिपोषिता: सन्त: क्रमेण शृङ्गारादिरूपतां भजन्ते'[11]।

रामदेवचिरञ्जीवभट्टाचार्य: '*काव्यविलासे*' रसलक्षणञ्चकार - 'एते एव स्थायिभावा विभावाद्यै: परिपूर्णा रसरूपत्वेन परिणमन्ति, यथा सुवर्णादय: कुण्डलादित्वेनेति'[12]।

प्रसङ्गतः समुल्लेखार्हं यत् आस्वादजनकत्वेन रसत्वं निरूपितम् आचार्यप्रवरेण राधावल्लभेन। महामहोपाध्याय: अभिराजराजेन्द्रमिश्र:*अभिराजयशोभूषणे* काव्यलक्षणनिरुपणप्रसङ्गे रसस्य सर्वातिशायि स्थानम् स्वीचकार 'काव्यं लोकोत्तराख्यानं रसगर्भं स्वभावजम्'। तन्मते काव्यं कदापि नाधमकाव्यं भवेत्, यतः कविनिर्मितिः (काव्यं) सरस्वती वाङ्मूर्तिः इति। अतस्तेन रसाधिष्ठितस्य काव्यस्यास्वादजनकत्वेन विभाजनं कृतम् – सहृदयास्वाद्यं, कोविदास्वाद्यं, लोकास्वाद्यञ्चेति।*अभिराजयशोभूषणे* 'आत्मोन्मेषाख्ये तृतीयोन्मेषे रससिद्धस्य काव्यस्यात्मा औचित्यम् इति वर्णितम्।*औचित्यविचारचर्चायामपि* उल्लिखितम् - 'औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्'। वस्तुत: काव्ये रसस्यास्तित्वे औचित्यं प्राणप्रदधर्मः।

रसाभिव्यक्तेः प्रक्रियायाम् अर्वाचीनालंकारिकाणां मतानि :-

चिरन्तनालंकारिकैरङ्गीकृतं यत् विभावादिभिर्व्यक्तः स्थायिभावो रसरूपेण पर्यवस्यते, परन्तु रसाभिव्यक्तेः प्रक्रियाविषये अर्वाचीनालंकारिकाः प्राचीनैः समम् अभिन्नं मतं पोषयन्ति। तेषां मतानां मौलिकत्वमवश्यमेव लक्षणीयम्। प्रसङ्गतः उल्लेख्यं यत् विद्यारामस्य अभिमतम्-

---

[7] *रसविलासः*, पृ. ०३

[8] *शृङ्गारामृतलहरी*, पृ. १३१

[9] *अभिनवकाव्यालंकारसूत्रम्* (द्वितीयोऽध्याय:)

[10] *रसकौस्तुभः*, पृ. २४

[11] *काव्यकौमुदी*,पृ. ४८

[12] *काव्यविलासः*, पृ. ०४

"भावैस्तैस्तर्हि यश्चित्ते पुर्य्यमाण: समन्तत:।
उद्रिक्त: कोऽपि निर्यायात् भाव: सन्द्रो रस: स्मृत:"[13]।।

इत्थं रसनिष्पत्ते: त्रीणि स्तराणि विद्यन्ते- क.) भावेन चित्तस्य परिपूर्णता ख.) भावानाम् उद्रेक: ग.) भावानां नि:सरणम्।

साहित्यसारे अच्युतरायाचार्येणोक्तम्- 'निरुक्तविभावादित्रयसंयोगेन जनिता लौकिकमानसव्यापारवशात् आत्मनिष्ठानन्दांशावरणस्य तात्कालिकापसरणेन साक्षिचित् एव अन्त:करणे वासनात्मकतयावस्तितं रत्यादिस्थायिभावम् भासयतीति स एवोक्तरीत्या सुखहेतुत्वात् रस इति विभावादिसामग्र्या तात्कालिकापसरितानन्दावरण-चिद्वेद्य-स्थायिभावत्वं रसत्वमिति'[14]। अत्र 'तात्कालिक' - पदप्रयोगस्य सार्थकतात्रैव यत् रसप्रतीति: सद्यैव भवति। 'चिद्वेद्यस्थायिभावत्वम्' इति पदप्रयोगात् सुखाभावस्यापत्ति: स्यात्। एतन्निवारणार्थं साहित्यसारकृता आनन्दादिपदस्य प्रयोगो विहितः।

*रसमीमांसा*यां आचार्यो गङ्गाराम: प्राह-

"कविभि: काव्यैः सुहृदं मानससदनं समानीतै:।
अनुभावैश्च विभावैर्व्यभिचारिभिरपि च सम्भूय।।

कश्चिदलौकिकरूपां व्यापारो जन्यते तत्र।
तस्मात् स्वतः प्रकाशाज्ञानावरणमपसरति द्राक्।।

इत्थञ्च मनोवृत्ति: स्वयं स्थायी प्रकाशते भूम्ना।
भग्नावरणज्ञानग्राह्य: स्थायी रसोऽनुमन्तव्य:"[15]।।

आचार्यभूदेवशुक्लोऽपि प्रसङ्गतो मन्यते – काव्यै: समुत्पन्नात् सत्त्वात्मकमनोवृत्तेरज्ञानांशस्य विनष्टो भवति, तदा काव्यात्मरूपो रस: स्फूरित: स्यात्। तदुक्तम् -

"काव्यवाक्यसमुत्पन्नमनोवृत्त्या विनाशिते।
अज्ञानांशे स्फुरन्नव्यादात्मा नवरसात्मक:"[16]।।

---

13 *रसदीर्घिका,* पृ. ०२
14 *साहित्यसारः*,पृ. ८७-८८
15 रसमीमांसा पृ.६,७
16 *रसविलासः*, पृ. ०१

अर्वाचीनैर्मन्यते यद् ब्रह्मानन्दचिदेव रस इति। ब्रह्मानन्दोऽनादिरनन्त: उत्पत्तिविनासशून्यश्चेति कृत्वा ‘विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति:’, ‘व्यक्त: स तैर्विभावाद्यै: स्थायिभाव: रस: स्मृत:’ चेति प्राचीनप्रक्रियायां रसोत्पत्ति: कथं स्यादिति जिज्ञासायाम् अच्युतरायमोदक: शङ्कां निवारयितुमाह -

“श्वा यथा चर्वयन्नस्थि तत: स्वमुखशोणितम्।
मत्वा तदीयं रमते तद्वियोगे च खिद्यति।।

तथैवानादिसंस्कारैर्जीव: शब्दादिकं भजन्।
तल्लाभेन तदिच्छाया ध्वंसेऽन्तर्मुखमानसे।।

प्रतिविम्बितमानन्दं ब्रह्मैवात्मानमद्वयम्।
तदीयत्वेन मत्वाथ सुखदु:खे व्रजत्यलम्”[17]।।

वस्तुत: ब्रह्मानन्द एव रस:, इच्छाशक्तिर्हि तद्व्यञ्जक: - “वस्तुतस्तु: प्रत्यगभिन्नाद्वैतब्रह्मरूपानन्दस्यैव रसत्वात् इच्छाध्वंसस्यैव उक्तरीत्या तद्व्यञ्जकत्वात् चेति सिद्धम्”[18]। अत: तन्मते अद्वैतब्रह्मैव रस:। रसो नित्योऽखण्ड: स्वप्रकाशश्च स्याच्चेत् उत्पन्नो रस:, सद्यानुभूत: रस: चेत्यादयोऽनुभवा: विरुद्धा:। अस्मिन् प्रसङ्गे अच्युतरायो बलिष्ठयुक्त्योपस्थापयति-

“नित्यानन्दात्मभत्वानि सिद्धान्यत्र चिदंशत:।
रत्याद्यंशेन भास्यत्वमनित्यत्वमपि स्फुटम्”[19]।।

पण्डितराजो रसगङ्गाधरे चिदंशस्य नित्यत्वं प्रकाशत्वञ्च स्वीकृतवान् – ‘चिदंशमादाय नित्यत्वम् स्वप्रकाशत्वञ्च सिद्धम्’ इति। वस्तुत: अच्युतरायो जगन्नाथमतेन सह आनन्दपदं संयुक्तवान्।

रसपरिगणनम् -

रससंख्याविषये जगन्नाथोत्तरकालेऽपि नवीनाचार्यवद् भिन्नमतानि परिलक्ष्यन्ते। केचिन्मन्यते, रसोऽष्टविध: केषाञ्चित् मते च दश रसा: सम्भवन्ति। श्रीकृष्णकविना रसस्य अष्ट भेदा: स्वीकृता अपि शान्तरसस्य श्रेष्ठत्वं प्रतिपादितम्। काव्यकौमुद्याम् वङ्गीयालंकारिकेण हरिदाससिद्धान्तवागीशेन रसस्य दशविधत्वम् स्वीकृतम् - ‘स चात्र दशधा’। हरिदासस्तावत् वात्सल्यम्, श्रीकृष्णकवि: विद्यारामश्चेति मायाम् अच्युतरायमोदकस्तु भक्तिं रसरूपेण स्वीकुर्वन्ति। शिवरामत्रिपाठिना श्रद्धा रसरूपेण परिगणिता। अद्यतनीयैरालंकारिकैर्देशभक्तिरपि रसरूपेण गणिता।

[17] साहित्यसार:, पृ. ८९

[18] *तत्रैव*, पृ. ८९

[19] तत्रैव, पृ. ८९

आलंकारिकस्य गङ्गारामस्य मतानुसारेण मुख्यत: रसो द्विविध:- मुख्य-गौणभेदात्। मुख्यरस: पुन: द्विविध:- क.) संलक्षक्रमव्यङ्ग्य: ख.) असंलक्षक्रमव्यङ्ग्यश्चेति । तदुदितम् -

"स रसो द्वेधा प्रथमो मुख्योऽपरो गौण:।
आद्योऽपि द्विविध: स्यादक्रं एकोऽथ संक्रमोऽन्योऽपि।।

तत्रासंलक्ष्यक्रम उक्तैर्व्यक्त: स यो विभवद्यै:।
उन्नेयविभावो य: स तु संलक्ष्यक्रम: कथित:।
भावोऽस्ति यत्र मुख्यो रसोऽत्र गौणो मत: सुधियाम्"[20]।।

रसङ्गाधरे मतस्यास्य प्रतिध्वनिः संश्रूयते- 'यत्र तु विचारवेद्यं प्रकरणं उन्नेया वा विभावादयस्तत्र सामग्रीविलम्बाधीनां चमत्कृतेर्मान्थर्यमित्ति संलक्ष्यक्रमोऽप्येष भवति'।

गङ्गारामो विद्यारामश्चेति शृङ्गार: मुख्यरस: इति मन्येते। हरिदासस्य मतेऽपि 'कामार्विभावको रस: शृङ्गार:'[21]। काव्यनाट्ययो: शान्तरसस्योपस्थितिविषये प्राचीनवदर्वाचीनालंकारिकेष्वपि भिन्नमतं परिलक्षितम्।

विद्याराम-राजचूडामणि-अच्युतराय-छज्जुराम-चिरञ्जीवाद्याचार्या: निर्वेदं शान्तरसस्य स्थायिभाव इति मन्यन्ते पुनश्च श्रीकृष्णकवि-भूदेवशुक्ल-नरहर्यादीणाम् आचार्याणां मते शम एव शान्तरसस्य स्थायिभाव:।

प्राचीनालंकारिको दर्पणकारो विश्वनाथो वात्सल्यम् दशमरसरूपेणाङ्गीचकार चमत्कारित्वोत्पत्तिहेतुत्वात्। वात्सल्यरसस्य स्थायिभाव: स्नेह:, पुत्रादिः आलम्बनविभावश्च । परन्तु साहित्यबिन्दुकृत् छज्जुरामविद्यासागरो मन्यते, 'स्नेहो वात्सल्यं मैत्र्यावन्ध एते रतेरेव विशेषा न रसाः'। काव्यकौमुद्यां हरिदाससिद्धान्तवागीशेन स्नेहम् वात्सल्यरसस्य स्थायिभावरूपेण स्वीक्रियते- 'स्नेहस्थायिभावको वात्सल:'। किन्तु कृष्णकवि: वात्सल्यरसस्य स्थायिभावरूपेण कारुण्यमुरीकृतवान् - 'अन्ये तु करुणा स्थायी वात्सल्यं दशमोऽपि च'[22]।

अस्मिन् समये नव मतवादा: जनिं लभन्ते-

१. शृङ्गारैकवाद:[23] (प्रवक्तारस्तावत् वेङ्कटामात्य: मधुसूदनकवीन्द्रश्चेति)

---

[20] *रसमीमांसा*,पृ. ५१-५२

[21] *काव्यकौमुदी*, पृ. ४९

[22] *मन्दारमरन्दचम्पूः*, पृ. १००

[19] शृङ्गार: प्रथम: तत्र मुख्यत्वात् सकलेष्वपि. (*रसदीर्घिका*, पृ. ०९)

२. मायारसवादः (प्रवक्तारः खलु भानुदत्तः चिरञ्जीवभट्टाचार्यः विश्वेश्वरपण्डितश्चेति)

३. भक्तिरसवादः[24] (प्रवक्तारौ तावत् अच्युतरायमोदकः मधुसूदनकवीन्द्रश्चेति)

विद्यारामस्य मते शृङ्गारस्तावन्मुख्यरसः - "शृङ्गारः प्रथमस्तत्र मुख्यत्वात् सकलेष्वपि" (*रसदीर्घिका*, पृ. ०९)। तस्य अभिप्रायोऽयमेव यत् 'शृङ्गारस्यानुगतत्वेन रसाः स्वारस्यमाप्नुयुः'। भुदेवशुक्लेन तस्य *रसप्रदीपे* नारायणपण्डितमतं स्वीकृत्य अद्भुतैकरसत्वं नाङ्गीकृतम्।

अच्युतराय-विद्यारामाद्याचार्याः भक्तिं पृथग्रसरूपेण स्वीकृतवन्तः। अच्युतरायमते भक्तिस्तावत् शान्तरसाद्भिद्यत एव, शान्तरसे भक्तिरसस्यान्तर्भावोऽसम्भवः खलु - "निर्वेदस्थायिनि शान्तरसे सर्वतो निर्वेद एव, भक्तौ लैहिकामुष्मिकसुखास्वादनोत्तरायाम् न तथा निर्वेदोऽतो भक्तिर्भिन्नैवोच्यते"। भूदेवशुक्लोऽपि भक्तिं रसत्वेनाङ्गीकरोति स्म, कारणमेतद्यत् भक्तिरसे ईश्वरविषयिणी रतिर्विराजते[25]। विद्याराममते भक्तिरसस्य स्थायिभावो हि भावः । रूपरसादिविषयपरित्यागपूर्वकम् ईश्वरम् प्रति उत्पन्नं प्रेम खलु भावः इत्युच्यते। स्थायिभावेन पुष्टो भावो भक्तिरसे परिणमितो भवति । तदुक्तम् -

"विषयाभ्यासमुन्मुच्य दृढप्रेमो य ईश्वरे।
स भाव इति विज्ञेयः पूर्णो भक्तिरसस्तु सः"[26]।।

भक्तिरसस्य देवता विष्णुः वर्णश्च कृष्णः –'वर्णो भक्तैर्घनश्यामो दैवतं पुरुषोत्तमः'। रसतरङ्गिणीकृद्भानुदत्तः दशमरसरूपेण मायां स्वीकृतवान्। मानवानां चित्तवृत्तिर्द्विविधा - प्रवृत्तिः निवृत्तिश्चेति। निवृत्त्यात्मकचित्तवृत्तौ शान्तरसः, प्रवृत्त्यात्मकचित्तवृत्तौ मायारसश्च भवतः। मायारसस्य स्थायिभावस्तावन्मिथ्याज्ञानम्। पण्डितराजोत्तरवर्तिनः श्रीकृष्णकवि-विद्यारामाद्याचार्या मायारसस्यास्तित्वमङ्गीचक्रुः। मायारसः शान्तरसस्य विरुद्धरस इति *रसदीर्घिका*याम् उच्यते[27]।

चिरञ्जीवभट्टाचार्य-विश्वेश्वरपाण्डेयौ मायारसस्य रसत्वं खण्डितवन्तौ। चिरञ्जीवो मायारसस्य कारणम् अजन्यमिति मन्यते[28]। ब्रह्मभिन्नत्वान्मायारसे स्वीकृते सति शृङ्गारादिरसानां रसत्वे आपत्तिः

---

[24] वस्तुतस्तूभयश्राघ्यम् यो मद्भक्त इति स्मृतेः। भक्तिर्हि द्विविधा-मुख्यामुख्या च तत्राद्या आलंकारिकमते शान्तेऽन्तर्भावात् अन्त्यायाश्च भावत्वात् तत्खण्डनं, भक्तमते तु शान्तास्यैव तत्रन्तर्भावात् आद्याया एव रसत्वोक्त्या तन्मन्दनं च इत्यविरोधः (*साहित्यसारः*, पृ. १३१)

[25] भक्तेः रतित्वेन भावान्तर्गततया रसत्वानुपपत्तेः(*भावविलासः*, पृ.- २७)

[26] *रसदीर्घिका*, पृ.-४०

[27] यथा निवृत्तौ शान्तरसे सति मायारसाभावस्तथा प्रवृत्तौ मायारसे सति शान्तरसाभाव एवमन्योन्यभावेन द्वयोरन्यतर एव रसः। अतो नव रसा इत्युक्तम्। (*रसदीर्घिका* , पृ.-४०)

[28] अत्रेदं चिन्त्यम् – मायाया अनादित्वेनाजन्यत्वाद्रसत्वासंभवः, रसास्तु सर्वे जन्य एव। कथं वा कथयेन्मिथ्याज्ञानादिर्मायाया कारणमिति शास्त्रविरुद्धत्वात्। वस्तुतस्तु आलंकारिकाणां मते रसो नित्य आनन्दरूपः। अतस्तस्य ब्रह्म स्वरूपत्वेन मायाया रसत्वासम्भवः।(*काव्यविलासः* पृ.- १०)

समापतेत्, सर्वेषां रसानां मायान्तर्भूक्तत्वात्। अतो माया शृङ्गारादिभ्यो भिन्ना इति शक्यवचम्। मिथ्याज्ञानरूपो भाव: विभावादिभि: पुष्ट: सन् मायारसो भवति। तदुक्तम् -

> "प्रगाढराग: संसारे मिथ्याज्ञानं प्रकीर्तितम्।
> मिथ्याज्ञानं तु सम्पूर्णम् माया रस इति स्मृतः"[29]।।

मायारसस्य वर्णो नील: देवता च निर्ऋति: - 'वर्णो नीलो सवर्णोऽस्य दैवतं निर्ऋतिस्तथा'।

विद्यारामेण श्रीकृष्णेन च अष्ट रसान् चतुर्धा विभज्य नवव्याख्यानपद्धतिः संसृष्टा

१. अत्यन्तसुकुमारो रस: (शृङ्गार: करुणश्चेति)
२. किञ्चित्सुकुमारो रस: (हास्य: अद्भुतश्चेति)
३. अत्युद्धतो रस: (रौद्र: वीभत्सश्चेति)
४. ईषत्प्रौढो रस: (वीर: भयानकश्चेति)

विद्यारामो मनुते - ईषन्मृदुनिसर्गाश्च शान्तहास्याद्भुता रसा:'[30]।

प्राचीनपरम्परानुसारं श्रीकृष्णकवि: शृङ्गारवीररौद्रवीभत्सरसान् प्रकृतिरसरूपेण व्याख्यातवान् पूर्वोक्तेभ्यो रसेभ्यो यथाक्रमेण हास्य-करुण-अद्भुत-भयानकानां रसानामुत्पत्तेः।

परिशेषे वक्तव्यमेतद्यत् विद्यारामादीनाम् अर्वाचीनालंकारिकाणां मते, यदा रस औचित्यपूर्वकं प्रयुक्तः स्यात्, तदा स 'रस:' इत्यभिधीयते, अन्यथा रसाभास इत्यच्युते। औचित्याभावे मित्ररस: शत्रुवत् आचरति, शत्रुरसोऽपि मित्रवत् समाचरति – 'यथा रसास्तथा भावा औचित्याद् भावतामियु:'।नवीनाचार्या: नवमरसरूपेण शान्तरसं युक्तिपूर्वकं स्वीकृतवन्त:।ते मायारसं भक्तिरसञ्च स्वीकृत्य रसस्य गणनायाम् अभिनवत्वं मौलिकत्वञ्च प्रदर्शितवन्तः। रसनिष्पत्तौ नवीनतत्त्वसंयोजनम् अत्यावश्यकमिति मत्वा नवीनास्ते काव्यतात्त्विकाः पूर्वाचार्यैरङ्गीकृतानां रससंघटकानां धर्माणामस्तित्वं विनम्रशिरसा स्वीकृत्य चिरन्तनालंकारिकान् प्रति सम्मानं पोषितवन्त इति शिवम्।

---

[29] रसदीर्घिका, पृ. – ३९

[30] तत्रैव, पृ.- ५४

परिशीलिता ग्रन्थानुक्रमणी

अभिनवकाव्यालंकारसूत्रम्. राधावल्लभत्रिपाठी, सम्पूणानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, २००५

अभिराजयशोभूषणम्. अभिराजराजेन्द्रमिश्रः, वैजयन्तप्रकाशनम्, इलाहवादः, २००६।

त्रिवेणिका. आशाधरभट्टः, सरस्वतीभवनसिरिज्, वाराणसी, १९२५ ।

काव्यकौमुदी (हरिदाससिद्धान्तवागीशः). (सम्पा.) वासवचन्द्रभट्टाचार्यः, कलिकाता, १९५५।

काव्यविलासः (रामदेवचिरञ्जीवभट्टाचार्यः). (सम्पा.) वटुकनाथशर्मा जगन्नाथशर्मा च, गभर्मेण्टसंस्कृतलाइब्रेरी, वाराणसी ।

मन्दारमरन्दचम्पूः (श्रीकृष्णकवि). (सम्पा.) केदारनाथ-वासुदेवलक्ष्मणपनशीकरौ, काव्यमाला,१९५५।

नञ्जराजयशोभूषणम् (नरसिंहकविः). (सम्पा.) इ. कृष्णमाचार्यः, ओरियेण्टल इन्सटिटिउट्, वरोदा, १९३०।

नाट्यशास्त्रम् (भारतः) (अभिनवभारतीटीकोपेतम्). (सम्पा.) आर्. एस्. नागरः, परिमलपवलिकेशन्, देहली, २००३ (पुनः प्रकाशितम्)।

काव्यप्रकाशः (मम्मटः). प्रथमादिषष्ठोल्लासान्तः, (अनुवादकः व्याख्याता च) डः विमलाकान्तमुखोपाध्यायः, (सम्पा.) विपदभञ्जनपालः, संस्कृत पुस्तक भाण्डार, कोलकाता, १४२७ (प्रथमप्रकाशः)।

साहित्यदर्पणः (विश्वनाथः). (कुसुमप्रतिमाटीकोपेतः), (सम्पा.) हरिदाससिद्धान्तवागीशः, कोलकाता,१९६७ शकाब्दः (चतुर्थसंस्करणम्)

समसामयिके संस्कृतवाङ्मये उत्तराधुनिकभावधारा

मण्टुकुमारजाना[1]

परिवर्तमानता हि साहित्यस्य धर्मः। अस्माकं सुप्राचीनं साहित्यमपि न हि तद्व्यतिक्रमि। याश्च भाषाः, यानि च साहित्यानि युगमानसिकतायाः परिवर्तनेन समं स्वात्मनः परिवर्तनं संसाधयितुम् अर्हाणि, ताश्च भाषाः, साहित्यान्यपि क्रमेणैव पुष्टानि भवन्ति। संस्कृतसाहित्यमपि अधुना प्राचीनवर्म परित्यज्य अतीताद् वर्तमानाद्वा बीजं संगृह्य नवखातावच्छिन्नपथे प्रवहन् ऊनविंश-विंशशताब्द्योः आधुनिकभावधाराम् आत्मीकृत्य आधुनिकं जातम्। परं साम्प्रतं विरचितं संस्कृतवाङ्मयम् आधुनिकयुगमानसिकताञ्च अतिक्रम्य उत्तराधुनिकताया युगम् आप्नोति। समसामयिकसंस्कृतसाहित्यं युगपरिवर्ततेनैव आत्मनः स्वरूपं परिवर्त्य इदानीन्तनकालोपयोगिभावधारां विषयांश्च आदाय विश्वसाहित्ये स्वसुरभिं सञ्चारयति। प्रादेशिक-वैदेशिकसाहित्यैः सह गहनपरिचयवशात् साम्प्रतं संस्कृतकवयः तेभ्यो ग्रन्थेभ्यः उपकरणानि संगृह्य समसामयिकसंस्कृतसाहित्यस्य समृद्धिं साधयन्ति।

उत्तराधुनिकसंस्कृतसाहित्यस्य स्वरूपाधायकानि वैशिष्ट्यानि खलु –

प्रथमतः, उत्तराधुनिककाव्यधारायाः स्वतन्त्रः सुनिर्दिष्टः संज्ञार्थो विद्यते। बुद्धिवृत्तिकादशो वर्तते अस्मिन् वादे। तथाहि अनादर्शिकदृष्टिभङ्गी हि वादस्यास्य वैशिष्ट्यम्।

द्वितीयतः, यस्य कस्यापि साहित्यस्य साधारणं लक्षणं सहृदयहृदयाह्लादि शब्दार्थमयत्वम्। अतः उत्तराधुनिककाव्यस्य निर्दुष्टं लक्षणं भवेत् – सहृदयहृदयाह्लादि व्यङ्ग्यार्थमयत्वम्।

तृतीयतः, साहित्यजगतितले शिल्पं द्विविधं भवति – ध्रुपदीशिल्पम् (Class Art) गणशिल्पं (Mass Art) चेति। उत्तराधुनिकभावधाराश्रिते काव्ये अथवा संस्कृतकाव्ये गणशिल्पस्य (Mass Art against Class art) सर्वातिशायि प्राधान्यं स्वीकरणीयम्। तत्र साधारणानां अन्त्यजानां मनुजनूनां जीवनव्यथा समस्याश्च पदं कुर्वन्ति। परम् अहं एतन्न वच्मि राधावल्लभत्रिपाठी, राजेन्द्रमिश्रः, हर्षदेवमाधवः, वनमालीविश्वालश्चेति कवयस्तदीयकाव्येषु प्रान्तिकजनानां मनोव्यथां नोपायनीकुर्वन्ति, परं ते पूर्वरूपेण न हि गणशिल्पाश्रितकाव्यं ग्रथितवन्तः।

चतुर्थतः, प्राचीनाधुनिककाव्यनिष्ठानि कल्पानि (Image) खण्डशः विभज्य व्यवहरति आधुनिककविः। तत्र प्राचीनरूपकाणां तथा च केन्द्रभूमित्वस्य परिहारः अपेक्षितः (Rejection of Meta-narrative and Centrality)। ध्वनिकृतापि अस्मिन् प्रसङ्गे सहमतं पोषितम् – 'न हि इतिवृत्ताख्यानमात्रेण कवित्वसिद्धिः, इतिहासादेव तत्सिद्धेः'।

---

[1] गवेषकः, साहित्यविभागः, श्रीलाल-बहादुर-शास्त्री-राष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली।

पञ्चमतः, राजेन्द्रमिश्रेण अवचेतनतया क्वचित् सचेतनतया स्वकीयभाणप्रहसनयोः कासुचित् कवितासु उत्तराधुनिकभावधाराश्च प्रयुक्ताः। विशेषेण, जनपद-ग्राम-कुलादिस्वजातीयपरम्परानुसारं अभिराजस्य काव्येषु गजल-काजरी-सोहर-लोरीलोकगीतीनाम् व्यवहारो दृश्यते। तत्र अन्त्यजानां मानवानां जीवनव्यथा पदं करोति। '*चतुष्पथीयम्*' इति पथनाटिकायाः विषयः खलु सर्वदा साधारणमानवानां जीवनसमस्या।

संस्कृतसाहित्ये उत्तराधुनिकताया बीजमुप्तमासीत् राधावल्लभत्रिपाठिनो रचनासु। परवर्तिनि काले हर्षदेव-केशवचन्द्रदाश-वनमालीविश्वाल-प्रमोदकुमारनायेक-प्रफुल्लमिश्र-अरुणमिश्रादीनां कृतिष्वपि उत्तराधुनिकाताः स्पष्टं प्रभावः अस्माकं नयनयोः प्रपतति।

आचार्यस्य राधावल्लभत्रिपाठिनः नाटकेषु कथासु कवितासु च आधुनिकजीवनव्यथा, जीवत्समस्यास्तथा च सांकेतिकी व्यञ्जना पदं कुर्वन्ति। विशेषेण, त्रिपाठिनः 'सुशीला, मशकधानी', 'तण्डूलप्रस्थीय'मिति रूपकेषु, अथवा राजेन्द्रमिश्रस्य 'रुपरुद्रीयम्', 'अकिञ्चनकाञ्चनमिति रूपकद्वितये सामाजिक-मनोवैज्ञानिकसमस्याश्चित्रिताः। 'फण्डूश्चरितभाणे' छात्रसमाजस्य दुर्नीतिर्विशृङ्खला चेति विषयत्वेन आचार्यैराकलिता। प्रभुनाथद्विवेदिनः 'करोणाशतकम्' इति साम्प्रतिकजीवनकेन्द्रिकं पद्यकाव्यम्। प्रादेशिक-वैदेशिकसाहित्यैः समं गहनपरिचयवशात् उत्तराधुनिकसंस्कृतसाहित्ये बहुविचित्रिताः काव्यविधयः अस्माकं नयनयोः आपतन्ति। भाषा-अभिव्यक्ति-शिल्पादिप्रसङ्गे उत्तराधुनिककवयः काव्यानि ग्रथयन्ति। विशेषेण, कथासु टुप्कथा (लघुकथा – प्रमोदकुमारनायकस्य 'सप्ततिः'), स्पशकथा (डिटेक्टिभ स्टोरि, जनार्दनहेगडे-महाभागस्य 'व्यूहभेदः', त्रासदकथा, ('नरेन्द्रपुरीयं रेलस्थानम्'), उपन्यासः (केशवचन्द्रदाशस्य उपन्यासाः प्रसिद्धाः) चेति अवान्तरभेदाः परिलक्ष्यन्ते। 'विमानकाव्यम्' आधुनिकसाहित्यस्य उत्तराधुनिकसंस्कृतसाहित्यस्य अपरः प्रसिद्धकाव्यभेदः ('विमानयात्राशतकम्' – राजेन्द्रमिश्रस्य, 'धरित्रीदर्शनम्' – राधावल्लभस्य)। कवेः सीतानाथस्य 'आधुनिककाश्यपस्योपदेशः', 'दादाजनाः' चेति कवितयोः वर्तमानस्य समस्याधारितजीवनं पदं करोति। वनमालीविश्वालस्य Valentine's Day शीर्षककवितायां अस्माकं मूल्यबोधापक्षयः ध्वनितः।

गद्यच्छन्दसस्तथा च वैदेशिकच्छन्दसः प्रयोगः उत्तराधुनिकताया वैशिष्ट्यमेकम्। उदाहरणत्वेन हर्षदेवमाधवस्य हाइकु-तानकादिच्छछन्दोबद्धः 'लावारसन्दिग्धाः स्वप्नमयाः पर्वताः' इति ग्रन्थः प्रसिद्धः। करोणासमकालीने काले हर्षदेवेन शताधिकं हाइकुच्छन्दसा करोणाविषयकाः कविताः ग्रथिताः। छन्दमुक्ताः कविताः रचयन्ति कविः अरुणमिश्रः। 'तव जवाधरमन्मयरेखासु', 'नेत्रप्रान्ते निष्पन्दः समय' इति शुद्धप्रेमाश्रितकवितासंकलनद्वयं तस्य। तस्य *नेत्रप्रान्तेः निष्पन्दसमयः* इति उत्तराधुनिकं काव्यं खलु *नायिकाकृत-नायकासक्तकवितायाः* निदर्शनम्। परं *तव जवाधरमन्मयरेखासु* इति काव्यसंकलनं *नायककृत-नायिकासक्तकविता*। आसीत् संस्कृतसाहित्ये (Love Poem) पूर्णप्रेमोजीव्यकाव्यस्य नितरामभावः। परं

कवेररुणस्य कवितासु पूर्णतः प्रेमाश्रितभावानामातिशय्यं पाठकानां दृष्टिपथमायाति। विशेषेण, कवेः अरुणस्य द्वितीये काव्यसंकलने पूर्णतः नारीवादस्य प्रतिध्वनिः संश्रूयते। नारीवादस्तावदुत्तराधुनिककाव्यधाराया विशिष्टः पन्थाः। दिङ्मात्रमुदाहरणं तावत् –

‘तथैव नीलशाटिका, नीलतरे नयने। / नखेषु प्रलीप्ता नीलमसृणिका

केशेष्वपि वहमाना नीलनदी। / स्वर्णकङ्कणहस्ता त्वं तथैवासि, भो!

विंशोत्तरीये वयसि विलसती!’[2]

किञ्च,

‘नारी एका नदी, न कुत्रचित्सर्वदा तिष्ठति।
तथापि तव मनः शिवजटायां चिरं भ्रमितं मया, चिरञ्च स्थितम्’[3]।

अरुणरञ्जनमिश्रस्य काव्यसंकलनद्वितयस्य बह्वीषु कवितासु (‘अहं सुवर्णा’, ‘मत्स्यकन्या’, ‘नाम्ना सुवर्णा’, ‘सुवर्णा – कोणार्ककन्या’, ‘तव देहे सप्तपर्णिसुगन्धः’, ‘न नीलपक्षी, न चन्द्ररात्री’, ‘अहं तवावन्तिका’ चेति) नारीणां सौन्दर्य-प्रकृति-भावादीनि सालंकृतया प्रस्फुटितानि।

प्रसङ्गतः, प्रफुल्लमिश्रः परमानन्द-झा चेत्यनयोः नाम करणीयम् उत्तराधुनिककाव्यसंसारे । प्रफुल्लमिश्रस्य ‘चत्वारि श्रृङ्गाः’, ‘तथापि सत्यस्य मुखम्’ इति कवितासंकलनात्मिके ग्रन्थे उत्तराधुनिकमानवीयान्तश्चेतनायाः कलात्मकः पक्षः प्रतिपदं पाठकान् विमोहयति।

तरुणकवेः ऋषिराजस्य दलितकवितासंग्रहः ‘सूर्यगेहे तमिस्रा’[4] तथा च आदिवासीकवितासंग्रहः ‘धनुरातनोति’ इति नाम्ना साम्प्रतं प्रकाशपदवीं गतौ। तत्र सूर्यगेहे तमिस्रा इत्याख्यः संग्रहोऽयं सत्यकामजाबाल-ऐतरेय-महीदास-विदुर-व्यास-शबरी-गुहराज-सूतपौराणिक-एकलव्यादीनां सर्वेषां समक्षम् आरात्रिकदीपकल्पः अस्ति। अस्मिन् दलितकवितासंकलने षड्विंतशत्संख्यकाः कविता राजन्ते। तस्यैव ‘रक्तशाटीधारिणी माता’ शीर्षके लघुकथासंकलने ‘चतुरदूरभाषे आषाढ़’ इति कथायां Whatsapp, SMS, Smart Phone चेति विषयाः स्थानिताः। मन्ये उत्तराधुनिकभावाधारायाः प्रतिध्वनिसूचकः ग्रन्थोऽयम्।

---

2 *तव जवाधरमन्मयरेखासु*, अरुणरञ्जनमिश्रः, वनारसमर्काण्टाइल एण्ड् को., कलकाता, 2018, पृ.-127

3 *नेत्रप्रान्ते निष्पन्दसमयः*. अरुणरञ्जनमिश्रः, वनारसमर्काण्टाइल एण्ड् को., कलकाता, 2019. पृ.- 43

4 *सूर्यगेहे तमिस्रा* (भारतीयदलितकविता), अनुवादकः सम्पादकश्च ड. ऋषिराजजानी, गुजराती दलित साहित्य अकाडेमी, अमदावादम्, 2018.

हर्षदेवस्तावत् प्रयोगशीलसंस्कृतकवितानां स्रष्टेति। प्रवीणपण्ड्यया सम्पादिते 'क्षणे क्षणे'[5] इति कवितासंकलनात्मकग्रन्थे त्रयोदशाधिकशतसंख्यकाः संस्कृतकविताः हिन्द्यनुवादसहिताः विलसन्ति। तत्र 'संख्यास्खलनम्' (Wrong Number), 'आय-व्ययपत्रकम् -1998', 'वेदनाभरव्यथिता ध्वंसावशेषाः' (Homeric Smile), 'भित्तिचित्राणि' (Murals), 'पुरुष-नसबन्धी-वन्ध्यीकरणम्' (Vasectomy), 'विप्रयोग-सुचित्रकाव्यम्' (Graph), 'क्षितिमण्डलोष्मीभवनम्' (Global Warming), 'संक्षिप्तसन्देशसेवा'' (SMS) चेति उत्तराधुनिकभावधारायाः प्रभावो दृश्यते। हर्षदेवेन 'भूतप्रेतशतकम्' इति शतककाव्ये भूतप्रेतयोः काल्पनिकं जीवनं वर्णितम्। संस्कृतसाहित्ये इतः पूर्वं भूतप्रेतजीवनाश्रितं काव्यं नास्माकं नयनयोरापतति।

संस्कृतसाहित्ये सचेतनतया अरुणरञ्जनः सर्वप्रथमेव उत्तराधुनिकतत्त्वानि मनसिकृत्य काव्यानि कौति। तस्य नवीनविम्बविधानं, कल्पनायाः उत्तुङ्गता, प्रतिच्छत्रं प्रतीयमानार्थसद्भावः, कल्पलोकस्य प्रत्यग्रोन्मेषजिह्वानि डयनानि चमत्कारमातन्वन्ते। प्रसङ्गतः, नारायणदाश-कौशलतिवारी-प्रवीणपाण्डेयादयः आधुनिककवयो नित्यं उत्तराधुनिकभावधारया समेकीकृत्य साहित्यभाण्डारगारं पुष्णन्ति। अर्थात् संस्कृतसाहित्यं क्रमेणैवोत्तराधुनिकधाराभिः प्रभावितं सत्स्वपुष्टिं सम्पादयतीति।

परिशीलिता ग्रन्थपञ्जी

Mishra, Sashibhusan. *Swarṇasundaram* (Dr. Nirmal Sundar Mishra Felicitation Volume). Edited by Sashibhusan Mishra, Kolkata: The Banaras Mercantile Company, 2020.

Mishra, Aruna Ranjan. *Contemporary Sanskrit Writings in Orissa*, Delhi: Pratibha Prakasan, 2006.

Sen, Subhrajit. *Modern Sanskrit Literature: A Bird's eye view*, Kolkata: Sanskrit Pustak Bhandar, 2019.

5 *क्षणे क्षणे*, सम्पादकः ड. प्रवीणपण्या, खुश्बु प्रकाशन, अहमदाबाद, 2019.

आशुबोधव्याकरणस्य लकारार्थप्रकरणे लडर्थविषये पाणिनि-तदितराणां वैयाकरणानां प्रभावः

मौसुमी राणी गिरिः[1]

वाग्व्यवहारं विना लौकिकव्यवहारो न सम्भवति। ऋग्वेदादौ वाग्विषयकं विवरणमुपलभ्यते। वागस्यास्य स्वरूपज्ञानाय व्याकरणस्य ज्ञानमत्यावश्यकम्। आवैदिककालादेव स्वीकृतं व्याकरणस्य गौरवम्। वागस्य वाण्या वा बहवो व्यवहारिकपक्षाः सन्ति तन्मध्ये आचार्यपाणिनिना ये दशलकाराः समुत्पादितास्तेऽपि वाग्व्यावहारायान्यतमाः। परवर्तिनिकाले पाणिनिमनुसृत्य नैके वैयाकरणा लकारविषये आलोचिताः। पाणिनिसूत्राणि यथासाध्यं संक्षिप्तानि भवन्ति। यत एवमुच्यते-"अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः" इति। सूत्राणां वाक्याक्षराणां संक्षेपसाधनाय पूर्वसूत्रात् परसूत्रे अनुवृत्तिर्विद्यमाना। फलतः पूर्वसूत्रस्य वक्तव्यमज्ञात्वा परसूत्रस्य अर्थबोधो नात्र सम्भवति। कदाचिद् बहुपूर्ववर्तिसूत्रस्यांशविशेषो बहुपरवर्तिनि सूत्रे अनुवृत्तिर्भवति। एतादृश्योऽनुवृत्तयो बालशिक्षार्थिनां कृते दुर्बोध्या भवन्ति। एतस्मात् कारणाद् बहवो वैयाकरणाः पाणिनेरष्टाध्याय्याः काठिन्यतालाघवाय स्वस्वभावनानुसारं नवनवव्याकरण-रचनाकर्मसु प्रवृत्ता अभवन्। महामहोपाध्यायः तारानाथतर्कवाचस्पति-भट्टाचार्यमहोदयस्तेषामन्यतमः। स बालानां सुखबोधाय 'आशुबोधव्याकरणम्' इति ग्रन्थं विरचितम्।आशुबोधव्याकरणे तत्कृतसूत्राणि विविधैः प्रकरणैः सज्जीकृतानि।

पाणिनेः 'धातोः' इत्यस्मात् सूत्रात् विधीयमाना दश लकाराः शास्त्रेषु सुप्रसिद्धाः। इमे लकाराः तावत् लट् लिट् लुट् लृट् लेट् लोट् लङ् लिङ् लुङ् लृङ् चेति। लडादिशब्दाः पारिभाषिकशब्दरूपेणैव गृहीताः। 'नामैकदेशग्रहणे नाममात्रग्रहणम्' इति न्यायानुसारं सत्यभामा यथा भामा इति नाम्ना अभिधीयते,तथैव कालस्य लकारेण लडादिपारिभाषिकाशब्दाः इति। तस्मादेव एषामादिवर्णः कालशब्दाभिधायकः। रूपदृष्ट्या टिद्-ङिद्भेदेन इमे लकारा द्विधा विभज्यन्ते। तेषु षट् टिल्लकाराः, चत्वारश्च ङिल्लकाराः। शास्त्रेषु लडादीनां वर्तमानत्वाद्यर्थेषु उक्तत्वात्ते खलु लकारार्थाः यथा वर्तमानक्रियावृत्तेर्धातोर्लड्, भूतानद्यतनपरोक्षार्थवृत्तेर्लिड्, भविष्यत्यनद्यतनेऽर्थे लुट्, क्रियायां सत्यामसत्यां वा भविष्यत्यर्थाल्लृड्, अनद्यतनभूतार्थवृत्तेर्लङ्, विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेष्वर्थेषु आशिषि चार्थे लेट्, लोट्, लिङ् च भूतसामान्यार्थे लुङ्, हेतुहेतुमद्भावे क्रियातिपत्तौ च लृङ् विधीयन्ते। व्यवहारिकदृष्ट्या वर्तमान-भूत-भविष्यत्कालेषु एषां लकाराणां प्रयोगो दृश्यते। मयाधुना आलोच्यते आशुबोधव्याकरणस्य लकारार्थप्रकरणे लडर्थविषये पाणिनि-तदितराणां वैयाकरणानां प्रभावः।

---

[1] शोधच्छात्रा, संस्कृतविभागः, कलिकाताविश्वविद्यालयः, पश्चिमवङ्गः।

आशुबोधव्याकरणस्य लकारार्थप्रकरणे लडर्थविषये पाणिनि-तदितराणां वैयाकरणानां प्रभावः

पाणिनीयव्याकरणानुसारं वर्तमानकालिको लकारस्तावल्लट्लकारः। अष्टाध्यायी’ति ग्रन्थे भवता पाणिनिना लट् विधीयते ‘वर्तमाने लडि’[2]ति सूत्रेण।

महाभाष्य-काशिकानुसारेण लडर्थः

वर्तमाने लड् इति सूत्रस्य भाष्ये भाष्यकृतापि वर्तमानलक्षणानि कृतानि तद्यथा –

‘भूतभविष्यत्प्रतिद्वन्द्वो हि वर्तमानकाल’[3] इति

‘आरम्भोऽनपवृक्तो वर्तमान’[4] इति।

‘प्रारब्धोऽपरिसमाप्तश्च वर्तमान’[5]इति च।

वर्तमानलक्षणप्रसङ्गेन काशिकाकारेण - प्रारब्धापरिसमाप्तत्वं लक्षणमेव गृहीतम् – “प्रारब्धोऽपरिसमाप्तश्च वर्तमान”[6] इति। वर्तमानस्यात्र त्रिविधलक्षणेषु प्रथमलक्षणं न निर्दुष्टमन्योन्याश्रयदोषदुष्टत्वात्। यतो लक्षणेनानेन भूतभविष्यद्विरोधिनः कालस्य वर्तमानसंज्ञा विधीयते। लक्षणमिदं कालस्याखण्डतत्त्वमवलम्ब्यैव स्वीकृतम्। लक्षणेऽस्मिन् भूतभविष्यज्ज्ञानापेक्षं भवति वर्तमानज्ञानं, भूतज्ञानञ्च वर्तमानभाविज्ञानापेक्षमपि च भविष्यज्ञानं भूतवर्तमानज्ञानापेक्षम्, तस्मादत्र लक्षणे अन्योन्याश्रयदोषः समागतः। प्रथमेतरलक्षणयोः क्वचिदर्थगतो भेदो नास्ति। अत्र तु शब्दतो भेदो दृश्यते। अतः प्रथमलक्षणस्यार्थः काचन प्रारब्धा क्रिया यावन्न विरामो लभ्यते तावद्वर्तमानत्वमिति। तृतीयलक्षणस्याप्यनुरूपोऽर्थोऽभिप्रेतः। तद्यथा कोऽपि आरब्धो व्यापारो अपरिसमाप्तश्चेत्तत्र वर्तमानत्वमिति। अतः वर्तमानत्वं हि प्रारब्धापरिसमाप्तक्रियोपलक्षितत्त्वमिति। अतः क्रियारम्भात् फलप्राप्तेः पूर्वावधिविद्यमानः कालो हि वर्तमानकालः। यथा पचत्यादिपदानि फूत्कारादिविशेषक्रियाणां समुदायात्मकरूपण्येव। समुदायात्मकक्रियासु प्रारम्भक्रियातोऽनुत्पन्नान्तिमक्रियावधि प्रवाहकालः वर्तमानकालः।

प्रथमतः भाष्यभाषितलक्षणे प्रश्नः समुदेति यत् प्रारब्धापरिसमाप्तस्य वर्तमानत्वे ‘देवदत्तः मासं पठती’त्यत्र यद्यपि ग्रन्थाध्ययनात्मिका क्रियासमाप्तिरेकमासं यावत् प्रवर्तते, तथापि तदा अध्ययनक्रियाया अतिरिक्ता भोजनशयनादिक्रिया अपि वर्तन्ते। अतस्ताः क्रिया अध्ययनक्रियायाः वर्तमानत्वप्रकाशे

---

[2] *अष्टाध्यायी*- 3.2.123

[3] उक्तसंख्यकसूत्रस्य भाष्यम्।

[4] तत्रैव

[5] तत्रैव

[6] *काशिका*, 3.2.123 संख्यकसूत्रस्य वृत्तौ, पृष्ठाङ्कः - 635।

प्रतिबन्धकाः भवेयुः। तथोक्तं पतञ्जलिना –“प्रवृत्तस्याविरामे शासितव्या भवन्ती। इहाधीमहे, इह वसामः, इह पुष्यमित्रं याजयामः। किं पुनः कारणं न सिद्धति अवर्तमानत्वादि”[7]ति।

तद्व्याख्यायामाह कैयटेन –“इहाधीमह इत्यध्ययनं प्रवृत्तं प्रारब्धं न च विरतम्। यदा च भोजनादिकां क्रियां कुर्बन्तो नाधीयते तदाधीमह इति प्रयोगः स प्राप्नोति”[8] इति। अस्य समाधित्वेन निगदितं यत् भोजन-शयनादिगौणक्रियासमूहा न प्रतिबन्धका अध्ययनरूपमुख्यक्रियाप्रकाशनार्थम्। अत्र नान्तरीयकत्वात्तासां न भेदकत्वमिति। इमा भोजनादिगौणक्रियाः पठनरूपाया मुख्यक्रियाया अवयवक्रियारूपैः ग्राह्यन्ते। यतः संहिताध्ययनरूपक्रियाव्याप्तौ यावन्न क्रियासमाप्तिमिता तावत् पठतीतिक्रियाकाङ्क्षा वतर्त एव। प्रक्षान्तरे ‘देवदत्तो भुङ्क्ते’ इत्यादावपि वर्तमानता स्वीकृता। अत्रापि भोजनक्रियायां हसनजल्पनाद्यवयवक्रियासमूहानां व्यवधानं दृश्यत एव। परन्तु अवयवक्रियाणामत्र नान्तरीयकत्वान्मुख्यक्रियाप्रकाशनेन भेदकत्वमिति। अतः ‘पठती’त्यादौ वर्तमानत्वं स्वीकरणीयमिति भाष्याशयः। तथाहि भाष्ये आकलितम् - – “नाय्या त्वेषा वर्तमानकालता, कुतः आरम्भानपवर्गादारम्भोऽनपवृक्तः। यं खल्वपि भवान् मुक्तसंशयं वर्तमानकालं नायाय्यं मन्यते, भुङ्क्ते देवदत्त इति तेनैतत्तुल्यम्, सोऽपि ह्यवश्यं भुञ्जानो हसति वा जल्पति वा पानीयं वा पिवति। यद्यत्र युक्ता वर्तमानकालता दृश्यते, इहापि युक्ता दृश्यताम् ”[9] इति।

तदुक्तं प्रदीपे –“यदा प्रवृत्तं न चोपरतं तदा तस्य भोजनादिक्रिया नान्तरीयकत्वादव्यवधायिका। अथवाध्ययनस्यैवावयवक्रिया”[10] इति। भर्तृहरिणापि इदमेवोक्तम् –

“व्यवधानमिवोपैति निवृत्त इव दृश्यते।
क्रियासमूहो भुज्यादिरन्तरालप्रवृत्तिभिः।।
न च विच्छिन्नरूपोऽपि सोऽविरामान्निवर्तते।
सर्वैव हि क्रियान्येन संकीर्णेवोपलभ्यते।।
तदन्तरालदृष्टा वा सर्वैवावयवक्रियै।
सादृश्यात् सति भेदे तु तदङ्गत्वेन गृह्यते।।”[11]इति।

---

[7] *काशिका*, 3.2.123 संख्यकसूत्रस्य वृत्तौ, पृष्ठाङ्कः - 635।

[8] तत्रैव

[9] *महाभाष्यम्* (3.2.123)

[10] तत्रैव

[11] *वाक्यपदीयम्*, (कालसमुद्देशः, 82-84)

अतः अध्ययनकाले भूज्याद्यन्तरालक्रियाभिः व्यवधाने सति अनागतावयवभावञ्चाभिप्रेत्य अतीतावयवकल्पनया निवृत्त इव स भुज्यादिरूपः क्रियासमूहो दृश्यते। ताः सर्वाः क्रियाः संकीर्णेवोपलभ्यते। अतः भूज्यादेरन्तरालक्रियान्तरव्यवधानेऽपि अध्ययनरूपमुख्यफलप्राप्तिपर्यन्तमविरतत्वात् देवदत्तः मासं पठतीत्यादौ वर्तमातनता सिद्धेति।एवं याजनादेरन्तरालक्रियान्तरव्यवधानेऽपि दक्षिणावाप्तिरूपमुख्यफलपर्यन्तमविरतत्त्वात् पुष्यमित्रं याजयाम इत्यादौ वर्तमानता सिद्धेति।

द्वितीयतः भूतभविष्यत्प्रतिद्वन्द्वी वर्तमान इति वर्तमानलक्षणे अपरा शङ्का तावत् आत्मा अस्ति तिष्ठन्ति पर्वताः, स्रवन्ति नद्य इत्यादिप्रयोगक्षेत्रेषु आत्मादिनित्यपदार्थेषु उत्पत्तेः किमपि सूत्रं नोपलभ्यते। यतः कालस्याखण्डतत्त्वं स्वीकृतमेव। तस्मादत्र साधनयोग्यताभावे क्रियात्मकताभावः तथा क्रियात्मकताभावे वर्तमानत्वादिनामप्यभावो जायते। अतः एषु क्षेत्रेषु वर्तमानत्वम् असम्भवम्। तथैव भाषितं भाष्यकारेण भाष्ये- “नित्यप्रवृत्ते च शासितव्या भवन्ती। तिष्ठन्ति पर्वताः। स्रवन्ति नद्य इति। किं पुनः कारणं न सिद्धति कालाविभागात्। इह भूतभविष्यत्प्रतिद्वन्द्वी वर्तमानः कालः, न चात्र भूतभविष्यन्तौ कालौ स्त”[12] इति

कैयटेनाप्युक्तम् –“स पर्वतास्तिष्ठन्तीत्यादौ स्थानादेः सर्वदा सद्भावात्साध्यत्वाभावात् क्रियारूपत्वाभावात्तद्धर्मस्य वर्तमानस्याप्यभाव इति भावः। साध्यस्यार्थस्यानित्यत्वादवश्यं भविष्यत्त्वेन भाव्यम्। उत्पन्नस्यापि नाशाद्भूतत्वेनेति भूत्भविष्यत्प्रतिद्वन्द्वी वर्तमानो धात्वर्थो नित्यप्रवृत्तस्य भूतभविष्यत्त्वाभावाद्वर्तमानत्वाभावः, क्रियारूपत्वाभावश्चेत्यर्थ”[13]इति।

शंकामिमामपाकुर्वन् भाष्यकृत् कथयति यत् तत्तत्कालिकानां राज्ञां क्रिया एव पर्वताः तिष्ठन्ति इत्यादिवाक्यानां वर्तमानत्वम्, तासां क्रियाणां वर्तमानकाले एव विद्यमानत्वात्। एतादृशः प्रयोगो भूतकाले भविष्यत्काले चापि भवति। तथा चोक्तं भाष्यकृता– “इह हि भूतभविष्यद्वर्तमानानां राज्ञां याः क्रियास्ताः तिष्ठतेरधिकरणम्। इह तावत् तिष्ठन्ति पर्वताः इति, क्रियास्तास्वतिक्रान्तासु”[14] इति।

वर्तमानसत्तापरीक्षा

वर्तमानसत्ताक्षेपः-

केचन वदन्ति नास्ति कश्चनः वर्तमानः कालः। यतः यो विषयो निष्पन्नः स भूतविषयरूपेण ग्राह्यः, योऽनिष्पन्नः स भविष्यतो विषयरूपेण कथितः। तस्मात् निष्पन्नमनिष्पन्नञ्च विना कश्चन वर्तमानकालो नास्ति। अतः नास्ति वर्तमानकालस्य कापि सत्ता। तदेव उक्तं कैयटेन प्रदीपे –“निष्पन्नस्यार्थस्य भूतत्वादनिष्पन्नस्य भावितान्निष्पन्नानिष्पन्नव्यतिरेकेण रूपान्तरस्याभाव”[15]इति।

---

12 *महाभाष्यम्* (3.2.123)

13 तत्रैव।

14 *महाभाष्यम्*।

15 तत्रैव, प्रदीपटीकायाम्।

भत्तृहरिणापीदमेव मतमुपस्थापितम् –

"सदसद्वापि वस्तु स्यात् तृतीयं नास्ति किञ्चन।
न भूतभविष्यन्तौ मुक्त्वा मध्यं न विद्यते।।"[16]इति।

अतः सदसद् इतिद्वयं समयान्तरसिद्धक्रिया। समयान्तरसिद्धक्रिययोः क्रियाणां वा एकत्र कथं सिद्धिर्भवेदिति प्रश्नः। तस्मादत्र भूतभविष्यतोः सिद्धिर्न तु वर्तमानस्य। अतः नास्ति वर्तमानकालस्य कापि सत्ता। विषयेऽस्मिन् क्षणभङ्गवादिनोऽपि उक्तम् - "वर्तमानकाला क्रिया नास्तीत्यर्थः। एवं च क्षणभङ्गुरे पदार्थमात्रे क्रियाश्रयत्वासंभवात्। क्रियायां भूतभविष्यप्रतिद्वन्द्विवर्तमानत्वाभावेन कालविभागानवगतेवर्तमाने लडिति सूत्रमसंगतमिति भाव"[17] इति।

हेलाराजेनापि निगदितम् –"साध्यमानावस्था क्रिया भन्यते। तत्र च यः क्षणोऽतीतः, स सन् सिद्धस्वभाव इति क्रिया तत्रातीता। यश्चासन् स साध्यः, स भावीक्षण इति तत्र भविष्यदुपाधिका क्रिया। न चान्योऽस्ति कश्चित् क्षणः सदसदुभयरूपः। विरुद्धस्वभावस्यैकत्वविरोधाद्"[18] इति।

वर्तमानस्य सत्ता नास्ति अस्ति वा इति प्रसङ्गे काकं प्रति उक्तिर्यथा -

"अनागते न पतसि अतिक्रान्ते च काक न।
यदि सम्प्रति पतसि कृत्स्नो लोकः पतत्ययम्।। "[19]इति।

अतः अनागतस्य पतनक्रिया असदेव। असति पततीतिक्रियायाः प्रयोगो न सम्भवति। यतः स क्षणः अधुनापि नागतः। पुनः भूतकालेऽपि न सम्भवति। यतः पूर्वमेव स क्षणः अतिक्रान्तः। पुनः यदि पततीतिक्रियायाः प्रयोगो भवति तर्हि हिमवानपि पततीत्यादिव्यवहारे का आपत्तिः? इत्थं यदि क्रियायाः विद्यमानत्वस्याभावे पततीत्यस्य प्रयोगः क्रियते तर्हि सर्वो लोकः पतति इति व्यवहारोऽपि स्वीकार्यः। एवं पर्वतादिविषयेऽपि पततीत्यस्य प्रयोगस्य असङ्गतिः प्रकाशिता।

तथा चाटीकितं प्रदीपटीकायाम्–" क्रियाया वर्तमानत्वाभावेऽपि यदि पतसीति व्यपदेशस्तदा विशेषाभावात् पर्वतादावपि पतसीतिव्यपदेशप्रसङ्ग इत्यर्थ"[20]इति।

अपि च क्रियाविभागोऽत्र न भवेत्। यतः यत् सत् तद् सिद्धमेव। सिद्धवस्तुनः कदापि क्रमवत्तया पुनः सिद्धस्य प्रयोजनं नास्ति। अनुरूपतया यदसत् तत्रापि क्रमवत्तायाः आवश्यकता नास्ति। अवस्थाद्वये एव क्रमवत्ताभावो दृश्यते। अतः क्रियाणां वर्तमानता न सम्भवति। तथा चोक्तं वाक्यपदीये –

---

[16] वाक्यपदीयम् (कालसमुद्देशः 85)

[17] *महाभाष्यम्*, (3.2.123 संख्यकसूत्रस्य उद्योतटीकायाम्) पृष्ठाङ्कः – 185।

[18] *वाक्यपदीयम्* (कालसमुद्देशः 85) पृष्ठाङ्कः – 613।

[19] महाभाष्यम् (3.2.123) पृष्ठाङ्कः – 184।

[20] तत्रैव, पृष्ठाङ्कः - 185।

"निवृत्तिरूपमेकस्य भेदाभावन्न कल्पते।
सदसद्वापि तेनैकं क्रमरूपं कथं भवेत्।।"[21] इति।

तथैव उक्तं तेन –

"बहुनां चानवस्थानादेकमेवोपलभ्यते।
यथोपलब्धिस्मरणं तत्र चाप्युद्यते।। "[22] इति।

तद्रूपञ्च प्रदीपेऽपि -"एक एव क्षण उपलभ्यते नातीतो नाप्यनागतो न चैकस्य क्षणस्य गमनादिक्रियावेशः संभवतीति भाव"[23] इति।

वर्तमानसत्तास्थापनम्

प्रथमतः- उपर्युक्तविषयो न युक्तः। देवदत्तः गच्छतीतिवाक्ये देवदत्तस्य देशान्तरप्राप्तिः न निर्हेतुका। अत्र गमनक्रियैव हेतुः आधारश्च गच्छतीति। किञ्च गमनक्रियामवलम्व्य एव गच्छतीतिज्ञानमिदम् अवाधिततया उत्पादितमस्ति। अतः क्रियाणां सत्तास्ति। एवं क्रियाणां वर्तमानत्वं स्वतः एव उत्पन्नं भवति।

द्वितीयतः– फलानां भेदत्वे √पच्-भिदादिरूपैः क्रियाणां पृथकीकरणं भवेत्। तस्मादेव फलैकत्वे क्रियैकता तथा फलानेकत्वे क्रियानेकता उतपद्यते। अस्यां स्थितौ सदसत्त्वेऽपि व्यापारक्षणानां वर्तमानकालस्य वाचकत्वे काऽपि आपत्तिर्न स्यात्, यतः सत्त्वं तावन्न वर्तमानलक्षणम्। परन्तु प्रारब्धापरिसमाप्तत्वं हि वर्तमानम्। अतः क्रियायाः प्रारम्भकालात् परिसमाप्तपर्यन्तं समुदायक्षणं वर्तमानस्यान्तर्गतम्। तथाहि हेलाराजीयटीकायाम् –"अत्र च सदसत्त्वेऽपि क्षणानां वर्तमानतोपपद्यत एव। न हि सत्त्वं वर्तमानलक्षणम्, किन्तु प्रारब्धापरिसमाप्तत्वम्"[24]इति।

भर्तृहरिनये बुद्धौ यः क्रियासमुहः एकत्र गृहीतो भवति स वर्तमानकालरूपेण ग्राह्यः। तद्यथा –

"कार्योत्पत्तौ समर्थं वा स्वेन धर्मेण तद्यथा।
आत्मतत्त्वेन गृह्यते सा चास्मिन् वर्तमानता।।
क्रिया प्रबन्धरूपं यदध्यात्मं विनिगृह्यते।
सङ्क्रान्तबिम्बमेकत्र तामाहुर्वतमानता।। "[25] इति।

---

[21] *वाक्यपदीयम्* (कालसमुद्देशः 86)

[22] तत्रैव, 87 संख्यककारिका।

[23] *महाभाष्यम्*, (3.2.123 प्रदीपटीका)।

[24] *हेलाराजीयटीका* (काल-89)।

[25] *वाक्यपदीयम्* (कालसमुद्देशः 89, 90)।

तृतीयतः –वर्तमानाभावे भूतभविष्यतोरप्यभावो दृश्यते। यतः वर्तमानमाश्रित्यैव तयोः सत्ता स्थिरीक्रियते। यस्य सत्ता अद्य नोपलभ्यते भूतेऽपि तस्य कापि सत्ता नासीत्। अपि च तस्य कल्पना न समीचीना भविष्यत्यपि। तथोक्तं महाभाष्यप्रदीपे –

"वर्तमानत्वाभावे च भूतभविष्यतोरप्यभावप्रसङ्गो, वर्तमानो हि भूतत्वं भविष्यत्त्वञ्च प्रतिपद्यते।"[26] इति।

अतः गच्छतीतिप्रयोगेन यदबाधितं ज्ञानमुत्पद्यते तदेव वर्तमानत्वस्य प्रमाणस्वरूपम्। तदुक्तम् उद्योते - "कदाप्यवर्तमानस्य शशविषाणादितुल्यस्य भूतभविष्यत्त्वे अपि त्वत्संमते न संभवत इति गच्छतीत्यबाधितप्रत्यस्तत्सत्तायां मानमिति भाव"[27] इति।

चतुर्थतः – केचन भिन्नयुक्त्या वर्तमानत्वस्य सत्ता स्वीकृता। यथा दह्यमानस्य विसस्य तथा मृणालस्य प्रत्येकं क्रियारूपस्य प्रत्यक्षगोचरत्वाभावेऽपि कालत्रयाणां ज्ञानसम्पन्नो योगी तु ताः सूक्ष्मक्रियाः वर्तमानकाले एव भवन्तीत्यनुभवति। तद्यथा –

"विसस्य वाला इव दह्यमाना,
न लक्ष्यते विकृतिः सन्निपाते।
अस्तीति तां वेदयन्ते त्रिभावाः,
सूक्ष्मो हि भावोऽनुमितेन गम्यः।।"[28]इति।

अतः यद्यपि कालस्याखण्डतत्त्वं स्वीकृतं तथापि कालः क्रियाश्रित इत्यनेन प्रत्ययेन भाष्यकारेण वर्तमानादिकालविभागस्य कल्पना स्वीकृता। तथाचोक्तं भाष्यवार्त्तिके –"सन्ति च कालविभागा"[29]इति।

पञ्चमतः - स्मयोगेन लट्लकारः अतीतकालस्य बोधको भवति। अत्र पाणिनिसूत्रं तावत् 'लट् स्मे'[30] इति। यथा – जानाति स्म वसति स्म इत्यादयः। अतः लट्लकारः तस्य तिङः द्योतको भवति यत्र स्म- इत्यस्याभावो वर्तते।

कौण्डभट्ट-नागेशभट्टयोर्नये लडर्थः

नागेशभट्टेन तथा कौण्डभट्टेन भाष्यकारस्य परिभाषाद्वयमेव अङ्गीक्रियते। कौण्डभट्टेन वर्तमानलक्षणं लक्षितम् - "प्रारब्धापरिसमाप्तत्वं भूतभविष्यद्भिन्नत्वं वा वर्तमानत्वम्"[31]इति।

---

26 *महाभाष्यम्*, (3.2.123 प्रदीपटीका), पृष्ठाङ्कः – 185।

27 तत्रैव , उद्योतटीकायाम्।

28 तत्रैव

29 *भाष्यवार्तिकम्*, पृष्ठाङ्कः – 184।

30 *अष्टाध्यायी* – 3.2.118।

आशुबोधव्याकरणस्य लकारार्थप्रकरणे लडर्थविषये पाणिनि-तदितराणां वैयाकरणानां प्रभावः

नागेशेन मञ्जूषाग्रन्थे लडर्थः कृतः –" तत्र वर्तमानत्वं प्रारब्धापरिसमाप्तत्वम्,भूतभविष्यत्भिन्नत्वं वा।"[32]इति।

परन्तु परमलघुमञ्जूषाग्रन्थे लडर्थविषये उक्रम् –

"वर्तमानत्वञ्च प्रारब्धापरिसमाप्तक्रियोपलक्षितत्वम्"[33]इति।

नागेशभट्टेन तथा कौण्डभट्टेन प्रारब्धापरिसमाप्तत्वलक्षणमेव अधिकं स्वीकृतम्। परन्तु भूतभविष्यद्भिन्नत्वमितिलक्षणं अन्योन्याश्रयदोषदुष्टम्। वस्तुतः लक्षणमिदं लोकप्रसिद्धमेव। सामाजिकदृष्ट्या लक्षणमिदं शुद्धम्, शास्त्रदृष्ट्या तु प्रारब्धापरिसमाप्तत्वलक्षणमेव ग्रहणयोग्यम्। अत्रापि 'आत्माऽस्ति' 'पर्वताः सन्ती'त्यादौ तत्तत्कालिकानां राज्ञां क्रियाया अनित्यत्वात्तत्विशिष्टस्योत्पत्यादिकमादाय वर्त्तमानत्वमूह्यम्। एवम् तम् आसीत् "तुच्छेनाभ्यपिहितं यदासीत्", "अहमेकः प्रथममासम् वर्त्तामि च भविष्यामि" इत्यादिश्रुतयोऽपि योज्याः।

प्रक्रियाकौमुदी-शब्दकौस्तुभ-वैयाकरणसिद्धान्तकौमुद्यनुसारेण लडर्थः

श्रीरामचन्द्राचार्येण तत्कृतरप्रक्रियाकौमुदीग्रन्थे वर्तमाने लट् इतिसूत्रस्य वृत्तौ लडर्थः कृतः – "आरब्धापरिसमाप्तक्रियोपलक्षिते काले वाच्ये धातोर्लिट् प्रत्ययः स्यात्।"[34] इति।

लडर्थप्रसङ्गेन भट्टोजिदीक्षितेन शब्दकौस्तुभ इति ग्रन्थे निगदितं –"तस्य च वर्तमानत्वारब्धापरिसमाप्तत्वम् "[35]इति। अपि च वैयाकरणसिद्धान्तकौमुदीग्रन्थे तेन गदितं वर्तमाने लडिति सूत्रस्यार्थविषये "वर्तमानक्रियावृत्तेर्धातोर्लट् स्याद्"[36] इति।

आशुबोधव्याकरणानुसारं लडर्थः

तारानाथतर्कवाचस्पतिनापि पाणिनेः सम्पूर्णसूत्रमिदं गृहीत्वा वर्तमानकालविधायकं सूत्रं कृतम् – 'वर्त्तमाने लट्'[37] इति। अपि च स्वकृतवृत्तौ लडर्थप्रसङ्गे आह – "वर्त्तमानक्रियावाचिधातोः लट्" स्यात्। वर्त्तमानस्तु आरब्धापरिसमाप्तः कालः। स च प्रयोगसमानकाल एव भवति"[38] इति।

---

[31] *वैयाकरणभूषणसारः* (लकारार्थनिर्णयः), पृष्ठाङ्कः – 48।

[32] *मञ्जूषा* ,पृष्ठाङ्कः - 81।

[33] *परमलघुमञ्जूषा* (दशलकारादेशार्थनिरूपणम्)।

[34] *प्रक्रियाकौमुदी* (उत्तरार्धः), पृष्ठाङ्कः – 6।

[35] *शब्दकौस्तुभः*, पृष्ठाङ्कः – 465।

[36] *वैयाकरणसिद्धान्तकौमुदी*।

[37] *आशुबोधव्याकरणम्* (लकारार्थप्रकरणम् – 613)।

[38] तत्रैव

वस्तुतः वैयाकरणनये वर्तमानत्वस्य निष्कर्षभूतपरिभाषा तावत् प्रारब्धापरिसमाप्तत्वमेव। अतः अधिश्रयणादधःश्रयणपर्यन्तं पचनात्मकव्यापारसमूहमित्येव पचतीत्यस्यार्थः। तारानाथतर्कवाचस्पतिमहोदयेनापि वर्तमानत्वस्य निष्कर्षभूतपरिभाषेयं गृहीता।यतः तेन प्राचीनव्याकरणग्रन्थानां काठिन्यस्य लाघवाय स्व-भावनानुसारं त्रिमुनिव्याकरणमुपजीव्यत्वेनाश्रित्य प्रक्रियाकौमुदी-वैयाकरणसिद्धान्तकौमुद्यौ अनुसृत्यैव आशुबोधव्याकरणग्रन्थोऽयं रचितः। आशुबोध इति विशेषणेन अनायासबोधः स्वीकृतः। तस्मादनायासेन सुखेन वा बोधार्थं तेन व्याकरणग्रन्थोऽयं रचितः। तस्य ईदृशी चेष्टा अवश्यमेव प्रशंसनीयार्हा इति शम्।

सहायकग्रन्थसूची

अष्टाध्यायीसूत्रपाठः, सत्यनारायणचक्रवर्तीसम्पादितः, संस्कृतपुस्तकभाण्डारः, कलकाता, २००४।

अष्टाध्यायी, पुष्पादीक्षितसम्पादिता, संस्कृतभारती, नवदेहली,२०१०।

आशुबोधव्याकरणम्, श्रीतारानाथतर्कवाचस्पतिभट्टाचार्यसङ्कलितम्, श्रीजीवनानन्दविद्यासागरभट्टाचार्य-प्रकाशितम्, कलिकातानगरे सरस्वतीयन्त्रेण मुद्रितम्, तृतीयसंस्करणम्- १८६२।

काशिका (न्यास-पदमञ्जरी भावबोधिनीसहिता),जयशङ्करलालत्रिपाठिसुधाकरमालवीय-सम्पादिता, तारा प्रिंटिङ्ग वर्क्स, 2187.

काशिकावृत्तिः, ईश्वरचन्द्रसम्पादिता, चौखम्बासुरभारतीप्रकाशनम्, बाराणसी, २००४।

महाभाष्यम्, श्रीभार्गवशास्त्रि-जोशि-सम्पादितम्, चौखम्बासंस्कृतप्रतिष्ठानम्, २००८ (पुनर्मुद्रितम्)।

महाभाष्यप्रदीपव्याख्यानानि, एम् एस् नरसिंहाचार्यसम्पादितानि, इन्स्टिटियुट् फ्रान्सियास् इण्डोलोजिक्, पण्डिचेरी।

परमलघुमञ्जूषा, जयशंकरलालत्रिपाठीसम्पादिता, कृष्णदास अकादमी, वाराणसी, वि सं 2061।

प्रक्रियाकौमुदी, श्रीमुरलीधरमिश्रसम्पादिता, संपूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, 2000।

लकारार्थनिर्णयः, अशोककुमारवन्द्योपाध्यायसम्पादितः, श्रीबलरामप्रकाशनी, २००५।

वाक्यपदीयम्, रघुनाथशर्मणा सम्पादितम्, सम्पूर्णानन्दविश्वविद्यालयप्रकाशितम्, वाराणसी, १९७७।

वैयाकरणभूषणसारः शङ्करीयुतः, महादेवचिमनाजी-आप्टे-सम्पादितः, आनन्दाश्रममूद्रणालयः, १८७९।

वैयाकरणभूषणसारः (प्रभादर्पणटीकाद्वयोपेतः), तारकेश्वरशास्त्रिचतुर्वेदसम्पादितः, चौखम्वासंस्कृतभवनम्, वाराणसी, १८७९।

वैयाकरणभूषणसारः, बालकृष्णपञ्चोलिसम्पादितम्, चौखम्बा- संस्कृत-सीरिज, वाराणसी, १९६१।

वैयाकरणसिद्धान्तकौमुदी, महामहोपाध्यायगिरिधरशर्मणा महामहोपाध्यायपरमेश्वरानन्दशर्मणा च सम्पादिता, मोतिलालबनारसीदासप्रकाशिता, दिल्ली, १९६१ (प्रथमसंस्करणम्)।

शब्दकौस्तुभः, पं गोपाल-शास्त्री-नेनेसम्पादितः, चौखम्बासंस्कृतसीरीजाफिस, बनारससिटी, १९२९ इ.।

संस्कृत व्याकरण शास्त्र का इतिहास (भाग-२), युधिष्ठिरमीमांसकः, भारतीयप्राच्यविद्याप्रतिष्ठानम्, अजमेर, संवत् २०२५।

The Students Sanskrit English Dictionary, V.S. Apte, Nag Publications, Jawahar Nagar, Delhi, 1987.

‘श्रीकृष्णस्य परमदेवत्वं तथा परमब्रह्मत्वं’ गोपालतापन्युपनिषद्दिशैकं संक्षिप्तावेक्षणम्

भवेश-मण्डलः[1]

वेदस्य जटिलयागयज्ञजालसमन्वितस्य दृढबन्धनात् जनानां मुक्तिलाभ-वासनाया उपनिषच्छास्त्रस्य आविर्भावः। त्रिविधभवपरिताप-परितप्तमर्त्यचेतसां विश्रान्तिहेतुता एव सांसारिकान् उपनिषोन्मुखतां नयति। उपपूर्वकात् निपूर्वकात् सद्धातोरुत्तरं क्विप्प्रत्यययोगेन उपनिषदिति शब्दो निष्पद्यते। साधारणतया उपनिषच्छब्देन यां विद्यामाश्रित्य तन्निष्ठस्य निःसंशयपूर्वकम् अनुशीलनेन सैव विद्या अनुशीलनकारिणोऽविद्याजनितसंसारबन्धनस्य विनाशतां सम्पूर्णभावेन साधयति – सैव विद्या अवगन्तव्येति। इयं विद्या ब्रह्मविद्या। अर्थाद् उपनिषदि ब्रह्मविद्यैव दार्ढ्येन प्रतिष्ठिता। ब्रह्मविद्याप्रतिपादिकेयमुपनिषदेव प्रस्थानत्रय्या अन्तर्भुक्ता। इदं तावत् प्रस्थानत्रयं परवर्तियुगस्य भारतीयवेदान्तदर्शनस्य भित्तिभूमिः।

सामान्यभावेन उपनिषदः वेदशाखया, च पुनरारण्यकेन सार्धं युक्ता वर्तन्ते। यथा कृष्णयजुर्वेदस्य कठशाखायामन्तर्भुक्ता कठोपनिषत्, तथान्यत्र – बृहदारण्यकोपनिषत् आरण्यकभागेन सह सम्बद्धा वर्तते। संस्कृतबृहद्वाङ्मयेषु उपनिषद्संख्यागणनं नितान्तं दुरूहं वर्तते। परन्तु यजुर्वेदान्तर्भुक्तमुक्तिकोपनिषदि ईशकेनकठादीनि अष्टोत्तरशतसंख्यकानि उपनिषदां नामानि उपलभ्यन्ते। तासामुपनिषदामन्यतमा खलु ‘‘गोपालतापनी’’ उपनिषत्। इयमुपनिषत् अथर्ववेदस्य पिप्पलशाखाया अन्तर्गता। एतद्धेतोः इयमुपनिषदार्थर्वणोपनिषन्नाम्ना अभिहिता भवति। यशोदापुत्रः गोपालोऽस्या उपनिषदः प्रतिपाद्यः।

तत्रभवान् गोपालः देवः सच्चिदानन्दः। तथा चाह तापनीश्रुतिः –

‘‘ओं सच्चिदानन्दरूपाय कृष्णयाक्लिष्टकारिणे।
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे।।’’[2]

अयमेव गोपालप्रभुः सर्ववेदवेदान्तेषु प्रतिपादितं परमं ब्रह्म। यस्य आश्रयादेव भवबन्धनं चिराय मुक्तं भवति। इयमेव गोपालतापनी गोपालविद्याप्रतिपादिका। टीकाकारविश्वेश्वरस्य भारत्यां – **‘‘गोपालविद्या गर्भ-जन्म-जरा-रोगाद्यनर्थव्रातं शातयति तथा कृष्णाख्यं संसारविनिवर्तकं परं ब्रह्म गमयति संसारहेत्वविद्यादिकञ्चात्यन्तमवसादयति विनाशयतीति व्युत्पत्त्या गोपालविद्या उपनिषदुच्यते।’’**[3]

---

[1] गवेषकः, संस्कृतविभागः, कलकाताविश्वविद्यालयः, पश्चिमवङ्गः।

[2] *पूर्वगोपालतापनी* -१

[3] *गोपालतापन्युपनिषत्* – १ (*विश्वेश्वरटीका*)

'श्रीकृष्णस्य परमदेवत्वं तथा परमब्रह्मत्वं' गोपालतापन्युपनिषद्दिशैकं संक्षिप्तावेक्षणम्

यो गोपान् जीवान् आत्मत्वेन आसृष्टिपर्यन्तम् आलाति आदत्ते स्वीकरोति, स गोपालो भवतीति। अर्थात् गोपान् जीवान् स्वानुजीविनो यश्चात्मत्वेन परमस्नेहादात्माभेदेन आसृष्टिपर्यन्तं सर्गप्रलयोपलक्षितं कालं सर्वमेव व्याप्य आलाति स्वीकरोति गोपालः स एव भवति। पूज्यपादिका श्रुतिरेव स्वयमेवं स्पष्टीकरोति – **''यो गोपान् जीवान् वै आत्मत्वेनासृष्टिपर्यन्तमालाति स गोपालो भवति।''**[4] अयमेव गोपालः परं ब्रह्म कृष्णः। तथा च गोपालतापनी –

''सोऽहं परं ब्रह्म कृष्णात्मको नित्यानन्दैकरूपः।''[5]

अस्यामुपनिषदि श्रीकृष्णस्य परमत्वं, देवत्वं, ब्रह्मत्वम् इति अभिप्रायः प्रतिपद्यते। कृष्-धातोरुत्तरं णप्रत्यययोगेन 'कृष्ण'शब्दोऽयं निष्पद्यते। अयं कृष्-धातुः सत्तावाचकः, णप्रत्ययः आनन्दस्य वाचकः इति धातुप्रत्ययमिश्रणादेव कृष्णरूपं परं ब्रह्माभिहितम्। तथा च गोपालतापनी

''कृषिर्भूवाचको शब्दो णश्च निवृतिवाचकः।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते।।''[6]

केचित्तु भक्तजनपापकर्षणात् कृष्ण[7] इति व्याख्यायन्ते। अयमेव कृष्णो हि परमो देवः।

सामान्यतया दीव्-धातोरुत्तरम् अच्-प्रत्यययोगेन 'देव'शब्दो निष्पद्यते। यास्काचार्यः देवशब्दस्य व्युत्पत्तिं दर्शयितुमाह – **''देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा। यो देवः सा देवता।''**[8] आचार्यसायणः देवशब्दस्य व्युत्पत्तिप्रसङ्गे उवाच – द्योतनार्थदीव्-धातोः देवशब्द आगतः[९]। योगिवरो याज्ञवल्क्यः –

''दीव्यते क्रीडते यस्मात् रोच्यते दोतते दिवि।
तस्मादेव इति प्रोक्तः स्तूयते सर्वदैवतैः।।''[10]

---

4 *गोपालोत्तरतापनी* – ४४

5 तत्रैव – ४४

6 *गोपालतापन्युपनिषत्* – १

7 तापनीव्याख्याकार उपनिषद्ब्रह्मयोग्युवाच – 'अनृतजडदुःखात्मकपापकर्षणात् पापकर्षणः कृष्णः' (तापनीव्याख्यानम्, पृ. – ४४)

8 *निरुक्तम्* – ७/१४

9 'तथा द्योतनार्थदीव्यतिधातुनिमित्तो देवशब्द इत्येतदाम्नायते.... (*ऋक्-संहिता* – १/१/१)

10 *वाचस्पत्यम्*, पञ्चमो भागः, पृ. - ३६७५

इत्याद्युवाच देवशब्दस्य व्याख्यानप्रसङ्गे। पूज्यपादः शङ्करः विष्णुसहस्र-नामस्तोत्रे देवशब्दस्य व्याख्यानप्रसङ्गे अकथयत् – **"यतो दीव्यति क्रीडति सर्गादिभिः विजिगीयतेऽसुरादीन्, व्यवहरति सर्वभूतेषु आत्मतरा द्योतते, स्तूयते स्तुत्यैः सर्वत्र गच्छति तस्माद्देवः।"**[11]

अस्य देवस्य स्वार्थे तल् इति देवता निष्पद्यते[12]। शब्दकल्पद्रुमकारस्य मतेन या क्रीडां तनोति सा देवता[13]। अयं भावापन्नः श्रीगोपालः कृष्णो वेति परमदैवतः। अस्य विषयस्य स्पष्टीकरणं तापनीश्रुतौ मिलति। यत्र ब्रह्मणो मानसपुत्राणां **"कः परमो देवः"** इति प्रश्ने भगवान् ब्रह्मा उवाच इह श्रीकृष्ण एव परमो देवः, अर्थात् सर्वोत्कृष्ट देवः। यः सर्वदेवापेक्षया श्रेष्ठः। स एव परमाराध्यः[14]। अयमेव कृष्णो गोपालो वा तापन्युपनिषद प्रतिपाद्यः। यद्यपि उपनिषत्प्रतिपाद्यं ब्रह्म आकाररहितमिति उच्यते किन्तु अत्र साकारो गोपाल एव परं ब्रह्म। तथा च गोपालतापनी – **"ओं योऽसौ परं ब्रह्म गोपालः"**[15]। स परः ज्योतिर्मयः, दिव्यदेहधारी। यस्य ज्योतिषैव निखिलं जगत् परिव्याप्तम्। केवलं अस्य ज्ञानेनैव मुक्तिरास्वाद्यते जनैः। सकलसंसारयातनां शातयति ज्ञानमिदम्। अस्या एव पराया विद्यायाः प्रतिपादिकेयमुपनिषत्। यस्मात् जन्ममृत्युभवबन्धनच्छेदि गोपालज्ञानम्, अतोऽस्य ज्ञानस्य अस्या गोपालविद्याया वा परमुत्कृष्टत्वम्। इयमेव उत्कृष्टविद्या एव गोपालविद्या यस्याः प्रतिपादिका एव गोपालतापन्युपनिषद्।

अयमेव परमो दैवतः कृष्ण एव सकलभक्तानां पापादिकं खण्डयति[16]। स एव सांसारिकाणां भक्तानाम् अविद्यादिक्लेशं दूरीकरोति[17]। उपनिषद्ब्रह्मयोगी गोपालतापन्याः टीकाकारः कृष्णस्य परमदैवतप्रसङ्गे युक्तिभारतीं तनोति स्म। श्रीकृष्णः स्वभक्तानां विभ्रमं कर्षति[18]। गोपालतापनीश्रुतिव्याख्यानकारः विश्वनाथचक्रवर्तिना एकं सुन्दरं व्याख्यानं प्रस्तुतीकृतम्। तस्याभिप्रायेण स सर्वप्रकारपापकर्माणि, तथा प्रारब्धारब्धसञ्चितानि कर्माणि नाशयति। सदैव मुक्तिदानार्थमेवासुरादीन्

---

11 *विष्णुसहस्रनाम*, श्लोकः – ५४ (शाङ्करभाष्यम्)

12 'क्वचित् स्वार्थिका अपि प्रत्ययाः प्रकृतितो लिङ्गवचनान्यनिवर्त्तभाष्योक्तेः पुंस्त्वातिक्रमेण स्त्रीत्वम्' (*वाचस्पत्यम्*, पञ्चमभागः, पृ. – ३६८२)

13 देवता देव एव, स्वार्थे तल्। द्युतिं क्रीडां वा तनोति या (*शब्दकल्पद्रुमः*, द्वितीयो भागः, पृ. – ७४२)

14 'तदु होवाच ब्राह्मणः। श्रीकृष्णो वै परमं दैवतम्' (*पूर्वगोपालतापनी* – ३)

15 *गोपालोत्तरतापनी* - ९४

16 तथा च तापनीश्रुतिः – 'नमः पापप्रणाशाय गोवर्धनधराय...... च' (*गोपालतापनी* – ४३)

17 यद्वा भक्तपापकर्षणात् कृष्णः परमं दैवतम्' (*पूर्वगोपालतापनी* - ३, *विश्वेश्वरटीका*)

18 'स्वभक्तपटलस्वातिरिक्तास्तित्वविभ्रमकर्षणात् कृष्णो वै प्रसिद्धः परमं दैवतम्' इति श्रुतिः (*गोपालतापन्युपनिषत्*, *उपनिषद्ब्रह्मयोगिटीका*, पृ. – ४२)

आकर्षति। एवं दयालुभावोपेतत्वात् श्रीकृष्ण एव परमं दैतवम्[19]। तापनीश्रुतिरेव तथैवोवाच – ‘‘तस्मात् कृष्ण एव परो देवः’’[20]। अयमेव परमो देवः कृष्णः परमैश्वर्यशाली[21]। अयमेव सर्वजगतस्तथा सर्वभूतानां नियन्ता सनातनः पुरुषः तथा परं ब्रह्म। येन निखिलाचराचरो व्यापृतः। यत् जन्ममृत्युजराधिव्याधिबन्धनानामुपरि वर्तते। मृत्युरेव सदैव तस्य भयाद्भीतः[22]। अयमेव उपनिषत्प्रतिपादितः पुरुषः। यस्य भयात् सर्वे एव स्वीयकर्मादिषु व्यापृता वर्तन्ते। तथा च तैत्तिरीयोपनिषत् –

‘‘भीषास्माद्वातः पवते भीषोदेति सूर्यः।
भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः।।’’[23]

कठोपनिषदि तथा प्रोच्यते –

‘‘भयादस्याग्निस्तपति भयात्तपति सूर्यः।
भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः।।’’[24]

एषः कृष्णः यः परमो देवः, भगवान् गोपीजनवल्लभः, सर्वपापमोची, दिव्यदेहधारी सगुणः, स एव सर्वभूतेषु गूढः, एक एव देवः, सर्वव्यापी, सर्वभूतान्तरवासी, साक्षी, चेतनो निर्गुणः, निराकारः। तथा च गोपालतापनी –

‘‘एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी, चेता केवलो निर्गुणश्च।।’’[25]

विष्णुपुराणेऽपि कृष्णस्य परब्रह्मत्वमुक्तं –

‘‘यत्रावतीर्णं कृष्णाख्यं परं ब्रह्म नराकृतिः।’’[26]

श्रीमद्भागवतमहापुराणे व्रजवासिनां सौभाग्यं प्रकीर्तितं यतस्ते पुनर्ब्रह्म कृष्णं लब्धवन्तः।

‘‘अहो भाग्यमहो भाग्यं नन्दगोपव्रजौकगाम्।
यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम्।।’’[27]

---

19 ‘पापानि प्रारब्धाप्रारब्धसञ्चितानि कर्षति नाशयति, पापं चित्तमपि स्वीयलीलायामाकर्षति। पापपुरुषान् पूतनावधकेश्यादीन् असुरानपि स्वहस्तान्मुक्ति-दानार्थमाकर्षति इति कृष्णः स एव परमकृपालुत्वात् परमं दैवतमिति भावः’ (*गोपालतापन्युपनिषत्*, तापन्यविवृत्तिः, पृ.– ४)

20 *गोपालपूर्वतापनी* - ५०

21 दिव्यालंकारणोपेतं रत्नपङ्कजमध्यगम् (*पूर्वगोपालतापनी* – १४)

22 ‘गोविन्दान्मृत्युर्बिभेति’ (*पूर्वगोपालतापनी* - ४)

23 *तैत्तिरीयोपनिषत्* – २/८/१

24 *कठोपनिषत्* - २/३/३

25 *गोपालोत्तरतापनी* - ९७

26 *विष्णुपुराणम्* – ४/११/४

अयमेव परमानन्दः श्रीकृष्णः सदैवाराध्यः। तं सदा यजेत्, भजेदिति। तथा च गोपालतापनी – **"....कृष्ण एव परो देवस्तं ध्यायेत्तं रसयेत्तं यजेत्तं भजेदिति ओं तत् सत्।।"**[28]

अयं श्रीकृष्णरूपपरब्रह्माराधनादेव जनानां मोक्षलाभो भवेत् –

"परं ब्रह्म परं धाम योऽसौ ब्रह्म तथा परम्।
तमाराधय हरिं याति मुक्तिमप्यतिदुर्लभम्।।"[29]

सहायकग्रन्थपञ्जी

अथर्ववेदीयगोपालतापनीयोपनिषत्. (विश्वेश्वरस्य टीकया तथा बङ्गानुवादेन सहिता). संकलकः तथा प्रकाशकः श्रीमहेशचन्द्रपालः. कलिकाता : सभावकार्यालयः, १८१० (शकाब्दः)।

उपनिषत्संग्रहः. सम्पादकः पण्डितजगदीशशास्त्री. दिल्ली : मोतिलाल बनारसी दास, २०१७ (सप्तमं पुनर्मुद्रणम्)।

विष्णुपुराणम् (श्रीधरस्वामिटीकासमेतम्). कृष्णद्वैपायनवेदव्यासप्रणीतम्. प्रकाशकः श्रीविहारीलालसरकारः. कलिकाता : १२९४ (बङ्गाब्दः)।

श्रीमद्भागवतम् (श्रीधरस्वामिटीकासमेतम्). कृष्णद्वैपायनवेदव्यासप्रणीतम्. अनुवादिका अध्यापिका गीता-माइतिः. कलिकाता : उद्बोधनकार्यालयः, १४२५ (बङ्गाब्दः, चतुर्थसंस्करणम्)।

गोपालतापनी (श्रीविश्वेश्वरकृतटीकया श्रीजीवगोस्वामिकृतटीकया च सहिता). संशोधकः श्रीरासविहारिसाङ्ख्यतीर्थः. प्रकाशकः श्रीरामदेवमिश्रः. मुर्शिदावाद : १३२४ (बङ्गाब्दः, चतुर्थसंस्करणम्)।

वैष्णव उपनिषत् (श्री उपनिषद्ब्रह्मयोगिविरचितव्याख्यायुता). सम्पादकः महादेवशास्त्री. मद्रास : अडयार् पुस्तकालयः (थियासोफिकल सोसाइटि), १९२३।

वाचस्पत्यम् (पञ्चमो भागः). श्रीतारानाथतर्कवाचस्पतिः भट्टाचार्यः. वाराणसी : चौखम्बा संस्कृत सीरीज आफिस, १९६२।

शब्दकल्पद्रुमः (द्वितीयो भागः). राजाराधाकान्तदेवः. वाराणसी : चौखम्बा संस्कृत सीरीज आफिस, १९६७ (तृतीयसंस्करणम्)।

श्रीगोपालतापनी (विश्वेश्वरपण्डितविरचितटीकासहिता). सम्पादकः श्रीहरचन्द्रविद्याभूषणः श्रीविश्वनाथशास्त्री च. कलिकाता : एसियाटिक-सोसाइटि, १८७० (संवत्)।

---

27 *भागवतपुराणम्* – १०/१४/३२

28 *पूर्वगोपालतापनी* - ५०

29 *विष्णुपुराणम्* - १/११/४६

अथर्ववेदसम्मतम् आयुश्शब्दार्थवैचित्र्यम्

देवजित् दासः[1]

उपोद्घातः -

संस्कृतसाहित्ये आयुश्शब्दः अतीव चर्चितः। शब्दोऽयं स्वकीयार्थवैचित्र्येण महत्तात्पर्यमावहति। अस्माकं सुप्राचीने वैदिकसाहित्येऽपि आयुश्शब्दः समुपलभ्यते। संहितायां ब्राह्मणे आरण्यके उपनिषदि च शब्दस्यास्य प्रयोगोऽर्थश्च प्राप्येते। आयुश्शब्दस्य जीवनमित्यर्थः। अमरकोषे आयुश्शब्दस्य जीवितकाल इत्यर्थः प्राप्यते- **"आयुर्जीवितकालो(भ)ना"**[2]। चरकसंहितायामाप्यन्ते आयुरित्यस्य पर्यायवाचकाः शब्दाश्चेतनादयः **-"तत्रायुश्चेतनानुवृत्तिर्जीवितमनुबन्धो धारि चेत्यकोऽर्थः"**[3]। आप्ते- (Apte)-महोदयस्य कोशग्रन्थे आयुश्शब्दस्यार्थः **"Duration of life."**[4]इति।

अथर्ववेदेऽपि समुपलभ्यमानस्यायुश्शब्दस्य जीवनमित्यर्थः। परन्तु अत्रायुश्शब्दार्थे वैचित्र्यं लक्षणीयम्। न केवलं जीवनार्थक आयुश्शब्दः, परमथर्ववेदे क्वचिदयुश्शब्दस्य शतसंवत्सरजीवनम्, कुत्रचिदायुश्शब्दस्य चिरकालजीवनम्, क्वचिच्चायुसो वृद्धिः, कुत्रचिदन्नम्, कदाचन बहुकालव्यापि जीवनम्, कुत्रचिदायुरादिफलसिद्धिश्चेत्यादयो बह्वर्था आम्नायन्ते। कुत्रापि पुनः आयुश्शब्दः प्राणार्थद्योतकः। अपि च, कुत्र आयुश्शब्दस्य कृते भाष्यकारेणायुष्यमिति प्रयोगो विहितः। आयुश्शब्दस्याथर्ववेदसम्मतमर्थवैचित्र्यनिरूपणं ह्याशयो मम।

१. आयुः

आयुश्शब्दस्य विविधाः प्रयोगा अथर्ववेदे दरीदृश्यन्ते। प्रथमकाण्डादारभ्य तन्निदर्शनमाप्यते। प्रथमकाण्डस्य त्रिंशत्तमे सूक्ते विद्यमानस्य आयुश्शब्दस्यार्थः शतसंवत्सरपरिमितं जीवनम् - **"तथाविधम् आयुः जीवनं कृणुत कुरुत।.... शतसंवत्सरपरिमितम् आयुः कुरुतेत्यर्थः** [5]**"**। द्युलोके विद्यमानानां देवतानां, पृथिव्यां राराज्यमानानां देवतानाञ्चापि विविधेषु स्थानेषु विद्यमानदेवानाम् आयुषो विषये ऋषेः प्रार्थना दृश्यते। ऋषिणोच्यते यत् जरापर्यन्तम् आयुर्नाम जीवनं ददातु इति। कियत्कालपरिमितमायुरिति विषयेऽपि

---

[1] गवेषकः, संस्कृतविभागः, गौड़वङ्गविश्वविद्यालयः, मालदा, पश्चिमवङ्गः।

2 *Amarakoṣa*. 2nd kāṇḍa/kṣatriyavarga/293

3 *Caraka-Saṃhitā*, Sūtrasthānam .30/22

4 Apte, Vamanshivram. *The Student's Sanskrit- English Dictionary*. Rev. with Ed.& Enl. Delhi: Motilala Banarasidass Pvt. Ltd, 2017(13th rpt.of 2nd ed. 1970).P-99

5 *Atharvaveda, Sāyaṇabhāṣya*.1/30/3

ऋषिणोक्तं यच्छतकालपरिमितमायुस्तावत्कालमृत्युरहितं स्यादिति। अपि चेदमायुः परमायुभङ्गकरान् अपमृत्यून् निवारयतु। तथाह्याम्नातम् -

“ये देवा दिवि ष्ठ ये पृथिव्यां ये अन्तरिक्ष ओषधीषु पशुष्वप्स्वन्तः।
ते कृणुतु जरसामयुरस्मै शतमन्यान् परि वृणक्तु मृत्यून्”[6]।।

Whitney -महोदयेन आङ्गलानुवादकाले अस्यायुश्शब्दस्य ‘the length of life’ इति व्याख्यानं विहितम्। अपि चेदमायुः शतसंवत्सरव्यापि भवत्वित्याशयः हुइटनि-वर्य्यस्य। तदुदितं तेन -

“you, O gods, that are in the heaven, that are on earth, that are in atmosphere, in the herbs, in the cattle, within the waters - do ye make old age the length of life for this man; let him avoid the hundred other deaths.[7]”

पञ्चत्रिंशत्तमे सूक्ते आयुश्शब्दो जीवनकाल इत्यर्थो द्योत्यते। ये पुरुषाः हिरण्यं बध्नन्ति, ते कदापि ज्वराद्युपद्रवकारणान्न बाध्यन्ते, पिशाचादिभिश्च कदापि नेति। एतद् हिरण्यं नाम सुवर्णम् इन्द्रादिदेवतानां प्रथमोत्पन्नः शरीरधारको बलोपेतोऽष्टमो धातुविशेषः। हिरण्यमिदं धारयन् पुरुषः जीवेषु सुदीर्घं शतकालावधि जीवनं धारयतीति। रक्षानिबन्धनहिरण्यधारणान्निरामयः सन् शतसंवत्सरान् जीवतीति। तथाहि सायणाचार्येणोक्तम् - **“स पुरुषः जीवेषु मध्ये दीर्घम् शतसंवत्सरपरिमितम् आयुः जीवनकालं कृणुते करोति।**[8]**”**इति। ऋषिणाम्नातम् -

“नैनं रक्षांसि न पिशाचाः सहन्ते देवानामोजः प्रथमजं ह्येतत्।
यो बिभर्ति दाक्षायणं हिरण्यं स जीवेषु कृणुते दीर्घमायुः।।[9]”

अथर्ववेदस्य द्वितीयकाण्डस्य त्रयोदशसूक्तस्य प्रथम-द्वितीय-चतुर्थेषु मन्त्रेषु चायुश्शब्दस्योल्लेखो दृश्यते। परन्त्वत्रायुश्शब्दस्यार्थो न स्फुटः। अत्र अग्निः आयुर्दाता इति ऋषिणा उपमामुखेनोच्यते। अग्निर्माणवकस्य पिता इति। पिता यथा पुत्रं रक्षति, तथा हे अग्ने, त्वमपि अस्माभिर्दत्तं घृतं पीत्वा माणवकस्य रक्षां कुरु। पुत्रोऽपराधी सन्नपि यथा पित्रा पालनीयः, तथा त्वमपि कुरु। तथा त्वं माणवकाय शतसंवत्सरपरिमितं दीर्घमायुषं देहीति। सायणाचार्येणोक्तम् -**“..शरदः शतम् शतसंवत्सरपरिमितम् आयुः कृण्वन्तु कुर्वन्तु।”**[10]मानवकस्याकालमृत्युर्मा भवतु। ऋषिणा मानवकं प्रत्युच्यते यत्, हे मानवक! त्वं प्रस्तरं

---

6 *Atharvaveda*. 1/3/3

7 *Atharvaveda Saṁhitā.* Eng. Tr. &notes W.D. Whitney, Ed. & Rev. K.L.Joshi III Vols. Vols I. Delhi: Parimal Publication, 2015. P-53

8 *Atharvaveda*, *Sāyaṇabhāṣya*.1/35/2

9 *Atharvaveda*.1/35/2

10 *Atharvaveda, Sāyaṇabhāṣya*.2/13/4

प्रत्यागत्य प्रस्तरं स्पृश, स्पर्शनाद्भवतः शरीरमप्यश्मवत् अर्थात् रोगादिविनिर्मुक्तं दृढञ्च भवत्विति। विश्वेदेवाः अपि माणवकाय शतवर्षपरिमितं दीर्घमायुषं यच्छन्तु-

"एह्यश्मानमा तिष्ठाश्मा भवतु ते तनूः।
कृण्वन्तु विश्वे देवा आयुष्टे शरदः शतम्।।[11]"

द्वितीयकाण्डस्य सप्तदशसंख्यके सूक्ते आयुश्शब्दस्य चिरकालजीवनमित्यर्थः तत्-कालः शतसंवत्सरपरिमितः इति सायणाचार्येण कृतः**"आयुश्चिरकालजीवनम्.. ।अतः शतसंवत्सरपरिमितम् आयुर्मे देहि[12]"**।

द्वितीयकाण्डस्यैकोनत्रिंशत्तमे सूक्ते आयुरित्यनेन पदेन केवलं शतसंवत्सरपरिमितत्वमुक्तम् सायणाचार्येण -**"आयुः शतसंवत्सरपरिमितम्।[13]"** तथाह्याम्नायते -

"आयुरस्मै धेहि जातवेदः प्रजां त्वष्टरधिनिधेह्यस्मै।
रायस्पोषं सवितरा सुवास्मै शतं जीवाति शरदस्तवायम्।।[14]"

अष्टमकाण्डस्य द्वितीयसूक्ते आयुरिति पदस्य विशेषार्थो नास्ति। अत्र मृत्युना अपहृतस्य माणवकस्य आयुष्कामपुरुषस्य प्राणान् आयुश्च पुनः स्वस्थाने अवस्थापयितुं प्रार्थ्यते। अतः सायणाचार्येण उक्तम्,- **"ते तव असुम् प्राणं मृत्युना अपहृतम् आयुश्च पुनः आ भरामि आहरामि।[15]"** सूक्तस्यास्य आयुष्यसूक्तमिति नाम साम्प्रदायिकैः प्रदत्तम्। Whitney-महोदयेन सूक्तमिदं दीर्घायुप्राप्तिसूक्तम्[16] इत्यभिहितम्।

परवर्तिनि एकस्मिन् मन्त्रे दीर्घमायुरित्युक्ते शतसंवत्सरलक्षणमायुर्बोध्यम् -**"द्राघीय अतिदीर्घं शतसंवत्सरलक्षणम् आयुः।[17]"** मृत्युसकाशादानीतस्य माणवकस्यायुः पुनः अधिकृत्योच्यते -

"अद्या मुरीय यदि यातुधानो अस्मि यदि वायुस्तस्य पुरुषस्य।
अधा स वीरैर्दशभिर्वि यूया यो मा मोघं यातुधानेत्याह।।[18]"

---

11 *Atharvaveda*. 2/13/4
12 *Atharvaveda*. *Sāyaṇabhāṣya*. 2/17/4
13 Ibid. 2/29/2
14 *Atharvaveda*. 2/29/2
15 *Atharvaveda*, *Sāyaṇabhāṣya* .8/2/1
16 *Atharvaveda Saṁhitā*. Eng. Tr. &notes W.D. Whitney, Ed. & Rev. K.L.Joshi III Vols. Vols I. Delhi: Parimal Publication, 2015. P-141
17 *Atharvaveda*, *Sāyaṇabhāṣya*. 8/4/15
18 *Atharvaveda*. 8/4/15

अथर्ववेदस्यैकादशकाण्डस्य प्रथमसूक्ते उपलभ्यमानस्य आयुश्शब्दस्यार्थस्तावज्जीवनमिति। तज्जीवनं दीर्घमर्थात् शतसंवत्सरपरिमितमिति कृत्वा सायणाचार्येणोक्तम्- **"..दीर्घम् शतसंवत्सरपरिमितम् आयुः जीवनम्।**[19]**"** अत्रायुश्शब्दस्य विशेषणं दीर्घमिति।

अथर्ववेदस्य सुप्रसिद्धे भूमिसूक्ते द्वाविंशतितमे मन्त्रे द्वाषष्टितमे मन्त्रे चायुश्शब्दस्योल्लेखः दृश्यते। ऋषिणाम्नायते -

"उपस्थास्ते अनवीमा अयक्षा अस्मभ्यं सन्तु पृथिवि प्रसुताः।
दीर्घं न आयुः प्रतिबुध्यमाना वयं तुभ्यं बलिहृतः स्याम्।।[20]"

द्वादशकाण्डगतस्य द्वितीयसूक्ते सर्वम् आयुरिति पदद्वयमस्ति, अर्थादत्रायुश्शब्दस्य विशेषणमस्ति सर्वमिति। परन्तु तदर्थो भाष्यकारेण न कृतः। ऋषिणा प्रार्थ्यते जीवनस्य कृतेऽस्मभ्यं सर्वमायुर्ददातु। तथाह्याम्नातम्

"आ रोहतायुर्जरसं वृणाना अनुपूर्वं यजमाना यति स्थ।
तान् वस्त्वष्टा सृजनिमा सजोषाः सर्वमायुर्नयतु जीवनाय।।[21]"

पुनश्च, चतुर्दशकाण्डस्य प्रथमसूक्तस्य कतिपयेषु मन्त्रेषु आयुश्शब्दस्य विशेषणं समुपभ्यते। तत्र द्वाविंशतिमन्त्रे सर्वम् आयुरिति पदद्वयमस्ति अर्थात् सम्पूर्णजीवनलाभ इत्याशयः। चतुर्विंशतितमे मन्त्रे दीर्घमायुः इति पदद्वयमस्ति अर्थात् दीर्घजीवनं लभताम् इति। किञ्च, ऋषिणा अन्यत्राम्नायते -

"स्योनं ध्रुवं प्रजायैः धारयामि तेऽश्मानं देव्याः पृथिव्या उपस्थे।
तमा तिष्ठानुमाद्या सुवर्चा दीर्घ त आयुः सविता कृणोतु।।[22]"

अष्टादशकाण्डस्य तृतीयसूक्तेऽपि 'आयुरिति' पदं विद्यते। अस्य पदस्यार्थस्तावज्जीवितमिति। तथाहि सायणाचार्येणोक्तम् - **".. आयुः जीवितम् ...** [23]**"**इति।

चतुर्थसूक्तस्य एकस्मिन् मन्त्रे समुलभ्यमानस्य आयुरिति पदार्थः सायणाचार्येण कृतः बहुकालजीवनम् इति - **"..आयुः बहुकालजीवनं..।**[24]**"**अपि च, ऊनविंशतितमकाण्डस्य

---

19 *Atharvaveda, Sāyaṇabhāṣya*. 11/1/34
20 *Atharvaveda*. 12/1/62
21 Ibid, 12/2/24
22 Ibid. 14/1/47
23 Atharvaveda, Sāyaṇabhāṣya. 18/3/17
24 Ibid. 18/4/62

पञ्चपञ्चाशत्तमसूक्ते 'आयु'रित्यस्यार्थः अन्नं जीवनमिति वेति। अग्निरयं सर्वजनेनाहुतः ऐश्वर्यवान् भवतु। सायणाचार्येणो उक्तम्-**"अग्ने त्वं विश्वम् सम्पूर्णम् आयुः अन्नं जीवनं वा व्यश्नवत् प्रापय।**[25]**"**अयमग्निरस्मभ्यं सम्पूर्णमायुर्नाम जीवनं प्रापयतु। अत्रोपमामुखेन अश्वाय प्रभुः यथा तृणानि ददाति, तथैव हे अग्निः ! त्वमपि अस्मभ्यं आयुर्नाम जीवनं यच्छ इति। अतः ऋषिणोक्तम्,-

"त्वमिन्द्रा पुरुहुत विश्वमायुव्यश्नवत्।
अहरहर्बलिमित्ते हरन्तोश्वायेव तिष्ठते घासमग्ने।।[26]**"**

२. आयुंषि

अथर्ववेदे द्वितीयकाण्डस्य चतुर्थसूक्तस्य षष्ठे मन्त्रे "आयुंषि" इति पदमुपलभ्यते। अत्र केवलम् आयुर्वर्धनाय प्रार्थना दृश्यते, आयुश्शब्दस्य पृथगर्थो नास्ति तत्र -**"...न अस्माकं आयुंषि प्र तारिषत्। प्रपूर्वस्तरतिवृद्ध्यर्थः।**[27]**"**अथर्ववेदस्य षष्ठकाण्डस्याष्टसप्ततितमे सूक्ते विद्यमानस्यायुश्शब्दस्य कोऽप्यर्थो न स्फुटः। परन्तु आयुः सहस्रसंवत्सरपरिमितं भवतु इति प्रार्थना दृश्यते। त्वष्टृदेव एव पतिं पत्नीञ्च जनयति, अयं त्वष्टृदेवः एताभ्याम् आयुंषि अर्थात् शतवर्षपरिमितं दीर्घजीवनं ददातु। सायणाचार्येणोक्तम् - **"सहस्रसंवत्सरपरिमितानि आयुंषि एवमात्मकं दीर्घम् आयुः कृणोतु करोतु।**[28]**"**तस्माद् ऋषिणोक्तम्,-

"त्वष्टा जायामजनयत् त्वष्टाऽस्यै त्वां पतिम्।
त्वष्टा सहस्रमायुंषि दीर्घमायुः कृणोतु वाम्[29]।।

३. आयुषा -

अथर्ववेदस्य तृतीयकाण्डे पञ्चमसूक्ते लभ्यमानस्य 'आयुषा' इति शब्दस्य व्याख्यायामर्थो भाष्यकारेण न कृतः। आयुश्शब्दस्तु स्वार्थे एव प्रयुज्यते -

"यं निदधुर्वनस्पत्यौ गुह्यं देवाः प्रियं मणिम्।
तमस्मभ्यं सहायुषा देवाः ददतु भर्तवे" [30]।।

---

25 *Atharvaveda, Sāyaṇabhāṣya*. 19/55/6
26 *Atharvaveda*. 19/55/6
27 *Atharvaveda, Sāyaṇabhāṣya*. 2/4/6
28 *Atharvaveda*. 6/78/3
29 Ibid. 6/78/3
30 Ibid. 3/5/3

तृतीयकाण्डस्यान्तिमसूक्तस्य सर्वेषु मन्त्रेष्वेवायुश्शब्दः समाम्नायते। अस्यायुश्शब्दस्यार्थश्चिरकालजीवनमिति। भाष्यकारेणोक्तम् **“आयुषा चिरकालजीवनेन सं योजयामि।।**[31]**”**एभिर्मन्त्रैरुपनयनादनु आयुष्कामनार्थं माणवकशरीरम् आचार्योऽभिमन्त्रयेत्। ऋषिणा उक्तम्-

“वि ग्राम्याः पशवः आरण्यैर्व्यापस्तृष्णयासरन्।
व्यऽहं सर्वेण पाप्मना वियक्ष्मेण समायुषा।।[32]**”**

किञ्च, Whitney-महोदयेन मन्त्रगतस्यायुरित्यस्य “life time” इति व्याख्या कृता। अतः तेनोक्तम्,-

“The cleansing one (has turned) away from mishap (ārti), the mighty one (śarkra) away from evil doing; I away from all evil (have turned), Away from yakṣam to union (sam) with life-time.[33]”

सप्तमकाण्डस्य चतुर्नवतितमसूक्तस्य द्वितीये मन्त्रे विद्यनमानस्यायुश्शब्दस्यार्थस्तावज्जीवनमिति। भाष्यकारेणोक्तम्- **“आयुषा जीवनेन च संसृज”**[34]। अग्नेः आधानकर्मणि अग्निं प्रति ऋषिणोच्यते - हे अग्ने अस्मान् बलेन पुत्रादिना आयुषा (जीवनेन) सह योजयतु। अतः उक्तम्,-

“सं माग्ने वर्चसा सृज सं प्रजाया समायुषा।
विद्युर्मे अस्य देवा इन्द्रो विद्यात् सह ऋषिभिः।।[35]**”**

४. आयुषे -

अथर्ववेदस्य प्रथमकाण्डस्य पञ्चत्रिंशत्तमसूक्तस्य प्रथममन्त्रे समुपलभ्यमानस्य ‘आयुषे’ इत्यस्यार्थस्तावद् ‘आयुर्वृद्धये’ इति। भाष्यकारेणोक्तम् – **‘आयुषे आयुरभिवृद्धये ......। आयुष इत्युक्तं तदेव विवृणोति, दीर्घायुत्वाय दीर्घायुष्ट्वाय।.... चिरकालजीवनाय**[36]’ इति। अत्रेदमुल्लेख्यं यदायुः शतशारदविशिष्टं शतं शारदाः समाहताः यस्मिन् जीवने तत् शतशारदम् अर्थात् आयुः शतवत्सरपरिमितं भवत्विति ऋषेः प्रार्थना -

---

31 *Atharvaveda*, *Sāyaṇabhāṣya*. 3/31/3
32 *Atharvaveda*. 3/31/3
33 *Atharvaveda Saṁhitā*. Eng. Tr. & notes W.D. Whitney, Ed. & Rev. K. L. Joshi III Vols. Vols I. Delhi: Parimal Publication, 2015. P-233
34 *Atharvaveda*, *Sāyaṇabhāṣya*. 7/94/2
35 *Atharvaveda*. 7/94/2
36 *Atharvaveda*, *Sāyaṇabhāṣya*. 1/35/1

"यदाबन्धन् दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमानाः।
त् ते बध्नाम्यायुषे वर्चसे बलाय दीर्घायुत्वाय शतशारदाय।।[37]"

द्वितीयकाण्डगतस्याष्टाविंशतितमे सूक्ते 'आयुषे' इत्यस्य पदस्यार्थः खलु शतसंवत्सरजीवनाय। भाष्यकारेणोक्तम् **"...आयुषे शतसंवत्सरजीवनाय.."**[38]। न केवलमायुषमपि च तेजसं जननशक्तिविशिष्टं रेतसं ददातु। तथाहि ऋषिणा प्रार्थितम् -

"इममग्न आयुषे वर्चसे नये प्रियं रेतो वरुण मित्र राजन्।
मातेवास्मा अदिते शर्म यच्छ विश्वे देवा जरदष्टिर्यथासत्।।[39]"

वेदभाष्यकृता Whitney-महोदयेन 'आयुषे' इत्यस्य 'life time' इति व्याख्या कृता, न तु शतसंवत्सरजीवनमिति। अतस्तेनोक्तम्,-

"This one, O Agni, do thou lead for life-time, for splendour, to dear seed, O Varuna, Mitraking! like a mother, O Aditi, yield (yam) him refuge; O all you gods, that he be one reaching old age.[40]"

पुनश्च, चतुर्थकाण्डस्य दशमे सूक्ते समुपलभ्यमानस्य 'आयुषे' इत्यस्यार्थस्तावत् आयुरादिफलसिद्धये इति। आयुश्शब्दस्यार्थः आयुरादेः फलसिद्ध्यर्थम् इति। अतः सायणाचार्येणोक्तम् **"आयुषे आयुरादिफलसिद्ध्यर्थम्।"**[41]। किञ्च, षष्ठकाण्डस्य एकस्मिन् सूक्तेऽपि 'आयुषे' इत्यस्य पदस्यार्थः चिरकालजीवनायेति। तथाहि भाष्ये भाषितं सायणाचार्येण - **"आयुषे चिरकालजीवनाय"**[42]। महाशान्तिकर्मणि दीर्घायुसो लाभाय निऋतिं प्रति ऋषिणोच्यतेऽयं मन्त्रः –

'यत् ते देवी निऋतिराबबन्ध दाम ग्रीवास्वविमोक्यंयत्।
तत् ते वि ष्याम्यायुषे वर्चसे बलायादोमदमन्नमद्धि प्रसूतः' [43]।

37 *Atharvaveda*. 1/35/1
38 *Atharvaveda, Sāyaṇabhāṣya*. 2/28/5
39 *Atharvaveda*. 2/28/5
40 *Atharvaveda Saṁhitā*. Eng. Tr. & notes W. D. Whitney, Ed. & Rev. K. L. Joshi III Vols. Vols I. Delhi: Parimal Publication, 2015. P-119
41 *Atharvaveda, Sāyaṇabhāṣya*. 4/10/7
42 Ibid. 6/63/1
43 *Atharvaveda*. 6/63/1

५. आयुषः -

दशमकाण्डस्य तृतीयसूक्तेऽपि “आयुषः इति पदमुपलभ्यते। देवं प्रति ऋषिणोच्यते पूर्णजीवनात् प्राक् शरीरस्य विनष्टकारिणं रोगं विनाशयतु -

“तांस्त्वं प्र च्छिद्ध वरण पुरा दिष्टात् पुरायुषः।
य एनं पशुषु दिप्सन्ति ये चास्य रास्ट्रदिप्सवः”[44]।।

अत्रायुषः इति पदस्यापि कोऽप्यर्थो भाष्यकृता न स्पष्टीकृतः। whitney-महोदयेनात्रार्थः कृतः शब्दस्यास्य ‘Life time’ इति। उक्तञ्च तेन - “Them, O varuṇā do you cut off (pra-chid), before what is appointed (diṣṭā), before (the end of) their life-time-them who strive to damage him in respect to cattle, and who are intent to damage his kingdom.[45]”

उपसंहारः

अथर्ववेदस्य प्रारम्भिकेषु कतिपयेषु सूक्तेष्वायुश्शब्देन जीवनं बोध्यम्। तज्जीवनन्तु शतसंवत्सरपरिमितं भवत्विति प्रार्थना प्रायेण कृता ऋषिभिः। कुत्रचिदायुश्शब्दस्य कोऽपि विशेषार्थो नोल्लिखितः। आयुश्शब्दस्य प्रसिद्धार्थं गृहीत्वा तस्य कोऽपि विशेषोऽर्थो नोल्लिखितस्तत्र। अथर्ववेदस्यैकत्रायुश्शब्देन अन्नमुक्तमिति। अस्मज्जीवनेऽन्नस्य मदद्गुरुत्वमनुभूयायुश्शब्दस्यार्थस्तावदन्नमिति भाष्यकृन्नयः। अन्नमृते यथा जीवनमसम्भवपरम्, तथैवायुर्विना जीवनं न चलतीति। अथर्ववेदस्यापरत्रायुश्शब्दस्यार्थः प्राण इति। जीवने अन्नस्य यावन्माहात्म्यं, तथैव प्राणानाम्। अथर्ववेदस्य केषुचित् स्थलेषु आयुश्शब्देन सुदीर्घदीवनमित्युक्तम्। परन्तु बहुकालपर्यन्तजीवनेन कस्य कालविशेषस्य बोधः स्यादिति प्रश्नोऽमीमांसितः। परन्तु विश्वमायुः सर्वमायुश्चेति चिरकालजीवनं पदत्रयेन शतसंवत्सरविशिष्टकालो बोध्य इति। तथाह्युच्यते – **‘जीवेमः शरदः शतम्, बुध्येमः शरदः शतम्…’**[46]इति। यद्वा भवतु नाम, आयुश्शब्दः बह्वर्थकोऽपि जीवनकालविषये सम्यग् धारणासीद् वैदिकयुग इति निश्चप्रचं वक्तुमलम्।

---

44 *Atharvaveda*. 10/3/16
45 *Atharvaveda Saṁhitā.* Eng. Tr. & notes W. D. Whitney, Ed. & Rev. K. L. Joshi III Vols. Vols I. Delhi: Parimal Publication, 2015. P-312
46. *Atharvaveda*. 19/67/2-3

Select Bibliography

Amarsiṃha. *Amarakoṣa*. Beng. Tr. Gurunath Vidyanidhi Bhattacharya. Kolkata: Sanskrit Pustak Bhandar, 1417 B.E. (=2010C.E.)

Apte, Vamanshivram. *The Student's Sanskrit- English Dictionary*. Rev. with Ed. & Enl. Delhi: Motilala Banarasidass Pvt. Ltd, 2017(13th rpt. of 2nd ed. 1970)

Atharvaveda. Ed. Vishvabandhu. IV part. part I- IV. Hoshiapur : Vishveshvaranand Vedic Research Institute, 1960. (1st Ed.).

Atharvaveda Saṁhitā. Eng. Tr. & notes W.D. Whitney, Ed. & Rev. K. L. Joshi III Vols. Vols I-III. Delhi: Parimal Publication, 2015.

A Vedic Word Concordance. Ed. Vishva Bandhu XV Vols. Vol-I. Hoshiarpur: Vishvesharanand Vedic Research Institute, 1985.

Caraka. Caraka-Saṃhitā. Ed.with English Tr. R. K. Sharama & Bhagawan Dash. VII Vols. Vol.I. Varanasi: Chowkhamba Sanskrit Series office, 2012. (rep).

Hymns of the Atharva-veda. Eng. Tr. Maurice Bloomfield. Oxford: The Clarendon Press, 1897 (Rep. 1964, 1967, 1973).

वेदस्य अपौरुषेयत्वसाधनम्

जयदेवदिण्डा[1]

उपोद्घातः

आर्यधर्मस्य आर्यदर्शनस्य च जीवनं सन्ति वेदाः। भारतीयसंस्कृतिः सभ्यता च तानाधारीकृत्यैव प्रवर्तते। सत्यानुसन्धातृभिर्महर्षिभिरनुभूतस्य परमतत्त्वस्य बोधयितारो भूत्वा भुवि ते विभान्ति। इष्टप्राप्तेरनिष्टपरिहृतेश्च अलौकिका उपायास्तेभ्य एव विदिता जायन्ते। यत्र प्रत्यक्षस्य न च अनुमानस्य प्रवेशस्तत्रापि ते प्रविशन्ति। स्मृतिपुराणादीनां मान्यत्वं तदनुगामित्वमेवावतिष्ठते। भारतीयधर्म ईश्वरविरोधन्तु सोढुं न शक्नुते परं न स तेषां लवमात्रमपि विरोधं सहते। ईश्वरसत्ताया विरोधीति दर्शनानि न नास्तिकानि, भारतीयधर्मे मतानि भवन्ति परं यानि शास्त्राणि मतानि वा वेदविरोधीनि वर्तन्ते तानि नास्तिकानि दर्शनानि, यानि च न विरोधीनि तानि आस्तिकानि मन्यन्ते। तेषामध्ययनमिहापरिहार्यत्वेन अनिवार्य्यत्वेन चाभ्युपगतम्। यो हि द्विजो वेदमनधीत्यान्यत्र श्रमं विदधाति स इह शुद्रो मतः–

"योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः" ॥[2] इति।

अस्य च वेदस्य स्वरूपेऽस्ति प्राचीनमनीषिषु नैसर्गिको दृष्टिभेदः। वेदस्य रचयितृविषयेऽस्ति प्राचीनभारतीयदार्शनिकानां मतभेदः। केचन प्राचीनभारतीयदार्शनिकाः वेदानपौरुषेयान् मन्यन्ते केचन तु पौरुषेयान्। न्यायवैशेषिकयोर्मतेन वेदाः पौरुषेया नित्याश्च सन्ति। परं सांख्यवेदान्तमीमांसानाञ्च मतेन ते अपौरुषेयाः सन्ति। पाश्चात्यदार्शनिकनये वेदाः महाभारतादय इव केचित् ऋषिप्रणीताः अद्भुताः ग्रन्थराशय एव। तन्मते सामान्यग्रन्थवद् वेदोऽपि ऋषिप्रणीत एव। सत्सु मतपार्थक्येष्वपि सिद्धान्तस्तु गन्तव्य एव। प्रबन्धेऽस्मिन् वेदानां पौरुषेयापौरुषेयत्वं समासेन यथामति निरूप्यते।

वेदाः पौरुषेयाः

आधुनिकदार्शनिकानां मते तु वेदाः पुरुषकृतत्वात् पौरुषेया एव। न्यायवैशेषिकमतेन ईश्वरकृतत्वाद्वेदाः पौरुषेया नित्याश्च। महाप्रलयकाले ईश्वरो वेदान् रचयामास। न्यायमातानुसारम् ईश्वरस्यापि पुरुषेषु अन्तर्भावित्वाद् आगतञ्च वेदानां पुरुषकृतत्वम्। मीमांसासूत्रे जैमिनिमहर्षिर्जगाद 'वेदाश्चैके सन्निकर्षं पुरुषाख्याः'[3], 'अनित्यदर्शनाच्च'[4] चेति। एतैः जैमिनिवचनैर्वेदानां पुरुषप्रणीतत्वन्तु नितान्तं सुकरं

---

1 अतिथिः अध्यापकः, लक्ष्मी-देवी-शराफ-आदर्श-संस्कृत-महाविद्यालयः, देवघरः, झारखण्डः

2 *मनुसंहिता*– २.१६८।

3 *मीमांसासूत्रम्*– १.१.२७।

4 तत्रैव – १.१.२८।

प्रतिभाति। वेदेषु विद्यमानेषु 'बवरः प्रावाहणिरकामयत'[5], 'कुसुरुविन्द औद्दालकिरकामयत'[6] इत्यादिश्रुतिवचनैः वेदानामनित्यत्वं पौरुषेयत्वञ्च सिद्ध्यति। वेदशाखाया नामकरणमपि ऋषिप्रोक्तनामानुसारेण दृश्यते। काठकः कौथुमीयस्तैत्तिरीयकः कालापकः पैप्पलादक इत्यादीनां वैदिकशाखानां प्रवक्तृनामानुसारेण अभिधा जाता। 'तेन प्रोक्तम्'[7] इत्यनेन पाणिनिसूत्रेण अणादितद्धितप्रत्यये पाणिनिना प्रोक्तं पाणिनीयं, व्यासेन प्रोक्तं वैयासिकं भारतम् इतिवद् रूपम्। पुरुषप्रोक्तत्वात् वेदानां पौरुषेयत्वन्तु सुसिद्धमेव। किञ्च वेदाः पौरुषेया वाक्यसमूहात्मकत्वात् कालिदासादिवाक्यवदिति। वेदाश्च वाक्यात्मकाः, तस्मात् पौरुषेयाः।

वेदस्य पौरुषेयत्वस्वीकारे प्रबलसम्प्रदायो नैयायिकसम्प्रदायः। तैः स्वपक्षे बह्वो युक्तय उपस्थाप्यन्ते। मीमांसका वेदानामपौरुषेयत्वं स्वीचक्रुः 'अपौरुषेया वेदाः सम्प्रदायाविच्छेदे सत्यस्मर्यमाणकर्तृकत्वादात्मवद्' इति युक्तिबलात्। अत्रैव मीमांसकान् प्रति नैयायिकानां पृच्छा सति महाप्रलये सम्प्रदायस्य कथमविच्छेदत्वम्। किञ्च किमिदमस्मर्यमाणकर्तृकत्वम्, अप्रमायमाणकर्तृकत्वम् अस्मरणगोचरकर्तृकत्वं वा। आद्यपक्षस्तु असमीचीनः।

"अस्य महतो भूतस्य निःश्वसितमेतत् यदृग्वेदः यजुर्वेदः सामवेदः"।[8] इति।

"इदं सर्वमसृजत ऋचो यजूंसि सामानि"।[9] इति।

"तस्माद्यज्ञात्सर्वहुतः ऋचः समानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत"॥[10] इति।

इत्यादिश्रुतिभिर्वेदानाम् ईश्वरकर्तृकत्वप्रमाणीयत्वात्। विकल्पासहत्वात् नाप्यपरपक्षः। अस्मरणकर्तृकत्वमपि द्विधा विभक्तम्– एकेनास्मरणकर्तृकत्वं सर्वैरस्मरणकर्तृकत्वं च। आद्यविकल्पपक्षे तु 'यो धर्मशीलो जितमानरोषः','उपमा कालिदासस्य भारवेरर्थगौरवम्' इत्यादिमुक्तकोक्तिषु व्याभिचारः। एताषां मुक्तिकोक्तीनाम् अस्मरणकर्तृकत्वात् वेदा इव एतेष्वपि अपौरुषेयत्वमापतति। किञ्च द्वितीयविकल्पोऽपि न साधुः सर्वास्मरणस्य असर्वज्ञदुर्ज्ञानत्वात्। अर्थात् वेदरचयितुः स्मरणं केनापि कर्तुं न शक्यते इति तु सर्वज्ञेनैव गद्येत। परन्तु अस्मिन् जगति सर्वज्ञत्वाभावात् वेदाः पौरुषेया इति तु स्वीकार्यमेव। किञ्च यथा आप्तप्रणीतत्वे एव मन्वादिवाक्यानां प्रमाणत्वं तथैव वेदवाक्यानामपि आप्तप्रणीतत्वादेव प्रमाणत्वम्।

"वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम्।

---

5 *तैत्तिरीयसंहिता*– ७.१.१०.२।
6 *तत्रैव* –७.२.२.१।
7 *अष्टाध्यायी*– ४.३.१०१।
8 *बृहदारण्यकोपनिषत्*– २.४.१०।
9 तत्रैव– २.४.१०।
10 *पुरुषसूक्तम्*– १०.९०.९।

वेदाध्ययनसामान्यादधुनाध्ययनं यथा" ॥[11] इति।

इति श्लोकवार्तिकप्रमाणेन मीमांसका वेदस्य अपौरुषेयत्वं साधयन्ति। कारणं वेदानाम् अपौरुषेयत्वादेव वेदाध्ययनं गुर्वध्ययनपूर्वकं भवति। पौरुषेयत्वे तु गुर्वध्ययनपरम्परा छिन्ना स्यात्। तस्माद्वेदाः अपौरुषेयाः इति चेन्न। कारणं हि–

"भारताध्ययनं सर्वं गुर्वध्ययनपूर्वकम्।
भारताध्ययनत्वेन साम्प्रताध्ययनं यथा" ॥[12] इति।

अर्थात् महाभारतादिनामध्ययनमपि गुर्वध्ययनपूर्वकं भवति। तर्हि महाभारतवाक्यमपि अपौरुषेयम् इत्यापतति। अत्र हि मीमांसकैः प्रतिपाद्यते यत् को ह्यन्यः पुण्डरीकाक्षान्महाभारतकृन्भवेत् इत्यादिवचनात् व्यासः महाभारतस्य स्मर्यते -

"कृष्णद्वैपायनं व्यासं विद्धि नारायणं विभुम्।
कोऽन्यो हि भुवि मैत्रेय महाभारतकृद्भवेत्" ॥[13] इति।

तस्मात् यद्यपि महाभारताध्नं सर्वं गुर्वध्ययनपूर्वकं भवति तथापि महाभारतस्य कर्तृस्मरणात् पौरुषेयत्वम्। परन्तु वेदानां न तथा इति चेन्न वेदानां कर्तृस्मरणात्। अत्रोच्यते पुरुषसूक्ते पुरुषः एव कर्तृत्वेन स्मृतो वर्तते।

किञ्च शब्दाः अनित्याः। शब्दानाम् अनित्यत्वात् शब्दराशीनां वेदानां कथं नित्यत्वम्। वेदानां नित्यत्वस्वीकारे तु शब्दानां नित्यत्वं स्वीकार्यम्। तत्तु न। शब्दः अनित्यः अस्मदादिबाह्येन्द्रियग्राह्यत्वात् घटवत् इत्यनुमानबलेन शब्दानाम् अनित्यत्वं स्वीक्रियते। नैयायिकानां मते वेदानां कर्ता ईश्वरः। ईश्वरस्यापि पुरुषेषु अन्तर्गतत्वात् वेदाः पौरुषेयाः। ननु अत्र मीमांसकानां प्रश्नः परमेश्वरस्य ताल्वादिस्थानाभावेन वर्णोच्चारणासम्भवात्कथं वेदानाम् ईश्वरप्रणीतत्वं चेदुच्यते नैयायिकैः स्वभावतोऽशरीरस्यापि तस्य भक्तानुग्रहार्थं लीलाविग्रहग्रहणसम्भवात् सम्भवति तु परमेश्वरस्य वेदप्रणीतत्वम्। तस्मात् वेदाः पौरुषेयाः न तु अपौरुषेयाः। अपौरुषेयत्वप्रतिपादकः मीमांसकराद्धान्तस्तु असमीचीनः।

वेदाः अपौरुषेयाः

सांख्यवेदान्तमीमांसानाञ्च मतेन वेदाः अपौरुषेयाः सन्ति। किञ्च अस्माकं प्राचीनभारतीयपरम्परा वेदानाम् अपौरुषेयत्वमेव स्वीकरोति। भगवान् परमकारुणिको जैमिनिः अपौरुषेयत्वमेव आह। 'बवरः प्रावाहणिरकामयत', 'कुसुरुविन्द औद्दालकिरकामयत' इत्यादिश्रुतिवचनैः पूर्वपक्षैः यद्वेदानां पौरुषेयत्वम् अनित्यत्वं च साध्यते तत्तु असमीचीनम्। वस्तुतस्तु श्रुतिवचनैरेतैः वेदानाम् अपौरुषेयत्वं नित्यत्वं च साध्यते न तु पौरुषेयत्वम्। 'यः कल्पः स कल्पपूर्वः' इत्यादिन्यायैः वेदनां प्रवाहमाणत्वमेव सूच्यते। तेन पूर्वकल्पे

---

11 *श्लोकवार्तिकम्*– ७.३६६।

12 *सर्वदर्शनसंग्रहः*, मीमांसादर्शनम्, श्लोकसंख्या ५।

13 *विष्णुपुराणम्*– ३.४.५।

यथा बवरादयः विद्यमानाः आसन् तथैव अस्मिन् कल्पेऽपि। तस्मात् एतैः श्रुतिवचनैस्तु वेदानाम् अपौरुषेयत्वं नित्यत्वं च नितरां साध्यते।

> "वेदे तु पुरुषाभावाल्लिङादिनिष्ठ एव। नहि वेदः पुरुषनिर्मितः। 'यः कल्पः स कल्पपूर्वः' इति न्यायेन संसारस्यानादित्वादीश्वरस्य च सर्वज्ञत्वादीश्वरो गतकल्पीयं वेदमस्मिन् कल्पे स्मृत्वा उपदिशतीत्येतावतैवोपपत्तौ प्रमाणान्तरेणार्थमुपलभ्य रचितत्वकल्पनानुपपत्तेश्च। ततश्च पुरुषाभावाच्छब्दनिष्ठैव सा।"[14] इति।

काठकः कौथुमीय इत्यादीनां 'तेन प्रोक्तम्' इत्यादिपाणिनीयसूत्रेण अणादितद्धितप्रत्ययसिद्धत्वात् वेदानां तत्प्रवक्तृत्वात् पौरुषेयाः वेदाः इति यत्पूर्वपक्षिणा प्रतिपादितं तन्न समीचीनम्। अत्र तु प्रवचननिमित्तत्वं हेतुः, न तु कर्तृनिमित्तत्वम्। अध्ययनसम्प्रदायप्रवर्तकत्वेन काठकः कौथुमीयः तैत्तिरीय इत्यादिसमाख्या। 'वैशम्पायनः सर्वशाखाध्यायी, कठः पुनरिमां केवलां शाखामध्यापयाम्बभूव' इत्यादिस्मृतिवचनैः वैशम्पायनादीनां सम्प्रदायप्रवर्तकत्वं सम्पाद्यते न तु वेदरचयितृत्वम्। तस्माद्वेदाः अपौरुषेयाः नित्याश्च।

> "यथा 'तेन प्रोक्तम्' (पा०सू०४.३.१०१) इति पाणिन्यनुशासने जाग्रत्यपि काठक-कालाप-तैत्तिरीयमित्यादिसमाख्याध्ययन-सम्प्रदायप्रवर्तकविषयत्वेनोपपद्यते, तद्वत्रापि सम्प्रदायप्रवर्तक-विषयत्वेनाप्युपपद्यते।"[15]इति।

ननु कालिदासादिवाक्यवद् वाक्यत्वाद् वेदानामपि पौरुषेयत्वम् अनित्यत्वम् इति चेन्न। कालिदासादिग्रन्थेषु तत्तत्सर्गावसाने कर्तार उपलभ्यन्ते। तथा वेदस्यापि पौरुषेयत्वे तत्कर्तोपलभ्येत। न चोपलभ्यते। वेदाश्च वाक्यात्मकाः, तस्मात् पौरुषेयाः, कालिदासादिवाक्यवत् इति वाक्यत्वहेतुः तर्करूपेण प्रतिपादितः स तु प्रतिकूलत्वात् पराहतः। तस्माद् अपौरुषेयाः वेदाः। तथा सति पुरुषबुद्धिदोषकृतस्य अप्रामाण्यस्य अनाशङ्कनीयत्वात् विधिवाक्यस्य धर्मे प्रामाण्यं सुस्थम्।

> "पौरुषेयं न वा वेदवाक्यं स्यात्पौरुषेयता।
> काठकादिसमाख्यानाद्वाक्यत्वाच्चान्यवाक्यवत्॥
> समाख्याध्यापकत्वेन वाक्यत्वं तु पराहतम्।
> तत्कर्त्रनुपलम्भेन स्यात्ततोऽपौरुषेयता" ॥[16] इति।

ननु यदुक्तं पौरुषेयाः वेदाः, अत्र किं तावत् पौरुषेयत्वम्। पुरुषादुत्पन्नत्वमात्रं यथा अस्माभिः अहरहः उच्चार्यमाणस्य वेदस्य, उतः प्रमाणान्तरेण अर्थमुपलभ्य तत्प्रकाशनाय रचितत्वं यथा अस्मदादिभिरेव निबन्धमानस्य प्रबन्धस्य। प्रथमपक्षः स्वीक्रियते चेत् नास्ति वेदानाम् अपौरुषेयत्वे दोषः।

---

14 *मीमांसान्यायप्रकाशः*, पृ० ९।

15 *सर्वदर्शनसंग्रहः*, जैमिनिदर्शनम्, पृ० ४६९।

16 *जैमिनीयन्यायमाला*, वेदापौरुषेयत्वाधिकरणम्, पृ० ५४-५५।

यतो हि अस्माभिः प्रत्यहं सस्वरः वेदोच्चार्यते तथैव सृष्ट्यादौ परमेश्वरेण वेदोच्चारणं कृतम्। एतेन उच्चारणे सत्यपि तथा अस्मासु वेदकर्तृत्वं नापपति तथैव परमेश्वरेऽपि वेदकर्तृत्वं नापतति। तस्मात् प्रथमपक्षे तु नास्माकं वेदापौरुषेयत्वपाक्षिकाणां विप्रतिपत्तयः।

द्वितीयपक्षोऽपि असारः। ननु द्वितीये किमनुमानबलात् तत्साधनम् आगमबलाद्वा। अनुमानबलात् साध्यते चेत् मालतीमाधवादिवाक्येषु सव्यभिचारत्वात् प्रामाण्यापत्तिः। लोकेऽपि कवयः मनसि सर्वं कल्पयित्वा प्रमाणान्तरेण सर्वमुपलभ्य नाटकादीनां लेखनं कुर्वन्ति। यद्युच्यते अनुमानबलाद् वेदविषयः ज्ञायते किञ्च ग्रन्थवद् ग्रथितत्वात् वेदः पौरुषेयः तर्हि वेदभिन्नेष्वपि वेदस्य प्रामाण्यापत्तिः। मालतीमाधवादिष्वपि स्वकपोलकल्पित्वाद्वाक्यत्वाच्च वेदानां प्रामाण्यापत्तिः। वाक्यमिति प्रमाणत्वे सतीति विशेष्यते चेत् विपश्चितो मनसि न वैशद्यमापद्यते। प्रमाणान्तरागोचरार्थप्रतिपादकं हि वाक्यं वेदवाक्यम्। तस्मात् वेदाः अपौरुषेयाः नित्याश्च इति नितराम् आयाति।

किञ्च परमेश्वरस्य वेदकर्तृकत्वं शरीराभावात् कथं स्यादिति मीमांसकजिज्ञासायां नैयायिकैः भक्तानुग्रहार्थं लीलाविग्रहग्रहणसम्भवात् सम्भवति तु परमेश्वरस्य वेदप्रणीतत्वम् इति प्रतिपादितं तदपि न समीचीनम्। परमेश्वरस्य सति लीलाविग्रहपरिग्रहाभ्युपगमेऽपि अतीन्द्रियदर्शनं न सम्भवति परमेश्वरे देशकालस्वभाव-विप्रकृष्टार्थग्रहणोपायाभावात्। वेदार्थः अतीन्द्रियः। परमेश्वरस्य इद्रियत्वेऽपि अतीन्द्रियदर्शनं न सम्भवति। यद्युच्यते चक्षुरादीनाम् अतीन्द्रियदर्शनत्वासम्भवेऽपि परमेश्वरस्तु अतीन्द्रियदर्शनक्षमतासम्पन्नः इति चेन्न दृष्टान्तानुसारेणैव कल्पनायाः आश्रयणीयत्वात्। पूर्वदृष्टस्यैव कल्पना भवति नतु अपूर्वस्य। किञ्च इद्रियाणि स्वविषयम् अतिक्रम्य परविषयं न गृह्णन्ति। उक्तं च प्रभाकरगुरुणा–

"यत्राप्यतिशयो दृष्टः स स्वार्तानतिलङ्घनात्।
दूरसूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्रवृत्तिता" ॥[17] इति।

तस्माद्वेदाः न ईश्वरकृताः। तस्मान्न पौरुषेयाः। अतः एव ईश्वरस्य सर्वज्ञत्वासिद्ध्यभावात् वेदानामर्थमुपलभ्य तत्प्रकाशनाय रचितत्वम् आगमबलात् नापि साध्यते। तस्मात् न वेदानां पौरुषेयत्वम्।

शब्दः अनित्यः अस्मदादिबाह्येन्द्रियग्राह्यत्वात् घटवत् इत्यनुमानबलेन शब्दानाम् अनित्यत्वं स्वीकृतं पूर्वपक्षैः तदपि न समीचीनम्। शब्दानाम् अनित्यत्वात् शब्दराशीनां वेदानामपि अनित्यत्वम् इति तु नाक्षेपणीयम्। शब्दस्य उत्पत्त्यभावात् शब्दाः नित्याः, तस्मात् शब्दानाम् अनित्यत्वात् वेदाः पौरुषेयाः अनित्याश्च इति नैयायिकमतमपि असाधु। तस्मात् वेदाः नित्याः अपौरुषेयाश्च।

समीक्षणम्

वेदाः पौरुषेयाः अनित्याः उतः अपौरुषेयाः नित्याः इत्युभयत्रापि सन्ति वादिप्रतिपादिनां प्रबला युक्तयः। अस्माकं परम्परापि द्विधा विभक्ता। एकत्र पौरुषेयत्ववादिनः अपरत्र च अपौरुषेयत्ववादिनः।

17 *सर्वदर्शनसंग्रहः*, मीमांसादर्शनम्– ६।

अस्माकं स्मृतिग्रन्थास्तु वेदानाम् अपौरुषेयत्वं नित्यत्वञ्च प्रतिपादयन्ति। श्रीमद्भागवते षष्ठस्कन्धे धर्मप्रमाणत्वेन परिगृहीतवेदः–

"वेदप्रणिहितो धर्मः ह्यधर्मस्तद्विपर्ययः।
वेदो नारायणः साक्षात् स्वयंभूरिति शुश्रुम" ॥[18] इति।

इति श्लोकेन साक्षात् भगवत्स्वरूपत्वेन प्रतिपाद्यते। तत्रैव 'शब्दब्रह्म परं ब्रह्म ममोभे शाश्वती तनू'[19] इति भगवद्वाक्येन शाश्वतत्वं वेदस्य उच्यते। तनुरिव तनुः स्वरूपम् इत्यर्थः। एतेन वेदस्य अपौरुषेयत्वं प्रतिपाद्यते। 'वेदः शिवः शिवः वेद' इति च प्रसिद्धिः। पौरुषेयत्वे वेदानां तु भ्रमप्रमादविप्रलिप्सादिदोषाः सम्भवन्तीति शबरस्वामिपादैः प्रतिपादितम्।

वादरायणव्यासप्रणीतस्य ब्रह्मसूत्रस्य शास्त्रयोनित्वाधिकरणे शङ्करभगवत्पादाः 'अरे अस्य महतो भूतस्य निःश्वसितमेतद् यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः'[20] इत्यादिश्रुतिमूलतया विचारे प्रवर्तन्ते। तत्र भगवच्छशङ्कराचार्यपादाः अनेकविद्यास्थान-उपबृंहितस्य प्रदीपवत् सर्वार्थ-अविद्योतिनः सर्वज्ञकल्पस्य महतः ऋग्वेदादेः योनिः कारणं ब्रह्म इति विस्तरतः अपौरुषेयत्वं च साधयन्ति। मीमांसायां वेदे पुरुषाभावात् प्रेरणायाः शब्दमात्रनिष्ठत्वात् शाब्दीभावनेत्युच्यते। 'वैदिकवाक्ये तु पुरुषाभावात् लिङादिशब्दनिष्ठ एव। अत एव शाब्दीभावनेति व्यवह्रियते'[21] इति लौगाक्षिभास्करः। अत एव वेदस्य अपौरुषेयत्वं सिद्ध्यति।

स्मृतिपुराणेषु वेदविषयिणी भावना तादृश्येव प्रायेण, यादृशी मीमांसायां विभावितास्ति। मनुर्वेदान् नित्यान् अपौरुषेयांश्च मन्यते। तेनोक्तम्–

"पितृदेवो मनुष्याणां वेदश्चक्षुः सनातनम्।
अशक्यञ्चाप्रमेयञ्च वेदशास्त्रमिति स्थितिः" ॥[22] इति।

उपसंहृतिः

प्रतीच्या विपश्चितो वेदान् ऋषिप्रणीतान् मन्यन्ते। तेषां हि आधिभौतिकी दृष्टिस्तान् शब्दराशिमेव सामान्यग्रन्थमेवागच्छन्ति। परं वेदमर्मज्ञा भारतीया मेधाविनस्तान् न ऋषिप्रणीतान् मन्यन्ते। तेषां मतमिदं यद् ऋषयो वैदिकमन्त्राणां द्रष्टारः सन्ति न च कर्तारः। अलौकिकसामर्थ्यशालिनः ऋषयो दिव्यया प्रतिभया मन्त्राणां दर्शनं लब्धवन्तः। 'ऋषिः' इत्येतस्य पदस्य व्युत्पत्तिलभ्यः ऋषति पश्यति इति ऋषिः अर्थः एव 'मन्त्रद्रष्टा' इत्यस्ति। एषः 'ऋषिः' इतिशब्दः 'इगुपधात् कित्'[23] इत्यनेनौणादिकेन सूत्रेण इनि कृते निष्पद्यते। निरुक्ते विद्यमानाः "तद्येनास्तपस्यमानन् ब्रह्म स्वयम्भ्वभ्यानर्षत्...॥" इत्यादिपङ्क्त्य ऋषेः मन्त्रद्रष्टृत्वमुपपादयन्ति। ननु वेदाः ऋषिद्रष्टृत्वात् अपौरुषेयत्वात् नित्याः इति न समीचीनं 'स तपोऽतप्यत।

18 *श्रीमद्भागवतम्*– 6.1.40।
19 तत्रैव – 6.16.51।
20 *बृहदारण्यकोपनिषत्*– 2.4.10।
21 *अर्थसंग्रहः*, पृ0 ३२।
22 *मनुसंहिता*– १२.९४।
23 उणादिसूत्रम्– 4.120।

तस्मात् तपस्तेऽपानात् त्रयो वेदा अजायन्त। ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्यात्'[24] इत्यादिश्रुतिवाक्यादेव वेदानां जनित्वं ज्ञायते चेन्न, गतकल्पीयं वेदम् अस्मिन् कल्पे स्मृत्वा उपदिशति इति अक्षरमात्रविपर्यासं विना यथा कल्पान्तरे आसीत् तथैव उपदिशतीति प्रवचननिमित्ता श्रुतिः इयं, न तु उत्पत्तिबोधिका। अत एव 'अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा'[25] इत्यादिवचनम् उपपद्यते। एवं संक्षेपेण वेदानाम् अपौरुषेयत्वं यथमति अल्पीयसा वचसा उपन्यस्तम् इति शम्।

परिशीलितग्रन्थसूची

आपदेवः। (१९३७)। *मीमांसान्यप्रकाशः* (प्रभाव्याख्योपेतः)। शास्त्री वासुदेवः (सम्पा०)। पुने : पुने उरियेन्टाल रिसार्च इन्सटिटिउट्।

दीक्षितः, पुष्पा। २०१०। *अष्टाध्यायीसूत्रपाठः* (प्रकरणनिर्देशसमन्वितः)। नवदेहली : संस्कृतभारती।

भास्करः, लौगाक्षिः। *अर्थसंग्रहः*। (२००९)। मुसलगाँवकरः राजेश्वरशास्त्री (सम्पा०)। वाराणसी : चौखम्भा संस्कृत संस्थान।

मनुः। (२०११)। *मनुसंहिता* (वङ्गभाषीयं संस्करणम्)। वन्द्योपाध्यायः, मानवेन्दुः (सम्पा०)। सदेश : कोलकाता।

माधवः। २००४। *सर्वदर्शनसंग्रहः* (प्रकाशव्याख्योपेतः)। शर्मा उमाशङ्करः (सम्पा.)। वाराणसी : चौखम्बाविद्याभवन।

मिश्रः, श्रीरामचन्द्रः। २०१०। *संस्कृतसाहित्येतिहासः*। वाराणसी : चौखम्बा विद्याभवन।

शुक्लः, रमेशचन्द्रः। २०००। *प्रबन्धरत्नाकरः*। वाराणसी : चौखम्बा विद्याभवन।

---

24 *ऐतरेयब्राह्मणम्*– 25.7।

25 *महाभारतम्*, शान्तिपर्व, 232.24।

प्राचीनवङ्गेषु दानपत्रस्य भूमिका

रूपमदासः[1]

'दानपत्रम्' इति शब्द-विश्लेषणात्पदद्वयमाप्यते, प्रथमं 'दान', यस्यार्थः प्रदेये वस्तुनि स्वाधिकारत्यागः। तस्य प्रभुत्वमन्यस्मै प्रदेयमिति। द्वितीयं पदं 'पत्रम्'- इति शब्दस्यार्थः यस्य विशेष-वस्तुनः उपरि दानविषयो लिख्यते। एतानि दानपत्राणि हस्तलिखितानि तथोत्कीर्णानि चासन्। परन्तु ताम्रपत्राण्युत्कीर्णान्येव भवन्ति स्म। दानपत्रेषूत्कीर्णाः लिपयः प्रायशस्तदानीन्तनकवीनां प्रतिभा-कारणात् उत्खनकस्य त्रुटिवशाद्वा शब्दविन्यासे त्रुटिपूर्णा भवन्ति स्म। अधुनाहं शशाङ्कस्य समयकालीनस्य मेदिनीपुर-ताम्रशासनस्य श्रीचन्द्रस्य रामपाल-ताम्रशासनस्य च विषये यथामति पर्यालोचयामि।

शशाङ्कस्य राजत्वकालीने मेदिनीपुर-ताम्रशासनद्वयम् –

शशाङ्कस्य राजत्वकालीनसमये मेदिनीपुरस्य-ताम्रशासनं भारतान्तर्गत-पश्चिमवङ्गप्रदेशस्य मेदिनीपुर-मण्डलाल्लभ्यते। दण्डनायक-विनयरञ्जनसेनमहाभागः १९३७ तमे ईशवीये वर्षे ताम्रफलकद्वयमिदं दक्षिण-मेदिनीपुरस्य कस्यचिद् यवनस्य गृहात्संगृहीतवान्। ताम्रशासनद्वयस्य भाषा आसीत् संस्कृतम्, लिपिश्च आदि-नागरी, छन्दः अनुष्टुप्, रीतिर्गौडी चेति। एवञ्च अस्य समयकालः ख्रीः षष्ठ-सप्तम-शताब्द्योरन्तर्वर्ती, प्रथमं ताम्रशासनं शशाङ्कस्य अष्टमराज्यवर्षाङ्कितम्। अस्य ताम्रशासनस्य पार्श्वद्वये दश अनुष्टुप्छन्दाश्रिताः श्लोका वर्तन्ते। तत्र सप्तमश्लोके कर्षणयोग्यभूमेर्वास्तुभूमेश्च दानस्य परिमाणमुल्लिखितमासीत्। तत्परिमाणं खलु चत्वारिंशत्द्रोणवाप्कर्षणयोग्यभूमिरेकद्रोणवाप्-वास्तुभूमिश्चेति। महाप्रतीहतः शुभकीर्तिरमां भूमिमक्रीणात्-

"क्रीत्वास्मत्तो यथान्यायं शुभकीर्तिरयं वुधः।
चत्वारिंशद्ददौ द्रोणान् द्रोणवापं च वास्तुनः[2]।।"

स पितुः पुण्यवृद्धाय तां भूमिं भरद्वाज-गोत्रीय-माध्यदिन-शाखाध्यायि-ब्राह्मण-दाम्यस्वामिने प्रादात् -

"भरद्वाजसगोत्राय माध्यन्दिनाय धीमते।
दाम्यस्वामिन एतस्मै पित्रोः पुण्याभिवृद्धये[3]।।"

द्वितीयं ताम्रशासनं शशाङ्कस्य नवदश-राज्यवर्षाङ्कितम्। शशाङ्कस्य अधीनस्थः सामन्त आसीत् सोमदत्तः। तस्य अमात्यस्य प्रकीर्णदानस्य सुपरामर्शेन सोमदत्तः काश्यपगोत्रीयाध्वर्योर्भट्टिश्वराय-महाकुम्भारपद्रक-नाम्ना प्रददौ । तथाहि प्रोक्तम् -

---

[1] शोधच्छात्रः, श्रीलालबहादुशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली।
[2] *Select Inscription* (Volume-II), (D.C. Sircar), page – 25
[3] तत्रैव

"भट्टेश्वराय गुणिने काश्यपायाध्वर्यवे।
महाकुम्भारपद्रके दत्तः सर्वमण्डलवर्जितः[4]।।"

ताम्रशासनमिदं तावीराधिकरणस्याधिवासिभिर्हिताय लोकार्पितम् । तेषां विश्वासः समासीत् यद्दानफलं पुण्यदायकम्। अस्यापरं फलं तावत्स्वर्गगामित्वम् – "भूमेर्गोचर्ममात्रायाः दाने स्वर्गं फलं स्मृतम्[5]।" उपर्युक्तस्य ताम्रशासनद्वयस्य स्थानमासीत् शशाङ्कस्य साम्राज्यान्तर्गत-दण्डमुक्तिजनपदस्य तावीरनामकं स्थानम्। अस्मिन् ताम्रशासनद्वये व्यवह्रियमानाया मुद्राया उपरिभागे अक्षरैर्निबद्धमासीत् स्थाननाम – तावीराधिकरणम्। प्रथमे ताम्रशासने सम्राजः शशाङ्कस्य विशेषं वैशिष्ट्यत्रयं परिलक्ष्यते। तद्यथा महनीयत्वम्, सौन्दर्यम्, राजकोषस्य बहुरत्नसम्भारत्वञ्चेति। एतानि त्रीणि वैशिष्ट्यानि विश्लिष्य वक्तुमलं यत् तदानीन्तन-शासकाः युद्धजयलाभाय साम-दान-दण्ड-भेद-नीतीनां प्रयोगमकुर्वन्। प्रसङ्गेऽस्मिन् आचार्येण मनुना मनुसंहितायाः सप्तमेऽध्याये उक्तम्-

"एवं विजयमानस्य येऽस्य स्युः परिपन्थिनः।
तानानयेद् वशं सर्वान् सामादिभिरूपक्रमैः"[6]।।

विजयलाभात्परं प्रजानां कृते हितकराणि कर्माणि सम्पाद्य प्रजासुखं स्वस्य सुखमिति मन्तव्यं राज्ञा। प्रसङ्गेऽस्मिन् कौटिल्येनार्थशास्त्रस्य विनयाधिकरणे प्रोक्तम्-

"प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम्।
नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम्[7]।।"

वर्तमान-परिस्थितौ दृश्यते यत् सम्राडिव उच्चपदाधिकारिषु केचनाभ्यन्तरीणयुद्धे जयं लब्धुं साम-दान-दण्ड-भेद-नीतीः प्रयुङ्क्ते स्म, किन्तु जयलाभात्परं पुनः जनगणानां हिताय किमपि न चिन्तयन्ति। तेषां कार्याणां प्रतिफलनं दृश्यते सामान्यसंख्यकानां नाम स्तावकानां स्वार्थ-सिद्धये । अतः साम्प्रतिके काले येषाम् उच्चपदाधिकारिणामुपरि उत्तरदायित्वं वर्तते, ते उदारपन्थिनो भवेयुश्चेत्, तेषां कार्यमवश्यमेव जनहितकरं भवेत्।

श्रीमतश्चन्द्रस्य रामपालताम्रशासनम् -

ऐतिहासिको राधागोविन्द-वसाकः १९१३तमे इशवीयाब्दे वांलादेशस्य ढाका-जिल्लान्तर्गतः पञ्चसाराख्यग्रामस्य यदुनाथादिदं ताम्रफलकं अक्रीणात्। अधुना ताम्रफलकमिदं Barendra Research

---

[4] *Select Inscription* (Volume-II), (D.C. Sircar), P-27

[5] तत्रैव

[6] *मनुसंहिता*, (सम्पा. मानवेन्दु वन्द्योपाध्याय) सप्तम-अध्यायः, श्लोकः - १०३

[7] *अर्थशास्त्रम्* (विनयाधिकरणम्, राजप्रणिधिः)

Society इति संस्थायाः प्रयत्नशालायां संरक्षितमस्ति। ताम्रशासनस्यास्यांशद्वयस्यैकस्मिन्नंशे राजप्रशस्तिः, अन्यस्मिंश्चांशे दानविषयो लिपिबद्धोऽस्ति। दानपत्रस्यास्य भाषा खलु संस्कृतम्। लिपिस्तावत् उत्तरी-नागरी, समयकालः ख्री. एकादशशताब्दीति । ताम्रशासनस्यादावेव भगवतो बुद्धस्य पादवन्दनमस्मन्नयनयोरापतति

"वन्द्यो जिनः स भगवान् करुणैकपात्रं धर्मो प्यसौ विजयते जगदेकदीपः"[8] इति।

अस्मिन् ताम्रशासने चन्द्रवंशस्य माहात्म्यकीर्तनात्परं हरिकेलाधिपतिना श्रीचन्द्रेण पुण्ड्रवर्धनभुक्तेर्नान्यमण्डले नेहकाष्ठीति ग्रामे पीतवासगुप्तशर्मणे पाटकभूमिदानस्योल्लेखो बभूव।

"श्रीपौण्ड्रभुक्रन्तः पातिनान्यमण्डले नेहकाष्ठिग्रामे पाटकभूमौ समुपगताशे[9]।"

भूमिमापकस्य सर्वोच्च-परिमापकः पाटक इति। दीनेशचन्द्र-सरकार-महोदयस्य मतानुसारेण एकपाटकः तु ६४०/८००-परिमिता विघा। अस्या भूमेः दानपत्रे उल्लिखितानि कानिचित्पदानि विशेषार्थं भजन्ते, तेषां प्रयोगोऽपि वर्तमानसमाजे समधिकप्रसिद्धः। 'सलवणा' लवणसहितम् इत्यर्थो बोध्यः। ताम्रशासनस्यास्य पाठनाज्ज्ञायते यत्- अत्र नान्यमण्डले यस्मिन् दानभूमिविषये समुल्लिखितमस्ति तत्स्थानं समुद्रसंलग्नम् इति। वस्तुतः तस्मिन् स्थाने जलप्राचुर्यात् ग्रामवासिनः तस्यां भूमौ खननं कृत्वा तज्जलम् अवध्नन्। ततःपरं तेन जलेन लवणं निर्मितवन्तस्ते। लवणमुत्पाद्य विक्रीय च तद्धनं जनानाम् आयस्योत्सः अभूत्। सम्राट् तस्याः भूमेरधिकारं त्यक्त्वा भूमिदानमकरोत् इति प्रसङ्गस्तत्र विशेषरूपेणोल्लिखितो वर्तते। अत्रोल्लिखितस्य 'सादशापराधा' इत्यस्य पदस्यार्थविश्लेषणाज्ज्ञायते यत्पदमिदं दशापराधान् बोधयति। चौर्यवृत्तिः, हत्या, परस्त्रीगमनम् (कायिकम्), कटुभाषणम्, असत्यम्, अपमाननम्, वस्तुहीनभाषणञ्च (वाचिकम्), परधनलोभः, अधर्मचिन्ता, असत्यानुरागश्च (मानसिकम्) – एतेऽपराधा आचार्यमनुना स्वीकृताः। तेऽपराधा अवश्यमेव दण्डनीयाः। यद्यपराधः प्रमाणितो भवति चेद्धार्यशुल्को ग्रहीतुर्दातव्यः। 'सचौरद्धरणा' इति पदमिदं विशेषार्थं भजते। तत्र लुण्ठकानां हस्ताद्ग्रामवासिनां रक्षणस्योत्तरदायित्वं राज्ञ एव। भूमिदानात्परं प्रदेय-करस्याधिकारं प्राप्नोत् दानग्रहीता।

अतः वर्तमानसमाजेऽपि उक्तापराधानां गुरुत्वानुसारेण दण्डविधानव्यवस्था अस्ति। अस्माद्दण्डभयादेव सर्वे मनुष्याः नियन्त्रिताः भवन्ति। मनुसंहितायाः सप्तमेऽध्याये आचार्येण मन्तव्यम् -

"सर्वो दण्डजितो लोको दुर्लभो हि शुचिर्नरः।
दण्डस्य हि भयात्सर्वं जगद् भोगाय कल्पते[10]।।"

---

[8] *नित्य कालेर तुइ पुरातन* (सम्पा. देवार्चना सरकार) पत्राङ्कः - १९७

[9] तत्रैव, पत्राङ्कः -१९८

उभयोस्ताम्रपत्रयोस्तुलनात्मकं पर्यालोचनं क्रियते चेद्वक्तुं शक्यते यत् कर्णसुवर्णस्य सम्राजः शशाङ्कस्य राजत्वस्य समयकालः आसीत् ख्री.६००-६२५ इति। चन्द्रवंशस्य राज्ञः श्रीचन्द्रस्य समयः आसीत् खी. ९२९-९७५ इति। शशाङ्कः ब्राह्मण-धर्मस्यासीत् पृष्ठपोषकः। बुद्धगयास्थानस्य बोधिवृक्षस्य छेदनं बौद्धधर्ममते धर्मविरोधीति आख्या प्रदीयते। अपरतः, आसीत् श्रीचन्द्रो बौद्ध-धर्मस्य पृष्ठपोषकः, गुप्तसाम्राज्यस्य पतनात्परं यदा स्वाधीननरपतिराविर्भूतोऽभूत्, तेषु पूर्वभारतस्य कर्णसुवर्णस्य राजा आसीत् शशाङ्कः। पक्षान्तरे बभूव श्रीचन्द्रश्चन्द्रवंशस्य सार्वभौम-नृपः। अपरपक्षे ताम्रशासनद्वयेऽपि ब्राह्मणेभ्यो भूमिदानस्योल्लेखो वर्तते। मेदिनीपुर-ताम्रशासने श्रीचन्द्रस्य रामपाल-ताम्रशासने च दानभूमेः अपहरणकारिणः पापाचरणकारिणश्च प्रति महापातकस्याभिशापवृत्तं दृक्पथम् आयाति। तदानीन्तनसमये अधिकानि दानपत्राणि फलके उत्कीर्णानि जातानि। कारणमेतत् फलकस्य स्थायित्वम् अधिकं भवति, पुनः धातुरूपेण ताम्रपत्रं सहजलभ्यञ्चेत्येतस्य मूल्यमपि बहु-स्वल्पमासीत्। परन्तु वर्तमानसमये एतानि दानपत्राण्यधितन्त्र-माध्यमेन online-द्वारा सहजलभ्यानि जातानि। पृथिव्याः कस्मिंश्चित् कोणे स्थित्वापि विषयस्यास्य ज्ञानं प्राप्तुं शक्यम्।

उपसंहारः –

शशाङ्कस्य राजत्वकालीने समये मेदिनीपुर-ताम्रशासने दृश्यते यत् वङ्गस्य प्रथमैकीभूतः शासकः आसीत्, गुप्तसाम्राज्यस्य पतनात्परं शशाङ्कस्याविर्भावो जातः, तदारभ्य शशाङ्कस्य राज्यविस्तारो जातः। शशाङ्कस्याष्टमे राज्यवर्षे पौषमासस्य द्वादशदिनाङ्के पुनः नवदशराज्यवर्षे भाद्रपदमासस्य ऊनविंशतितमे दिनाङ्के दानविषयो लिपिबद्धः समासीत्।

बौद्धधर्मान्तरस्य राज्ञः श्रीचन्द्रस्य राजत्वे यस्यैक-पाटक-परिमित-भूमिदानस्य समुल्लेखोऽस्ति तद्दानमपि केवलं ब्राह्मणेभ्यः । वर्तमानसमाजेऽपि भूमिदानप्रथेयं प्रचलितास्ति, तथा प्राचीनकालवन्न हि बृहती । वर्तमानकालेऽपि ब्राह्मणेभ्यो दानप्रथा प्रचलति। श्रीचन्द्रस्य ताम्रशासने उल्लिखितेन सलवणेति पदेनैव समुद्रस्य जल-संरक्षणं तथा च परिशोधनेन व्यवहार्यमित्यर्थो लभ्यते।

'सादशापराधा' पदमाध्यमेन चौर्यवृत्ति-हत्या-परस्त्रीगमनादीनां दश अपराधानां विषये वर्णितमस्ति, ते अवश्यमेव दण्डनीया निन्दनीयाश्च। किन्तु वर्तमानसमाजे एतेऽपराधा अधिकं दरीदृश्यन्ते। अस्य दण्डविधानमपि बहुत्रैव शिथिलं जातम्। अतः सम्यक्तया समग्रं जगदिदम् उचितमार्गेण प्रचलिष्यति। वर्तमानयुगेऽपि अपराधिनाः प्रति यदि अपराधः प्रमाणीभूतः भवति तर्हि अपराधस्य प्रयोजनं विविच्य दण्डविधानं करणीयम्। प्रसङ्गेऽस्मिन् धर्मशास्त्रकारेण मनुना मनुसंहितायाः सप्तमे अध्याये उक्तम्–

---

[10] *मनुसंहिता*, (सम्पा. मानवेन्दु वन्द्योपाध्याय) सप्तम-अध्यायः, श्लोकः - १२

"तीक्ष्णश्चैव मृदुश्च स्यात् कार्यं वीक्ष्य महीपतिः।
तीक्ष्णश्चैव मृदुश्चैव स्यात् राजा भवति सम्मतः[11]।।".

सहायकग्रन्थपञ्जी

अर्थशास्त्रम्. सम्पा. मानवेन्दु वन्द्योपाध्याय, कलिकाता : संस्कृत पुस्तक भाण्डार, २०१४।

नित्यकालेर तुइ पुरातन, देवार्चना सरकार, कलिकाता : पश्चिमवङ्ग राज्य पुस्तक पर्षद्, २०१३।

मनुसंहिता, सम्पा. अशोककुमार वन्द्योपाध्याय, कलकाता : सदेश, २००९।

Select Inscriptions (Vol. II), D.C. Sircar, University of Calcutta, 1983 (1st Edition).

[11] *मनुसंहिता,* (सम्पा. मानवेन्दु वन्द्योपाध्याय) सप्तमाध्यायः, श्लोकः - १४०

श्रीश्वरविद्यालङ्कारकृतं श्रीभिक्टोरियाजीविताश्रितं 'विजयिनीकाव्यम्' – विश्लेषणात्मिका समीक्षा

तापस-वर्मणः[1]

१. भूमिका

भारतवर्षस्येतिहासे इंराजशासनमेको विशिष्टोऽध्यायः। समयेऽस्मिन् भारतवर्षस्य शिक्षाक्षेत्रेऽपि परिवर्तनाध्यायः प्रारभते। इंराजैः तेषामाङ्गलभाषा भारतवर्षस्य शिक्षाव्यवस्थायां योजिता। अतःपरं भारतवर्षस्य संस्कृतपण्डितपरिवारेषु भेदद्वितयं परिलक्ष्यते स्म। केचन 'Modern' इत्याख्ये विद्यालये महाविद्यालये च प्रवेशं स्वीकृतवन्तः। अपरे च पूर्वपद्धत्या तेषां संस्कृतशिक्षणं चालितवन्तः। यद्वा भवतु, संस्कृतकाव्यकवनधारा न तु स्तब्धाभवत्। परन्तु पण्डिताः तेषां कृतिवस्तुना द्विधा विभक्ता जाताः। केचन नूतनाङ्गिकेन पुरातनविषयमाश्रित्य काव्यादीन् रचितवन्तः। अपरे च केचन इंराजसाम्राज्यविषयकाणि स्तुतिपकराणि काव्यानि प्रणीतवन्तः। तत्र इंराजशासकानां तथा राजकुमाराणां राजकुमारीणां वा जीवनचरितानि, तेषां राज्याभिषेकः वासीत् काव्यादीनां विषयः। वि. राघवन्-महोदयेन विषयोऽयमाङ्गलभाषया 'Panegyrical Poems'[1] इति नाम्नाभिहितः। उक्तञ्च तेन 'Modern Sanskrit Writings' इत्याख्ये तदीय प्रबन्धे –"A second type of new literature written by the traditional Pandit in the British period is panegyrical poems on the British Empire, the Crown and the Coronation Durbar. Loyalty to the ruler and the tendency to eulogize him are in the blood of the old style Sanskrit scholars, and only a change of the subject of eulogy from their former local kings to the new Emperor from the far-off land was necessary."[2] इति।

२. श्रीश्वर-विद्यालङ्कारः – परिचितिः कृतिततिश्च

स्तुतिकाव्यपरिसरे तथाधुनिकमहाकाव्ये आसीत् श्रीश्वर-विद्यालङ्कारः एकः महान् कविः। अद्यतनस्य वांलादेशस्य रंपुरमण्डलस्य इटाकुमारी इति नामधेये ग्रामे १२४१ बङ्गाब्दे कविरयं श्रीश्वरविद्यालङ्कारः जनिं लेभे। तस्य पितुः नाम बभूव क्षितीश्वर-भट्टाचार्यः। श्रीश्वरविद्यालङ्कारः आबाल्यात् नानाविधेषु शास्त्रेषु पाण्डित्यमधिगत्य कलिकाता-संस्कृत-महाविद्यालये श्रीप्रेमचन्द्र-तर्कवागीशमहोदयात् काव्यं नाटकमलंकारशास्त्रञ्चाधिजगे। शिक्षां समाप्य काकिनायां राजसभापण्डितपदमलञ्चकार सः। अनन्तरं नैकेषां काव्यानां रचनाकारः कविरयं न केवलं बङ्गभूमौ अपि तु विश्वसंस्कृतसाहित्ये काव्यरचनायां वैप्लविकं परिवर्तनं साधयामास। तस्य कृतिरूपेण 'सप्तशती', 'जीवदूतम्', 'नलोदयः', 'देवीशतकम्', 'शिवजातकम्', 'कौमार-व्याकरणम्', 'सुलोचना', 'हेमोद्वाहकाव्यम्', 'विजयिनीकाव्यम्',

---

[1] गवेषकः (पि.एच् डि.), संस्कृतसंकायः, कोचविहार-पञ्चानन-वर्मा-विश्वविद्यालयः, पश्चिमवङ्गः।

‘दिल्लिमहोत्सवकाव्यम्’, ‘शक्तिशतकम्’ (असमाप्तम्), ‘विक्रमभारतम्’ (असमाप्तम्) इत्यादयः ग्रन्थाः आकर्ण्यन्ते[3]। एतेषां काव्यानां मध्ये *विक्रमभारतम्, विजयिनीकाव्यम्, दिल्लिमहोत्सवकाव्यञ्चा*धुना प्राप्यन्ते। कविना श्रीश्वरविद्यालङ्कारेण इंल्याण्डदेशवास्तव्यायाः महाराज्ञीभिक्टोरियायाः जीवनचरितमवलम्ब्य द्वादशसर्गात्मकं ‘विजयिनीकाव्यं’ विरचितम्। पत्रेऽस्मिन् ‘विजयिनीकाव्य’स्य अलंकारशास्त्रदिशा ऐतिहासिकदृष्ट्या च विचारविमर्शः क्रियते।

३. ‘विजयिनीकाव्य’स्य प्रतिसर्गं विषयसमासः

महाराज्ञीभिक्टोरियायाः जीवनचरितमनुसृत्य द्वादशसर्गात्मकं काव्यमिदं श्रीश्वरविद्यालङ्कारेण विंशशताब्द्याः प्रारम्भे विरचितम्। अत्र महाराज्ञीभिक्टोरियायाः जन्मतः तस्याः प्रशासनिकजीवनं वर्णितम्। अधः काव्यस्यास्य विषयः सर्गानुसारं क्रमेण समासेन समुपस्थाप्यते।

प्रथमः सर्गः - ‘इंराजचरितवर्णन’-नामधेये प्रथमे सर्गेऽस्मिन् आदौ तावत् इउरूप-देशस्यावस्थानम्, ततःपरम् इउरूपीयाणां वर्णना, तेषां भ्रमणम्, विज्ञानदक्षतेत्यादयो विषया वर्णिताः।

द्वितीयः सर्गः - ‘विजयिनीराज्यप्राप्तिः’ इति नामधेयः सर्गोऽयम्। अत्र महाराज्ञीभिक्टोरियायाः जन्म, बाल्यजीवनं, तस्याः राज्याभिषेकः, प्रशासनिकदक्षता, भृत्यं प्रति उदारता, सेनां प्रति सहानुभूतिरित्यादयश्च वर्णिताः खलु विषयाः। तस्याः राजत्वे सर्वत्र आनन्दमयपरिवेशसृष्टिः अभवदित्यपि ज्ञायते।

तृतीयः सर्गः - विजयिनीकाव्यस्य तृतीयसर्गस्य नाम ‘विजयिनीविवाहः’ इति। नाम्नैव सर्गस्यास्य विषयः प्रकाश्यते। अत आल्बार्ट्-महोदयेन सह महाराज्ञीभिक्टोरियायाः विवाहः वर्णित इह।

चतुर्थः सर्गः - ‘विजयिन्या गृहधर्म्मपालन-भारतशासन-पतिवियोगादिवर्णन’-नामधेये सर्गेऽस्मिन् आदौ वसन्तर्तोः वर्णनं प्राप्यते। तथाहि वनेषु जलेषु वृक्षेषु विहगेषु जन्तुषु पुरुषेषु स्त्रीषु चास्य ऋतोः प्रभावः वर्णितः। आल्बार्ट-भिक्टोरियाभ्यामस्य ऋतोः आनन्दोपभोगः, तयोः भ्रमणम्, आत्मजानां जन्म, भारतवर्स्य सेनाविद्रोहः (Indian Sepoy Mutiny) चेति विषयाः ध्वनिताः। सेनाविद्रोहस्य परं १८५८-ईशीयाब्दे भारतवर्षे ब्रिटिशशासनव्यवस्थाप्रचलनं भवति। तत्र महाराज्ञीभिक्टोरियया सहापरेषामाधिकारिकाणां नियोगः, महाराज्ञीभिक्टोरियाया उद्योगेन भारतवर्षे रेलयानस्य, राजमार्गाणाम्, चिकित्सालयानां, सेनावाहिनीनां, दूरभाषव्यवस्थायाः, विश्वविद्यालयानां, उच्चन्यायालयानां, सार्वजनीन-नियमव्यवस्थायाश्च कथं प्रतिष्ठा जातेति विषया अत्र वर्णिताः। ततः आल्बार्ट्-महोदयस्य तिरोभावोऽप्यत्र वर्णितः।

पञ्चमः सर्गः - ‘ब्युयारयुद्धवर्णन’-नामधेयः सर्गोऽयम्। अत्र आदौ आफरिकादेशस्य वर्णना, ब्युयाराणां परिचितिः, तेषां मनोभावः इत्यादयश्च वर्णिताः। ततःपरम् इंराजैः सह ब्युयाराणां युद्धं तथा विश्वेतिहासे ख्यातं ब्युयार-युद्धं विस्तरेण वर्णितम्।

षष्ठः सर्गः - ‘विजयिनीतिरोभावः’ इति सर्गोऽयं नाम्नैव स्वस्य विषयं प्रस्फुरति। अत्र विस्तृतेन महाराज्ञीभिक्टोरियायाः मृत्युद्दश्यं वर्णितम्।

सप्तमः सर्गः - ‘कविविलाप’ इति नामधेये सर्गेऽस्मिन् कविना श्रीश्वरविद्यालङ्कारेण महाराज्ञीभिक्टोरियायास्तिरोधानमुद्दिश्य करुणातिकरुणो विलापः कृतः।

अष्टमः सर्गः - ‘श्रीमन्नवराजकृतप्रतिमाविसर्ज्जनी’ इति नाम्नि अष्टमे सर्गे आदौ महिष्याः भिक्टोरियायाः प्रथम-पुत्रस्य एड्ओयार्ड-सप्तमस्य जन्मविवाहादिकथा वर्णिता। ततश्च तस्य राज्याभिषेकः, मातरं प्रति भक्तिः, मातुः सर्गप्राप्तिप्रार्थना इत्यादयश्च विषया वर्णिताः।

नवमः सर्गः - ‘श्रीमन्नवराजीयघोषणाकथन’ इति नाम नवमः सर्गः। भारतवर्षे महिष्याः वियोगजनिता शोकवर्णना, नवराजकृतानि भारतवर्षस्य जनहितैषिकार्याणि च वर्णितानि।

दशमः सर्गः - ‘लण्डनवर्णन’ इति नाम्नि सर्गेऽस्मिन् लण्डनस्य वर्णना, लण्डनीय-स्त्रीपुरुषाणां वर्णना, तेषां सम्पदां ग्रन्थागाराणां च वर्णना विद्यते।

एकादशः सर्गः - ‘इलंण्डवर्णन’-नामैकादशः सर्गः। अत्र इंलण्डदेशस्य वर्णनायां तत्रस्थस्त्री-पुरुषौ, समुद्रः, योगायोगव्यवस्था, विद्यालयः, महाविद्यालयः इत्यादयश्चोल्लिखिताः।

द्वादशः सर्गः - ‘भारतवर्षवर्णन’ इति नामनि सर्गेऽस्मिन् आदौ ब्रिटिशशासनेन कथं भारतवर्षस्योन्नतिसाधनं भवति तद्वर्णितम्। ततः भारतवर्षस्य पशूनां फलानां पर्वतानां नदीनाञ्च वर्णना विद्यते।

४. विजयिनीकाव्यस्य वैशिष्ट्यमनन्यत्वञ्च

‘इतिहासोद्भवं वृत्तमन्यद्वा सज्जाश्रयम्’[4] इति आलंकारिकवचनं मनसि निधाय कविना श्रीश्वरविद्यालङ्कारेण तत्कालिकविश्वविख्याताया महाराज्ञीभिक्टोरियाया जीवनचरितमाश्रित्य ‘विजयिनीकाव्यं’ नाम महाकाव्यं विरचितम्। ‘विजयिनीकाव्यमि’दं न केवलं महाकाव्यसंज्ञकम्, अपि त्वाधुनिकसंस्कृतसाहित्यजगति नूतनमार्गनिर्देशकः विजयध्वजः। अत्र कविना श्रीश्वरविद्यालङ्कारेण सुकल्पितेनोपायेन सुचारुरूपेण च महाराज्ञीभिक्टोरियायाः जीवनचरितं तुलिकयेव स्वस्य लेखन्याङ्कितम्। तत्र महिष्याः (महाराज्ञीभिक्टोरियायाः) जीवनचरितवर्णनायां विश्वविख्यातब्युयार-युद्धस्यापि वर्णना कृता, सा खलु विश्वेतिहासस्य किञ्चन लिखितं प्रामाण्यम्।

न केवलं वृत्तान्तत्वेन काव्यमिदं नावीन्यं धत्ते, अपि तु काव्येऽस्मिन् श्लोकरचनायां कविना प्रतिपादान्तं मैत्र्यप्रथा विहिता, सापि संस्कृतसाहित्यजगति महाकाव्यरचनायां प्रथमः प्रयासः। तत्र इउरूपस्यावस्थानविषये चरणद्वयस्यान्ते मिथोऽक्षराणां प्रयोगः द्रष्टव्यः। यथा -

“अब्धेः प्रतीच्यामपरत्र पारे
द्वीपो महानस्ति नृपाधिकारे।
अनेकपल्लीनगराधिवेशान्

भूमण्डनं संविदधत्प्रदेशान्।।[5] इति।

काव्येऽस्मिन् कविना श्रीश्वरविद्यालङ्कारेण वीरकरुणयोः रसयोः वर्णना बाहुल्येन कृता। तथा चेउरूपदेशस्य वर्णनायां वीररसस्य प्रयोगः -

"यः सिन्धुराज्यस्य वरं प्रतीरं
धत्ते च यः पार्थिवसैन्यवीरम्।
इरूपवत्ता-ध्वनितस्य तस्य
समुद्ररुद्रादपि भीर्न यस्य।।"[6] इति।

महाराज्ञीभिक्टोरियातिरोभावविषये कवेः विलापप्रसङ्गे काव्यस्यास्याङ्गरसत्वेन प्रवाहितस्य करुणरसस्य प्रयोगः -

"विषमं खलु काल-घर्षणं
यदुदस्तीकृत-मातृदर्शनम्!।
सहसाद्य शुचनया जगत्
कृतमुच्चैरथ नाम दुःखवत्।।"[7] इति।

अन्यत्रापि अपरेषां रसाणां प्रयोगः दृश्यते। तथा च श्रृङ्गाररसस्य प्रयोगः -

"यानरत्नवरवाहनादिभिः
सज्जतैः क्वचिदथाश्वसादिभिः।
तत्र तत्र विजहार निर्ज्जने
सा प्रियेण सह पुष्पिते वने।।"[8] इति।

विषयनावीन्यत्वेन ऐतिहासिकविषयत्वेन च काव्येऽस्मिन् कविना श्रीश्वरविद्यालङ्कारेण बहवः नूतनाः शब्दाः व्यवहृताः, तत्र कविना तेषां शब्दानामर्थोऽपि कृतः। तथा च -

"पुनश्च यस्मिन् इउरूप-नाम्नि
किं चित्रमेतन्न सलोकधाम्नि।
शत्रोश्च मित्रस्य च पुण्यधाम
स्मरस्य तद्द्वेष-धरस्य नाम।।"[9] इति।

कवेराशयस्तावत् यत् - इउरूपेति अत्र इ-पदेन कन्दर्पः उ-पदेन शिवश्च बोध्यते, अतः इउरूपेति नाम देशोऽयं शत्रोः मित्रस्य च पुण्यधाम।

यद्यपि काव्यमिदं वैदेशिकविषयान्वितम् ऐतिहासिकवृत्तोपेतञ्च तथापि कवेर्नैसर्गिकीप्रतिभया कुत्रापि काव्यस्यास्य तद्वृत्तं सौन्दर्यविघातकं न भवति। शब्दचयने, आद्योपान्तं मैत्र्यप्रथारक्षणे चैतिहासिकवर्णने च कविः श्रीश्वरविद्यालङ्कारः सिद्धहस्तः। काव्यसौन्दर्यसाधने आधुनिकसंस्कृतसाहित्यजगति आसीत् श्रीश्वरविद्यालङ्कारः अनन्यः कविवरः। तथा च इंल्यण्डदेशस्य वर्णने –

"द्वीपोऽयमुच्चैर्धृतरत्नशोभः
केषां न तं द्रष्टुमुपैति लोभः?।
महान्ति रत्नानि च यत्र भान्ति
यश्चोज्ज्वलस्त्रीमुखरत्नकान्तिः।।"[10] इति।

वसन्तर्तोः वर्णनं यथा –

"न हि विधुर्विसिनीं निशि हासयेत्
अहनि तद्हृदि किं मुदमानयेत्?।
इति रूपेव तदा न चकार किं
नृसविता सवितारकमेव विम्?।।" इति।

"मधुनिशा किमियं सकलोत्तमा?
किमुत तस्य रमा स्फुटचन्द्रमाः?।
किमुत वा विदिवान् सुषमोन्नता
नवसुधा वसुधातलमागता?।।"[11]इति।

आफरिकायाः ब्युयार-गणानां मनोभाववर्णनं यथा -

"धरामणेर्दूरकृतप्रवासा
वयं भवामोऽन्यजनस्य दासाः।
खनिं परित्यज्य वनं व्रजाम-
स्तथापि नेंराजगणं भजामः"।।[12] इति।

इतिहासोदन्तवर्णनायां तदनुरूपशब्दगुम्फने कवेः प्रातिभं दाक्ष्यं सुतरामेव प्रशस्यम्। किन्तु क्वचित् क्वचित् श्रुतिमधुरतायाः काचिद्धानिरपि नयनपथमस्माकमुपैति। यथा -

"विलसति वरखनिकाफरिका।
नवनवहीरककाञ्चनमणिका"।।[13] इति।

अत्र आफरिका (Africa) इति पदस्य प्रयोगेन श्लोकस्यास्य किञ्चित् श्रुतिमधुरता हन्यते। परन्तु कविराजविश्वनाथस्य मते 'सर्वथा निर्दोषस्यैकान्तमसम्भवादि'[14]त्यभिलक्ष्य वक्तुं शक्यते यत्, ऐतिहासिकवृत्तयुक्तकाव्यविरचने तदनुरूपपदप्रयोगे च एतादृशो दोषस्तु सामान्य एव इति हेतोर्विषयोऽयं लघुतयेव द्रष्टव्योऽस्माभिः।

काव्येऽस्मिन् प्राचीनालंकारिकैः प्रदत्तानां महाकाव्यविषयकाणां लक्षणानां तथा पर्वतस्य, ऋतोः, वनस्य, समुद्रस्य, नगरस्य, युद्धस्येत्यादीनां वर्णना यथा विद्यते तथैव तत्र गमनागमनव्यवस्थानां, शिक्षाप्रतिष्ठानां चिकित्सालयानां युद्धास्त्राणां चेत्यादीनामाधु-निकविषयाणां वर्णना दरीदृश्यते। एवं काव्येऽस्मिन् श्रीश्वरविद्यालङ्कारेण ऐतिह्याधुनिकतयोः मेलबन्धनं विहितम्।

५. विजयिनीकाव्यस्य प्रख्यातिः

कविना श्रीश्वरविद्यालङ्कारेण प्रवर्तितः मार्गोऽयं परवर्तिनि काले ‘Panegyrical Poems’ इति नाम्ना संस्कृतसाहित्यजगति भिन्नमार्गत्वेन परिचीयते। विंशशताब्द्याः प्रारम्भे संस्कृतसाहित्यजगति न केवलं भारतभूमौ, बहिर्भारतादपि काव्यमिदं कथमालोडनं सृष्टं, तस्य प्रामाण्यत्वेन अधः निर्वाचितमतद्वयं समुपस्थाप्यते -

“श्रीश्रीश्वर-विद्यालङ्कार-भट्टाचार्य्याणां कृतिं विजयिनीकाव्यमधीप्य परं सन्तोषमगमम्। अस्मिन् काव्ये च कविना महिष्याः भिक्टोरियायाः पवित्रतमं साध्वीनामादर्श-भूतजीवनचरितं वर्णयित्वा राजभक्तिः सम्यक् प्रदर्शिता। संस्कृतभाषापठनलोपप्रायायां दशायां, अस्मिन् काव्ये परमं कवित्वं, विविधछन्दोभङ्ग्या पदन्यासाः, सुललितपदानाञ्च बन्धनं बहुशः परिलक्ष्यन्ते। आफ्रिकानामधेयेषु देशेषु च बुयारयुद्धादिकं साम्प्रतं संस्कृतभाषायां प्रकटीकृत्य वर्णनम् अतीव काठिनमिति विविच्य, कविः सर्व्वेषामेव जनानां प्रशंसनीयमर्हति। तदाशास्महे स प्राच्यानां प्राश्चात्त्यानाञ्च सुधियां समादारं दीर्घजीवनञ्च लभतामिति।”[15] इति।

“I admire the facility with which you handle Sanskrit, the various metres and rhyme, and the richness and propriety of contents with which you adorn a subject so foreign to the Sanskrit Muse. You richly deserve the praise with which as you say your book has been received in your part of the province. Let me express the confident hope that many of your countrymen will enjoy your poem.”[16] इत्यलमतिपल्लवितेनेति शिवम्।

तथ्यसूत्रम्

---

1 *Modern Sanskrit Writings*, p. 2

2 तदेव

3 हेमचन्द्र-भट्टाचार्येण विरचिते *बङ्गीय संस्कृत-अध्यापक-जीवनी* इत्याख्ये ग्रन्थे ३१६-पृष्ठाङ्के श्रीश्वरविद्यालङ्कारस्य कृतिरूपेण ग्रन्थानामेषां नामानि प्राप्यन्ते।

4 *साहित्यदर्पणः*, ६.३१८

5 *विजयिनीकाव्यम्*, १.३

6 तत्रैव, १.४

7 तत्रैव, ७.१०

8 तत्रैव., ४.३५

9 तत्रैव, १.५

10 तत्रैव १.९

[11] तत्रैव, ४.३०-३१

[12] तत्रैव, ५.१८

[13] तत्रैव, ५.१

[14] *साहित्यदर्पणः*, पृ.११

[15] *Commented by Sarad Chandra Gupta Vidyaratna*, Professor of Sanskrit, Victoria College, Cooch Behar.

[16] *Commented by Harmann Jacobi*, Professor of Sanskrit and Pali in the University of Bonn, Germany.

परिशीलिता ग्रन्थानुक्रमणिका

- **संस्कृतभाषया वङ्गभाषया च निबद्धा ग्रन्थाः**

भट्टाचार्य, हेमचन्द्र. *बङ्गीय संस्कृत-अध्यापक-जीवनी.* कलिकाता, नवीन-प्रकाशकः।

मण्डल, विपुल ओ अरुप दास. *बङ्गदेशेर संस्कृत पण्डित.* कलकाता, प्रगतिशील प्रकाशक, २०१८।

मोहनः, ज्योत्स्ना. (सम्पा.) *काव्यप्रकाशः.* प्रथमः खण्डः, दिल्ली, नाग-प्रकाशकः, १९९५।

विद्यालङ्कारः, श्रीश्वरः. *विजयिनीकाव्यम.* (सम्पा.) कोकिलेश्वर-भट्टाचार्यः. कलिकाता, १९०२।

विद्यालङ्कारः, श्रीश्वरः. *दिल्लीमहोत्सवकाव्यम्.* (सम्पा.) कोकिलेश्वर-भट्टाचार्यः. कलकाता, १९०३।

शास्त्री, कृष्णमोहनः. (सम्पा.) *साहित्यदर्पणः* (*लक्ष्मी*-टीकोपेतः). वाराणसी, चौखम्बा संस्कृत संस्थान, २०१८।

सेनः, शुभ्रजित्. *भारतवर्षे आधुनिकसंस्कृतसाहित्यम् : विहङ्गमदृष्ट्या परिशीलनम्.* कोलकाता, संस्कृतपुस्तकभाण्डारः, २०१९।

---. *साहित्यजिज्ञासा.* कोलकाता, संस्कृत-पुस्तक-भाण्डारः, २०१५।

- **Books in English:**

Dasgupta, Surendra Nath & Sushil Kumar De. *A History of Sanskrit Literature : Classical Period.* Delhi: Motilal Banarsidass Publishers Private Limited, 2019.

De, Sushil Kumar. *History of Sanskrit Poetics*. Delhi: New Bharatiya Book Corporation, 2019.

Raghavan, V. *Modern Sanskrit Writings*. Madras: The Adyar Library and Research Center, 1956.

Talyor, Miles. *The English Maharani*. Haryana: Penguin Random House, 2018.

अष्टाध्याय्यां वाक्यपदीये च रूपतात्त्विकविश्लेषणम्

देवाञ्जलि-वोसः[1]

भाषाविज्ञानस्य ध्वनि-रूप-वाक्य-अर्थादिमूलतत्त्वेष्वन्यतमं हि रूपतत्त्वम्। रूपतत्त्वमिदं प्राचीनार्वाचीनभाषाविज्ञानयोः समृद्धांशत्वेन परिगण्यते। मनुष्याणां वाग्यन्त्रे समुच्चारितो ध्वनिरेव भाषाविश्लेषणस्य प्रथमः स्तरः।[2] अयं ध्वनिर्हि भाषायाः मूलभित्तिरूपेण स्वीक्रियते। एकेनैव ध्वनिना नैकविधध्वनिभिर्वा रूपमूलस्य निर्माणं भवति। रूपमूलमिदं शब्दनिष्पत्तिप्रक्रियाया मूलोपादानत्वेन परिगण्यते।[3] प्रकृतिप्रत्ययौ रूपमूलस्य प्रधानावालोच्यविषयौ।

❖ **अष्टाध्याय्याः रूपतत्त्वम्-**

- **पदप्रकरणम्-** वैदिककालादेव पदविषये बहुत्रैव चर्चा संदृश्यते। ऋक्संहितायामुक्तं- 'चत्वारि वाक्परिमिता।'[4] अपि च, 'चत्वारि शृङ्गा त्रयोऽस्य पादा।'[5]इति। प्रत्येकं भाषाणां व्याकरणेषु पदप्रकरणविषये पर्यालोचना आप्यते। हिन्दीव्याकरणे पदमिदमष्टधा विभज्यते। ते यथा- संज्ञा, सर्वनाम, विशेषणम्, क्रिया, क्रियाविशेषणम्, सम्बन्धसूचकः, समुच्चयबोधकः, विस्मयादिबोधकश्चेति।[6] आंगलव्याकरणे पदविभागविषये मतानैक्यं वर्तते। तत्र केचन अष्टपदविभागान् स्वीकुर्वन्ति। ते यथा- Noun, Pronoun, Adjective, Verb, Adverb, Preposition, Conjunction & Interjection[7]। चान्ये तु नवसंख्यकान् पदविभागान् अङ्गीकुर्वन्ति । ते यथा- Noun, Pronoun, Adjective, Determiner, Verb, Adverb, Intensifier, Preposition& Conjunction.[8]

संस्कृतव्याकरणस्य पदविभागविषयेऽपि मतानैक्यं दृक्पथमायाति। ऋक्प्रातिशाख्ये[9] अथर्वप्रातिशाख्ये[10] वाजसनेयिप्रातिशाख्ये[11] अर्थशास्त्रे[12] च विद्वद्भिः पदस्य चतुर्विभागः स्वीक्रियते।

---

[1] गवेषिका, संस्कृतविभागः, कोचविहारपञ्चाननवर्माविश्वविद्यालयः, पश्चिमवङ्गः।

[2] *भाषाविज्ञान ओ संस्कृत भाषातत्त्व*, पृ. ३।

[3] तदेव, पृ. ९ ।

[4] *ऋक्संहिता,* १.१६४.४५।

[5] तत्रैव, ४.५८.३ ।

[6] *भाषाविज्ञान एवं भाषाशास्त्र*, पृ.२८९।

[7] *High School English Grammar & Composition*, p-4.

[8] *A new approach to High School Grammar of Current English*, p -.5.

[9] नामाख्यातमुपसर्गो निपातश्चत्वार्याहुः पदजातानि शब्दाः। १२.५.६९९

[10] चतूर्णां पदजातानां नामाख्यातोपसर्गनिपातानां संध्यपद्यौ गुणौ प्रतिज्ञम्। १.१

[11] तच्चतुर्धा नामाख्यातोपसर्गनिपाताः। ८.५२

[12] तच्चतुर्विधम्। नामाख्यातोपसर्गनिपाताश्च इति। २.१०.६८

सर्वप्रथममेव यास्काचार्येण प्रत्यक्षतः चतूर्णां पदानामुल्लेखो कृतः। तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति।[13] महावैयाकरणेन पाणिनिना एतेषु पदचतुष्टयेषु नामाख्यातौ पदसंज्ञयाभिहितौ। 'सुप्तिङ्न्तं पदम्।'[14] परन्तु पाणिनेरिदमभिमतं नास्ति यत् केवलं नामाख्यातयोरेव पदसंज्ञा भवति, न तु निपातोपसर्गयोः। तत्र एवमेवावधेयं यत् नामाख्यातनिपातोपसर्गेभ्यरुत्तरं यदा सुप्तिङौ प्रत्ययौ प्रयुज्येते, तदा ते पदसंज्ञकत्वेनाभिधीयन्ते। केचन पञ्चप्रकारकाणि पदानि स्वीकुर्वन्ति।[15] परन्तु भाषाविज्ञानदृष्ट्या पाणिनेः पदविषये तथा पदविभागविषये आलोचना सर्वजनग्राह्या।

- **नाम-**अभ्यासार्थकस्य म्ना-धातोरुत्तरं म्नायतेऽभ्यस्ते इति व्युत्पत्तौ नामशब्दस्य निष्पत्तिः। यास्काचार्येण नामविषये उदितम् – सत्त्वप्रधानानि नामानि।[16] महर्षिणा पाणिनिना पदविषये सूत्रचतुष्टयं प्रणीतम्। यथा- क. 'सुप्तिङ्न्तं पदम्'[17], ख. 'नः क्ये'[18], ग. 'सिति च'[19], घ.'स्वादिष्वसर्वनामस्थाने'[20] चेति। एतेषु सूत्रचतुष्टयेष्वन्तिमसूत्रत्रितयं प्रक्रियायां प्रयुज्यते। यथा – 'ऊर्णाया युस्' ।[21] अत्र ऊर्णा इत्यस्य पदसंज्ञा 'सिति च'[22] इत्यनेन भवति। परन्तु 'सुप्तिङ्न्तं पदम्'[23] इति सूत्रेण प्रतिपादितं पदं शास्त्रीयव्यवहारे साधारणव्यवहारे च प्रयुज्यते।

सुबन्तपदानि पञ्चधा विभज्यन्ते, तद्यथा- विशेष्यम्, विशेषणम्, सर्वनाम, अव्ययम्, क्रिया चेति।

- **आख्यातम्-**ऋक्प्रातिशाख्ये आख्यातस्वरूपमुच्यते- 'तदाख्यातं येन भावं स धातुः'[24] इति। शुक्लयजुर्वेदे उच्यते- 'क्रियाप्रधानमख्यातमिति'।

या सम्पद्यते निष्पाद्यते वा सैव क्रियेति। पुनः सैव क्रिया शारीरिक-मानसिकप्रयत्नरूपेणापि प्रतिपाद्यते।[25] क्रियावाचकत्वे सति भ्वादिगणपठितत्वं धातुत्वमिति।[26] भूतभविष्यत्कालावच्छिन्नत्वं क्रियात्वेन स्वीक्रियते। क्रियाया मूलरूपमेव धातुरूपेण परिगण्यते।[27]

---

[13] *निरुक्तम्,* १.१.१

[14] *अष्टाध्यायी, १.४.१४*

[15] साक्षात् क्रियाविशेषप्रकाशनाभावात्तदपि पञ्चमं पदमिति कैश्चित्। हेलराजः, *वाक्यपदीयम्,* ३.१.१

[16] *निरुक्तम्,* १.१

[17] *अष्टाध्यायी, १.४.१४*

[18] तत्रैव, १.४.१५

[19] तत्रैव, ४.१६

[20] तत्रैव, ४.१७

[21] तत्रैव, २.१२३

[22] तत्रैव, ४.१६

[23] तत्रैव, ४.१४

[24] ऋक्-प्रातिशाख्यम्, १२.१९

- **उपसर्गः**-पाणिनिना उपसर्गविषये सूत्रितम् - "उपसर्गाः क्रियायोगे"[28] इति। प्रादिगणीयनिपाताः क्रियायुक्ताः सन्तः उपसर्गसंज्ञकाः भवन्ति। यद्यपि उपसर्गाणां द्योतकत्वविषये वाचकत्वविषये च मतानैक्यं दृश्यते, तथापि भाविकाले पाणिनिवत् प्रायशः सर्वे वैयाकरणाः द्योतकत्वपक्षं समर्थयन्ति।
- **निपातः**- अष्टाध्याय्यां पाणिनिना प्राग्रीश्वरान्निपाताः[29] इति सूत्रात् विभाषा कृञि[30] इति सूत्रपर्यन्तं निपातासंज्ञा विधीयते। पाणिनीयपरम्परायामयं निपातः शुद्धनिपात-गति-कर्मप्रवचनीयभेदात् त्रिविधः।
- **प्रकृतिप्रत्ययप्रकरणम्**- भाषायां प्रकृतिप्रत्यययोः प्रयोजनीयत्वमनस्वीकार्यम्। एतद्द्वयमेव भाषायाः मौलिकमुपादानम्। प्रकृतिप्रत्यययोः सम्मिलितरूपं हि पदत्वेन व्यवह्रियते। परन्तु केवलमात्रं प्रकृत्याः केवलप्रत्ययस्य वा प्रयोगो न सम्भाव्यते।[31]
- **प्रकृतिः**-प्रकृतिरेव भाषायाः मौलिकोपादानभूता। प्रकृतिरियं प्रातिपदिक-धातुरूपेण द्विधा विभज्यते। प्रातिपदिकं पुनः पाणिनिना द्विधा विभक्तम्। यथा- अव्युत्पन्नप्रातिपदिकं[32] व्युत्पन्नप्रातिपदिकं[33] चेति।
- **प्रत्ययः**- प्रत्ययेन व्यवहारयोग्यसिद्धरूपाणां निर्माणं सम्भवति। महाभाष्यकारो वदति- अर्थसम्प्रत्याययति स प्रत्ययः।[34] साधारणतया धातु-प्रातिपदिक-सुबन्त-तिङन्तपदादीनां प्रयोगादनन्तरं प्रत्ययाः भवन्ति।[35]
- **लिङ्गप्रकरणम्**-इह जगति स्त्रीपुंनपुंसकाभ्यां सर्वे विभज्यते।[36] लिङ्गमिति पदेन चिह्नमिति बोध्यते।[37] शास्त्रीय-लौकिकत्वेन[38] लिङ्गमिदं द्विधा विभज्यते। लौकिके जगति अवयवादिरूपेण लौकिकलिङ्गं निर्णीयते।[39] अपरपक्षे शास्त्रीयक्षेत्रे शास्त्रीयलिङ्गं निर्णीयते।

---

[25] *महाभाष्यम्*, १.३.१।

[26] *पाणिनीयव्याकरणस्य भाषावैज्ञानिकाध्ययनम्*, पृ.१५६।

[27] क.क्रियावचनो धातुः। वार्तिकम् पा. १.३.१ ख.भाववचनो धातुः। तत्रैव।

[28] *अष्टाध्यायी*, १.४.५९

[29] तत्रैव, ४.५६

[30] तत्रैव, ४.९८

[31] *महाभाष्यम्*, ३.१।

[32] तत्रैव,१.२.४५

[33] तत्रैव, २.४६

[34] तत्रैव, १.१. /

[35] तत्रैव, ३.१.२

[36] स्त्रीपुंनपुंसकत्वेन भिन्नं येन चराचरम्। लिङ्गं जयति तन्नित्यमशेषागमकारणम्।। *लिङ्गानुशासनम्* – १।

[37] लिङ्गं चिह्नम्। स्वोपज्ञवृत्तिः, *लिङ्गानुशासनम्*, - ४०।

[38] *पाणिनीयव्याकरणस्य भाषावैज्ञानिकाध्ययनम्*, पृ - २५४

- **वचनप्रकरणम्-** वचनपदस्यार्थो भवति संख्येति।[40] वचनमिदं त्रिधा विभज्यते। एकवचनम्,[41] द्विवचनम्,[42] बहुवचनञ्चेति।[43] बहुषु क्षेत्रेषु वचनादीनां प्रयोगे व्यतिक्रमो दृश्यते।
- **पुरुषप्रकरणम्-**संस्कृतभाषायां पुरुषत्रयं स्वीकृतम्। स च पुरुषः प्रथम-मध्यम-उत्तमभेदेन त्रिधा विभज्यते।

❖ **वाक्यपदीयग्रन्थस्य रूपतात्त्विकविश्लेषणम्-**

• **भर्तृहरिदृष्ट्या पदम्-**भर्तृहरिणा वाक्यपदीये एकमेव शब्दब्रह्मतत्त्वं स्वीकृतम्। अस्मादेव शब्दब्रह्मणोऽस्य जगतः उत्पत्तिः। तन्मते शब्दतत्त्वमिदमनादिनिधनमक्षररूपञ्चेति।[44] यतो हि शब्दस्य व्यवहारिकं रूपं नास्तीति,[45] कृत्वा शब्दोऽयं प्रायोगिकत्वेन अर्थात् पदरूपेण लोके प्रकाश्यते। यद्यपि आचार्येणानेन पदानां वास्तविकी सत्ता न स्वीकृता, तथापि वाक्यपदीयस्थिते पदकाण्डे प्रकीर्णकाण्डे वा पदविषयकाणां विज्ञानसम्मतविविधतत्त्वानां संयोजनं क्रियते। शब्दस्य प्रायोगिकस्थितेर्विचारावसरे एव नामाख्यातोपसर्गनिपातानां प्रसङ्गः समागच्छति।

• **नामाख्यातौ**-भर्तृहरिमते नामाख्यातयोर्मध्ये नास्ति कोऽपि भेदः। तन्नये तु 'सर्वं सत्त्वपदं शुद्धं यदि'[46]। अत्रेदमवधेयं यत् तेन साधनसिद्धावस्थारूपेण नामाख्यातयोर्मध्ये भेदो स्वीक्रियते। तन्मते, सिद्धावस्था सत्तायाः सूचिका तथा साधनावस्था भावस्य सूचिका भवति। परन्तु परिशेषे एवमपि स्वीक्रियते यत् अस्मिन् जगति व्यक्तिर्यथा आचार्य-पितृ-पुत्राद्युपाधिभिर्ज्ञायते, तथैव अर्थात्माऽपि नामाख्यातरूपैः अवभासते।[47]

• **उपसर्गः**-उपसर्गाणां प्रयोगः सदा क्रियया सह भवति। वाक्यपदीयकारेण भर्तृहरिणापि एतत् प्रदर्श्यते यत् अट्-आडादीनामागमानां प्रयोगो धातूपसर्गयोर्मध्य एव भवति। अर्थात् धातोः पूर्वमेव उपसर्गादीनां प्रयोगो भवति।[48] वस्तुतः उपसर्गाणां स्वातन्त्र्येण कोऽपि अर्थो न भवति। भर्तृहरिणा एतदेव मन्यते यत् धातूनां क्रियारूपेण प्रयोगात्प्राग्यथा धातुत्वकर्मभावयोः स्थापना मानसिकावस्थायां भवति, तद्वद्धातूपसर्गयोरर्थगतैक्यं मनसि एव जायते। धातूपसर्गयोराभ्यन्तरभेदः केवलं पदग्रहणपरकप्रवृत्तौ दृश्यते।

---

[39] लोक्यते येन शब्दार्थो लोकस्तेन च उच्यते। व्यवहारोऽथवा वृद्धव्यवहर्तृपरंपरा।। *उद्योतटीका*।

[40] वचनं संख्या, *सिद्धान्तकौमुदी*, ५३२।

[41] *अष्टाध्यायी, १.४.२२*।

[42] तत्रैव।

[43] तत्रैव, १.४.२१।

[44] *वाक्यपदीयम्*, (ब्रह्मकाण्डम् -१.१.१)।

[45] *भाषातत्त्व और वाक्यपदीय*, पृ १२८।

[46] *वाक्यपदीयम्*, १.३४५।

[47] तत्रैव, ८.६६।

[48] *वाक्यपदीयम्*, १.१०६।

- **निपातः**:- भर्तृहरिणा प्रत्ययेन सह निपातानां तुलना विहिता । प्रत्ययो वाचकत्वे[49] इति। निपातानामेवमनिश्चयतां स्वीकृत्य वाक्यपदीये हरिणा निगदितं – 'निपाताः द्योतकाः'[50]।

- **प्रत्ययः**:-निपातप्रसङ्गेनैव प्रत्ययानामुल्लेखो वर्तते।[51] पाणिनिवत् भर्तृहरिणापि प्रत्ययानामर्थवत्ता स्वीक्रियते।[52] परन्तु एते प्रत्ययाः स्वातन्त्र्यरूपेण न प्रयोक्तुं शक्याः। प्रत्ययार्थानां लौकिकप्रयोगदृष्ट्या कापि उपयोगिता तथा किमप्यस्तित्वं नास्ति।[53]

❖ **रूपतत्त्वविषये पाणिनेर्भर्तृहरेश्च मतविवेकः॥**

1. पाणिनिदिशा उपसर्ग-निपात-कर्मप्रवचनीयानामव्ययेष्वन्तर्भावो भवति। किन्तु भर्तृहरिणा पञ्चप्रकाराणां पदानां पृथक्तया स्वतन्त्र्यतया वास्तित्वं स्वीकृतम्।[54] तन्मते तु पदविभाजनं सम्यक्तया एवं कर्तव्यम्, अन्यथा तद्विभाजनं ह्यस्वाभाविकतया प्रतीयते।
2. पाणिनिना उपसर्ग-निपात-कर्मप्रवचनीयानां पदत्वं तथा अव्ययत्वं स्वीकृतम्। तेन उपसर्ग-निपात-कर्मप्रवचनीयाः प्रातिपदिकेषु परिगण्यते।[55] परन्तु तेन एतानि संज्ञासम्बद्धत्वेन तथा क्रियासम्बद्धेन न मन्यन्ते। हरिणापि एतेषां पदत्वं स्वीकृतम्। किञ्च तेन एतेषां संज्ञाक्रिययोः तुल्यमर्यादा प्रदीयते।[56] तन्मते अर्थात्मकतया तथा प्रायोगिकतया एतेषां स्वातन्त्यं स्वीकरणीयम्।
3. पाणिनिना द्वे पदे स्वीकृते। परन्तु भर्तृहरिणा पञ्चप्रकारकाणि पदानि स्वीकृतानि।[57]
4. पाणिनिना प्रत्ययानामर्थवत्ता स्वीकृता।[58] भर्तृहरिणापि 'जायते प्रत्ययोऽर्थेभ्यस्तथैवोद्देशजा मतिः'[59] इत्यनेन प्रत्ययस्य अर्थवत्ता स्वीकृता। परन्तु तेन केवलमेव शास्त्रीयदृष्ट्या हि प्रत्ययार्थवत्ता स्वीकृता। तन्मते लौकिकदृष्ट्या प्रत्ययानां कापि उपयोगिता नास्ति।[60]
5. पाणिनिना सुबन्त-तिङन्तयोर्मध्ये नामाख्यातादीनां ग्रहणं क्रियते। परन्तु हरिणा नामाख्यातादीनां भेदो नाङ्गीकृतः। तन्मते एकेनैव अर्थात्मना नामाख्याताभ्यां विभिन्नरूपं गृह्यते।[61]

---

[49] तत्रैव, २.१९६।

[50] तत्रैव, २.१९४।

[51] तत्रैव, १८२।

[52] तत्रैव, १८४।

[53] तत्रैव, २.२१३।

[54] *भाषातत्त्व ओर वाक्यपदीय*, पृ – १२७।

[55] *अष्टाध्यायी*.१.२.४५।

[56] *भाषातत्त्व ओर वाक्यपदीय*, पृ – १२८।

[57] *वाक्यपदीयम्*, ३.१.१।

[58] *अष्टाध्यायी*, १.२.४५।

[59] *वाक्यपदीयम्*, ३.३.५३।

[60] तत्रैव, २.२१३।

पाणिनिपरम्परायां सुबन्तेषु विशेष्य-विशेषण-सर्वनाम-अव्यय-क्रियादयो गण्यन्ते। विशेष्यपदस्यापि व्यक्तिवाचक-गुणवाचक-वस्तुवाचक-क्रियावाचकरूपैर्भेदोऽस्ति। भर्तृहरिणा विशेषण-सर्वनाम-व्यक्तिवाचक-गुणवाचक-भाववाचक-संख्यावाचकादयः सर्वे शब्दाः द्रव्याश्रितरूपेण मन्यन्ते।[62] संख्यावाचकशब्दविषये उच्यते- संख्यावान् सत्त्वभूतोऽर्थः सर्व एवाभिधीयते।[63]

पाणिनेः अष्टाध्यायी खलु प्रक्रियाक्रमस्य ग्रन्थः। तेन प्रक्रियायां तथा व्यवहारक्षेत्रे च पदानां गणना क्रियते। परन्तु भर्तृहरेः वाक्यपदीयन्तु दर्शनक्रमस्य ग्रन्थः। तेन पदानां वास्तविकसत्तास्वीकृता। तन्मते वाक्यान्तर्गतानां पदानां तथा पदस्थितानां प्रकृति-प्रत्ययानां कापि स्वतन्त्रसत्ता नास्ति। तद्धि-

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च।
वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन॥[64]

अविभाज्याद्वाक्यादेव बोधसौकर्य्यार्थं पदविभागस्य कल्पना क्रियते। सा कल्पनाप्रक्रिया तेन अपोद्धारत्वेनाङ्गीक्रियते।[65]

ग्रन्थपञ्जी

कौण्डभट्टः. *वैयाकरणभूषणसारः.* सम्पा.आद्याप्रसादमिश्रः.वाराणसी: सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, 1988.

घोषः, शुभ्रा वसु. *भाषाविज्ञान ओ संस्कृतभाषातत्त्व.* प्रथम.कोलकाता: संस्कृत वुक डिपो, 2010.

चक्रवर्ती, सत्यनारायण. *पाणिनीय शब्दशास्त्र.* प्रथमप्रकाश.कोलकाता: संस्कृत पुस्तक भाण्डार, 2003.

तैत्तिरीयप्रातिशाख्यम्. एशियाटिक् सोसाइटि अव् वेङ्गल, 1872.

द्विवेदी, कपिलदेव. *भाषाविज्ञान एवं भाषाशास्त्र.* चतुर्थसंस्करण.वाराणसी: विश्वविद्यालयप्रकाशन, 1984.

---

[61] *वाक्यपदीयम्*, ३.८.६६।

[62] तत्रैव, ३.५.२।

[63] तत्रैव, ३.११.१।

[64] तत्रैव, १.७४।

[65] तत्रैव, १.२४।

नागेशः. *परमलघुमञ्जुषा.* सम्पा.जयशंकरलाल त्रिपाठी.तृतीयसंस्करण.वाराणसी: चौखम्बा कृष्णदास अकाडेमी, विक्रमसंवत् 2061.

नागेशः. *परिभाषेन्दुशेखरः.* सम्पा.पण्डितश्रीसदाशिवशास्त्री.पञ्चमसंस्करण.वाराणसी: चौखम्बा संस्कृतसंस्थान, 2001.

पतञ्जलिः. *व्याकरणमहाभाष्यम्* नवाह्निकातिरिक्तप्रथमोऽध्यायः. सम्पा.हरिनारायण तिवारी.वाराणसी: चौखम्बा सुरभारती प्रकाशन, 2014.

पाणिनिः. *अष्टाध्यायी.* सम्पा.श्रीगोपालदत्त पाण्डेयः.द्वितीय संस्करण.वाराणसी: चौखम्बा सुरभारती प्रकाशन, 1981.

भर्तृहरिः. *वाक्यपदीय,* ब्रह्मकाण्ड. सम्पा.विष्णुपद भट्टाचार्य.द्वितीयप्रकाश.कोलकाता: पश्चिमबङ्ग राज्य पुस्तक पर्षद्, 2007.

यास्काचार्य. *निरुक्तम्.* सम्पा.उमाशंकरशर्मा.पञ्चमसंस्करण.वाराणसी: चौखम्बा विद्याभवन, 1981.

वामनजयादित्यौ. *काशिकावृत्तिः* न्यासपदमञ्जरीव्याख्योपेता. सम्पा. स्वामी द्वारिकादासशास्त्री आचार्य-कालिकाप्रसादशुक्लश्च. 1984. सुधिप्रकाशनम्, 1984.

शशिभूषणमिश्र. *पाणिनीयव्याकरणस्य भाषावैज्ञानिकाध्ययनम्.* प्रथममुद्रण. कोलकाता: द्य वनारस् मार्केन्टाइल, 2012.

शाकटायनः. *ऋक्तन्त्रम्.* सम्पा.सूर्यकान्तः मेहेरचान्दलक्षणदासश्च.दिल्ली, 1970.

शौनकः. *अथर्वप्रातिशाख्यम्.* द्वितीयसंस्करण.वाराणसी: चौखम्बा संस्कृत पुस्तकालय, 1962.

हालदारः गुरुपदः. *व्याकरणदर्शनेर इतिहास.* कोलकाता: संस्कृत वुक् डिपो, 2006.

मुद्राराक्षसे दैवप्रभावः – एका आलोचना

अनन्यासरकारः[1]

1. उपोद्घातः

मुद्राराक्षसं नाम नाटकं संस्कृतनाट्यकाव्ये मूर्धन्यतमं शिखामणिरिव प्रकाशमानं दृश्यते। नाटकस्यास्य रचयिता महाकविः विशाखदत्तश्च आसीत्। विशाखदत्तस्य एकमेव नाटकमस्य स्थानं नाटककारेषु प्रधानं प्रमापयति। स्वग्रन्थस्य प्रस्तावनायां दत्तपरिचयेन कवेरस्य राजवंशोद्भवत्वं प्रकाश्यते, अतः एव अस्य राजनीतिनिपुणत्वं स्वाभाविकम्। स च महाराजपदवीविभूषितः सामन्तस्य बटेश्वरदत्तस्य पौत्रो महाराजपृथुभास्करदत्तस्य पुत्रश्च आसीत्। यतो हि प्रस्तावनायां सूत्रधारमुखेन स्वपरिचयं प्रस्तौति- "आज्ञापितोऽस्मि परिषदा यथाद्य त्वया सामन्तबटेश्वरदत्तपौत्रस्य महाराजभास्करदत्तसूनोः कवेर्विशाखदत्तस्य कृतिरभिनवं मुद्राराक्षसं नाम नाटकं नाटयितव्यम्[2]" इति। नाटकेऽस्मिन् चाणक्यराक्षसयोः द्वन्द्वोपस्थापने बहुषु स्थलेषु नाट्यकारेण दैवप्रभावस्य उल्लेखः कृतः, यैः दैवप्रभावैः चाणक्यः राक्षसात् अजेयः आसीत्। लघुप्रबन्धेऽस्मिन् मुद्राराक्षसनाटकोपसर्जने दैवघटनानां माहात्म्यम् अल्पीयसा वचसा यथामति दिङ्मात्रं समवलोक्यते।

2. नाटकस्य नामकरणम्

"नाम कार्यं नाटकस्य गर्भितार्थप्रकाशकम्[3]" इति साहित्यदर्पणे उक्तवचनानुसारेण गर्भितार्थप्रकाशकं नाटकस्य नाम कार्यम्। यथा नाट्यकारैः क्रियते। महाकवेः कालिदासस्य अभिज्ञानशाकुन्तलम्, भवभूतेः उत्तररामचरितम्, शूद्रकस्य मृच्छकटिकम्। तथैव मुद्राराक्षसमिति गर्भितार्थप्रकाशकमेव। मुद्रया निगृहितो गृहितो राक्षसो यस्मिन् नाटके तद् मुद्राराक्षसमिति। मुद्रयैव चाणक्येन राक्षसोऽत्र निगृह्यते, तस्मान्नामकरणस्य सार्थक्यमेव विद्योतते।

3. कथावस्तुमूलम्

मुद्राराक्षसस्यास्य कथावस्तु मूलरूपेण श्रीमद्भागवतमहापुराणे, विष्णुपुराणे, इतिहासेषु लोककथायां च अवलोक्यते, किन्तु नैतादृक् किञ्चिद्भिन्नतया प्रसिद्धम्। महाकविना विशाखदत्तेन सा कथा मूलतः परिगृह्य स्वकल्पनाशक्त्या लोकप्रसिद्ध्या च संस्कृत्य नाट्यानुरूपेण परिणमिता। मुद्राराक्षसस्य कथा बृहत्कथातः परिगृहीतेति अवलोककारस्य धनिकस्य मतम्। तद्यथा- तत्र बृहत्कथामूलं मुद्राराक्षसम्-

चाणक्यनाम्ना तेनाथ शकटाख्यगृहे रहः।
कृत्यां विधाय सप्ताहात् सपुत्रो निहतो नृपः॥

---

[1] शोधच्छात्रा, संस्कृतविभागः, कलकाताविश्वविद्यालयः, पश्चिमवङ्गः।

[2] *मुद्राराक्षसम्*, पृष्ठासंख्या - 6

[3] *साहित्यदर्पणः*, श्लोकसंख्या -6.142, पृष्ठासंख्या – 402

योगानन्दे यशःराज्ये पूर्वनन्दसुतस्ततः।
चन्द्रगुप्तः कृतो राजा चाणक्येन स्वतेजसा[4]॥

इति बृहत्कथायां सूचितम्। एतेन मुद्राराक्षसस्य बृहत्कथामूलत्वं नितरां स्पष्टमेव।

4. मुद्राराक्षसे नायकः

नाटकस्यास्य नायकः चन्द्रगुप्तः चाणक्यो वा इत्यत्र सन्ति विदुषां नैकाः विप्रतिपत्तयः। केचित् प्रधानफलाश्रयतया चन्द्रगुप्तं नायकं मन्यन्तेऽपरे कथातन्तोः सञ्चालनप्रधानतया चाणक्यमेव नायकं स्वीकुर्वन्ति। केषाञ्चिन्मते नाटकस्यास्य चन्द्रगुप्तः एव धीरोदात्तनायकः, तदर्थमेव चाणक्यस्य सर्वे प्रयत्ना भवन्ति। धीरोदात्तनायकस्य लक्षणमुक्तं साहित्यदर्पणे-

अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः।
स्थेयान्निगूढमानो धीरोदात्तो दृढव्रतः कथितः[5]॥ इति।

केचिच्चाणक्यमेव नेतारं मन्यन्ते तस्यैवात्र प्राधान्यात्। नाटकेऽस्मिन् राक्षसनामानं मन्त्रिणं वशीकर्तुमेव सर्वे व्यापाराः चाणक्यकृताः इति दर्शिताः सन्ति। वस्तुतस्तु चिन्त्यमाने चाणक्य एव नायकः सिद्ध्यति। मुद्रया निगृहीतो राक्षसो यत्र तन्मुद्राराक्षसमिति व्युत्पत्तौ मुद्राराक्षसप्रवर्तकस्य नायकत्वं सिद्धप्रायम्। सत्यव्रतसिंहद्विजेन्द्रनाथावपि मतमिदं समर्थयतः[6]।

वस्तुतः चन्द्रगुप्त एवास्य नाटकस्य नेता। यद्यपि चन्द्रगुप्तः प्रख्यातवंशो राजर्षिर्नास्ति, तथापि राजा विक्रमशाली दयादाक्षिण्यादिगुणयुक्तो विद्याविनयसम्पन्नः चास्ति। यथा नायकस्य लक्षणमुक्तं तथा सर्वं सङ्घटते चन्द्रगुप्ते। तत्र नायकस्य लक्षणं साहित्यदर्पणे-

त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही।
दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यशीलवान्नेता[7]॥

एवं गुणसम्पन्नो नेता नायको भवति। चन्द्रगुप्तस्यापि एतादृशगुणवत्त्वात् नाटकेऽस्मिन् स एव नायक इति विदुषां प्रतिपत्तिः।

5. मुद्राराक्षसस्य विशिष्टता

महाकविविशाखदत्तप्रणीतं सप्ताङ्कविभक्तं पञ्चसन्धिसमन्वितम् अतिकौतुकपूर्णं सामाजिकहृदयावर्जकं नाटकमिदमस्ति। नाटकस्य लक्षणमुक्तं साहित्यदर्पणकृता विश्वनाथेन-

---

[4] *दशरूपकम्*, प्रथमः प्रकाशः, पृष्ठासंख्या – 402
[5] *साहित्यदर्पणः*, श्लोकसंख्या, 3.32, पृष्ठासंख्या – 96
[6] *संस्कृतसाहित्येतिहासः*, पृष्ठासंख्या - 108
[7] *साहित्यदर्पणः*, श्लोकसंख्या, 3.30, पृष्ठासंख्या – 96-97

नाटकं ख्यातवृत्तं स्यात्पञ्चसन्धिसमन्वितम्।
विलासद्‌र्ध्यादिगुणवद्युक्तं नानाविभूतिभिः॥
सुखदुःखसमुद्भूतिनानारससमन्वितम्।
पञ्चादिका दशपरास्तत्राङ्काः परिकीर्तिताः॥
प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान्।
दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः॥
एक एव भवेदङ्गी शृङ्गारो वीर एव वा।
अङ्गमन्ये रसाः सर्वे कार्यो निर्वहणेऽद्भुतः[8]॥ इति।

मुद्राराक्षसं नाम नाटकं विशुद्धराजनीतिपूर्णमस्ति। संस्कृतरूपककाराः यां प्रणयधारामवलम्ब्य स्वस्वरूपकाणि चिरात् सृजन्तोऽदृश्यन्त तां सर्वथा अवज्ञाय रूपकस्यास्य कर्ता स्वं रूपकं स्रष्टुमुपक्रमते। स स्वकीयान्नाटकात् विदूषकं बहिश्चकार, वातावरणं च प्रणयस्य विध्वंसयामास।

असत्यामपि शृङ्गारकथायाम् असत्यपि च प्रणयव्यापारकाले नाटकमिदम् अलौकिकेन सरसत्वेन आमूलचूडम् आप्यायितं वर्तते। ओजोगुण एवात्र तथा समृद्धो यथा सामाजिकमनोरञ्जनाय वस्त्वन्तरं नापेक्षते। नाटकेऽस्मिन् माधुर्यस्य सौन्दर्यस्य चाभावो दृश्यते। वीररसप्रधानेऽस्मिन् रूपके करुणशृङ्गाररसौ न दृष्टिगोचरतां प्राप्येते। यद्यपि रूपकमिदं वीररसप्रधानं परं नान्यानि वीररसाश्रयीणि रूपकाणि तुलामस्य अधिरोहन्ति। भासस्य प्रतिज्ञायौगन्धरायणं कूटनीतिविषयकं सदपि नास्य साम्यं कर्तुमर्हति यतस्तत्र ओजस्विता सा न दृश्यते या ह्येतदीयाम् ओजस्वितां तुलयितुं प्रभवेत्। नाटकमिदं मुद्राराक्षसम् आदितः समाप्तिं यावत् स्वं रूपकमोजस्विता-पौरुषोर्जस्वलताभिः पूर्णतया पूरयाम्बभूव।

नात्र रूपके स्त्रीपात्रमेकमपि वीक्ष्यते, सप्तमेऽङ्के केवलं चन्दनदासस्य जाया रङ्गमञ्चे प्रविशन्ती दृष्टा भवति परन्तु सा नाटकस्य प्रमुखेषु कार्येषु लेशमात्रं सम्बन्धं न निदधाति। सत्यपि स्त्रीपात्राभावे, असत्यपि च हास्यरसकोविदे विदूषके नाटकं नाकर्षणेन हीनं न च रोचिष्णुत्वेन शून्यम्।

अस्मिन् नाटके पात्राणां चरित्रं विशिष्टतां भजते। चरित्रचित्रणं रूपकेऽस्मिन् ललितं नितान्तम्। तद्विलोक्य रूपककारस्य लेखन्याः अस्यामपि दिशायां विस्मयकारिणी नैपुणी विदिता जायते। कुशलो नाटककारस्तथात्वेन पात्राणां सृष्टिञ्चकार यथात्वेन तानि अन्यस्य पात्रस्य चारित्रिकचारुताया विकासे सहायकानि स्युः। चाणक्यराक्षसयोः युगलं चन्द्रगुप्तमलयकेतोश्च द्वन्द्वम् एवंविधमेव घटते। चाणक्यराक्षसौ इति द्वेऽपि इमे पात्रे प्रत्यसूयायां तं तं विशेषम् उन्मीलयन्तौ दृश्येते। या विशिष्टता हृदयसम्बन्धिनी राक्षसे विद्यते सा चाणक्ये न, या च चाणक्ये बुद्धिविषयीनि विलक्षणता विद्यते सा राक्षसे न। परमुभावपि बुद्धिविशेषविलसतौ स्तः सुसचिवे अपेक्षिता गुणाः उभयत्र बीजतया प्रमुखीभवन्तः दृष्टा जायन्ते। द्वावपि राजनीतिक्षेत्रस्य अद्भुतौ कुशलक्रीडाशीलौ स्तः।

---

[8] *साहित्यदर्पणः*, श्लोकसंख्या – 6.7-10

नूनं महाकविना विशाखादत्तेन स्वस्वभावानुसारं कथावस्तु प्रसिद्धमादाय स्वप्रतिभया किञ्चित्परिकल्प्य संशोध्य चाद्भुतं सर्वजनग्राह्यं नाटकमिदं चक्रे। तस्य एतदेकमेव कृतिरत्नं दिगन्तव्यापि कीर्तियुतम्। 'दैवमविद्वासः प्रमाणयन्ति, विद्वांसोऽपि अविकत्थना भवन्ती[9]'त्यादयो सूक्तयः स्थाने प्रयुक्ता अनुपमां शोभां भजन्ते।

6. दैवघटनानाम् उपयोगिता

कस्यापि कथावस्तुनः रचनायां दैवघटनायाः माहात्म्यम् अनस्वीकार्यं विद्यते। मन्ये दैवघटनां विना कथा सम्यक् परिचालयितुम् अशक्या। तथैव मुद्राराक्षसे अपि। अथेदानीं मुद्राराक्षसे समागतानाम् आकस्मिकानां दैविकघटनानाम् उपयोगिता विविच्यते। महाकविना विशाखदत्तेन कृतं नाटकमिदं घटनाप्रधानम् इति तु सर्वजनविदितम् एव। घटनाप्रधानतया एव सामाजिकानां मनो रमते अत्र अतीव गीतवाद्यादीन् विनापि। कौतूलहं च उत्पद्यते राक्षसचाणक्ययोः कस्य जय इति। चाणक्यस्य कूटनीतिः राक्षसस्य च सहृदयतापरित्यागो धैर्यं स्वामिभक्तिश्च। चन्दनदासस्य महान् परित्यागः, चन्द्रगुप्तस्य कार्यप्रणाली, मलयकेतोश्च मूर्खता चैष सर्वः सामाजिकानां हृदये अद्भुतः कोऽपि भावः प्रभवति।

प्रथमाङ्कस्य अन्ते सूत्रधारे निष्क्रान्ते चाणक्यः प्रविश्य राक्षसस्य निग्रहाय स्वकृतप्रयत्नान् स्वयमेव विज्ञापयति। गुप्तसूचनायाः सङ्कलनाय चरस्य हस्ते चाणक्येन एव यमपटः प्रदत्तः। यमपटश्च कश्चित् प्राणिविपाकनरकलोकचित्राणां प्रदर्शनाय पटविशेषः, तमेव प्रदर्श्य स गुप्तचरः नगरे भ्राम्यन् गुप्तरूपेण सूचनाम् आकलयति। किमर्थमस्य प्रसङ्गस्य योजना चेदुच्यते प्रसङ्गस्य अस्य महान् उपयोगः। चरः पाटलिपुत्रस्य वृतान्तं निवेदयति चाणक्यसमीपे। तदनुसारं चाणक्यस्य अग्रिमः उद्योगः भवति।

चरश्च चन्दनदासस्य गृहात् प्राप्तां राक्षसमुद्रिकां सर्ववृत्तान्तनिवेदनपूर्वकं चाणक्यस्य हस्ते अर्पयति। अनयैव मुद्रिकया चाणक्येन राक्षसो गृहीतः इति। तस्मादेव नाटकस्य अस्य नाम मुद्राराक्षसमिति प्राभवत्। तदुत्तरमेव चाणक्यस्य विशेषप्रयत्नाः प्रभवन्ति। चरेण मुद्रा प्रदत्ता तयैव राक्षसः गृहीतः इति तु दैवादेव इति तु निश्चप्रचम्।

द्वितीयाङ्के राक्षसः यदा सम्पूर्णं स्वकृतम् उद्योगं भक्त्या विचिन्तयति स्वामिनं नन्दं तदैव मलयकेतुना प्रेषितः कञ्चुकी मलयकेतुना प्रदत्तेन आभूषणेन सह प्रविशति। प्रविशन्नेव कञ्चुकी स्वजराम् आलक्ष्य कथयति ममेव वृद्धावस्था मयि स्थितकामवासनां नाशितवती धर्मञ्च प्रतिष्ठापितवती किन्तु धनलोभात् क्रियमाणा मलयकेतोः सेवा जरास्थापितधर्मबुद्धिं न जेतुं शक्नोति।

राक्षसश्चन्द्रगुप्तं नाशयितुं बहु चेष्टते परन्तु सर्वत्रैव विफलो भवति। कञ्चुकीवाक्येनैव राक्षसस्य विफलता परिस्फुटते-

कामं नन्दमिं प्रमथ्य जरया चाणक्यनीत्या यथा।

---

[9] *मुद्राराक्षसम्*, पृष्ठासंख्या – 204

धर्मो मौर्य इव क्रमेण नगरे नीतः प्रतिष्ठां मयि॥
तं सम्प्रत्यप्रचीयमानमनु मे लब्धान्तरं सेवया।
लोभो राक्षसवञ्जायाय यतते जेतुं न शक्नोति च[10] ॥ इति।

अनेन वाक्येन कविः राक्षसप्रयोगस्य वैयर्थ्यं सूचयति। राक्षसश्च चन्द्रगुप्तं विनेष्टुं यद्यपि उपक्रमते तथापि दैवमेव तत्प्रतिकूलं भवति, अत एव स्थाने स्थाने तेन कृताः उद्योगाः व्यर्था भवन्ति। न खलु केवलया चाणक्यनीत्या राक्षसो निगृतोऽपि तु दैवेनापीति स्फुटमेव अत्रोपलभ्यते। स्वयमेव राक्षसो वक्ति-

इष्टात्मजः सपदि सान्वय एव देवः
शार्दूलोपतमिव यं परिपोष्य नष्ट।
तस्यैव बुद्धिविशिखेन भिनद्मि मर्म
वर्मीभवेद्यदि न दैवमदृश्यरूपम्[11] ॥ इति।

कञ्चुकिनः समीपात् मलयकेतोः प्रदत्तम् आभरणं राक्षसेन स्वीकृतम्। एतस्याः अपि घटनायाः दैवमाहात्म्यं न उपक्षेतुं शक्यते। दैवाद् एतदेव आभरणं पारितोषिकरूपेण राक्षसः सिद्धार्थकाय प्रयच्छति। एतदेव दैवकृतः उद्योगः कौटिल्यप्रयत्नं पोषयति। यद्यपि अलङ्कारं विनापि लोख एव पर्याप्तः कुमारापगाराय तथापि अभूषणेन सह लेखदर्शनेन दृढो विश्वासः जायते कुमारस्य। अन्यथा धूर्तलोख एष इति मत्वा लोखार्थम् उपेक्षेत। आभूषणं विलोक्य यति धूर्तलोखितः अयं स्यात् तर्हि मया प्रदत्तं कथमस्य पार्श्वे स्यात् इत्येवं विश्वासदार्ढ्याय आभूषणप्रदानरूपैषा घटना समायोजिता विशाखदत्तेन स्वनाटके। तच्च दैवादेव राक्षसं प्रति मलयकेतोः अविश्वासः उत्पादितः। तेन कुमारस्य राक्षसं प्रति दृढनिष्टा अपगता।

द्वितीयाङ्के अहितुण्डिकस्य गुप्तप्रवेशरूपा घटनापि महोपयोगिनी। अनया घटनया ज्ञायते यद् राक्षसद्वारा चन्द्रगुप्तस्य विनाशाय कियन्तः प्रयोगाः कृताः। अत्रापि केचित् प्रयत्नाः चाणक्येन विफलीकृताः केचिच्च दैवेन विफलीजाताः इति तु स्फुटमेव। राक्षसप्रयुक्ता विषकन्या चन्द्रगुप्ताय चाणक्येन पर्वतेश्वरे सा योजिता सापि दैवकृता एव।

तोरणपातनेन चन्द्रगुप्तस्य योजनापि दैवेनैव पर्वतके दैवयोगाद् गतार्था। एवमालोचनेन ज्ञायते यत् सर्वे राक्षसप्रयत्नाः चाणक्यादपि अधिकं दैवेन एव विफलीकृताः। कथयति चाणक्यः - सखे! पश्य दैवसम्पदं दुरात्मनः चन्द्रगुप्तहतकस्य कुतः?-

कन्या तस्य वधाय या विषमयी गूढं प्रयुक्ता मया।
दैवात्पवर्तकस्तया स निहतो यस्तस्य राज्यार्द्धहृत्॥
ये शास्त्रेषु रसेषु च प्रणिहितास्तैरेव ते घातिता।
मौर्यस्यैव फलन्ति पश्य विविधश्रेयांसि मन्त्रीतयः[12] ॥ इति।

---

[10] *मुद्राराक्षसम्*, श्लोकसंख्या – 2.9, पृष्ठासंख्या - 95
[11] तत्रैव, श्लोकसंख्या – 2.16, पृष्ठासंख्या - 123

एवम् आहितुण्डिकप्रसङ्गेन राक्षसकृतस्य उद्योगस्य तद्वैफल्यस्य च सर्वाः सूचनाः प्राप्यन्ते।

7. उपसंहृतिः

सर्वेष्वपि संस्कृतरूपकेषु विशाखदत्तकृतं मुद्राराक्षसनाटकं स्वकीयं महत्त्वविशिष्टम् अवदानं राजते। यद्यपि वेणीसंहारनामकं नाटकमपि भूयसा प्रोक्तगुणशालि परं तत्र युद्धस्य वातावरणं दर्शकानां मनसि किमपि विचित्रं भीतिमिश्रं वैरस्यं सृजति। अस्मिंस्तु विनैव युद्धादार्येण जितं दुर्जयं परबलमिति परा तृप्तिः। यथा आधुनिकेषु उपन्यासेषु कथातन्तुः वाचकान् आकर्षति मध्ये विरन्तुम् अवसरं न ददाति, तथैवात्र पाठकानां जिज्ञासा कदापि मध्ये न विश्रान्तिम् आसादयति। कुतूहलवर्धकम् आख्यानं नाट्यस्य जीवितं तदत्र पर्याप्तभावेन अवस्थितमिति चमत्कारि नाटकमिदम्। सुघटितकथावस्तुनः योजनेन व्यक्तित्वपूर्णपात्राणां चरित्रचित्रणेन ओजस्विगुणयुक्तेन नाटकमिदम् अद्वितीयमिति सर्वसम्मतम्। किञ्च अत्र वर्णिताभिः दैवघटनाभिः नाटकमिदं परिपूर्णम् इत्यत्र अस्ति वा कस्यचित् विदुषः विप्रतिपत्तिः? एवं समासेन मुद्राराक्षसनाटकोपसर्जने समागतानां दैवघटनानां माहात्म्यं यथामति वर्णितम् इति शम्।

सहायकग्रन्थसूचिः

उपाध्याय, बलदेव. *संस्कृतवाङ्मय का बृहद् इतिहास* (षष्ठः खण्डः), (सम्पा.) जयमन्तमिश्र, लखनऊ, उत्तरप्रदेश संस्कृत संस्थान, २००३.

मिश्र, रामचन्द्र. *संस्कृतसाहित्येतिहास,* वाराणसी, चौखम्बा विद्याभवन, २०१०.

मुख्योपाध्याय, गोपेन्दु. *संस्कृत साहित्येर इतिहास* (वङ्गभाषीयो ग्रन्थः), कलिकाता, इउनाईटेड वुक एजेन्सि, २०१३.

वन्द्योपाध्याय, धीरेन्द्रनाथ. *संस्कृत साहित्येर इतिहास* (वङ्गभाषीयो ग्रन्थः), कलिकाता, पश्चिमवङ्ग राज्य पुस्तक पर्षद्, २०१५.

वसु, अनिलचन्द्र. *दशरूपक* (प्रथम संस्करण), कलिकाता, संस्कृत-वुक-डिपो, २०१२.

विशाखदत्तः. *मुद्राराक्षसम्* (चतुर्थसंस्करणम्), जीवानन्द-विद्यासागर-भट्टाचार्यः (व्याख्याकारः), कलिकाता, गोवर्धनयन्त्रम्, १९११.

विशाखदत्तः. *मुद्राराक्षसम्,* ढुण्ढिराजः (व्याख्याकारः), बम्बे, निर्णयसागर-प्रकाशन, १९२५.

विश्वनाथः. *साहित्यदर्पणः* (लक्ष्मीव्याख्योपेतः), वाराणसी, चौखम्बा-संस्कृत-संस्थान, २०१५.

शुक्लः, रमेशचन्द्रः. *प्रबन्धरत्नाकरः,* वाराणसी, चौखम्बा विद्याभवन, २०००.

---

[12] *मुद्राराक्षसम्,* श्लोकसंख्या – 2.16, पृष्ठासंख्या - 123

स्वप्नवासवदत्तमिति नाटके करुणरसप्रसङ्गः

वापन-रुइदासः[1]

'रस आस्वादने' इत्यर्थे रस्-धातोः अच्प्रत्ययेन रसशब्दो निष्पद्यते। हरिद्रादिसंयुक्तानि विविधानि व्यञ्जनानि यथा मधुरादीनां षड्रसानां निवृत्तिं साधयन्ति, तथैव विभावादिभावानां संमिश्रणेनैव स्थायिभावो रसत्वेन पर्यवस्यते। किन्तु **'रसः इति कः पदार्थः'**[2] इत्येवम्प्रकारेण भरतमुनिना स्वकृतस्य प्रश्नस्य समाधानरूपेण उत्तरं दीयते यत् **'उच्यते आस्वाद्यत्वात्'**[3] इति। अर्थात् आस्वादनहेतुकस्तावद्रसः। पुनरेव तेन भणितं - **'कथमास्वाद्यते'**[4]? इत्थं स्वस्यैव प्रश्नस्योत्तरं प्रदातुकामेन तेनैव निगदितं - **"यथा हि नानाव्यञ्जनसंस्कृतमन्नं भुञ्जाना रसनास्वादयन्ति सुमनसः पुरुषा"**[5] इति। अर्थात् जनाः यथा नानाव्यञ्जनयुक्तान्नं भुज्यमानाः रसास्वादनं कुर्वन्ति तथैव सहृदयहृदया दर्शका आहार्य-वाचिक-सात्त्विकाङ्गिकाभिनयैरभिव्यक्तं स्थायिभावमास्वादयन्तः परमानन्दं प्राप्नुवन्ति। भरताचार्येण तदीये नाट्यशास्त्रे रसः साहित्यबीजरूपेण वर्णितः । यथोक्तं-

"यथा बीजाद्भवेद्वृक्षो वृक्षात् पुष्पं फलं यथा।
तथा मूलं रसाः सर्वे तेभ्यो भावा व्यवस्थिताः॥" (६/३८) इति ।

अर्थाद् बीजाद् यथा वृक्षाः, वृक्षेभ्यः पुष्पाणि, पुष्पेभ्यश्च फलानि, तथैव भावाद् रसः, रसाद् अभिनयः, अभिनयाच्च भावप्रतीतिर्भवति। अस्माद् रसबीजादेव काव्योत्पत्तिः। रस एव काव्यस्य फलम्। कुतः काव्यपाठस्य परिसमाप्तिरिति चेदुच्यते सहृदयानाञ्चर्वणायाम्। सामान्यतो य आस्वादोपयोगी स एव रसः। परन्तु रसस्वरूपमिदं वक्तुकामेन भरतमुनिना भणितम् -

"न हि रसादृते कश्चिदर्थः प्रवर्तते।
तत्र विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः॥"[6] इति ।

अर्थाद्रसमृते नैव पदार्थप्रतीतिर्भवति। विभावानुभावव्यभिचारिभी रसप्रतीतिः। सूत्रेऽस्मिन् भरतेन विभावानुभावव्यभिचारिभावाः पारिभाषिकशब्दरूपेण व्यवहृताः। विभावस्तु कः इति चेदुच्यते विपूर्वकाद्

---

[1] गवेषकः, संस्कृतविभागः, रामकृष्णमिशन्-विद्यामन्दिरम्, हावड़ा, पश्चिमवङ्गः।

[2] *Natyasastra of Bharata Muni* (Vol.I), p - 286

[3] तत्रैव

[4] तत्रैव

[5] तत्रैव

[6] तत्रैव

भूधातोः करणे घञा विभावशब्दो निष्पद्यते। अस्यार्थस्तावत् कारणम्। कस्य कारणमिति पृच्छायामुच्यते रसानुभूतेः कारणम् इति। क्रोध-स्नेहोत्पत्ति-भय-प्रेमाकुलादिकारणानि विभावनाम्ना व्यपदिश्यन्ते। भरतमुनिना तदीये नाट्यशास्त्रे विभावस्वरूपमुक्तं -

"बहवोऽर्था विभाव्यन्ते वागङ्गाभिनयाश्रयाः।
अनेन यस्मात्तेनायं विभाव इति संज्ञितः॥"(७/४) इति।

अर्थाद् विभावेन वाचिकाङ्गिकसात्त्विकाभिनया ज्ञापिता भवन्ति। अनेनैव विभावेन स्थायिभावानां व्यभिचारिभावानाञ्च ज्ञानमतिद्रुतं भवति। आलम्बनोद्दीपनभेदाद् विभावः द्विविधः। आलम्बनशब्दस्यार्थस्तावत् चित्तवृत्तेर्विषयः। अस्मच्चित्ते या काचिद् वृत्तिरस्ति, सा किञ्चिद्वस्त्ववलम्ब्योद्भूता भवतीत्ययमेवालम्बनविभावः। अपि च, अस्फुटस्य स्फूटीकरणम्, अर्धप्रसुप्तस्य सम्पूर्णतया जागरणम्, मुकुलितस्य प्रस्फुटनं येन परिवेशेन साध्यते, स एव उद्दीपनविभावः। इदमेव चित्तवृत्तेः सहकारिकारणम्।

अनुपूर्वकाद् भूधातोः करणे घञ्प्रत्यये अनुभावशब्दस्य निष्पत्तिः। व्यवहारिके जगति अस्मद्हृदये यदा कस्यचिद्भावस्यागमनं भवति, तदा अस्मद्भावविकारादव्यवहितपरमेव शारीरिकविकारः परिलक्ष्यते। वस्तुतः रत्यादिस्थायिभावानां कार्यं ह्यनुभावः। भरताचार्येण नाट्यशास्त्रे अनुभावस्वरूपमुक्तं -

"वागङ्गाभिनयेनेह यतस्त्वर्थोऽनुभाव्यते।
शाखाङ्गोपाङ्गसंयुक्तस्त्वनुभावस्ततः स्मृतः॥"(७/५) इति

वाचिकाङ्गिकसात्त्विकाभिनयैर्नाट्यस्य विविधप्रकारकाणां शाखाङ्गोपाङ्गानां सम्बन्धेन योऽर्थः प्राप्यते सामाजिकैः सोऽनुभूयते। अर्थान्नायक-नायिकयोः यान् भावान् दृष्ट्वा तयोः रतिशोकादीनां भावानामुत्पत्तिर्भवति, ते भावा एव अनुभावरूपाः।

वाचिकाङ्गिक-सात्त्विकाभिनययुक्तस्य रससमूहस्य उपप्रयोगं गमनकारयितृत्वादस्य नाम व्यभिचारिभावः। अस्य अन्यन्नाम सञ्चारिभावः। शृङ्गारात्मके मनोभावे चित्ताभिषेके सति क्वचिद्व्रीडा, क्वचिदानन्दः, पुनः क्वचित्क्षुद्रातिक्षुद्रभावाः द्रुतवेगेन संमिश्रिता भवन्ति। एते भावा एव व्यभिचारिरूपाः। समुद्रलहरीवत् एते भावाः आगच्छन्ति गच्छन्ति च। एतेषामनुभूतिः सर्वदैव सञ्चारणशीला तथा सहकारिकारणरूपा। ततः परं स्थायिभावः केवलं विभावानुभावव्यभिचारिभावसंयोगात् काव्यरसत्वेन नाट्यरसतया वा परिणमितो भवति। दशरूपककृता स्थायिभावलक्षणं कृतम् -

"विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः।
आत्मभावं नयत्यन्यान् स स्थायी... ॥"(४/३४) इति।

अर्थाद् यो भावः विरुद्धाविरुद्धभावाभ्यां कदापि न विच्छिन्नो भवति, अन्यभावांश्च समुद्रवत् स्वरूपे अन्तर्भावयति, स एव स्थायिभावः। नाट्येऽस्य अष्टौ भेदाः सन्ति। यथोक्तं काव्यप्रकाशकारेण-

"रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः ॥"(४/७) इति।

भरताचार्येण तदीये रससूत्रेऽपि स्थायिभावोल्लेखो न कृतोऽपि अस्य गुरुत्वमधिकम् इति निःशंसयम्। काव्यमध्ये स्थायिभावो न वर्तते चेत् रसास्वादनमसम्भवपरम् इति कृत्वा स्थायिभावस्य गुरुत्वमत्यधिकमेव। नाट्ये यथा स्थायिभावस्य अष्टौ भेदाः सन्ति, तथैव रसा अपि अष्टौ। तथाह्युक्तं भरतमुनिना तदीये नाट्यशास्त्रे -

"श्रृङ्गारहास्यकरुणा रौद्रवीरभयानकाः।
बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ॥"(६/१५) इति।

यथा - श्रृङ्गारः, हास्यः, करुणः, रौद्रः, वीरः, भयानकः, बीभत्सः,अद्भुतश्चेति। मम विषयो हि एतेषु अष्टप्रकारकेषु रसेषु स्वप्नवासवदत्तमिति नाटके करुणरसस्य प्रसङ्गः। आदावेव कोऽयं करुणरस इति विवेचनीयः।

करुणरसस्वरूपम् -

अस्मिन् जगतीतले सर्वमनुष्येषु किञ्चित् असौविध्यं विद्यते। पुनरपि त एव क्वचित् क्वचित् सम्पूर्णतया असहाया भवन्ति। यदा असहायत्वं तेषां सीमातिक्रमि भवति, तदैव तेषां मनुष्याणां हानिर्भवति, तेषां च मनसि करुणभावस्य सञ्चारो भवति। अभिनेता यदा कस्यापि चरित्रस्यानुकरणेन शोकभावमभिनयति, तदा सहृदयचित्ते शोकभावो जागरितो भवति। एवम्प्रकारेणैव दर्शकचित्ते यः करुणोद्रेको भवति, स एव करुणरसरूपेणाभिधीयते। अस्य करुणरसस्य वर्णो हि कपोतः अर्थात् अनुज्ज्वलधूसरः, देवता हि यमोऽस्य। तदुक्तं नाट्यशास्त्रकारेण - **"करुणो यमदैवतः"**(६/४४) इति। आनन्दवर्धनमते रस एव काव्यस्यात्मा। कविचित्तस्य रसानुभूत्या काव्यस्याविर्भावो भवति। एतत्प्रसङ्गे तेनैवाचार्येण आदिकविवाल्मीकिविरचिताद्रामायणादेकः श्लोकः उद्धृतः

"काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ॥"[7] इति।

---

[7] *ध्वन्यालोकः* (प्रथमोद्योतः), (सम्पा.) सत्यनारायण चक्रवर्ती, पृष्ठा - ५०

स्वप्नवासवदत्तमिति नाटके करुणरसप्रसङ्गः

कश्चिद् व्याधः तीरेण क्रौञ्चं जघान। निहतस्य क्रौञ्चस्य शोकमवलम्ब्य वाल्मीकिचित्ते शोकरूपस्थायिभावः करुणरसत्वेन काव्ये प्रकाशपदवीमितः। अत्र क्रौञ्चमिथुनस्य कृते यः शोकः स स्थायिभावः। शोकग्रस्तं क्रौञ्चयुगलं मिथः विभावः। क्रन्दनं ह्यनुभावः। दैन्योद्वेगादयश्च व्यभिचारिणो भावाः। एते परस्परं मिलित्वा करुणरसं सृजन्ति। एवम्प्रकारेण करुणरसव्यवहारः रामायणकाले अभूदेवेति मन्यते। अतः परं मनसि पृच्छा आयाति यत् करुणरसोत्पत्तिः कुतः? रसोत्पत्तेः हेतुरूपेण चत्वारो रसाः निर्धारिताः, यथा - शृङ्गारः, रौद्रः, वीरः वीभत्सश्चेति। भरतमुनिना नाट्यशास्त्रग्रन्थस्य षष्ठाध्याये एतत्प्रसङ्गे उक्तम् -

"शृङ्गारादि भवेद्धास्यो रौद्राच्च करुणो रसः।
वीराच्चैवाद्भुतोत्पत्तिर्बीभत्साच्च भयानकः॥"(६/३९) इति।

अर्थात् शृङ्गाराद्धास्यस्य, रौद्रात्करुणस्य, वीरादद्भुतस्य तथा बीभत्सतो भयानकरसस्योत्पत्तिर्भवति। अतः परं करुणरसविषये कानि कानि मतानि सन्तीति विषये आलोचनीयम्। भरतादारभ्य बहुभिराचार्यैः करुणरसविषयकाणि विविधानि मतानि प्रतिपादितानि। भरताचार्येण नाट्यशास्त्रे करुणरसलक्षणं कृतम्- **"अथ करुणो नाम शोकस्थायिभावप्रभवः। स च शापक्लेशविनिपतितेष्टजनविप्रयोगविभवनाशवधबन्ध-विद्रवोपघातव्यसनसंयोगादिभिः विभावैः समुपजायते।"**[8] इति। अर्थात् शोकरूपात् स्थायिभावतः करुणरसस्य निष्पत्तिर्भवति। शापक्लेशेन निपातितस्य प्रियजनस्य विच्छेदः, धननाशः, वधः, बन्धनम्, स्वस्थानात् पलायनम्, अग्निस्थानात् पलायनमित्यादिभ्यो विभावेभ्यो रसोऽयम् आविर्भूतो भवति। दशरूपककृता धनञ्जयेन करुणरसप्रसङ्गे उक्तम्-

"इष्टनाशादनिष्टाप्तौ शोकात्मा करुणोऽनुतम्।
निःश्वासोच्छ्वासरुदितस्तम्भप्रलपितादयः॥(४/८१)

तस्यापस्मारदैन्याधिमरणालस्यसम्भ्रमाः।
विषादजडतोन्मादचिन्ताद्या व्यभिचारिणः॥"(४/८२) इति।

अर्थात् इष्टवस्तुनाशाद् अनिष्टवस्तुप्राप्तेश्चोत्पन्नस्य शोकनामकस्य स्थायिभावस्य परिपुष्ट्या करुणरस उत्पद्यते। निःश्वासोच्छ्वासरोदनस्तम्भप्रलापादयोऽस्य रसस्य अनुभावाः। तथा अपस्मारदैन्याधिमरणालस्यसम्भ्रमोन्माद-चिन्ताजडताविषादादयोऽस्य व्यभिचारिणो भावाः। दशरूपकस्य टीकाकारेण धनिकेन तदीयावलोकटीकायां टीकितम् - **"इष्टस्य बन्धुप्रभृतेः विनाशादनिष्टस्य तु वधबन्धादेः प्राप्त्या शोकप्रकर्षः करुणः। तमन्विति**

---

[8] *Natyasastra of Bharata Muni* (Vol.I), p - 313

तदनुभाव निःश्वासादिकथनम्। व्यभिचारिणश्चास्यापस्मारादयः"[9] इति। इष्टविषयः अर्थात् सुहृदादीनां विनाशः। अनिष्टविषयश्चार्थात् वधबन्धनादेः प्राप्तौ उत्पन्नः शोकः करुणरसे पर्यवसितो भवति। जगन्नाथेन करुणरसस्य स्वरूपमादाय विस्तृततया नालोचितम्। किन्तु करुणरसस्य स्थायिभावविषये रसगङ्गाधरे उक्तम् - **"पुत्रादिवियोगमरणादिजन्मा वैक्लव्याख्यश्चित्तवृत्तिविशेषः शोकः"**[10] इति। अर्थात् पुत्रादेरिष्टजनाद्वियोगस्तथा मरणादिकार्यात् सञ्जाता विह्वलतारूपा चित्तवृत्तिर्हि शोकः।

भरतादारभ्य पण्डितराजं जगन्नाथं यावत् करुणरसविषये केषाञ्चिद् रसवादिनां शास्त्रकृतां मतान्यालोच्य दृश्यते यत् इष्टवस्तुनाशः, अनिष्टवस्तुप्राप्तिः, प्रियजनस्य मृत्युः, वधः, बन्धनम्, क्लेशः, दुःखम्, धननाशश्चेत्यादय आलम्बनविभावाः करुणरसस्य। प्रियजनस्य दाहकर्म, वस्त्रादिदर्शनम्, अतीतवृत्तस्मरणमित्यादयो हि उद्दीपनविभावाः अस्य। किञ्च भूमिपतनरोदनदैवनिन्दाभाग्यनिन्दात्मनिन्दोच्छ्वासप्रलापस्वरभङ्गाश्रुपातगात्र-कम्पनगात्रशैथिल्यवैवर्ण्यादयो ह्यनुभावाः। अपि च, निर्वेदग्लानिविषादचिन्तामोहस्मृति-जडतोन्माददैन्यत्रासशङ्कालस्यौत्सुक्यावेगव्याधिमरणापस्मारादयो हि करुणरसस्य व्यभिचारिभावाः। एतद्विभावानुभावव्यभिचारिभावसंयोगात् शोकनामकात् स्थायिभावात् करुणरससृष्टिः। अधुना भासकृते स्वप्नवासवदत्तमिति नाटके करुणरसप्रसङ्गः कीदृशः इति आलोच्यम्।

स्वप्नवासवदत्तमिति नाटके करुणरसप्रसङ्गः

संस्कृतसाहित्ये करुणरसात्मकानि नैकानि नाटकानि प्राप्यन्ते। तेषु भासविरचिते स्वप्नवासवदत्तमिति नाटके करुणरसप्रसङ्गमालोच्यते। नाटकस्यास्य शृङ्गाररसात्मकत्वेऽपि अनेकत्र करुणरसस्य प्राधान्यादिदं करुणरसात्मकमिति शक्यवचम्। एतदर्थं वक्तुमलं यन्नाटकमिदं करुणरसात्मकम्। एतत्पूर्वं करुणरसरूपेण नाटकं रसविभूषितं भवितुमर्हति इत्यस्यापि अन्यतमं निदर्शनं तावत् भवभूतिविरचितम् उत्तररामचरितमिति नाटकम्। तत्र तेनोक्तम् -**'एको रसः करुण एव'** इति। अनेन प्रकारेणैव महाकविभासेनापि स्वप्नवासवदत्तमिति नाटके करुणरसप्रसङ्गः संघटितः। इदानीं स्वप्नवासवदत्तरूपके करुणरसस्योद्रेकस्थलान्युदाहरणमुखेन प्रदर्श्यन्ते।

- तत्र प्रथमाङ्के दृश्यते यत् -

"ब्रह्मचारी - ततस्तस्याः शरीरोपभुक्तानि दग्धशेषाणि आभरणानि परिष्वज्य राजा मोहमुपगतः।"[11] इति

---

9 *दशरूपकम्*, सम्पा. बैजनाथ पाण्डेयः, पृष्ठा - ४६१

10 *रसगङ्गाधरः*, (सम्पा. विद्युत् वरण घोष) पुटाङ्कः - १५२

11 *स्वप्नवासवदत्तम्*, (सम्पा. अनिल चन्द्र वसु) पुटाङ्कः - १३

अर्थात् मृगयायाः प्रत्यागत्य वत्सराज उदयनो लावाणकग्रामस्याग्निकाण्डस्य मर्मान्तिकीं कथां श्रुत्वा प्रियतमायाः पत्न्याः शोकात् विलपितुमारेभे। इत्थं प्रियतमायाः वासवदत्तायाः मन्त्रिणो यौगन्धरायणस्य च शोकनिवारणे असमर्थे सति, तदग्नावेव प्राणविसर्जनाय उद्यते सति च स राजा रुमन्वतः चेष्टया परिशेषे सुरक्षितोऽभूत्। ततः परं वासवदत्तायाः परित्यक्तान् अलंकारान् आलिङ्ग्य स मूर्छितो बभूव। अत्र प्रियतमाया वासवदत्ताया मरणार्थम् उदयनस्य यः शोकः स स्थायिभावः। शोकग्रस्त उदयनो विभावः। उदयनो वासवदत्तां प्रति आलम्बनविभावोऽग्निदग्धा प्रियतमा वासवदत्तापि चालम्बनविभावरूपा। मूर्च्छा ह्यनुभावः। अग्निदाहविभावोत्पन्न आवेगो हि व्याभिचारिभावः। एवम्प्रकारेण विभावानुभावव्यभिचारिभावसंयोगात् शोकरूपस्थायिभावाच्च करुणरससृष्टिः।

- पुनश्च दृश्यते प्रथमाङ्के -

"ब्रह्मचारी - अस्ति रुमण्वान्नामामात्यो दृढं प्रयत्नवांस्तत्रभवन्तं पर्यवस्थापयितुम्। स हि -

अनाहारे तुल्यः प्रततरुदितक्षामवदनः
शरीरे संस्कारं नृपतिसमदुःखं परिवहन्।
दिवा वा रात्रौ वा परिचरति यत्नैर्नरपतिं
नृपः प्राणान् सद्यन्त्यजति यदि तस्याप्युपरमः॥"[12]इति ।

अर्थात् महाराजा उदयनः वासवदत्तायाः शोकेन कातरः सन् अन्नजलादीनि परित्यज्यति स्म। अत्यधिकरोदनवशात् तस्य मुखमण्डलं शुष्कं जातम्। अस्यामवस्थायां राज्ञ उदयनस्य शोकवशात् मृत्युर्भवति चेन्मन्त्री अपि प्राणान् त्यक्षति। अत्र वासवदत्तायाः कृते यः शोकः स हि स्थायिभावः। वासवदत्तां प्रति उदयन आलम्बनविभावः। रोदनम् अनुभावः। स्मृत्यौत्सुक्यात् व्यभिचारिभावः। एवम्प्रकारेण अत्रापि विभावानुभावव्यभिचारिभावसंयोगेन शोकरूपस्थायिभावात् करुणरसोत्पत्तिर्भवति।

- पुनः प्रथमाङ्के दृश्यते यत् -

"ब्रह्मचारी - तदिदानीं न जाने, "इह तया सह हसितम्", "इह तया सह कथितम्", "इह तया सह पर्युषितम्", "इह तया सह कुपितम्", "इह तया सह शयितम्" - इत्येवं तं विलपन्तं राजानम् अमात्यैर्महता यत्नेन तस्मात् ग्रामात् गृहीत्वापक्रान्तम्।"[13] इति।

---

[12] *स्वप्नवासवदत्तम्*, (सम्पा. अनिल चन्द्र वसु) पुटाङ्कः - १४

[13] तत्रैव, पुटाङ्कः - १४

वासवदत्ताशोकेन शोकोन्मादेन उदयनेन विविधस्थानेषु परिभ्रमता अत्र तया सह हसितम्, तया सह वार्तालापः कृतः, रात्रियापनम् विहितम्, अत्रैकत्र शयनकार्यं कृतञ्च इत्येवम्प्रकारेण वदता तेन विलापः कृतः। अतो राज्ञ उदयनस्य शोकप्रशमनार्थं मन्त्री तत्स्थानं परित्यज्य अन्यत्र राजानम् अपसारयति स्म। अत्र वासवदत्तायाः कृते मृत्युजनितो यः शोकः स हि स्थायिभावः। वासवदत्तां प्रति उदयन आलम्बनविभावः, अतीतकथास्मरणमुद्दीपनविभावः। प्रलापः अनुभावरूपः। उन्मादो हि व्यभिचारिभावः। एते विभावादयः परस्परं मिलित्वा शोकरूपात् स्थायिभावात् करुणरस्योत्पत्तिर्भवति।

- नाटकेऽस्मिन् चतुर्थाङ्केऽपि करुणरसप्रसङ्गः दृश्यते। यथा -

"राजा - वयस्य! न जानाति भवानवस्थाम्। कुतः?

"दुःखं त्यक्तुं बद्धमूलोऽनुरागः
स्मृत्वा स्मृत्वा याति दुःखं नवत्वम्।
यात्रा त्वेषा यद् विमुच्येह वाष्पं
प्राप्तानृण्या याति बुद्धिः प्रसादम्" ॥[14] इति।

अर्थात् रूपेण गुणेन शीलेन माधुर्येण च पद्मावती निःसंशयेन राज्ञ उदयनस्य प्रिया। किन्तु वासवदत्तां प्रति समर्पितप्राणस्य उदयनस्य हृदयं सा पद्मावती अधुनापि न जितवती। उदयनः यदा वासवदत्तायाः शोकेन कातरः, तदा विदूषकः धौर्यधारणाय तमनुरुरोध। उक्तं यत्- भाग्यलिपिरलङ्घनीया इति। वासवदत्ता परलोकं गता। ततस्तस्याः कृते शोकप्रकाशो न समीचीनः। तन्मते दुःखं हि - योऽनुरागः दृढमूलः स कदापि कयापि चेष्टया एव न परिहरणीया। तदनुरागस्य कथा वारं वारं तद्दुःखं जागरयति। ततो मनुष्यः शोकाकुलः सन् क्रन्दति इति कृत्वा वक्तुं शक्यते यद्राज्ञो मनसि एतादृशी अवस्था संघटिता। अत्र वासवदत्तायाः कृते यः शोकः स स्थायिभावः। शोकग्रस्त उदयनो विभावः। अतीतवृत्तस्मरणं ह्युद्दीपनविभावरूपम्। शोकाकुलावस्थायां क्रन्दनं, भाग्यनिन्दा, आत्मनिन्दा च अत्रानुभावाः। एवम्प्रकारेण विभावानुभावव्यभिचारिभावसंयोगात् शोकरूपस्थायिभावादत्र करुणरसोत्पत्तिर्भवति।

- ततः परं पञ्चमाङ्के दृश्यते यत् -

"विदूषकः - भोः ! कष्टम् !

रूपश्रिया समुदितां गुणतश्च युक्तां
लब्ध्वा प्रियां मम तु मन्द इवाद्य शोकः।
पूर्वाभिघातसरुजोऽप्यनुभूतदुःखः
पद्मावतीमपि तथैव समर्थयामि॥"[15] इति।

---

[14] *स्वप्नवासवदत्तम्*, (सम्पा. अनिल चन्द्र वसु) पुटाङ्कः - ३७

[15] तत्रैव, पुटाङ्कः - ४३

स्वप्नवासवदत्तमिति नाटके करुणरसप्रसङ्गः

अत्र पद्मवत्याः शिरपीडासंवादेन उदयनचित्ते वासवदत्तावियोगजनितं प्राथमिकं दुःखं पुनरेव उद्वेलितं जातम्। यतः रूपलावण्यगुणान्वितां पद्मावतीं लब्ध्वा उदयनस्य प्रथमपत्नीशोकः प्रशमितोऽभवत्। किन्तु अधुना तस्याः पद्मावत्याः शिरपीडाकथायाः राज्ञः पूर्वशोको नवतया जागरितोऽभूत्। पत्नीविरहजनितं दुःखम् अतिभयङ्करमित्येतत् तेन अनुभूतम्। ततः उदयनसकाशे पद्मावत्यपि दुःखकारणेव। उदयनमनसि वासवदत्तावियोगजनितं प्राथमिकं दुःखं पुनरेव जागरयित्वादत्र यः शोकः स स्थायिभावः। उदयनो ह्यालम्बनविभावः। अतीतवृत्तस्मरणमुद्दीपनविभावरूपम्। शङ्काचिन्तादिर्हि व्यभिचारिभावः। एवम्प्रकारेण विभावानुभावव्यभिचारिभावसंयोगेन शोकरूपस्थायिभावादत्र करुणरसोत्पत्तिर्भवति।

- नाटकेऽस्मिन् षष्ठाङ्केऽपि करुणरसस्य प्रसङ्गो दृश्यते। यथा -

"राजा -

श्रुतिसुखनिनदे कथं नु देव्याः
स्तनयुगले जघनस्थले च सुप्ता।
विहगगणरजोविकीर्णदण्डा
प्रतिभयमध्युषितास्यरण्यवासम्॥

अपि च अस्निग्धासि घोषवती ! या तपस्विन्या च स्मरसि।

श्रेणीसमुद्वहनपार्श्वनिपीडितानि
खेदस्तनान्तरमुखान्युपगूहितानि।
उद्दिश्य मां च विरहे परिदेवितानि
वाद्यन्तरेषु कथितानि च सस्मितानि॥"[16] इति ।

राज्ञा उदयनेन वासवदत्ता वीणावादने शिक्षिताभूत्। तस्याः वीणायाः नाम घोषवती। अस्याः वीणायाः दर्शनात्परं तां वीणां नीत्वा उदयनः वारं वारं विलपितुमारभे। वासवदत्ताविरहेन कातरः हिताहितशून्यः प्रेमिकः उदयनः वीणाम् अकथयत् - 'वीणे! त्वम् अतीव निर्दया। करुणायाः लेशमात्रमपि त्वयि नास्ति' इति। एवम्प्रकारेण विलपन् उदयनः घोषवतीं जिज्ञासते। जडवस्तुस्वरूपमिदं वीणायन्त्रमाधारीकृत्य उदयनस्य वेदना द्विगुणिता जाता। फलतः राज्ञ उदयनस्य चित्ते शोकरूपस्थायिभावस्य सृष्टिरभूत्। एतच्छोकस्य कृते उदयनस्य उच्छ्वासप्रलापावत्रानुभावौ। तस्माद्राजा उदयनो विषादग्रस्तः उन्मादश्च। उन्मादादिभावोऽयं व्यभिचारिभावरूपेण कथितः। एवम्प्रकारेण विभावानुभावव्यभिचारिभावसंयोगेन शोकरूपस्थायिभावादत्र करुणरसस्य सृष्टिः।

---

[16] *स्वप्नवासवदत्तम्*, (सम्पा. अनिल चन्द्र वसु) पुटाङ्कः - ५४

उपसंहृति:

यद्यपि केषुचित् दृश्यकाव्येषु अङ्गिरस एक एव भवति, तथापि अङ्गरसत्वेनान्येषां रसानामुपस्थितिरावश्यिकीत्यालंकारिकाणां राद्धान्त:। दृश्यकाव्यस्य विश्लेषणेन दृश्यते यदस्याङ्गिरस: श्रृङ्गार:, यस्य सम्भोगविप्रलम्भभेदाद् द्विविधत्वं सूच्यते। स्थायिभावाद् भिन्नो विप्रलम्भश्रृङ्गारो न करुणरसान्तर्गत:। स्वल्पात्तु विप्रलम्भमध्ये साधारणदृष्ट्या करुणरसोपस्थिति: सर्वैर्मन्यते। यथा प्रसङ्गतो वक्तुं शक्यते यत् उत्तररामचरितस्य रसस्तावत् करुण:। परं तत्र नायं मुख्यो रस:, क्वचित् करुणविप्रलम्भोऽपि विद्योतते। इत्थं श्रृङ्गाररसोपेते स्वप्नवासवदत्ताख्ये रूपके क्वचिच्च करुणरस: स्पष्टतया प्रकटित:। रसस्यास्य व्यवहारे भासोऽद्वितीय इत्यलं विस्तारेण।

सहायकग्रन्था:

काव्यप्रकाश. 1404 (वङ्गाब्द). सम्पा. रामानन्द आचार्य. कलकाता : संस्कृत पुस्तक भाण्डार.

दशरूपकम्. 1979.सम्पा. बैजनाथपाण्डेय:, दिल्ली : मोतीलाल बनारसी दास.

ध्वन्यालोक: (प्रथमोद्योत:). 2016. सम्पा.सत्यनारायण चक्रवर्ती. कलकाता: संस्कृत पुस्तक भाण्डार.

भरत नाट्यशास्त्र. 2009. सम्पा. ड: सुरेशचन्द्र वन्द्योपाध्याय औ छन्दा चक्रवर्ती, कोलकाता : नवपत्र प्रकाशन.

रसगङ्गाधर. 2017. सम्पा. विद्युत् वरण घोष. कलकाता : पश्चिमवङ्ग राज्य पुस्तक पर्षत्.

साहित्यदर्पण: (लक्ष्मीटीकोपेतः). 2018. सम्पा. आचार्य कृष्णमोहन शास्त्री. वाराणसी : चौखम्बा संस्कृत संस्थान.

स्वप्नवासवदत्तम्. 2004. सम्पा. अनिल चन्द्र वसु. कलकाता : संस्कृत वुक डिपो.

स्वप्नवासवदत्तम्. 1411 (वङ्गाब्द). सम्पा. शान्ति वन्द्योपाध्याय. कलकाता : संस्कृत पुस्तक भाण्डार.

व्याकरणशास्त्रे कर्मणो भेदाः तत्स्वरूपञ्च

विवेकानन्दलक्ष्मणः[1]

महर्षिपाणिनिप्रणीतायाम् अष्टाध्याय्यां **कारके** इत्यधिकारे स्थितेषु अपादानादिकारकेषु चतुर्थं कारकं तावत् कर्मकारकम्। अस्य कर्म इति शब्दस्य क्रिया इति अर्थो लोके प्रसिद्धः। अस्य कर्मशब्दस्य विभिन्नेषु दर्शनेषु विभिन्नेषु च प्रसङ्गेषु विविधार्थेषु सत्सु व्याकरणशास्त्रे तावत् फलाश्रयं कर्म इति अर्थः स्वीक्रियते। कर्मविधायकानां नैकानां सूत्राणां अर्थस्य आत्मभूतं हि कर्मसंज्ञाया एव विधानम्। करणार्थककृधातोः मनिन्प्रत्यये कर्म इति शब्दस्य क्रिया इति मूलभूतोऽर्थः। वस्तुतः व्याकरणशास्त्रे कर्म इति शब्दः कृत्रिमार्थे अकृत्रिमार्थेऽपि अस्ति। अत्र तु कृत्रिम एव। महर्षिणा पाणिनिना कर्मसंज्ञा तावत् एकादशसूत्रैः विहिता। तत्र सूत्रदृष्ट्या प्रधानतया एवं विभागः कर्तुं शक्यते –

१. कर्तुः ईप्सिततमम्
२. कर्तुः अनीप्सिततमम्
    क) द्वेष्यम्
    ख) उदासीनम्
३. द्विकर्मकधातूनां योगे कर्मत्वम् / अकथितं कर्म
४. प्रयोज्यकर्मत्वम्
५. अन्यान्यम्।

परन्तु कर्मणः प्रकृत्या कर्म सप्तविधम् भवति। अयं विभागः वाक्यपदीयकारेण स्वग्रन्थे कृतो वर्तते। अस्य विषये परं प्रस्तौष्यते। तानि च –

“निर्वर्त्यं च विकार्यं च प्राप्यञ्चेति त्रिधा मतम्।
तत्रेप्सिततमं कर्म चतुर्धान्यत्तु कल्पितम्।।

औदासीन्येन यत्प्राप्तं यच्च कर्तुरनीप्सितम्।
संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम्”।।[2]

अधुना पूर्वोक्तानां भागानां यथायथं विचारो क्रियते –

---

[1] गवेषकः, व्याकरणविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः।
[2] *वाक्यपदीयम्*, पदकाण्डः, कर्माधिकारः, ४५-४६।

ईप्सितं कर्म – कर्तुरीप्सिततमं कर्म (१.४.४९) इति सूत्रेण ईप्सिततमस्य कर्मसंज्ञा विधीयते। **कारके** इत्यधिकारे पठितत्वात् क्रियाद्वारा ईप्सिततमम् इत्यर्थे पर्यवसन्नो भवति। सिद्धान्तकौमुद्यामपि भट्टोजिदीक्षितेन अस्य सूत्रस्य वृत्तौ कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यादिति अर्थो कृतः। विविधैः वैयाकरणैः अत्र आप्-धातोरर्थविषये विभिन्नता कृता। हेमचन्द्रेण कर्तृव्याप्यं, चान्द्रव्याकरणे क्रियाप्यं, सुपद्मव्याकरणे क्रियाव्याप्यम् इत्यादयः अर्था उक्ताः। क्रियाप्ये कर्तृव्याप्ये वा अर्थे सत्यपि न कापि हानिर्वर्तते क्रियया कर्तृसम्पाद्यत्वात्।

सूत्रे कर्तुः इति पदस्याभावे माषेष्वश्वं बध्नाति इत्यादिषु माषाणाम् ईप्सिततमत्वम् कर्मणः न तु कर्तुरिति कृत्वा तत्रातिव्याप्तिवारणाय सूत्रे कर्तुरिति पदस्योपास्थापनम्। किञ्च तमपोऽभावे अग्नेर्माणवकं वारयतीति वाक्ये माणवकस्येव अग्नेरपि वारणार्थकधातुयोगे ईप्सितत्वात् माणवकस्यापि अपादानत्वं प्राप्नोति। प्रकृते माणवकस्य यथा अग्निरीप्सितस्तथैव कर्तुः माणवक ईप्सितः। तस्य चापादानसंज्ञा तमपा बाध्यते। पयसा ओदनं भङ्क्ते इति स्थले संस्कार्यस्य पयसः कर्मत्ववारणाय तमपो ग्रहणम् इति भाष्यकारस्य मतम्।

गुडं भक्षयति इत्यादिस्थलेषु क्रियाया एव ईप्सिततमत्वमिति प्रत्ययः कैयटेन पूर्वपक्षिणां मतत्वेन उपस्थापितः। तत्र क्रियाया ईप्सितमत्वमिव कर्मणोऽपि ईप्सिततमत्वमस्त्येव। अन्यथा गुडभक्षणादिषु भक्षणक्रियाया एव ईप्सिततमत्वे उपलभक्षणादिना कर्ता क्रियां निष्पादयेत्। उक्तं च भाष्ये यस्य हि गुडभक्षणे बुद्धिः प्रसक्ता भवति नासौ लोष्टं भक्षयित्वा कृती भवति इति।

अनीप्सितं कर्म – तथायुक्तं चानीप्सितम् (१.४.५०) इति सूत्रम् कर्तुः क्रियया अनीप्सितस्य कर्मसंज्ञां विधत्ते। अत्र नञः पर्युदासार्थः स्वीक्रियते। तेन द्वेष्योदासीनयोः कर्मत्वं सिद्ध्यति। प्रसज्यप्रतिषेधे स्वीकृते तु द्वेष्यस्य एव ग्रहणं स्यात्।

काशिकायां, महाभाष्ये, सिद्धान्तकौमुद्यां च द्वेष्यम् उदासीनं च अनीप्सितकर्मत्वेन गृहीतं विद्यते। हेलाराजेन तु द्वेष्यमेव अनीप्सितत्वेन स्वीकृतम्।

अकथितं कर्म – द्विकर्मकधातुभिर्योगे **अकथितं च** (१.४.५१) इति सूत्रेण अपादानादिसंज्ञाभिः अविवक्षितस्य कर्मत्वं विधीयते। धातुना ईप्सितानभितयोर्ग्रहणात् द्विकर्मकत्वं धातोर्भवति। गां दोग्धि पयः इति प्रसिद्धे उदाहरणे गोः धात्वर्थफलाश्रयत्वात् मुख्यकर्मत्वम्। पयसश्च मूलतोऽपादानस्यापि अपादानादिसंज्ञया अनुक्तस्य प्रकृतसूत्रेण कर्मत्वं सिद्धम्। अत्र वैयाकरणानां प्रसिद्धं विचारद्वयं विद्यते। प्रथमतः के द्विकर्मका धातव इति विचारः। द्वितीयस्तावत् तत्तद्धातुभिः अनुक्तत्वमस्ति न वा इति।

के तावत् द्विकर्मका धातव इति विषये भाष्यकारस्य मतम् ऐदम्प्राथम्येन शीलनीयम्। भाष्यकारस्य मते तु

“दुहियाचिरुधिप्रछिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ।
ब्रुविशासिगुणेन च यत्सचते तदकीर्तितमाचरितं कविना।।

नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च।
द्विकर्मकेषु ग्रहणं द्रष्टव्यमिति निश्चयः”।।[3]

इति श्लोकद्वयेन द्विकर्मकधातूनाम् परिगणनं कृतम्। तत्र दुह्, याच्, प्रच्छ, रुध्, भिक्ष्, चि इत्येतेषां धातूनां प्रयोगे निमित्तपदार्थेभ्यः पूर्वेण केनापि सूत्रेण यदि कारकविधानं न स्यात्तदा अनेन सूत्रेण कर्मत्वं वक्तुं शक्यम्। ब्रू-शास् इत्येतेषां धातूनां प्रधानकर्मणा सम्बद्धाः पदार्थाः पाणिनेः अकथितत्वेनाभिमताः। द्विकर्मकधातूनां प्रयोगे प्रधानकर्मणः **कर्तुरीप्सिततमं कर्म** इति सूत्रेण कर्मसंज्ञा। अप्रधानकर्मणस्तु **अकथितं च** इति सूत्रेण कर्मत्वं विहितम्। अत्र वस्तुतः अकथितपदस्य अप्रधानमिति अर्थो न स्वीकार्यः अपि तु असंकीर्तित इति अर्थः स्वीकार्यः। अप्रधान इत्यर्थे स्वीकृते तु पुत्रं धर्मं ब्रूते इत्येव साधुः स्यात्, तस्य अप्रधानत्वात्। सम्प्रदानद्वारा असंकीर्तिते तु पुत्राय धर्मं ब्रूते इत्यपि साधुः।

द्वितीयकारिकया नी, वह्, हृ, गत्यर्थकधातवश्च गृहीताः। कैयटस्य मतेन तु गत्यर्थकधातूनां गतिबुद्धीत्यादिसूत्रेण एव कर्मत्वं सिद्धं भवति। कैयटेनात्र मुष्, दण्ड्, जि इति त्रयो धातवो योजिताः तेन चतुर्दशधातूनां द्विकर्मकत्वं कैयटस्य मतेन विद्यते।

माधवीयधातुवृत्तौ तावत् –

“जयतेः कर्षतेर्मन्थेर्मुषेर्दण्डयतेः पचेः।
तारेर्ग्राहेस्तथा मोचेस्त्याजेर्दीपेश्च सङ्ग्रहः”।।

इत्ययं श्लोकः प्राप्यते। अस्मात् नूतनतया जिधातुः, कर्षधातुः, मन्थधातुः च नूतनतया द्विकर्मकत्वेन परिगणिताः सन्ति। एतान् विहाया ण्यन्ताः तारिग्राहिमोचित्याजिदीप्यश्चापि सन्ति। एतेषां ण्यन्तानां विषये विशदेन विवरणं शब्दकौस्तुभे लभ्यते। मूलधातवस्तु सप्तदश एतावता द्विकर्मकत्वेन परिगणिताः। एतेषु ग्रहधातुर्न द्विकर्मक इति भट्टोजिदीक्षितस्य मतम्।

एवंरीत्या क्रमेण रामचन्द्रादीनां मतानां परिशीलनादिना वैयाकरणसिद्धान्तकौमुद्यां भट्टोजिदीक्षितेन षोडशधातूनां संकलनं कृतम् –

---

[3] *महाभाष्यम्*, अकथितं च (१.४.५१)।

"दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासूजिमथ्मुषाम्।
कर्मयुक्स्यादकथितं तथा स्यान्नीहृकृष्वहाम्" ।।[4] इति।।

एवं विभागे कस्यापि धातोः द्विरुक्तिरपि न विद्यते तथा च आद्यानां द्वादशानां धातूनां प्रयोगे गौणं कर्म अभिहितं भवति अर्थात् कृत्यक्तखलर्थादिप्रत्यया ये कर्मणि विधीयन्ते तैर्योगे पूर्वोक्तधातूनां गौणं कर्म अभिहितं स्यात्, तथा निहृकृष्वहाम् मुख्यं कर्म अभिहितं स्यात्।

अकथितं च इति सूत्रस्य विचारे प्रवर्तमाने अत्र ग्रन्थे द्वितीयविचारत्वेन तैः द्विकर्मकधातुभिः अनुक्तत्वमस्ति न वा इति विचारो भवति। येषां द्विकर्मकधातूनां प्रयोगे कर्म अपादानादिसंज्ञया बाधितं न भवति तत्र गौणकर्मणि एव अकथितं च इति सूत्रेण कर्मसंज्ञा स्यादिति पूर्वपक्षिणां मतम्। तथात्वे तु पौरवं गां याचते, माणवकं पन्थानं पृच्छति, पौरवं गां भिक्षते इति त्रयाणां धातूनां प्रयोगे एव द्विकर्मकता सिध्येत्। यतो हि प्रश्नमात्रेण, याचनमात्रेण वा अपादानत्वं न सिद्येत्। तेन अपादानादिसंज्ञया कर्मत्वस्य बाधकाभावात् कर्मसंज्ञायाः प्राप्तिर्भवति। अत एव अत्र अकथितपदस्य कारकान्तरैः असंकीर्तितः इत्यर्थो पर्यवसन्नो भवति। तेन पूर्वोक्तानां षोडशानां धातूनां प्रयोगे गौणकर्मणां कारकान्तरेण अविवक्षाकारणात् तेषाम् अकथितं च इति सूत्रेण कर्मत्वं सिद्धम्।

प्रयोज्यकर्मत्वम् – गत्यर्थकधातूनां, ज्ञानार्थकधातूनां, भोजनार्थकधातूनां, शब्दकर्मकानाम्, अकर्मकधातूनां च प्रयोगे अणिजन्तः कर्ता णिजन्ते कर्म भवति। हृ, कृ इत्याभ्यां धातुभ्यां योगेऽपि विकल्पेन णौ कर्मत्व विहितं **हृक्रोरन्यतरस्याम्** इति सूत्रेण।

"शत्रूनगमयत्स्वर्गं वेदार्थं स्वानवेदयत्।
आशयच्चामृतं देवान्वेदमध्यापयद्विधिम्॥
आसयत्सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः" ॥[5]

श्लोकोऽयम् गतिबुद्धीत्यादिसूत्रस्य प्रसिद्धोदाहरणत्वेन प्रथते। अत्र एतान् धातून् विहायापि बहुभिः वार्तिकैः धात्वन्तरैर्योगे णौ कर्मत्वं विहितम्। तानि च वार्तिकानि सिद्धान्तकौमुद्यां अस्मिन् सूत्रे एव लभ्यन्ते।

एतानि सूत्राणि विहायापि कानिचन सूत्राणि वार्तिकानि च सन्ति यैः कर्मसंज्ञा विधीयते। तानि च

१. **अधिशीङ्स्थासां कर्म (१.४.४६**
२. **अभिनिविशश्च (१.४.४७)**

---

[4] *वैयाकरणसिद्धान्तकौमुदी*, कारकप्रकरणम्, अकथितं च (१.४.५१)।
[5] तत्रैव, गतिबुद्धिप्रत्यवसानार्थशब्दाकर्माकर्मकाणामणि कर्ता स णौ (१.४.५२)।

३. **उपान्वध्याङ्वसः (१.४.४८)**
४. **क्रुधद्रुहोरुपसृष्टयोः कर्म (१.४.३८)**
५. **अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञका इति वाच्यम् (वा)**

एतेषु आद्येषु त्रिषु सूत्रेषु आधारस्य कर्मसंज्ञा विहिता। तथाहि आधारोऽधिकरणम् इति सूत्रम् अष्टाध्याय्यां प्रथमाध्याये प्रथमपादे पञ्चचत्वारिंशत्तमं सूत्रम्। तस्मात् सूत्रात् एतेषु त्रिषु सूत्रेषु आधार इत्यनुवर्तते। ततश्च अधिपूर्वकशीङ्धातोः स्थाधातोः आस्धातोः च आधारस्य, अभिनि-इत्येतत्संघातपूर्वकस्य विशतेराधारस्य, उपपूर्वकस्य अनुपूर्वकस्य अधिपूर्वकस्य वा वस्धातोः आधारस्य कर्मत्वं विहितम्। अधिशेते अध्यास्ते, अधितिष्ठति वैकुण्ठं हरिः, अभिनिविशते सन्मार्गम्, उपवसति अधिवसति आवसति वा वैकुण्ठं हरिः इति क्रमेण उदाहरणानि।

सोपसर्गयोः क्रुध् द्रुह् चेति धातोः प्रयोगे यं प्रति कोपः तस्य कर्मसंज्ञा क्रुधद्रुहोपसृष्टयोः कर्म इति सूत्रेण विहितम्। देवदत्तमभिक्रुध्यति, देवदत्तमभिद्रुह्यति इत्युदाहरणम्।

अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञका इति वाच्यम् इति वार्तिकेन अकर्मकधातूनां योगे देशवाचकपदानि, कालवाचकपदानि, क्रियावाचकपदानि, गन्तव्याध्ववाचकपदानि च कर्मत्वेन परिगण्यते। अत्र तावत् अकर्मकधातुभिः उक्तपदार्थाः व्याप्ता भवन्तीति एतेषां व्याप्तिमुखेन कर्मत्वं सम्पद्यते। उक्तमते भर्तृहरेरपि कारिका दृश्यते। तेन तस्यापि सम्मतिः ज्ञायते। तथा हि –

"कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः।
सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते"।। इति।।

कर्मणः स्वरूपम्

विविधेषु शास्त्रेषु कर्मणः लक्षणं विविधरीत्या उक्तं वर्तते। तत्र कर्मणः लक्षणविषये विविधदार्शनिकानामपि मतानैक्यं दरीदृश्यते। तत्र मीमांसकानां नैयायिकानां च मतानि वैयाकरणैः बहुधा परिशीलितानि। नैयायिकानां यानि कर्मलक्षणानि सन्ति तेष्वपि मतान्तरं स्पष्टं दृश्यते। यथा – करणव्यापारविषयः कर्म इति शशधरेण न्यायसिद्धान्तदीपे, क्रियाजन्यफलशालित्वं कर्म इति, परसमवेतक्रियाजन्यफलशालित्वं कर्मत्वम् इति गङ्गेशोपाध्यायेन, एवंरीत्य बहूनि लक्षणानि नैयायिकाना मते इव मीमांसकादीनां मतेऽपि सन्ति। वैयाकरणानां मते कर्मलक्षणं नाम किमित्यधुना विचारणीयम्।

क्रिया हि फलेच्छापूर्वेच्छाविषयः। फलमेव त्विष्टतमम्। तच्च धातुनोपात्तमिति तद्विशिष्टत्वेनेच्छाविषयोऽत्र संज्ञी इति शब्दकौस्तुभे श्रीमता भट्टोजीदीक्षितेन उक्तम्। आहत्य क्रियाजन्यफलशालित्वं कर्मत्वम् इति तस्य मतम्।

फलाश्रयं कर्म इति मतेऽङ्गीकृते तु अग्नेरमाणवकं वारयति इत्यादिप्रयोगेषु अग्नेरपि कर्मत्वं स्यादिति हेतोः भगवता पाणिनिना तावन्मात्रमनुक्त्वा तथायुक्तं चानीप्सितम् तथा कर्तुरीप्सिततं कर्म इति सूत्रद्वयम् कृतम्।

वैयाकरणभूषणसारे कौण्डभट्टेन द्वितीयातृतीयासप्तमीनामाश्रयोऽर्थ इत्युक्त्वा धातूपात्तफलाश्रयत्वस्य कर्मत्वमङ्गीकृतम्। तेन पूर्वसंशयः न तिष्ठति। चैत्रो ग्रामं गच्छति इत्यादिवाक्येषु ग्रामस्य फलाश्रयत्वमिव चैत्रस्यापि वर्तते। तेन ग्रामस्येव चैत्रस्यापि कर्मत्वं प्राप्तम्। अतोऽत्र कर्त्रादिसंज्ञारहितस्य कर्मत्वमङ्गीकृतम् तेन। तदुक्तं भूषणसारे **न ह्येतदेव द्वितीयाप्रयोजकं किन्तु संज्ञान्तराभावविशिष्टे जायमाना कर्मसंज्ञैव। इह च परया कर्तृसंज्ञया बाधेन कर्मसंज्ञाया अप्रवृत्तेर्न द्वितीया।** इति।

घटं जानाति इत्यादिस्थलेषु ज्ञानस्य आवरणभङ्ग एव फलम्। तदाश्रयत्वेन घटादीनां कर्मत्वम्।

कर्तुरीप्सिततमं कर्म इति सूत्रे ईप्सिततमस्य स्पष्टं विचारो नागेशकृतायां लघुमञ्जुषायां दृश्यते। तन्मते तु – तत्र कर्तुरीप्सिततमं कर्मेति सूत्रबोधितं कर्मत्वं, कर्तृगतप्रकृतधात्वर्थव्यापारप्रयोज्यव्यापार-व्यधिकरणफलाश्रयत्वेन कर्तुरुद्देश्यत्वम् इति।

क्रियासम्पादकं हि कारकमुच्यते। अर्थात् कारकाणि क्रियायाः निष्पत्तौ सहायकाः भवन्ति। अत एव कर्मत्वस्य धात्वर्थफलाश्रयत्वाङ्गीकारे तस्य च क्रियासम्पाद्यत्वात् क्रियोत्पत्तौ निमित्ताभावात् कर्मणः कारकत्वाभावः। यतः कर्म साध्यं साधनं च उभयं भवितुं नार्हति। अत एव न्यासमञ्जर्यां जयन्तभट्टेन उक्तम् –

क्रियासम्पादकं हि कारकमुच्यते। क्रियासम्पाद्यं तु फलं भवति न कारकम्। कारकं च क्रियया चाप्तुमिष्टतममिति च विप्रतिषिद्धम्। इति।

एतदेव जयन्तभट्टस्य मतं पूर्वपक्षित्वेन स्वीकृत्य कारकचक्रे पुरुषोत्तमदेवेन समाधानमुच्यता कथ्यते यत् – कर्ता क्रियया यम् आप्तुमिच्छति तदेव कर्मसंज्ञं भवति। सर्वेषु कर्मसु स्वगतव्यापारस्य सत्त्वात् तद्द्वारा तस्य कारकत्वं सिद्ध्यति। कटं करोति इत्याद्युदाहरणेषु उत्पद्यमानं कटं उत्पत्तौ उत्पत्तिक्रियायां कर्ता सत् कर्म भवति। कटं करोति इति वाक्यं कटम् उत्पद्यमानमुत्पादयति इति रूपेण पठ्यमानं बोधयुतं भवति।

इदानीं नैयायिकपरम्परायां कर्मलक्षणम् उच्यते –

करणव्यापारविषयः कर्म – चूडामणिकृतन्यायसिद्धान्तमञ्जर्याः टीकाकृता शशधरेण स्वटीकायां न्यायसिद्धान्तदीपाख्ये लक्षणमेतत् समुपन्यस्तम्। करणेन निष्पद्यमानायाः क्रियायाः अनूकूलो यो व्यापारः तस्य विषयः आश्रयो वा भवति कर्म। दात्रेण धान्यं लुनाति इत्युदाहरणे दात्रं करणम्। तस्मात् निष्पद्यमानायाः क्रियायाः आश्रयत्वेन उक्तलक्षणात् धान्यस्य कर्मसंज्ञा सिद्धा।

परन्तु लक्षणमिदम् अतिव्याप्तिदोषदुष्टं वर्तते। तथा हि दात्रेण धान्यं लुनाति इति वाक्ये हस्तदात्रसंयोगे अस्य लक्षणस्य अतिव्याप्तिर्दृश्यते।

क्रियाजन्यफलशालित्वं कर्मत्वम् – प्राचीननैयायिकैः कृतं कर्मणो लक्षणत्वेन इदमतीव प्रसिद्धम् वर्तते। व्युत्पत्तिवादे गदाधरभट्टाचार्येण अस्य लक्षणस्य विस्तृतं वर्णनं कृत्वा इति प्राचीनपथपरिष्कारप्रकारः इत्युक्त्वा अस्य प्रत्याख्यानं कृतम्। नव्यन्याये कर्मणो विवेचने मूलभूतं लक्षणम् इदमेव अस्ति।

धात्वर्थव्यापारेन निष्पद्यमानस्य फलस्य आश्रयभूतं भवति कर्म। यथा ओदनं पचति इत्युदाहरणम्। अस्मिन् उदाहरणे विक्लित्तिरूपायाः क्रियायाः आश्रयं भवति ओदनम्।

इदमपि लक्षणमतिव्याप्तिदोषदुष्टं वर्तते। रामो वनं गच्छति इत्युदाहरणे कर्तरि रामे लक्षणम् अतिव्याप्तं स्यात्। तथाहि वनसंयोगानुकूलरूपव्यापारस्य आश्रयो यथा वनं भवति तथैव रामोऽपि भवति संयोगस्य द्विष्ठत्वात्। अत एव इदमपि लक्षणं सर्वथा गृहीतुं न शक्यते।

परसमवेतक्रियाजन्यफलशालित्वं कर्मत्वम् – गङ्गेशोपाध्यायेन प्रवर्तिते अस्मिन् कर्मलक्षणे पूर्वलक्षणस्थदोषाणां पराहारो जायते। अस्मिन् लक्षणे परम् इत्यस्य कर्मभिन्नमित्यर्थः। कर्मभिन्ने कर्तरि यो व्यापारः तज्जन्यफलाश्रयत्वस्य कर्मसंज्ञा अनेन लक्षणेन क्रियते। तेन पूर्वलक्षणस्थे रामो वनं गच्छति इति वाक्ये वनस्य इव रामस्यापि कर्मत्वप्राप्तिः आसीत् अत्र तु परसमवेत इत्यनेन व्यावर्तकत्वात् तस्य कर्मत्वं वारितम्।

परन्तु एतदपि लक्षणम् अतिव्याप्तिदोषभूयिष्ठं वर्तते। तथाहि गृहात् वनं गच्छति इति वाक्ये वनस्य इव गृहस्यापि कर्मत्वं सिद्ध्येत्। तथाहि गम्-धातोः यथा उत्तरदेशसंयोगरूपं फलं भवति तथैव पूर्वदेशविभागोऽपि भवेत्। तेन पूर्वदेशस्यापि फलाश्रयत्वेन कर्मत्वं सिद्ध्येत्।

पर्णं पतति भूमौ इत्युदाहरणे पत्-धातुरकर्मकः। अस्मिन्नुदाहरणे पत् इति धातोः अधःसंयोगावच्छिन्न क्रियायाः विभागरूपं फलमुत्पद्यते। तत्फलाश्रयत्वे पर्णस्य कर्मत्वं प्राप्नोति। किन्तु अकर्मकस्य पत् इति धातोः प्रयोगे कर्मत्वापत्तौ महती असङ्गतिः आपद्यते।

किञ्च, अस्मिन् लक्षणे विद्यमानस्य पर इति शब्दस्य विषयेऽपि शङ्का विद्यन्ते। परशब्दस्य भिन्न इत्यर्थः। कस्माद्भिन्नमिति चेत् कर्मणो भिन्नमिति वक्तव्यम्। कर्मणो लक्षणे एव कर्मणो भिन्नमित्युच्यमाने लक्षणम् अन्योन्याश्रयदोषदुष्टं भवति। यदि फलाश्रयाद्भिन्नमित्युच्यते तर्हि रामो वनं गच्छति इति वाक्ये रामस्य कर्मत्ववारणाय प्रयुक्तेन परशब्देन वनस्यापि कर्मत्वं निषिध्यते। अत एव इदमपि लक्षणं न युक्तियुक्तम्।

तत्क्रियानाश्रयत्वे सति तत्क्रियाजन्यफलशालित्वं कर्मत्वम् – पूर्वोक्तदोषपरिहाराय प्रवृत्तम् इदं लक्षणम् प्रवृत्तम्। तथाहि रामो वनं गच्छति इत्युदाहरणे रामस्य कर्तुः कर्मत्वपरिहाराय तत्क्रियानाश्रयत्वे इति उक्तम्। रामस्तु गमनक्रियाश्रयो भवति। तेन लक्षणस्य कर्तरि अतिव्याप्तिर्वार्यते।

परन्तु अस्यापि लक्षणस्य सर्वथा अङ्गीकारो कर्तुं न शक्यते पुनः अतिव्याप्तिदोषदुष्टत्वात्। तथाहि पर्वतादवहोरति इत्युदाहरणम्। अस्मिन् उदाहरणे पर्वतात् इति अपादानम्। तस्य स्पन्दनक्रियानाश्रयत्वे सति तत्क्रियाजन्यविभागरूपफलाश्रयत्वं वर्तते। अत एव अनेन लक्षणेन यद्यपि कर्तुः अतिव्याप्तिर्वारयितुं शक्यं तथापि इतरेषां कारकाणां कर्मत्वापत्तेः नेदं लक्षणं युक्तम्।

धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वम् – कारकचक्रे भवानन्देन इदं लक्षणं सिद्धान्तिपक्षत्वेन स्थापितम्। तथैव व्युत्पत्तिवादेऽपि गदाधरेण नव्यनैयायिकानां सिद्धान्तत्वेन समुपस्थापितम्।

फलावच्छिन्नो व्यापारो धात्वर्थः। तस्मिन् धात्वर्थे अर्थात् व्यापारे विशेषणत्वेन यत्फलं विद्यते तदाश्रयः कर्म।

अनेन लक्षणेन पूर्वोक्तदोषाणां परिहारो जायते। तथापि लक्षणमिदम् वैयाकरणकुले पूर्वपक्षित्वेनैव विद्यते इत्यलं पल्लवितेन।

कर्मणो भेदाः

एकमेव कर्म व्यवहारभेदेन विविधं भवति। तथा हि पाणिनीयसूत्रानुसारं कर्म मूलतो द्विविधं भवति ईप्सितमम् अन्यान्यं च। ईप्सिततमस्य त्रयो भेदाः सन्ति – निर्वर्त्यं, विकार्यं, प्राप्यं च। ईप्सिततमभिन्नं कर्म चतुर्विधं भवति – उदासीनम्, द्वेष्यम्, अकथितम्, अन्यपूर्वकञ्च। तदुक्तं वाक्यपदीये –

"निर्वर्त्यं च विकार्यं च प्राप्यञ्चेति त्रिधा मतम्।
तत्रेप्सिततमं कर्म चतुर्धान्यत्तु कल्पितम्।।

औदासीन्येन यत्प्राप्तं यच्च कर्तुरनीप्सितम्।
संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम्"।।[6] इति।

निर्वर्त्यं कर्म – यस्य प्रकाशनात्पूर्वं विद्यमानता नासीत्, प्रकाशितं सत् प्रतीतिविषयं भवति तन्निर्वर्त्यं कर्म इत्युच्यते। घटं करोति इत्युदाहरणम्। वस्तुतः एतल्लक्षणं सत्कार्यवादिनां मतानुसारं न संगच्छते। अत एव सूक्ष्मरूपेण पूर्वं विद्यमानं जन्मना च प्रकाशमानं निर्वर्त्यं कर्म इति तेषां मतम्। तेषां नये सर्वाणि वस्तूनि स्वोपादानकारणेषु कर्मणः पूर्वं सूक्ष्मरूपेण विद्यमानानि भवन्ति। उक्तं च वाक्यपदीये –

---

[6] *वाक्यपदीयम्*, पदकाण्डः, कर्माधिकारः (४५-४६)।

"यदसज्जायते सद्वा जन्मना यत्प्रकाशते।

तन्निर्वर्त्यम्………………"।। [7]इति।

विकार्यं कर्म – प्रतीयमानप्रकृतिविकृतिभावकत्वे सति क्रियानिर्वाह्यविशिष्टासत्त्वोत्पत्त्यन्यतर-फलवत्त्वम् विकार्यकर्मत्वम्। यद्धि स्वप्रकृत्या उच्छेदेन उत्पद्यते तद्भवति विकार्यं कर्म। यथा – काष्ठं भस्मं करोति इति। प्रकृते काष्ठस्य उच्छेदन भस्मम् उत्पद्यते। अथवा स्वप्रकृतौ विशिष्टगुणाधानेन यत्क्रियाफलाश्रयं भवति तदपि विकार्यं कर्म। यथा सुवर्णं कुण्डलं करोति इति। अस्मिन्नुदाहरणे प्रकृते कुण्डलस्य गुणान्तरोत्पत्तिद्वारा विकार्यत्वम्। तदुक्तं –

"प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्ठादिभस्मवत्।

किञ्चिद् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्"।।[8] इति।।

प्राप्यं कर्म – यस्मिन् कर्मणि क्रियाकृतवैलक्षण्यं न भवति तत्कर्म प्राप्यं कर्म भवति। यथा घटं पश्यति इति। घटस्य दर्शनेन घटे दर्शनजन्यं न किमपि वैलक्षण्यं दृश्यते इति कारणात् घटस्य प्राप्यकर्मत्वम्। तदुक्तम् –

"क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते।

दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते"।।[9] इति।।

इदानीं ईप्सिततमेतरकर्मणां चतुर्णां भागानां लघुपरिचयो प्रस्तूयते। तानि च उदासीनं, द्वेष्यं, संज्ञान्तरैरनाख्यातम्, अन्यपूर्वकं च। तथायुक्तं चानीप्सितम् इति सूत्रोक्तस्य अनीप्सितकर्मण भेदद्वयं भाष्यकृता उक्तम् – उदासीनं द्वेष्यं च।

उदासीनं कर्म – उद्देश्यान्तरे क्रियां कुर्वन् तदाधारो यदि अन्यत्कारकमपि उदासीनं कर्म स्यात्, एतादृशं अनीप्सितं कर्म उदासीनं कर्म इत्युच्यते। यथा ग्रामं गच्छन् तृणं स्पृशति इति। अत्र ग्रामसंयोगः फलम्। गमनस्य लक्ष्यमपि ग्राम एव वर्तते। तथापि तृणम् इच्छानधीनतयापि अत्र स्पर्शनस्य कर्म भवति। एतदेव उदासीनं कर्म इत्युच्यते।

द्वेष्यं कर्म – कर्तुः इच्छाविरुद्धत्वेऽपि ज्ञानेनाज्ञानेनापि वा क्रियाजन्यफलाश्रयं भवति तत्कर्म द्वेष्यं कर्म इत्युच्यते। यथा – ओदनं भुञ्जानो विषं भुङ्क्ते इति। अत्र कर्तुः पराधीनादिना विषस्य द्वेष्यत्वेऽपि गलविवरप्रवेशानुकूलफलाश्रयतया कर्मत्वं सिद्ध्यति।

---

[7] *वैयाकरणभूषणसारः*, सुबर्थनिर्णयः।

[8] तत्रैव, सुबर्थनिर्णयः।

[9] तत्रैव, सुबर्थनिर्णयः।

संज्ञान्तरैरनाख्यातं कर्म – अकथितं च इति सूत्रेण विहितानां कर्मणां संज्ञान्तरैरनाख्यातं कर्म इत्युच्यते। एतेषां गौणकर्म इत्यपि व्यवहारो दृश्यते। अपादानादिकारकैः अविवक्षितानां येषाम् अकथितं इति सूत्रेण कर्मत्वं सम्पद्यते तानि अत्र उदाहरणानि। यथा – गां दोग्धि पयः। अत्र गोः अपादानत्वेऽपि तदविवक्षायां प्रकृतसूत्रेण कर्मत्वं सिद्धम्।

अन्यपूर्वकं कर्म – कर्तुरीप्सिततमं कर्म, तथायुक्तं चानीप्सितम्, अकथितं च इति त्रीणि सूत्राणि विहाय अन्यैः सूत्रैः यत्र यत्र कर्मसंज्ञा विहिता ताः सर्वा अन्यपूर्वकं कर्म भवति। यथा – हरये क्रुध्यति इति।

एवं कर्मणो सप्तविधभेदाः वाक्यपदीयदिशा वैयाकरणभूषणसारे निरूपिता वर्तन्ते।

परिशीलितग्रन्थसूची

अष्टाध्यायीसूत्रपाठः (प्रकरणनिर्देशसमन्वितः) पुष्पादीक्षितविरचितः, नवदेहलीतः २०१० तमे वर्षे संस्कृतभारत्या प्रकाशितः।

वैयाकरणभूषणसारः, श्रीमत्कौण्डभट्टविरचितः, देहलीस्थात् चौखम्बा संस्कृत प्रतिष्ठानात् २०१६ ईशबीयाब्दे प्रकाशितः।

वैयाकरणसिद्धान्तकौमुदी, श्रीमद्भट्टोजिदीक्षितविरचिता, देहलीस्थात् मोतिलाल वनारसीदास इत्यास्मात् १९६१ ईशबीयाब्दे प्रकाशिता।

व्याकरणमहाभाष्यम्, श्रीमन्महर्षिपतञ्जलिविरचितम्, देहलीस्थात् चौखम्बा संस्कृतप्रतिष्ठानात् प्रकाशितम्।

निपाता नामाख्यातार्थयोर्द्योतका वाचका वेति निरूक्तिः

पार्थसारथिघोषः[1]

आलोचनाः

जगदिदं खलु मूकायते अन्तरेण शब्दमिति सर्वजनविदितमेतद्यतो हि भावविनिमयहेतुष्वस्यैव प्राधान्यत्वात्। अर्थाभिधानदृष्ट्या पदशब्दयोः पर्यायत्वं सुस्थिरम्। व्यक्ताव्यक्तभेदेन शब्दस्य द्वैविध्यं परिलक्षितम्। तयोर्यश्च व्यक्तः अर्थप्रतिपादको वा तदपि साध्वसाधुभेदेन द्विविधतामेति। असाधुशब्देभ्यः पृथकीकृत्य साधुशब्दानामाकलनन्तु शब्दानुशासनमिति शास्त्रेण विधीयते। साधुपदानामेव निर्णयजनकत्वादस्य शब्दानुशासनशास्त्रस्य पदशास्त्रमित्यपि समाख्यापरा। तच्च पदमादायैव दरीदृश्यन्ते वैमत्यानि दर्शनेषु। यथा- शक्तिविशिष्टं यत् इति धिया **''शक्तं पदम्''** इति आमनन्ति नैयायिकाः। **''सुप्तिङन्तं पदम्''**[2] इत्यत्र शाब्दिकानां स्वरसः। पदमिदमादायैव निरुक्तकाराः स्वकीयं मतं निगदन्ति। तन्मते अर्थाभिधायकं पदं खलु चतुर्विधम्। तदुक्तं निरुक्ते आचार्येण यास्केन – **''तद्यान्येतानि चत्वारि पदानि। नामाख्यातोपसर्गनिपाताश्च''**[3]।। इति। निरुक्तमते पदचातुर्विध्येषूपसर्गो हि अन्यतमः। कश्चोपसर्ग इति जिज्ञासायाः निवृत्तिं प्रतिपिपादयिषुणा भगवता पाणिनिना सूत्रितमष्टाध्याय्यां स्वप्रणीतायाम् – **''उपसर्गाः क्रियायोगे''**[4]। इति।। सिद्धान्तकौमुदीकृतो वदन्ति वृत्तौ सूत्रस्यास्य – **''प्रादयः क्रियायोगे उपसर्गसंज्ञकाः भवन्ति''** इति। अत एव अस्ति भवति इत्यादिक्रियाभिः सन्नद्धाः प्रादयः उपसर्गतामेन्ति इति आचार्यस्याशयः। परन्तु कुत्र प्रयोक्तव्याः धातोः प्राक्परं वेति जिज्ञासायां तन्निराकरणचिकीर्षुणा भगवता पाणिनिना निर्भणितम् – **''ते प्राग्धातोः''**[5]।। इति। दीक्षितभट्टेन निगदितं सिद्धान्तकौमुद्यामस्य सूत्रस्य वृत्तौ – **''ते प्रादयो धातोः प्रागेव प्रयोक्तव्याः''**।। इति। यथा अनुभवति इत्यत्र भवतीति क्रियायाः प्राक् प्रादिष्वन्यतमस्य अनु इत्यस्य प्रयोगात् तस्य उपसर्गत्वं सिद्धम्। एते एव **''प्रादयः''**[6] इति शास्त्रबलात् निपातसंज्ञका अपि भवन्ति। किञ्च चादीनामपि निपातसंज्ञा विधीयते **''चादयोऽसत्त्वे''**[7] इति सूत्रेण। एतद्विषये एव संशयः केषुचित् दृश्यते। केचन निपाताः नार्थवन्तः। अतस्ते नामाख्यातार्थद्योतका इति तेषां मतम्। यद्यपि साक्षात् निपातपदमादाय विषये अस्मिन् आचार्येण शाकटायनेन किमपि नोक्तं तथापि प्राद्युपसर्गरूपनिपातविषये निरुक्तञ्च निरुक्ते – **''न निर्बद्धा उपसर्गाः अर्थान्निराहुरिति शाकटायनः''**[8]।।

---

[1] गवेषकः, संस्कृतविभागः, कोचविहार-पञ्चाननवर्माविश्वविद्यालयः, पश्चिमवङ्गः।

[2] *अष्टाध्यायी,* 1.1.14

[3] *निरुक्तम्,* (मेधाचैतन्यसम्पादितम्), 1.1.1, पृष्ठा - 1

[4] *अष्टाध्यायी,* (1.4.59)

[5] तदेव, 1.4.80

[6] तदेव, 1.4.58

[7] तदेव, 1.4.57

[8] *निरुक्तम्,* (मेधाचैतन्यसम्पादितम्), 1.1.3, पृष्ठा - 60

इति। अर्थात् धातुभ्यः निः पृथक्तया बद्धाः प्रयुक्ताः उपसर्गाः स्वकीयार्थान् न निः निश्चयेन आहुः वदन्ति इति। परन्तु धातुस्थितान्नर्थान्नेव द्योतयन्ति एते उपसर्गा इति आचार्यस्य शाकटायनस्य मतम्। यथा भूधातोर्लटि तिपि निष्पन्नं भवतीति पदं सत्तारूपार्थस्य वाचकम्, परन्तु तत्क्रियापदस्यैव प्राक् अन्विति उपसर्गस्य योगे निष्पन्नमनुभवतीति पदमनुभवरूपार्थस्यैव वाचकम्। अनुभवरूपस्यार्थस्य वाचकः अन्विति भवतीति वा इत्यत्रैव संशितिः। मतानुसारं चाचार्यस्यात्र धातूनामनेकार्थत्वात् अनुभवरूपार्थः अपि भूधातौ एव सूक्ष्मतया वर्तते। यथा तमसावृते गृहे स्थितघटस्य केवलेन चक्षुषा अप्रकाशितत्वेन सदीपकं तस्य प्रकाशत्वात् दीपको हि घटस्य द्योतकः इति सिद्धः। तद्वत् भवतीति क्रियापदे स्थितानुभवरूपार्थस्य केवलेन भवतीति क्रियापदेन अप्रकाशितत्वेन अन्विति सोपसर्गं तदर्थस्य प्रकाशकत्वाद् अन्विति उपसर्गः अत्र अनुभवरूपार्थस्य द्योतकः एव इति आचार्यस्य मतम्। तस्मादेव आचार्येण शाकटायनेन निरुक्ते निगदितं – ‘‘**नामाख्यातयोस्तु कर्मोपसंयोगद्योतकाः भवन्ति**[9]’’।। इति। अत एव नामाख्यातार्थयोः द्योतकाः इमे उपसर्गा इति। कथंकारं भवतीति चेदुच्यते कर्मोपसंयोगद्योतकाः इति। अत्र कर्मपदेन अर्थः परामृष्टः। अत एव नामार्थः आख्यातार्थो वा, तन्नामार्थस्य आख्यातार्थस्य उप समीपे संयोगेन संयुक्ताः सन्तः इमे उपसर्गरूपनिपाताः तदर्थयोर्द्योतकाः भवन्तीति इति।

परन्तु आचार्यो गार्ग्यः ततो वैमत्यं सम्पोषयति। नेमे उपसर्गरूपनिपाताः नामाख्यातार्थयोः द्योतकाः परन्तु स्वार्थप्रतिपादका एव, अपि च तत्संयोगेन तयोरर्थपरिवर्तनन्तु सुतरां जायते इति। तदुक्तं निरुक्ते आचार्येण गार्ग्येन – ‘‘**उच्चावचा पदार्था भवन्तीति गार्ग्यः**’’[10]।। इति। उच्चाश्च अवचाश्चेति द्वन्द्वेन निष्पन्नस्य उच्चावचेति पदस्य बहुप्रकारा इत्यर्थः। अत एव एते चोपसर्गाः बह्वर्थप्रकाशकाः न तु नामाख्यातवन्निर्दिष्टा इति। यथा अनुभवति इत्यादिस्थलेषु अनुभवरूपार्थस्य वाचकः अन्विति उपसर्ग एव। न तु भवतीति क्रियायामेवानुभवरूपार्थो गोप्तः इति। अच एव गार्ग्याचार्यस्य मतानुसारं चोपसर्गरूपनिपाता स्वकीयार्थस्य वाचका एव न तु नामाख्यातार्थद्योतकाः।

वैयाकरणभूषणसारीया सम्मता व्याख्या

शाब्दिकसम्प्रदाये दर्शनतत्त्वप्रतिपादकग्रन्थेष्वयमाचार्यकौण्डभट्टप्रणीतो वैयाकरणभूषणसारः अन्यतमः। तत्र बहुप्रकरणोपेतेषु निपातार्थनिर्णयः इत्याख्ये कस्मिंश्चित् प्रकरणे आचार्येण कौण्डभट्टेन ‘‘**प्रादयः**’’[11] इति पाणिनीयशास्त्रबलात् प्रादीनां निपातत्वमुपसर्गत्वञ्चोनुभूय पूर्वपक्षोपस्थापनपुरःसरमेतेषां द्योतकत्वं वाचकत्वं वेति विषये वैशद्येन सदृष्टान्तमतिनैपुण्येन धिया चालोचना विहिता। प्रादीनां निपातत्वं ‘‘**प्रादयः**’’ इति शास्त्रेण सिध्यति, यत्तु चादीनां ‘‘**चादयोऽसत्त्वे**[12]’’ इति सूत्रेण निष्पद्यते। परन्तु

---

[9] *निरुक्तम्,* (मेधाचैतन्यसम्पादितम्), 1.1.3, पृष्ठा - 60

[10] तत्रैव

[11] *अष्टाध्यायी,* 1.4.58

[12] तत्रैव, 1.4.57

निपाता नामाख्यातार्थयोर्द्योतका वाचका वेति निरूक्तिः

निपातसामान्यमेव एतेषामिति। शाब्दिकानां नये तु एते निपाताः द्योतकाः न तु वाचकाः। अत्रैव विप्रतिष्ठन्ते पूर्वपक्षिणस्तार्किकाः। तार्किकास्तु प्रादीनामेव द्योतकत्वं चादीनां च वाचकत्वमित्यामनन्ति। निपातमात्रमेव केषाञ्चिद् द्योतकत्वं केषाञ्चन वाचकत्वमित्यङ्गीकरणे स्फुटं वैषम्यमयुक्तमेव। वैषम्ये कारणाभावात् तार्किकमतं नोपादेयमिति धिया तन्मतं मर्दयितुमुपक्रमते स्वप्रणीते वैयाकरणभूषणसारे आचार्येण कौण्डभट्टेन – ''**प्रादयो द्योतकाः, चादयो वाचकाः इति नैयायिकमतमयुक्तम्, वैषम्ये बीजाभावात्**''[13]।

तार्किकमतमण्डनम्

दर्शनेषु तत्त्वावलोकनप्रसङ्गे वाग्वैदग्ध्यकौशलेन कर्कशधियस्तार्किकाः सर्वत्रैव स्वेषामवदानं स्थापयन्ति स्म। न त्वत्रापि वैभिन्र्यं भाति। अतो निपाताः द्योतकाः वाचका वेति प्रसङ्गे सिद्धान्ताभ्युपगमनप्रसङ्गे ते निपातभूताः प्रादयो द्योतकाः, निपातभूताश्चादयश्च वाचका इति प्रतिपादयन्ति। अतः प्रजयतीत्यादिषु स्थलेषु प्रकर्षरूपो यः अर्थः स तु जिधातावेव अव्यङ्ग्यता राजते। परन्तु जयतीति क्रियापदं प्ररूपव्यञ्जकसमभिव्याहारेण प्रकृष्टजयरूपार्थस्य प्रत्यायकं जायते। अतः प्रादयो निपाताः न वाचकाः परन्तु द्योतका इति नैयायिकमतम्। किञ्च चादीनां वाचकत्वनिर्णयावसरे तार्किकैः युक्तिरुपस्थापिता यत् घटश्च पटश्चेत्यादौ घट समुच्चितः पट इत्यर्थस्तु अनुभविकेषु बोधदर्शनात् चादीनां वाचकत्वपक्षः सुतरां सिध्यतीति नैयायिकानां सम्मतिरिति।

शाब्दिकमतमण्डनम्

निपाताः द्योतका वाचका वेति विचारावसरे स्वसम्प्रदायं समर्थयितुमाचार्यः कौण्डभट्टः पूर्वपक्षमतमर्दनपुरःसरं स्वमतं स्थापयति वैयाकरणभूषणसारे। अतः पूर्वपक्षीयमतस्य निराकरणप्रसङ्गे आचार्येण भूषणसारे निजागद्यते – ''**प्रादयो द्योतकाः, चादयो वाचका इति नैयायिकमतमयुक्तम्, वैषम्ये बीजाभावादिति। ध्वनयन्निपातानां द्योतकत्वं समर्थयते**''।

''द्योतका प्रादयो येन निपाताश्चादयस्तथा।
उपास्येते हरिहरौ लकारौ दृश्यते यथा''।।

प्रादीनां चादीनाञ्चोभयविधानां निपातसामान्यात् केषाञ्चन द्योतकत्वं केषाञ्चिद्वा वाचकत्वमिति पूर्वपक्षिमतं नोपादेयमिति। परन्तु निपातमात्रमेव द्योतकमित्यत्रैव शाब्दिकानां सम्मतिः। सा च द्योतकता व्यञ्जनारूपा। कथं तत्प्रतीतिर्भवतीति चेत् निपाताव्यवहितसमीपस्थपदनिष्ठशक्तिबोधकता द्योतकतेति गृह्यते। तेन प्रजयति इत्यत्र निपाताव्यवहितसमीपस्थजयतीतिपदनिष्ठप्रकृष्टजयरूपशक्तिबोधकता द्योतकता प्रेति निपाते वर्तते। अनयैव रीत्या चादीनामपि द्योतकत्वमेव अङ्गीकर्तव्यम्। यथा घटश्च पटश्च इत्यत्रापि चकारासमभिव्याहृतेन

---

[13] *वैयाकरणभूषणसारः* (कौण्डभट्टप्रणीतः)

समुच्चितरूपार्थस्य अप्रतीतेस्तथा चकारसमभिव्याहृतेन समुच्चितरूपार्थस्य बोधनाच्च अत्रापि समुच्चितरूपार्थस्य द्योतक एव चकारः इति शाब्दिकानामाशयः। तेन यथा प्रजयतीत्यत्र केवलं प्रशब्दस्य क्वापि प्रयोगादर्शनात् प्रयोगे सति अर्थवत्त्वाभावात् वाचकत्वपक्षः न समाश्रयणीय इति। रीतिरियन्तु निपातमात्रमेवाविशेषभूता। तदुक्तं भूषणसारे आचार्येण कौण्डभट्टेन – **''येन हेतुना प्रादयो द्योतकास्तेनैव हेतुना चादयो निपातास्तथा द्योतका इत्यर्थः''**[14] **। इति**। पूर्वपक्षिमतं दूषयितुं तेषामेव प्रयोगोपस्थापनपुरःसरं दर्शयति आचार्यः कौण्डभट्टः – **''उपास्येते हरिहरौ लकारौ दृश्यते यथा''**[15]।। इति। तत्र भक्तः हरिहरौ उपास्ते इत्यस्यैव वाच्यान्तरे भक्तेन हरिहरौ उपास्येते इति कर्मणि लकारं प्रवर्तयितुमेव उपेत्यादीनां द्योतकत्वमङ्गीकुर्वन्ति तार्किकाः। अनयैव च रीत्या चादिष्वपि निपातेषु अङ्गीकर्तव्यं द्योतकत्वमिति।

चादीनामेतेषाञ्च द्योतकत्वं समर्थयन् विचारयति आचार्यः ईश्वरमनुभवतीत्यत्र ईश्वरकर्मकानुभवादिः न धातोः शक्यार्थः, शक्यश्चेत् तर्हि अनुरहितस्थले केवलं भवति इत्यत्रापि अनुभवादेः प्रतीतिः स्यात्। तथादर्शनात् चादीनामपि द्योतकत्वमेव सुसिद्धमिति शाब्दिकानां मतम्।

किञ्च वाचकत्वेन द्योतकत्वेन चोभयरीत्यैव अर्थावगमे सति निपातमात्राणामेव अर्थप्रतीत्यर्थं वाचकत्वद्योतकत्वरूपोपायद्वयावलम्बनसिद्धनैयायिकपक्षः गौरवायैव। पक्षान्तरे द्योतकत्वेनैव निपातमात्राणामर्थप्रतीतेः शाब्दिकपक्षे लाघवः इति प्रत्यक्षसिद्ध इति शाब्दिकानामावेदनमिति नैयायिकमतं न युक्तमिति।

स्वमतमण्डनम्

प्रादिचादिभेदेन निपातानामपि द्वैविध्यं सामान्यतः परिलक्षितो भवति। प्रादीनां द्योतकत्वं वाचकत्वं वेति संशये समुदिते द्योतकत्वमिति मतमुभयसम्प्रदायसाधारणमिति। अतो वैयाकरणा निपातमात्रस्य द्योतकत्वमङ्गीकुर्वन्ति। तत्र तार्किकाः केवलं प्रादीनामेव द्योतकत्वमङ्गीकृत्य चादिनिपातानां वाचकत्वपक्षं समर्थयन्तीति उभयविधविचारः अस्मदीयदृग्गोचरतामेति। परन्तु निपातानां द्योतकत्वपक्षमपि विचार्यते चेत् तत्त्वम् एवं निर्णीतं स्यात् यत् – यथा दीपेन घटः प्रकाश्यते इत्यत्र तमसावृते गृहे स्थितघटस्यात्मधारणानुकूलव्यापारे द्योतकभूतदीपस्योपयोगाभावः प्रत्यक्षसिद्धस्तथैव प्रादीनां द्योतकत्वपक्षे प्रजयतीत्यादिषु स्थलेष्वपि प्रकृष्टजयरूपार्थप्रतिपादने प्रेत्यस्याप्युपयोगाभावः अङ्गीकर्तव्य एव। अतो निपातानां द्योतकत्वपक्षे एते निरर्थकाः इत्येव सिद्धान्तत्वेनायाति। निपातानां द्योतकत्वेन निरर्थकत्वात् निर्मक्षिकमित्याद्यव्ययीभावसमासानुपपत्तिः स्यात्। पूर्वपदप्रधानः अव्ययीभावो रीतिमिमामादाय निर्-इत्यस्य उपसर्गत्वेन निपातत्वात् द्योतकत्वपक्षः समाश्रितश्चेत् निर्मक्षिकमित्यत्र निरिति निपातस्य द्योतकत्वेन

---

[14] *वैयाकरणभूषणसारः* (कौण्डभट्टप्रणीतः)

[15] तत्रैव

निपाता नामाख्यातार्थयोर्द्योतका वाचका वेति निरूक्तिः

निरर्थकत्वात्तस्याव्ययीभावत्वमसिद्धमेव। अतः अव्ययभावसमासार्थप्रतिपत्यर्थं निरित्युपसर्गरूपनिपातस्य वाचकत्वमङ्गीकर्तव्यमिति मदीया मतिः।

किञ्च वाचकत्वाङ्गीकारे अपि क्वचिद्दोष आपद्यते एव। यथा विराग इत्यत्र विशिष्टो रागः विरागः, विगतः रागः विराग इत्यादिस्थले वाचकत्वन्तु सुस्पष्टमेव। अपि च वाचकत्वेन नानार्थत्वमपि उररीकर्तव्यमपि, अन्यथा वीति निपातस्य विशिष्टविगतान्यतमरूपार्थकल्पने दोषः क्वचिदनिष्टप्रसङ्गः स्यादेव। अथवा प्रकरणेणापि अर्थं कल्पयितुं शक्येत। यथा वृद्धस्यास्य अङ्गनासु विरागः। रमणीसु वृद्धानां प्रायेणानुरागाभावादत्र वीति निपातस्य विगत इत्यर्थः कल्पनीय एव। किञ्च शिशूनां मिष्टान्ने विरागः दृश्यते इत्यत्रापि प्रायेण शिशवः मिष्टान्नं प्रति अनुरागवन्त इति दृश्यते तस्मादत्र विरागघटितस्य वीति निपातस्य विशिष्टरूपार्थस्य कल्पनमेव श्रेयस्करम्। इत्थं प्रकरणेनापि निपातानामर्थव्यवस्थां कल्पयितुं शक्यते इति शिवम्।।

ग्रन्थपञ्जी

कौण्डभट्टः. *वैयाकरणभूषणसारः*. सम्पा. प्रभाकर मिश्रः. प्रथमसंस्करण. काशी : अरविन्दमिश्रः, मकरन्दमिश्रश्च, १९८२.

पतञ्जलिः. *महाभाष्यम्*. (*पस्पशाह्निकम्*). सम्पा. मेधाचैतन्य. द्वितीयः. कोलकाता : संस्कृतवुक्डिपो, २०१७.

पाणिनि. *अष्टाध्यायी*. सम्पा. तपनशङ्कर भट्टाचार्य. तृतीय खण्ड. कोलकाता : संस्कृतवुक्डिपो, २०१७.

पाणिनिः.*पाणिनीयशिक्षा*. सम्पा. बालकृष्ण शर्मा. उज्जयिनीस्थ-कालिदास-अकादेमी-निदेशकः : श्रीनिवासरथः, २०५० वि.

भट्टोजिदीक्षितः.*सिद्धान्तकौमुदी*. सम्पा. गिरिधरशर्मा. बाराणसी : मोतीलालबनारसी, २०१४. (प्रथमसंस्करणम्).

यास्कः. *निरुक्तम्*. सम्पा. तारकनाथ अधिकारी. प्रथम. कोलकाता : संस्कृतवुक्डिपो, २०१६.

पुराणे विविधानां कलाविद्यानां समीक्षणम्

अर्पितामैत्री[1]

पुराणशब्दस्य व्युत्पत्तिः पाणिनियास्काचार्याभ्यां विहितास्ति। पुरा भवम् इत्यस्मिन् अर्थे 'सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च'[2] इत्यनेन सूत्रेण पुराशब्दात् ट्युप्रत्यये कृते तुटः आगमे सति पुराणशब्दस्य निष्पत्तिः भवति। परन्तु पाणिनिः स्वयमेव तेन प्रणीतयोः सूत्रयोः पुराणशब्दस्य प्रयोगे तुडागमस्य अभावस्तु निपातनात् सिद्ध्यति, ते च सूत्रे स्तः – 'पूर्वकालैक- सर्वजरत्पुराणनवकेवलाः समानाधिकरणेन' (२/१/४९) इति तथा 'पुराणप्रोक्तेषु ब्राह्मणकल्पेषु' (४/३/१०४) इति च। पाणिनेः प्रक्रियानुसारेण पुरा-शब्दात् व्यु-प्रत्ययो भवति परन्तु नियमानुसारेण तुटः आगमो न भवति। यास्कप्रणीते निरुक्ते (३/१९) पुराणशब्दस्य व्युत्पत्तिः अस्ति - 'पुरा नवं भवति' इति। वायुपुराणानुसारेण पुरा अनति अर्थात् प्राचीनकाले यत् जीवितम् आसीत् तदेव पुराणमित्युच्यते[3]।

पद्मपुराणानुसारेण अस्यार्थो भवति 'पुरा परम्परां व्यष्टि कामयते' अर्थात् यत्खलु प्राचीनतायाः परम्परायाः कामनां करोति तदेव पुराणमित्युच्यते[4]।एतस्याः वर्णनायाः इदम् अवबुध्यते यत् पुराणे वर्णिताः विषयास्तु प्राचीनकालाद् एव सम्बन्धिताः आसन्। बहुषु क्षेत्रेषु तु इतिहासः पुराणञ्च समानार्थकमिति स्वीक्रियते, परन्तु इतिहासस्य व्युत्पत्तिलभ्योऽर्थो भवति प्राचीनकालाद् वास्तविकरूपेण घटिताः घटनाः, परन्तु पुराणे प्रयुक्तस्य इतिहासशब्दस्यार्थो भवति इतिवृत्तमिति।

भारतीयसाहित्यपरम्परायां पुराणं तु विशेषं स्थानं धत्ते। अष्टदशपुराणानि अष्टादशोपपुराणानि च मिथो मिलित्वा विश्वकोशो भवति। पुराणेषु उपपुराणेषु च प्राप्ताः विषयाः भवन्ति – आख्यायिका – इतिहास – वंशावली – शास्त्र – कला – विद्या – धर्म – पाप – पुण्य – दण्डादयः, एतेषां विषयाणां विचारः वर्णना चात्र वरीवर्तते। पुराणं तु भूत-भविष्यदित्यादिभिः सह अस्माकं मातृभूमेः प्राचीनसंस्काराणां, भवितव्यानां परिणामानां चेत्यादीनामुल्लेखमपि करोति।

पुराणेषु खलु स्थापत्य – नृत्य – संगीत – मूर्तिकलादीनां प्रायः सर्वासामपि कलानां विवरणं दृश्यते। ब्रह्मपुराणे औडीशातीर्थवर्णनम्, वायुपुराणे जम्बुदीपवर्णनम्, अग्निपुराणे व्याख्यायितभवन –

---

[1] गवेषिका, संस्कृतविभागः, गौड़वङ्गविश्वविद्यालयः, पश्चिमवङ्गः।

[2] *अष्टाध्यायी* - ४/३/२३

[3] *वायुपुराणम्* – १/२०३

[4] *पद्मपुराणम्* – ५/२/५३

स्थापत्य – मूर्तिकलादीनां विस्तृततया सारगर्भितरूपेण च विवरणम्, मत्स्यपुराणे तु प्रतिष्ठितानां पीठानाम्, देवमूर्तेः निर्माणस्य विवरणञ्च दृश्यते।

लोकोपयोगिनीनामनेकासां विद्यानां वर्णना तु विशेषरूपेण विश्वकोशीये अर्थात् अग्निपुराणे, गरुडपुराणे, नारदीयपुराणे च प्राप्यते। काश्चन कलाः विद्याश्च नितरामेव विलक्षणाः सन्ति, तेषां मूलग्रन्थस्तु महता श्रमेण अन्वेषणे कृते सत्यपि नैव प्राप्यते। अत्र काश्चन विद्याः समासेन मया शोधप्रबन्धेऽस्मिन् उपस्थाप्यन्ते । तद्यथा -

- **अश्वशास्त्रम् (अश्वचालनचिकित्सादयो विद्याः**) – इयं तु एका प्राचीना विद्या अस्ति। अश्वचिकित्सानिमित्तं प्राचीनकाले एकः स्वतन्त्र आयुर्वेदोऽस्ति, स तु शालिहोत्रमिति नाम्ना प्रसिद्धमस्ति। पुराणेषु तु अस्य सुस्पष्टं ज्ञानं भवति। अग्निपुराणे २८८ तमे अध्याये अश्वचालनस्य वर्णना प्राप्यते। एतस्मिन्नेव पुराणे पुनः २८९ – २९० तमेषु अध्यायेषु अश्वचिकित्सायाः संक्षिप्तं विवरणं प्राप्यते। गरुडपुराणे २०१ तमे अध्याये अयमेव विषयः प्राप्यते।

  प्रसङ्गेऽस्मिन् हस्तिशास्त्रमपि उल्लेखनीयमस्ति। सोमपुत्रस्य बुधस्य गजवैद्यकस्य प्रवर्तकरूपा पौराणिकी अनुश्रुतिः अपि मत्स्यपुराणे (२४/२-३) प्राप्यते। गजायुर्वेदस्य विवरणं तु धन्वन्तरिणा प्रदत्तं यस्य संक्षिप्तं विवरणं तु गरुडपुराणे प्राप्यते। (२०१ अध्याये)[5]। अग्निपुराणे २८७ तमे अध्याये अयमेव विषयः प्राप्यते। एतान् विषयान् अतिरिच्यापि अग्निपुराणे २८२ तमे अध्याये गोचिकित्सायाः अपि वर्णनं दृश्यते।

- **आयुर्वेदः** – अग्निपुराणे गरुडपुराणे च आयुर्वेदो विशद्रूपेण व्याख्यातोऽस्ति। अस्मिन् तु औषधिस्वरूपम् एवञ्च गुणपरिचयादीनां व्याख्या अपि प्रदत्ता, गरुडपुराणस्य ५६ तमे अध्याये (१४६ - २०२) अस्य साङ्गोपाङ्गतया विवेचनं दृश्यते। एतान् विहाय अपि अग्निपुराणे २८२-तमे अध्याये वृक्षायुर्वेदस्यापि चर्चा कृता अस्ति, यत्र वृक्षलतागुल्मेभ्यः उत्पन्नायाः व्याधेः चिकित्सा वर्णिता अस्ति। इयमेव भारतवर्षस्य एका प्राचीना विद्या।
- **रत्नपरीक्षाकला** – गरुडपुराणे अस्य विषयस्य चर्चा तु द्वादशाध्यायेषु विस्तृतरूपेण (६८ - ८०) वर्णिता अस्ति। यस्मिन् तु रत्नविभाजनम्, तस्य गुणदोषयोः प्रभावादीनां चर्चा प्राप्यते। अग्निपुराणे २६४-तमे अध्याये अयं विषयो वर्णितोऽस्ति[6]।
- **वास्तुकला एवं शिल्पकला** – मत्स्यपुराणे विषयस्यास्य अष्टादशाध्यायेषु विस्तृतरूपेण चर्चा विद्यते (अध्याय २५२ - २७०)। अग्निपुराणेऽपि अयं विषयः केषुचित् अध्यायेषु विकीर्णरूपेण प्राप्यते[7]। यत्र तु

---

[5] *गरुडपुराणम्* – २०१/३३/ २९

[6] *अग्निपुराणम्* - अध्यायः - २६४

वास्तुविद्यायाः मूलभूताः सिद्धान्ताः, स्थानस्य निर्माणाय रूपरेखायाः देवमूर्तेः निर्माणं तथा मन्दिराणां राजप्रासादानां रचना च प्राप्यते।

- **ज्योतिषम्** – श्रीमद्भागवतस्य अष्टमे स्कन्धे पञ्चमाध्यात् विंशत्यध्यायपर्यन्तं, गरुडपुराणे पञ्चसु अध्यायेषु (५९ - ६४) फलितज्योतिषस्य विवरणं प्राप्यते। तत्र प्राप्ताः विषया भवन्ति – नक्षत्रदेवताकथनम्, योगिनीस्थितिनिर्णयः, सिद्धियोगः, अमृतयोगः, दशाविवरणम्, दशाफलम्, यात्रायां शुभाशुभकथनम्, राशेः विवरणम् इत्यादीनां विषयाणां विरवणं प्राप्यते।
- **सामुद्रिकशास्त्रम्** – अस्याः विद्यायाः लक्ष्यमस्ति व्यक्तेः शरीरस्य अङ्गस्य स्वरूपं निरीक्ष्य तस्य जीवनस्य दशाकथनम्। अग्निपुराणे २४३ – २४५ अध्याये तथा च गरुडपुराणे १.६३-६५ अध्याये अस्याः विद्यायाः विवरणं प्राप्यते।
- **धनुर्विद्या** – प्राचीनकाले इयं विद्या सुप्रसिद्धा आसीत्। अग्निपुराणे चतुर्षु अध्यायेषु (२४९ - २५२) अस्याः वर्णनं दृश्यते।
- **अनुलेपनविद्या** – मार्कण्डेयपुराणे (६१ अध्याये ८-१०) अस्य वर्णना दृश्यते। अत्र तु एकस्य विशिष्टस्य पादस्य लेपविषये उक्तमस्ति, तस्य यदि पादयोः धारणं करोति कोऽपि तर्हि अर्धदिवसे सहस्रयोजनयात्रायाः शक्तिः भवति।
- **सर्वभूतरूतविद्या** – अस्याः विद्यायाः तात्पर्यं तु सर्वेषां जीवजन्तूनां ध्वनेः अर्थावबोधनाय विद्यते। तस्य विवरणं तु मत्स्यपुराणे (२०/२५), मार्कण्डेयपुराणे (६४/३), पद्मपुराणस्य सृष्टिखण्डे (१०/८५) च प्राप्यते[8]।
- **रक्षोघ्नविद्या** – मार्कण्डेयपुराणे (७०/२१) अस्याः रक्षोघ्नविद्यायाः वर्णनं प्राप्यते[9]। एतस्यां विद्यायां तु यज्ञं ये राक्षसाः अपवित्रं कुर्वन्ति तेषां दूरीकरणस्य उपायाः वर्ण्यन्ते।
- **उल्लापनविद्या** – अस्याः विद्यायाः प्रभावेन जटिलं वस्तु सरलं भवति।
- **सङ्गीतकला** – पुराणादिषु तु सङ्गीत – नृत्य – वादनादीनां कलानां विस्तृततया वर्णनं लभते। अग्निपुराणे सामविधानम् (अध्यायः २६१), छन्दोविवरणम् (अध्यायः ३२८ - ३३४), नृत्यविवरणम् (अध्यायः ३४१) च भेदपूर्वकं व्याख्यातमस्ति।

- **उपसंहारः** – उपर्युक्ताः विद्याः अतिरिच्यापि अभिनयकलाः[10], भूगोलम्, गणितादयो विषयाः विस्तृततया वर्णिताः सन्ति। वस्तुतः पुराणं तु अस्माकं भारतीयसाहित्यपरम्परायां सारगर्भितमुद्घोषितमस्ति, यत्तु

---

[7] *अग्निपुराणम्* - ४० अ., ९४ – ९५ अ., १०५ – १०६ अ., २४७ अ.

[8] *मत्स्यपुराणम्* (२०/२५), *मार्कण्डेयपुराणम्* (६४/३), *पद्मपुराणम्* (सृष्टिखण्डः - १०/८५)

[9] *मार्कण्डेयपुराणम्* (७०/२१)

[10] *अग्निपुराणम्*, अध्यायः – ३४२

पुराणे विविधानां कलाविद्यानां समीक्षणम्

अद्यतनस्य विश्वस्य लौकिकाध्यात्मिकज्ञानस्य विश्वकोशस्य च भूमिकायां सार्थकतया दृढरूपेण च प्रत्यक्षितमस्ति। वस्तुतः पुराणेषु धर्म – दर्शन – भक्ति – कला – इतिहास – राजनीति – समाजव्यवस्थादि-विभिन्नविषयिकाः सामग्र्यः सङ्कलिताः सन्ति । अतः पुराणवाङ्मयं भारतीयजीवनस्य साहित्यस्य च अस्ति अमूल्यं रत्नम् । विश्वसाहित्येऽपि अष्टादशमहापुराणानि अनुपमानि श्रेष्ठरत्नानि सन्ति । वस्तुतः पुराणेषु प्राचीनभारतस्येतिहासो निहीतोऽस्तीत्यलं पल्लवितेनेति शिवम् ।

अनुशीलिता ग्रन्थसूचिका

प्राथमिकग्रन्थस्रोतांसि

अग्निपुराणम् पञ्चानन-तर्करत्न-सम्पादितम्, नवभारत -पावलिशार्स, कोलकाता, १९९९ (प्रथमसंस्करणम्).

वायुपुराणम् पञ्चानन-तर्करत्न-सम्पादितम्, नवभारत -पावलिशार्स, कोलकाता, १९९९ (प्रथमसंस्करणम्).

पद्मपुराणम् पञ्चानन-तर्करत्न-सम्पादितम्, नवभारत -पावलिशार्स, कोलकाता, १९९९ (प्रथमसंस्करणम्).

मार्कण्डेयपुराणम् – पञ्चानन-तर्करत्न-सम्पादितम्, नवभारत -पावलिशार्स, कोलकाता.

मत्स्यपुराणम् पञ्चानन-तर्करत्न-सम्पादितम्, नवभारत -पावलिशार्स, कोलकाता.

गौणग्रन्थस्रोतांसि

चट्टोपाध्याय, अशोक. *पुराण परिचय.* मडार्न वुक एजेन्सी, कोलकाता, १९७७ (प्रथमसंस्करण) ।

वन्द्योपाध्याय, धीरेन्द्रनाथ. *संस्कृत साहित्येर इतिहास.* पश्चिमवङ्ग - राज्य – पुस्तक - पर्षद्, कोलकाता, २०१५ (द्वितीयसंस्करण).

पण्डा, गङ्गाधर. *संस्कृत वाङ्मय का बृहत् इतिहास* (त्रयोदशखण्ड). उत्तरप्रदेश संस्कृत संस्थान, लखनऊ, २००६ (प्रथमसंस्करण).

वरोला, वाचस्पति. *संस्कृतसाहित्य का इतिहास.* चौखाम्बा संस्कृत सीरिज आफिस, वाराणसी, १९७५ (द्वितीयसंस्करण).

वैदिकवाङ्मये प्रतिभासितं गणिकाजीवनम्

देवव्रतगुप्तः[1]

प्राचीनकालादेव वाराङ्गनाजीवनमादाय पृथिव्याः विविधेषु समाजेषु, संस्कृतिषु, साहित्येषु च भिन्नमार्गावगाहिन्या भावनायाः प्रकाशः संदृश्यते। भारते अपि गणिकानाम् इतिहासः सुप्राचीनः। वेदेभ्यः महाकाव्यस्य परिधिं यावत् निरवच्छिन्नतया भिन्नाङ्गिकेन दृष्टिभङ्ग्या च वाराङ्गनानां चित्रं वर्णितम् आलोक्यते। कविगुरुः रवीन्द्रनाथः स्वकल्पनायां तस्य *उर्वशी*ति कवितायां स्वर्गस्य अप्सरसः उर्वश्याः वर्णनं चकार – 'नह माता, नह कन्या, नह वधू, सुन्दरी रूपसी, हे नन्दनवासिनी उर्वशी'।

वयं जानीमो यत् भारतीयसनातनधर्मस्य आकरग्रन्थत्वेन स्वीकृतो वेदः। चतुर्वेदस्य नैकाश्च शाखाः, ब्राह्मणानि, आरण्यकानि, उपनिषदश्च विद्यन्ते। षड्वेदाङ्गानि अपि वेदार्थज्ञानाय उपकारकाणि । कल्पसूत्राणि अपि विद्यन्ते। तथाहि षड्विंशब्राह्मणे आम्नातम् – 'चत्वारोऽस्य वेदाः शरीरं षडङ्गान्यङ्गिनि' इति। वैदिकवाङ्मये वाराङ्गनाप्रसङ्गे न केवलम् चत्वारः वेदाः, चापि तदन्तर्गतशाखाप्रशाखाः अवलम्बनीयाः।

वेदे वाराङ्गनाजातीया नारी जारिणीति उच्यते। ऋग्वेदे जारिणीशब्दः आम्नातः – 'हस्राश्च वभ्रवो वाचमक्रतँ क्रमीदेषां निष्कृतं जारिणी'[1] इति। चतुर्वेदेषु वाराङ्गनारमण्यः विविधाभिः उपाधिभिः भूषिताः। ऋग्वेदे हस्रा[2], अग्रूः[3], साधारणी[4], ग्ना[5], यती[6], यव्या[7], विश्या[8] चेति गणिकायाः पर्यायवाचकाः शब्दाः प्राप्यन्ते। अथर्ववेदे पुंश्चली[9] महानग्निः[10] नग्ना[11] वेश्या चेति शब्दाः, शुक्लयजुर्वेदस्य वाजसनेयीसंहितायां व्रजयिणी, पुंश्चली, साधारणी, सामान्या, रञ्जनकारिणी, अतिवारी, अतिष्कदरी चेति शब्दाः, कृष्णयजुर्वेदस्य तैत्तिरीयब्राह्मणे अपष्कदरी इति गणिकायाः पर्यायवाचकाः शब्दाः प्राप्यन्ते।

पिशेल-गेण्डनारादिवैदेशिकाः पण्डिताः मन्यन्ते यत् प्राचीनग्रीसदेशस्य एथेन्सनगरे यथा *हिटेराइटाख्यगणिकानां* प्रतिपत्तिरासीत्, तथैव भगवतः बुद्धदेवस्य काले वैशालीनगर्य्यां पतितानां प्रसिद्धिरासीत्। वैदिककाले अपि भारतवर्षे पतितावृत्तिः सत्यमेव आसीत् ।

व्यवहारिकप्रयोजनेन एव वेदस्य सृष्टिर्बभूव। अस्माकम् आलोच्याः पतिता नार्य्यः अपि व्यवहारिकप्रयोजनसिद्धये सविशेषं भूमिकां पालितवत्यः। सामाजिकजीवने स्त्रीणां स्खलन-पतनादिकम् अवच्युतिश्चेति व्यतिक्रमिजीवनचर्चा वैदिकयुगे प्रचलन्ती आसीत्।

जारिणीशब्दार्थः उपपत्नी अवैधप्रेमिका वेति। ऋग्वेदिकमन्त्रेषु जारिणीजातीयानां नारीणां भूरिशः उल्लेखः प्राप्यते –

---

[1] गवेषकः, संस्कृतविभागः, गौड़वङ्गविश्वविद्यालयः, मालदा, पश्चिमवङ्गः।

'सेनेव सृष्टामं दधात्यस्तुर्न दिद्युत्त्वेषप्रतीका।
यमो ह जातो यमो जनित्वं जारः कनीनां पतीर्जनीनाम्'[12]।। इति।

ऋग्वेदे नर्तकीनां समुल्लेखो विद्यत एव। ऊषा देहापसारिणी नर्तकीति उच्यते । सा ऊषा निर्लज्जतया उन्नतस्तनद्वयं प्रदर्श्य नृत्यन्ती –

'अधि पेशांसि वपते नृतुरिवा पोर्नुते वक्ष उस्रेव वर्जवम्।
ज्योतिर्विश्वस्मै भुवनाय कृण्वती गावो न व्रजं व्युषा आवर्तमः'।। इति।

कामक्रीड़ायाः वेश्यावृत्तेस्तथा अस्तित्वं प्राप्यते ऋग्वैदिकमन्त्रेषु – 'परा शुभ्रा अयासो यव्या साधारण्येव मरुतो भिभिक्षुः'[13] इति। न केवलम् ऋग्वेदे, यजुर्वेदे आर्य-शूद्रनरनारीणामवैधमिलनप्रसङ्गे आम्नायते – 'शूद्रा यदर्यजारा न पोषाय धनायति'[14] इति।

ज्ञायते यत् यौनवासनाया नियन्त्रणाय विवाहविधिः प्रचलितः। किन्तु वैदिकयुगे विवाहोत्तरजीवने अपि व्यभिचारस्य प्रमाणम् आसीत्। वरुणप्रघासनामकं यज्ञानुष्ठानं प्रकृष्टप्रमाणमस्य। मासचतुष्टयात् परम् अनुष्ठितेऽस्मिन् यज्ञे अद्भुतविधानं दृश्यते। यज्ञाग्निं प्रज्वाल्य पूजको ब्राह्मणः यज्ञस्थले यजमानां पत्नीम् आह्वयति। यज्ञकुण्डस्य प्रज्वलिताग्निं परितः उपविष्टः ऋत्विक् यजमानपत्नीं पृच्छति – 'भोः त्वं वद अद्य, तव कति जाराः सन्ति' इति। सर्वसमक्षं यजमानपत्न्या सदुत्तरं दातव्यम् आसीत्। परम् उत्तरेण यजमानपत्नी मुखेन किमपि न प्रत्युत्तरयन्ती आसीत्। परं तस्याः कति उपपतयः आसन्, तत्संख्यानुसारं सा रमणी यज्ञस्थलात् समपरिमाणकं तृणम् आदाय इङ्गितेन ज्ञापयति स्म। अतः, उल्लिखितस्य वरुणप्रघासस्य यज्ञस्य उद्देश्यं सांसारिकमङ्गलार्थकम् अपि प्रधानम् उद्देश्यम् आसीत् गृहकर्तुः स्वकीययौनविच्युतेः स्वीकृतिः। अतः, सामाजिकीमिमां वास्तवतां स्वीकृत्य अनुमातुं शक्यते यत् वैदिकयुगे विवाहविहीनेन व्यभिचारेण समं विवाहपरवर्तिनि जीवने अपि व्यभिचार आसीत्।

आर्यसमाजे पुरुषेभ्यः नारीणां संख्या स्वल्पीयसी आसीत्। कारणमेतत् यत् आर्यसमाजे कन्यासन्ततिं प्रति चरमावज्ञा कन्याहत्या चेति। तैत्तिरीयसंहितायां मैत्रायणीसंहितायाञ्च उल्लिखितमासीत् यत् नवजातशिशूणां मध्ये पुत्रः आसीत् आदरणीयः काम्यश्चेति। कन्या आसीत् उपेक्षिता। स्वभावत एव पारिवारिकजीवने पारिपार्श्विकावज्ञार्थं परवर्तिनि काले नार्यः गणिकावृत्तिं गृहीतवत्यः। भिण्टारनित्सनये, वैदिकयुगे भ्रातृहीनाः नार्य्यः गणिकावृत्तिं गृहीतवत्यः। ऋग्वेदे समाम्नातं – अभ्रातेव पुंस एति प्रतीची गर्तारुगिव सनये धनानाम्[15] इति। अर्थात् अक्षक्रीड़ासक्तो जनो यथा धनाकाङ्क्षायां गृहम् आगतः, तथा भ्रातृहीना नारी पुरुषं निकषा गच्छतीति।

वैदिकयुगे याश्च नार्य्यः सामाजिकरूपेण गणिकायाः वृत्तिं गृहीतवत्यः, तत्र कारणानि तावत् –

क). उन्नतार्यजातिभूक्तैः जनैः सह अनुन्नतेषु अनार्येषु संघर्षेण निहतेषु सत्सु तासाम् असहायरमण्यः उपायान्तरं न प्राप्य आर्याणां यौनसङ्गिन्यः अभवन्। परवर्तिनि काले ताः यौनजीविकां गृहीतवत्यः।

ख). भ्रातृहीनाः कन्याः सामाजिकलाञ्छनातः मुक्तिं प्राप्तुं तथा च समाजे जीवितुकामाः ताः नार्य्यः उपायं न प्राप्य गणिकाजीवनम् आश्रयन्ते स्म ।

ग). उच्चवंशजाः जनाः यौनसङ्गित्वेन याश्च रक्षितानारीः व्यवहरन्ति स्म, कियत्कालात् परं यौनसम्भोगेच्छायाः निवृत्तेः परं ताः चिराय त्यजन्ति स्म। स्वाभाविकगत्या परवर्तिजीवनं धारयितुम् निरुपायाः सत्यस्ताः हतभागिन्यः नार्य्यः देहजीविकां अवलम्बन्ते स्म ।

परिशेषे वक्तव्यं यत् गणिकावृत्तेः प्रसारे यथा समाजतन्त्रस्य भूमिका आसीत्, तथैव राष्ट्रतन्त्रस्यापि। राजकार्यं सम्पादयितुं राजानः गणिकानां व्यवहारं चक्रुः। मूलतः, शत्रुहत्यायै गुप्तचरवृत्त्यर्थञ्च राजानः ताः नियुक्तवत्यः। प्राचीनकाले विषकन्यानां प्रयोगः उल्लेखनीयो बभूव । विषकन्या नाम गणिका। अपि च, अतिथीनाम् आप्यायनार्थम्, उच्चश्रेणीयदेशीयनृपेभ्यः उपहाररूपेण सुन्दरीणां गणिकानां व्यवहारः वैदिकयुगादेव निरवच्छिन्नरूपेण दृश्यते इति शिवम्।

तथ्यसूत्राणि –

1. *ऋग्वेदः* (10.36.5)
2. तत्रैव (1.124.7)
3. तत्रैव (4.19.9)
4. तत्रैव (1.167.4)
5. तत्रैव (1.124.8)
6. तत्रैव (7.76.3)
7. तत्रैव (1.167.4)
8. तत्रैव (1.126.5)
9. तत्रैव (15.2.5)
10. तत्रैव (14.1.36)
11. तत्रैव (5.7.8)
12. *ऋग्वेदः* (1.66.4)
13. तत्रैव (1.167.4)
14. *तैत्तिरीयसंहिता* (7.4.19.3)
15. *ऋग्वेदः* (1.124.7)

परिशीलिता ग्रन्थानुक्रमणी

अथर्ववेद – अनुवादक ओ सम्पादक रमेशचन्द्र दत्त, हरफ प्रकाशनी, कलकाता।

ऋग्वेदसंहिता (द्वितीयः खण्डः) – सम्पा. आब्दुल आजीज आल आमन, हरफ प्रकाशनी, कोलकाता।

कामसूत्रम् (वात्सायनः) – सम्पा. पारसनाथद्विवेदी, चौखाम्बा सुरभारती प्रकाशन, वाराणसी, 2014।

छान्दोग्योपनिषत् (प्रथमः भागः) – अनुवादकः सम्पादकश्च दुर्गाचरणसांख्यवेदान्ततीर्थः, देवसाहित्यकुटिर प्राइभेट लिमिटेड्, कलकाता, 2002।

प्राचीन भारते नारी ओ समाज – सुकुमारी भट्टाचार्य, न्याशानाल वुक, कलकाता, 2010।

भारतीय समाजे प्रान्तवासिनी – सुरेशचन्द्र वन्द्योपाध्याय ओ रमला देवी, सस्कृत पुस्तक भाण्डार, कलकाता, 1392।

महाभारतम् (वेदव्यासः) – सम्पा. हरिदाससिद्धान्तवागीशः, विश्ववाणी प्रकाशन, कलकाता, 1383 वङ्गाब्दः।

संस्कृत साहित्ये वाराङ्गना - दुर्गापद चट्टोपाध्याय, सुवर्णा प्रकाशनी, 1998 (प्रथम प्रकाश)।

Vedic India - translated by L. Renou, Rout Ladge Curzon, London.

Paippalada Samhita of Atharvaveda (Vol.II) – Dipak Bhattacharya, The Asiatic Society, Kolkata, 2007.

http://blogger-anirban.blogspot.com/2015/09/blog-post_82.html?m=1

http://www.ebanglalibrary.com/

पराशरीयाचारकाण्डे आद्यश्लोके टीकयोः पदार्थविमर्शः

सायन्ती-गराइ[1]

दिनान्तरं यथा शब्दार्थस्य परिवर्तनं जायते तथैव सामाजिकपरिवर्तनमपि जायते नितरामेव। तस्य प्रभावस्तु साहित्ये प्रतिफलति। तादृशं प्रतिफलनं दृश्यते पराशरसंहितायाः अर्थविषये। टीकाकारेषु क्वचित्स्थलेषु अर्थविषयकपार्थक्यं सुतरामेव दृष्टिं नो नन्दयति। पराशरसंहितायाः आचारकाण्डस्य प्रथमश्लोकं व्याप्यैव अस्य शोधविषयस्य परिधिः। अस्मिन् यत्र खलु माधवाचार्यस्य तथा नन्दपण्डितयोर्मध्ये मतवैभिन्नं दृश्यते तेषामेव चर्चा विहिता मया। तद्विषयिणी तौलनिकी समीक्षा अत्र स्थानं लभते। पराशरमहामुनिना प्रणीतस्य पराशरसंहितायाः भिन्नयोः टीकयोः द्वयोः माधवाचार्यस्य पराशरमाधवं तथा नन्दपण्डितस्य विद्वन्मनोहरां समाश्रित्य तुलनात्मकसमीक्षायान्तु ऐतिहासिकदृष्ट्या समयस्य समाजस्य च भूमिका अनस्वीकार्या। पि. भि. काने-महोदयमते तु पराशरसंहितायाः रचनाकालः ईशवीय-प्रथमशतकतः पञ्चमशतकमध्ये एव राजते। माधवाचार्यस्य रचनाकालस्तु १३३० ईशवीयाब्दतः १३८५ ईशवीयाब्दपर्यन्तम्। नन्दपण्डितस्य रचनाकालस्तु निर्णेतुं शक्यते – १५९५ – १६३० ईशवीयाब्दमवधि।

प्रथमं मतपार्थक्यम्

"अथातो हिमशैलाग्रे देवदारुवनालये।
व्यासमेकाग्रमासीनमपृच्छन्नृषयः पुरा।।"[2]

इति पराशरसंहितायाः आचारकाण्डस्य आदिमश्लोकस्थम् **अथ**पदम् आश्रित्य उभययोः टीकाकारयोः मतपार्थक्यं विद्यते। आचार्यमाधवः तदीये पराशरमाधवे लिखति - 'अथशब्द आनन्तर्यार्थः, अनन्तरमपृच्छन् इत्यन्वेतुं योग्यत्वात्'[3] इति। ततश्च वदति - 'अध्ययनानन्तर्यमर्थशब्दार्थः'[4] इति। नन्दपण्डितस्तु लिखति तदीय-विद्वन्मनोहरायां - 'अथ उपनयनान्तरम्'[5] इति।

---

[1] गवेषिका, संस्कृतविभागः, कोचविहार-पञ्चानन-वर्मा-विश्वविद्यालयः, पश्चिमवङ्गः।

[2] *पराशरसंहिता*, १-१।

[3] तत्रैव. (माधवाचार्यस्य पराशरमाधव-टीकोपेता आचारकाण्डरूप-प्रथमभागात्मिका). सम्पा. चन्द्रकान्त-तर्कालंकारः. कोलकाता : दि एसियाटिक सोसाइटि. १९७४. पृष्ठासंख्या – ३३. प्रकाशितम्.

[4] तदेव - पृष्ठासंख्या – ३४।

[5] *The Parāśaradharma Saṁhitā or Parāśara-Smṛiti*, edited by pandit Vāmana Śāstri Islampurkar. Bombay: Government Central Book Depot. 1893. page 85. Print.

तौलनिकी समीक्षा-

कोषग्रन्थानुसारं 'मङ्गलानन्तरारम्भ-प्रश्न-कार्त्स्न्येष्वथोऽथ' इति अथशब्दार्थाः। माधवाचार्यमतमत्र युक्तम्। अथ शब्दस्य आनन्तर्यार्थे एव प्रयोगः उचितः। ननु कथं न विद्यमानेषु अन्येषु अर्थेषु अथशब्दस्यान्वयः? यदि च आरम्भार्थे प्रयोगः स्यात् तर्हि आरभ्यते अपृच्छन् इति अन्वयस्तु न यथार्थं प्रतिपादयति। न च प्रश्नार्थे अथशब्दस्यान्वयः, पृच्छ्यते अपृच्छन् इति अन्वये तु पुनरुक्तिदोषः। कार्त्स्न्यार्थे कार्त्स्न्यम् अपृच्छन् इत्यन्वयेऽपि सम्बन्धाभावात् न योग्यः। आचार्यः माधवः आनन्तार्यार्थग्रहणे हेतुं प्रदर्शयति - 'आनन्तर्यार्थतायां तु तत्प्रतियोगिनः पूर्ववृत्तस्य उत्तरकालीनप्रश्नस्य च हेतु-हेतुमद्भावः सूचितो भवति।'[6] इति। वस्तुतः आनन्तर्यं सदा पूर्वापररूपप्रतियोगिद्वयनिरूप्यं भवति। पूर्वस्य हेतुत्वं गम्यते, उत्तरस्य च हेतुमत्त्वं गम्यते। हेतोः पूर्ववर्त्तित्वनियमादित्यभिप्रायः। अत्र तु पूर्वर्धे हेतुर्हि प्रश्नः, तस्य च कार्यत्वं भवति उत्तरार्धे उत्तरस्य।

ननु प्रश्नः समायाति कस्य अनन्तरम् अपृच्छन् इति। अखिलज्ञानभावे अत्यन्तमज्ञाते वा न प्रश्नः समागच्छति मनसि। प्रष्टव्यविषयं खलु सामान्यज्ञानम्। अयं तु साधारणनिर्देशः। तेन प्रष्टव्यविषयसामान्यज्ञानं तद्विषयविशेषज्ञानाभावश्च प्रश्नहेतुरिति लभ्यते। "धर्मेण पापमपनुदति", "धर्मं चरेत्" इत्यादिवेदवाक्यम् अधीत्य तु साधारणतया धर्मविषयकं ज्ञानं जायते। सामान्यज्ञानानन्तरं विशेषज्ञानार्थमेव प्रश्नः। तस्मात् वेदाध्ययनानन्तरर्यमथशब्दार्थः।

नन्दपण्डितेन वेदाध्ययनानन्तरं नोक्त्वा उपनयनानन्तरमिति अर्थः स्वीकृतः अथ शब्दस्य। उप-पूर्वकात् नीधातोर्ल्युटि निष्पन्नोऽयं उपनयनशब्दः संस्कारविशेषमेव द्योतयति। स च संस्कारः भवति त्रिविधः नित्यः काम्यः नैमित्तिकश्च। अस्मिन् च संस्कारे द्विजातीनामेवाधिकारः विद्यते। तत्र नित्यः अष्टमवर्षादिकाले विहितः, ब्रह्मवर्चसादिकामस्य पञ्चमादिवर्षविहितः काम्यः, नैमित्तिकस्तु पुनः संस्कारप्रयोजकपापापनोदनार्थं प्रायश्चित्तात्मकः। तेषाञ्च द्विजातीनां ब्राह्मणक्षत्रियवैश्यानां यज्ञसूत्रधारणादिरूप-प्रधानसंस्कारे सति "स्वाध्यायोऽध्येतव्यः" इति श्रुत्यनुसारं स्वकीयशाखायाः अध्ययनं कुर्वन्ति ते। अत आदौ उपनयनविधिः ततश्च स्वशाखाध्ययनरूपवेदाध्ययनं ततश्च धर्मविषयकं जिज्ञासा।

माधवाचार्य-नन्दपण्डितमतयोर्मध्ये अयमेव भेदो यत् वेदाध्ययनानन्तरं धर्मविषयकं प्रश्ने तु सन्निपात्योपकारकं भवति वेदाध्ययनम्। उपनयनानन्तरमित्यर्थे स्वीकृते तु आरादुपकारकं भवति उपनयनविधिः। यदि च उपनयनानन्तरं धर्मविषयकं जिज्ञासायां तु केवलं द्विजातीनामेवाधिकारः सुनिश्चितः। परन्तु साम्प्रतिककाले तु न हि केवलं द्विजातीयाः एव श्रौतपाठेऽधिकारिणोऽपि तु सर्वे एव। अतः वेदाध्ययनानन्तरं धर्मविषये सामान्यज्ञानानन्तरं तद्विषये विशेषज्ञाने सर्वेषामेवाधिकारः माधवाचार्यमतमाश्रित्य वक्तुं शक्यते। किं च मानमत्र? माधवाचार्येणोच्यते – "अथशब्दस्य

---

[6] *पराशरस्मृतिः*. श्रीचन्द्रकान्ततर्कालंकारपरिशोधिता. कलिकाता : दि एसियाटिक् सोसाइटि. १९७४. पृष्ठासंख्या – ३२. मुद्रितम्।

पौरुषेयग्रन्थानाच्च सर्ववर्णविषयत्वात् स एव तेषु योग्यः।"[7] इति। वस्तुतः पौरुषेयाः पुरुषकृता ग्रन्था मन्वात्र्यादिप्रणीताः स्मृतयः, रामायणादीनि ऋषिप्रणीतानि काव्यानि, भारतादयः इतिहासाः, अग्निमत्स्यादीनि पुराणानि च पौरुषेयग्रन्थाः। नात्र कालिदासादीनां लौकिककवीनां कृतीनामत्र संग्रहः। पौरुषेयशब्देन तेषामपि ग्रहणे कर्तव्येऽपि आर्षत्वाभावात् न तत्र विधिर्निषेधश्च। एतच्च –

"चतुर्णामपि वर्णानां यानि प्रोक्तानि श्रेयसे।

धर्मशास्त्राणि राजेन्द्र श्रृणु तानि नृपोत्तम॥"[8] इत्यादीनि बहूनि वचनानि उदाहृत्य कमलाकरभट्टैः शूद्रधर्मतत्त्वे विस्तरेण प्रपञ्चितमित्यत्र संक्षेपः।

द्वितीयं मतपार्थक्यम्

प्रथमश्लोकस्य अत-शब्दस्य आनन्तर्यार्थत्वे तस्य पूर्वप्रतियोगित्वात् हेतुत्वं गम्यते एव। माधवाचार्येण तदीये पराशरमाधवे उच्यते - "अतः शब्दो हेत्वर्थः। यस्मादेकशाखाध्यायिनो नाशेषधर्मज्ञानं, यस्माच्च युगान्तरधर्मावगत्या न कलिधर्मावगतिः, तस्मात्, इति हेतुर्द्रष्टव्यः"[9]। इति।

नन्दपण्डितस्तु अत्र हेतुत्वस्य भिन्नकारणत्वं प्रस्तौति तदीय-विद्वन्मनोहरायां - "उपनीय शौचाचारान् शिक्षयेत् इत्यनेन उपनयनानन्तरं शौचाचाराणां विज्ञेयत्वमुपदिश्यते अतो हेतोः"[10] इति हेतुमाह।

तौलनिकी समीक्षा-

पूर्वे एव आलोचितं यत् आनन्तर्यं तु पूर्वापररूपप्रतियोगिद्वयनिरूप्यम्। पूर्वस्य च हेतुत्वं गम्यते। प्रश्नरूपहेतुत्वे सत्येव उत्तररूप-हेतुमत्त्वभावो दृश्यते। ननु कथं हेतुत्वम्? तद्धि माधवाचार्यनये तु एकशाखाध्ययनेन न हि अशेषधर्मविषयकं ज्ञानं जायते कदाचित्। यतो हि युगान्तरं व्याप्य धर्मस्य अवगतिः। न हि सत्ययुगस्य धर्मस्वरूपं त्रेतायां द्वापरे वा। धर्मस्य भिन्नस्वरूपं दृश्यते एव। अतः धर्मविषयकजिज्ञासायां मतिः स्वाभाविकी एव। येषां खलु किमपि वेदाध्ययनात्मकं ज्ञानं नास्ति तेषां न कदापि धर्मविषये जिज्ञासाऽपि भविष्यति। अत्यन्तमज्ञाते तु न पृच्छा जायते एव। ननु कथं माधवाचार्येण

---

[7] *पराशरस्मृतिः*. श्रीचन्द्रकान्ततर्कालंकारपरिशोधिता. कलिकाता : दि एसियाटिक् सोसाइटि. १९७४. पृष्ठासंख्या – ३६. प्रकाशितम्।

[8] *The Parāśaradharma Saṁhitā or Parāśara-Smṛiti*, edited by pandit Vāmana Śāstri Islampurkar. Bombay: Government Central Book Depot. 1893. page 40. Print.

[9] तत्रैव।

[10] तत्रैव. page 87. Print.

एकशाखाध्ययनमुक्तमिति चेदुच्यते 'स्वाध्यायोऽध्येतव्यः' इति श्रुत्यनुसारं तु प्राचीने काले वेदाध्ययनस्य प्रचलनमासीत्। न हि सर्वे सर्वेषामेव वेदशाखायां निपुणाः भवितुमर्हन्ति। किञ्च, युगान्तरे धर्मस्वरूपस्य परिवर्तनं कथंकारं जायते? अस्यां पराशरसंहितायामेव दृश्यते व्यासदेवेन धर्मविषयकपृष्टे सति पराशरमुनिः युगान्तरभेदे धर्मस्वरूपं निगदितं –

"तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते।
द्वापरे यज्ञमित्युचुः दानमेकं कलौ युगे ॥"[11] इति।

नन्दपण्डितेन तु तदीयायां विद्वन्मनोहरायाम् उपनयनानन्तरार्थे अथशब्दस्य स्वीकृतत्वात् शास्त्रानुसारं शौचाचारादीनां शिक्षणार्थम् उपनयनमावश्यकम्। शौचाचारादयस्तु धर्मपदवाच्यः। अतो नन्दपण्डितेन उपनयनानन्तरमिति उक्तम्। परन्त्वत्र विषयस्य सङ्गतिमवलोक्य वक्तुं शक्यते यत् स्व-स्ववेदशाखामधीत्यैव उपपराशरं समागताः मुनयः धर्मस्वरूपं ज्ञानाय। सन्निपात्योपकारकरूपेण वेदाध्ययनानन्तरमेव धर्मजिज्ञासा समीचीना।

किञ्च, माधवाचार्यः प्राचीनत्वेपि धर्मज्ञानं सर्वेषामेव वर्णानां कृते इति चिन्तितवान्, यत्तु केवलवेदाध्ययनानन्तरार्थे एव ज्ञायते। उपनयनविधिस्तु केवलं द्विजातीनामेवाधिकारः। तत्र नास्ति शूद्राणां स्थानं धर्मजिज्ञासायां नन्दपण्डितमते इति मदीयमतम्। अत अथपदस्य वेदाध्ययनानन्तरार्थे प्रयोगः उचितः स्यात्।

<u>**तृतीयं मतपार्थक्यम्**</u>

"अथातो हिमशैलाग्रे देवदारुवनालये।
व्यासमेकाग्रमासीनमपृच्छन्नृषयः पुरा।।"[12]

इति पराशरसंहितायाः आचारकाण्डस्य आदिमश्लोकस्थम् **'देवदारुवनालये'** इति पदम् आश्रित्य उभययोः टीकाकारयोः मतपार्थक्यं विद्यते।

'देवदारुवनालये' इति पदस्य पाठभेदो विद्यते 'देवदारुद्रुमालये'[13] इति। देवदारुवने आलये निर्जने गृहे निवसति स्म व्यासदेवः। अस्य पदस्यार्थः आचार्यमाधवः तदीये पराशरमाधवे लिखति-

---

[11] *पराशरसंहिता*, १-२२।

[12] तत्रैव – १-१।

[13] *The Parāśaradharma Saṁhitā or Parāśara-Smṛiti*. Ed. Pandit Vāmana Śāstri Islampurkar. Bombay: Government Central Book Depot.1893. page 88. Print.

"देवदारुवनालये – इत्यनेन मनोऽनुकूलतामाह"[14] इति। नन्दपण्डितस्तु वदति - "देवदारुवनालयत्वेन विविक्ते मनोऽनुकूले च विक्षेपकारणाभावत्वेन तत्त्वप्रतिभासयोग्य इति यावत्"[15] इति।

तौलनिकी समीक्षा

देवदारुवनालये इति पदस्यार्थस्तु सूचितः पूर्व एव। आदावेव विवेच्यं यत् श्लोके कथमस्य पदस्य योजना, किञ्च तात्पर्यम्। चित्तस्य एकाग्रावस्थायामेव समाधिर्जायते। समाधिस्तु समाधायां ध्येयवस्तुनि एकाग्रतया मनसः स्थापनम्। तदेव पातञ्जलयोगदर्शने 'योगश्चित्तवृत्तिर्निरोधः'[16] इति सूत्रे प्रपञ्चितं पतञ्जलिना। एकाग्रावस्था तु विषयान्तरव्यावृत्तैकमात्रमविषयकचित्तवृत्तिः। एकाग्रे चित्ते एव ब्रह्मणि लीनः सम्भवः, यत्तु ऋषीणामभीष्टम्। निर्जने एव स्थाने एकाग्रं दृढं जायते। तादृशः महर्षिः कृष्णद्वैपायनः स्वाभीष्टलाभाय यत्नपरायण आसीत्। अतो देवदारुवनालये निवसति स्म व्यासदेवः। निवासकारणं प्रदर्शयति माधवाचार्यः –

"श्वेताश्वतराणां मन्त्रोपनिषदि श्रुतं –

'समे शुचौ शर्करा वह्नि वालुका-
विवर्जिते शब्दजलाश्रयादिभिः।
मनोऽनुकूले न च चक्षुःपीडने
गुहानिवाताश्रयने प्रयोजयेत्।।'[17] इति।

ईदृशं स्थानमेव मनोऽनुकूले उपयोगः। प्रायः समानमेवोक्तं नन्दपण्डितेन तथापि नन्दपण्डितस्य वचने अत्यन्तं स्पष्टता विद्यते। तट्टीकायां तु विविक्ते इति पदं युक्तमेव। विविक्तो नाम निर्जनः। निर्जने स्थाने एव ध्येयवस्तुनि एकाग्रता जायते। विविक्तस्थानस्य मनोऽनुकूलतामाह विक्षेपकारणाभावत्वात् तत्त्वप्रतिभासत्वाच्च। वस्तुतः विक्षेपावस्थायां तु चित्तस्य एकाग्रता न जायते।

---

[14] *पराशरस्मृतिः*. श्रीचन्द्रकान्ततर्कालंकारपरिशोधिता. कलिकाता : दि एसियाटिक् सोसाइटि. १९७४. पृष्ठासंख्या – ३६. प्रकाशितम्.

[15] *The Parāśaradharma Saṁhitā or Parāśara-Smṛiti*. Ed. Pandit Vāmana Śāstri Islampurkar. Government Central Book Depot. Bombay. 1893. page 88. Print.

[16] *पातञ्जलयोगदर्शनम्* – १-२।

[17] *पराशरस्मृतिः*. श्रीचन्द्रकान्ततर्कालंकारपरिशोधिता. कलिकाता : दि एसियाटिक् सोसाइटि. १९७४. पृष्ठासंख्या – ३७. प्रकाशितम्.

ग्रन्थस्रोतांसि

संस्कृतग्रन्थाः

पराशरः. *पराशरस्मृतिः* (माधवाचार्यस्य पराशरमाधव-टीकोपेता आचारकाण्डम्). सम्पा. चन्द्रकान्त-तर्कालंकारः. देल्ली : ओरियेन्टाल- वुक्- सेन्टार. २००७. प्रकाशितम्.

पराशरः. *पराशरस्मृतिः* (माधवाचार्यस्य पराशरमाधव-टीकोपेता आचारकाण्डम्). सम्पा. पण्डित-वामन-शास्त्री-इस्लाम्पुरकारः. बोम्वाइ : गभर्मेन्ट-सेन्ट्राल-वुक्-डिपो. १९०६. प्रकाशितम्.

पराशरः. *पराशरस्मृतिः* (माधवाचार्यस्य पराशरमाधव-टीकोपेता आचारकाण्डरूप-प्रथमभागात्मिका). सम्पा. चन्द्रकान्त-तर्कालंकारः. कोलकाता : दि एसियाटिक सोसाइटि. १९७४. प्रकाशितम्.

योगीन्द्रः, सदान्दः. *वेदान्तसारः*. सम्पा. विपदभञ्जनपालः. कलकाता : संस्कृत-पुस्तक-भाण्डारः. १४१७ बङ्गाब्दः. प्रकाशितः.

आङ्गलग्रन्थाः

Kane. P.V., *History of Dharmaśāstra (Vol. 1),* Govt. Oriental series Class B NO, 6, Pune: Bhanderkar Oriental Research Institute, 1997. Print.

Parāśara. *Parāśarasmṛti.*Translated into English by Manmatha Nath Dutta. Edited & Revised by K. L. Joshi. Delhi: Parimal Publication. 2009. Print.

प्रकाशितपत्रिकाः

Kāśividyāsudhānidhiḥ The Pandit New Series, Vol. XXVIII (A Monthly Publication of the Benares College). Benares: The Medical Hall Press. 1906. Print.

Kāśividyāsudhānidhiḥ The Pandit New Series, Vol. XXX (A Monthly Publication of the Benares College). Benares: The Medical Hall Press. 1908. Print.

Kāśividyāsudhānidhiḥ The Pandit New Series, Vol. XXXI (A Monthly Publication of the Benares College). Benares: Mahamandal Shastra Prakashak Samiti Press. 1909. Print.

संस्कृतवाङ्मये स्वल्पख्यातदूतकाव्यपरिचयः

श्रीमती टिनामण्डलः[1]

शब्दार्थमयं काव्यशरीरं दृश्य-श्रव्यत्वभेदात् द्विधा विभज्यते। तत्र संस्कृतसाहित्ये लौकिकश्रव्यकाव्यस्य महाकाव्य-खण्डकाव्य-चम्पूकाव्यादयो बहवो भेदाः परिलक्ष्यन्ते। अपि च, श्रृङ्गारिकगीतिकाव्यं हि प्रायः श्रृङ्गारवर्णनपरमेव। यद्यपि तत्र सम्भवति इतरे प्रसङ्गगता विषया अपि तथापि तस्य मुख्यं प्रयोजनं तु श्रृङ्गारजन्यानन्द एव। श्रृङ्गारिकं हि गीतिकाव्यं दूतकाव्य-प्रस्तुतिकाव्य-स्फुटकाव्यभेदेन त्रिविधं दृश्यते। मनुष्याणां सामाजिके तथा राजनैतिके च जीवने दूतस्य महत्त्वपूर्णा भूमिका सर्वदा विद्योततेतमाम्। संस्कृतसाहित्ये दूतकाव्यपरम्पराऽतिप्राचीना। काव्यशास्त्रस्याद्याचार्यो भामहः काव्यालंकारे निर्दिशति–

“अयुक्तिमद्यथा दूता जलभृन्मारुतेन्दवः।
तथा भ्रमरहारीतचक्रवाकशुकादयः।।
अवाचोऽयुक्तवाचश्च दूरदेशविचारिणः।
कथ दूत्यं प्रपद्येरन् इति युक्त्या न युज्यते”॥ इति।

दूतस्य कर्म दौत्यकर्म इति षष्ठीतत्पुरुषसमासः। दूतमुखेन वार्ताप्रेरणस्य परम्परा आवैदिककालादेव प्रवहन्ती।

सर्वप्रथमं वैदिकसाहित्ये दौत्यकर्मणो निर्दशनमाप्यते। ऋग्वेदस्य प्रथमे मण्डले हव्यवहनाद् अग्निर्हि देवानां दूत[1] इति कल्पितम्। ऋग्वेदस्य पणि-सरमासूक्ते (10.108) देवराजेन्द्रः देवशुनीं सरमां पणेः सकाशे दूतरूपेण प्रेरितवान्। वाल्मिकीये रामायणे विरहिणा रामेण देव्याः सीतायाः सकाशे दूतस्य हनुमतः प्रेषणं कृतमिति कृत्वा सुप्राचीने आर्षमहाकाव्ये सर्वप्रथममेव दौत्यकर्म उपनिबद्धम्। महाभारतेऽपि दूतस्य गुरुत्ववहा भूमिका अस्माकं नयनयोः आपतति। महाभारतस्य उद्योगपर्वणि श्रीकृष्णः युधिष्ठिरस्य वार्ताम् आदाय कौरवसभाम् आगतः। किञ्च, महाभारतस्य नल-दमयन्त्योः दूतत्वेन नियोजितः हंसः। दूतकाव्यमिति नामकरणं कालिदासस्याविर्भावात्पूर्वं संस्कृतकाव्यजगति प्रसिद्धं नासीदिति। मूलतः, कालिदासो हि दूतकाव्यस्य स्रष्टेति। मेघदूतस्य रचनारीतिम् अवलम्ब्य परवर्तिनि काले रचितानि काव्यानि दूतकाव्यनाम्ना व्यपदिश्यन्ते। दूतमाध्यमेन संवादप्रेरणमुपजीव्य नायक-नायिकयोरन्यतरस्य हृदयानुभूतिः यदा शतधारासु उत्सारिता भवति, तदैव तद्दूतकाव्यसंज्ञां लेभे। कविचित्तगतः तन्मयीभाव एव काव्यस्यास्य

---

[1] गवेषिका, संस्कृतविभागः, गौड़वङ्गविश्वविद्यालयः, मालदा, पश्चिमवङ्गः।

विषयः। दूतकाव्ये चेतनाद् अचेतनानां मनुष्येतराणाञ्च[2] प्राणिनां दौत्यमेव सुतरां प्रतिविम्बितं भवति। रामायणे हनूमत्सन्देशः खलु मेघदूतस्य उत्स इति टीकाकृतो मल्लिनाथस्य मतम्।

संस्कृतालंकारशास्त्रे दूतकाव्यस्य पृथक्तया श्रेणीविभागो न दृश्यते। साहित्यदर्पणकारेण खण्डकाव्यप्रसङ्गे उल्लिख्यते - "खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि च"[3]। उदाहरणरूपेण मेघदूतस्य उल्लेखो विहितस्तेन। अतः अलङ्कारशास्त्रस्य नियमानुसारेण दूतकाव्यं खण्डकाव्यस्य अन्तर्गतमिति। यद्यपि गीतिकाव्यनाम्ना संस्कृतालंकारशास्त्रे कोऽपि विभागो नास्ति, तथापि गीतिकाव्यस्य विशेषं भेदमात्रम् दूतकाव्यम् दूतेन सन्देशप्रेषणादिति। अतः दूतकाव्यं सन्देशकाव्यमपि कथयितुमलम्। अद्यावधि आविष्कृतेषु वङ्गीयदूतकाव्येषु प्राचीनतमं तावत् लक्ष्मणसेनस्य सभाकविना धोयिना विरचितं पवनदूतम्। दूतकाव्यमिदं वैष्णवेतरदूतकाव्यस्य प्रकृष्टं निदर्शनम्।

संस्कृतसाहित्ये स्वल्पख्यातानि कानिचित् दूतकाव्यानि प्राप्यन्ते। तान्यधस्तात् उल्लिख्यन्ते विषयोल्लेखपूर्वकम् –

(१) **हंससन्देशः** - काञ्चीपुरीनिवासी वेदान्तदेशिकः १३२५-१४२६ मितवैक्रमाब्दान्तरालस्थितिमान् वेदान्तदेशिको हंससन्देशसंज्ञकं दूतकाव्यं प्रणीतवान्। श्रीरामचन्द्रः सीतां निकषा हंसरूपिदूतं प्रेषयामास इति विषयः। हंससन्देशे कविः कर्मफलवशात् विच्छिन्नायाः शिवनिवासवासिन्याः स्वप्रियतमायाः भक्तेः सकाशे मानसहंसं दूतीकृत्य परब्रह्मतत्त्वस्य स्वरूपं बोधितवान् –

‘सत्यं ज्ञानं सकलभुवनाधारमाधारशून्यं
सन्तं सूक्ष्मं निरूपममजं निर्विकारं निरीहम्।
शुद्धं शान्तं निरुपमरुचिं स्वच्छमानन्दरूपं
व्याप्ताशेषं विगतकलूषं त्वां तमेव स्मरामि’[4]।।

अत्र हि कतिपयेषां दाक्षिणात्यतीर्थस्थलानामपि वर्णनं लभ्यते। काव्येऽस्मिन् ११० पद्यानि सन्ति। प्रत्येकमेवास्य पद्यं मेघदूतपद्येन सह संवदते भावभाषाप्रस्तुतीकरणदृष्ट्या। ग्रन्थस्यास्य सन्ति बह्व्यः टीकाः।

(२) **हंसदूतम्** - दूतकाव्यमिदं वङ्गीयकविना रूपगोस्वामिना विरचितम्। आसीत् श्रीरूपगोस्वामी श्रीचैतन्यस्य शिष्यः। मथुरापुरं गतस्य कृष्णस्य सविधे ललिताख्यया गोप्या हंसरूपस्य दूतस्य प्रेषणं हि काव्यस्यास्य विषयमूलम्। तत्र प्रेमिकं निकषा प्रेमिकायाः राधायाः सन्देशप्रेरणस्य भूमिका वर्णिता –

‘शरीरान् मे प्रेमा त्वयि परमिति स्नेहलघुता।
न जीविष्यामीति प्रणयगरिमाख्यापनविधिः।
कथं नायासीति स्मरणपरिपाटीप्रकटनं
हरौ सन्देशाय प्रियसखि न मे वागवसरः’[5]।।

(३) **मनोदूतम्** - विष्णुदासेन विरचिते दूतकाव्ये संसारविषयतो मनसः कृष्णसमीपे दूतरूपेण प्रेषणं विषयः। यतीन्द्रविमलेन वङ्गीयदूतकाव्येतिहासे मनोदूतस्योल्लेखो विहितः।

(४) **जैनमेघदूतम्** - मेरुतुङ्गाचार्येण विरचिते इह दूतकाव्ये नेमिपत्नी राजमती मेघं दूतरूपेण नियोजयामास।

(५) **पदाङ्कदूतम्** - नवद्वीपाधिपतेः प्रख्यातनाम्नः कृष्णचन्द्रनृपतेः पितुः रघुरामरायमहोदयस्य सभापण्डितेन श्रीकृष्णचन्द्रसार्वभौमेण कविवरेण १६४५ मिते ईशवीयाब्दे रचितं पदाङ्कदूतम्। यतीन्द्रविमलः वङ्गीयदूतकाव्येतिहासे ग्रन्थे पदाङ्कदूतं समुल्लिखितवान्। पदाङ्कदूतन्तु वैष्णवपरम्परानुसारि।

(६) **मनोदूतम्** - १८१४ मिते ईशवीयाब्दे तौलङ्गव्रजनाथेन निर्मिते अस्मिन् काव्ये द्रौपद्याः कृष्णसमीपे मनोरूपिणो दूतस्य प्रेषणम् उपवर्णितम्। सप्तदशशताब्द्यां रामरामशर्मणापि वैष्णवभावधाराम् आश्रित्य मनोदूतं व्यरचि।

(७) **तुलसीदूतम्** - इह दूतकाव्ये वैद्यनाथभट्टाचार्येण १७०६मिते ईशवीयाब्दे प्रणीते गोपिभिः तुलसी दूतरूपेण कृष्णं निकषा प्रेषितेति उपवर्णितम्। त्रिलोचनदासस्यापि तुलसीदूतमिति काव्यं प्रसिद्धम्। इदञ्चापि वैष्णवभावानुसारि।

(८) **कीरदूतम्** - रामगोपालकविः गोपीनां मथुरायां कृष्णसमीपे कीररूपस्य दूतस्य प्रेषणं प्रस्तौति।

(९) **कोकिलसन्देशः** - १४६०मितवैक्रमाब्दमभितः स्थितिमता मालावारनिवासिना केनचिद् उद्दण्डाख्येन कविना मेघदूतस्य हि भावभाषादिभिरनुकृत्य कोकिलसन्देशनामकं काव्यं प्रणीतमस्ति, यत्र हि प्रेमी प्रेमिकायै कोकिलद्वारेण सन्देशं प्रेषयति।

(१०) **भृङ्गसन्देशः** - वासुदेवेन विरचितं काव्यमिदम्। अत्र कामिना प्रियायाः सकाशे भृङ्गरूपस्य दूतस्य प्रेषणं हि वस्तु।

(११) **हंससन्देशः** - भट्टवामनकृतः ग्रन्थोऽयम्। श्रीसेतुलक्ष्मीप्रसादमालायां हंससन्देशो नामको दूतकाव्यग्रन्थो दृश्यते। अत्र यक्षेण हंसद्वारा प्रियासमीपे सन्देशः प्रेरितः। पूर्णसरस्वत्याः हंससन्देशः इति ग्रन्थोऽपि नयनयोः आपतति।

(१२) **चातकसन्देशः** - केनचित् अज्ञातकविना विरचितः अयं ग्रन्थः।

(१३) **नेमिदूतम्** - विक्रमेण रचितं दूतकाव्यमिदम्। अत्र द्वाविंशतितमस्य जैनतीर्थङ्करस्य नेमिनाथस्य संसारत्यागः, तत्पत्न्याः राजीमत्याः विरहदीर्णा अवस्था, राजीमत्या स्वामिनः सकाशे दूतरूपेण

पर्वतस्य प्रेरणञ्चेत्यादयो विषयाः प्राप्यन्ते। परमत्र पर्वतरूपस्य दूतस्य मुखे संवादप्रेरणस्य कोऽपि उल्लेखो नास्ति। केवलं नायिका स्वकीयां दुरवस्थां विशदीकरोति अत्र। रचनाकालः अस्य त्रयोदशशताब्दी। प्रसङ्गत उल्लेख्यं यत् कविः विक्रमः मेघदूतस्य प्रतिश्लोकं चतुर्थचरणं समस्यापूर्तिरूपेण गृहीत्वा काव्यमिदं ररर्च।

(१४) **शीलदूतम् –** चरित्रसुन्दरगणिना नेमिदूतस्यानुकरणेन शीलदूतमिति काव्यं विरचितम्। रचनाकालः अस्य ईशवीयाब्दे १४२५ तमे। राजा स्तूलभद्रः पितुः मृत्योः परं संसारं प्रति वीतरागः सन् राज्यं तत्त्वा श्रमणवृत्तिं जग्राह। तस्य पत्नी कोशा निरासक्तं स्वामिनं प्रति अनुरोधञ्चकार संसारधर्मं परिगृहीतुम्। तथापि स्थूलभद्रः शीलधर्मस्य वैराग्यस्य च गुरुत्वम् उपदिदेश। तदा कोशापि स्वामिनः सविधे दीक्षां गृहीत्वा त्यक्तसंसारा सन्न्यासिनी अभूत्। कविरयं प्रतिश्लोकं मेघदूतस्य प्रत्येकं श्लोकस्य अन्तिमचरणेन समस्यापूर्तिद्वारा काव्यमिदं रचितवान्।

(१५) **मेघदूतसमस्यालेखः** – दूतकाव्यस्यास्य रचयिता मेघविजयः। कालिदासकृतस्य मेघदूतस्य श्लोकपदानि समस्यापूर्तित्वेन संगृह्य त्रिंशदधिकं शतं श्लोकैः निबद्धः अयं काव्यग्रन्थः। ईशवीयाब्दे १६६३ तमे ग्रन्थस्यास्य आनुमानिको रचनाकालः। काव्यस्यास्य वस्तु तावत् मेघरूपस्य दूतस्य माध्यमेन विजयप्रभसूरेः सकाशे धर्मीयवार्ताप्रेरणम् इति।

(१६) **पवनदूतम्** – धोयिनः पवनदूतस्यानुकरणेन वादिचन्द्रसूरिणा जैनविदुषा पवनदूतमिदं काव्यं व्यरचि। उज्जयिन्याः राज्ञा विजयनरेशेन समं तस्य पत्न्याः तारायाः विच्छेदवृत्तं वस्त्वस्य काव्यस्य। काव्यमिदं मन्दाक्रान्ताछन्दसा रचितम्। राजमहिषी विद्याधरेण अपहृता सती राजा दुःखितः सन् वायुरुपिणो दूतस्य माध्यमेन स्वककुशलीं वार्तां प्रेषयामास इति।

(१७) **चन्द्रदूतम्** - इदम् दूतकाव्यम् जम्बुकविना कृतम्। अत्र चन्द्रस्य दौत्यकार्यम् उपायनीकृतं वर्तते। राक्षसराजरावणो वनवासिनीं जनकनन्दिनीं सीतां तपस्विवेशमास्थाय छलेन बलेन च जहार। हृत्वा च ताम् रथमारोह्य समुद्रम् अतिक्रम्य रक्ष:पुरीं लङ्कां निनाय इति ज्ञात्वा श्रीरामचन्द्र हनुमन्तं दूतं कृत्वा सीतान्तिकं प्रेषयामास। प्रत्यावृत्ते पवननन्दने श्रीरामचन्द्रश्चन्द्रं दूतरूपेण तत्र विसृष्टवान्। वृत्तमिदं न पौराणिकमैतिहासिकं वा। एतत्तु कविकल्पितम् इति मन्ये।

(१८) **वातदूतम् –** अष्टादशशतकस्य मध्यलग्ने कृष्णनाथन्यायपञ्चाननेन रचितं वातदूतं काव्यसौन्दर्येण छन्दोनिर्माणेन, भाषा-भावयोर्मणिकाञ्चनयोगेन च शतश्लोकविशिष्टं काव्यम्। रावणेन अपहृता अशोकवनवासिनी सीता रामचन्द्रस्य कुशलसंवादलाभमुद्दिश्य वायुं दूतरूपेण रामचन्द्रं निकषा प्रेषितवती। प्राथमिके श्लोकत्रितये अपहृतायाः सीतायाः दैनन्दिनविरहावस्थायाः मर्मन्तुदं वर्णनं समुस्थापितं मन्दाक्रान्ताच्छन्दसो सावलीलगतिमाधुर्य्येण।

(१९) **मेघदौत्यम्** - पूर्ववङ्गनिवासिना त्रैलोक्यमोहनगुहनियोगीमहाभागेन रचितं दूतकाव्यं तावत् मेघदौत्यम्। काव्यमिदं मेघदूतस्य परिशिष्टम् – अस्मि प्रार्थी रचयितुमिदं मेघदूतावशिष्टम्। दूतकाव्येषु मेघदौत्यं सर्वबृहत्। यक्षेण प्रेरितं मेघं यक्षपत्नी तत्सविधे प्रतिदूतरूपेण पुनः यक्षस्य सकाशे प्रेरयतीति वस्तु काव्यस्यास्य।

(२०) **चन्द्रदूतम् – अष्टादशशताब्द्यां** श्रीकृष्णतर्कालंकारेण रचितं चन्द्रदूतं द्वापञ्चाशत् श्लोकैर्विन्यस्तं दूतकाव्यमेकम्। हनूमता सीतायाः सन्देशे समानीते पुनः रामचन्द्रेण लङ्कास्थितां देवीं सीताम् उद्दिश्य दूतरूपेण चन्द्रस्य प्रेरणं वर्णितम् अस्मिन् दूतकाव्ये। दूतकाव्यमिदं पूर्णतया कविकल्पितम्। इह काव्ये न्यायशास्त्रस्य प्रभावो विद्यते। दिङ्मात्रम् उदाहरणं तावत् – 'सामग्री चेत् फलविहरिणो नानुयोगः समन्तात्'[6]। उल्लेख्यं यत् श्रीकृष्णसार्वभौमस्य पदाङ्कदूतेन समं चन्द्रदूतस्य भाषागतं वर्णनागतं च साम्यं लक्षणीयम्।

परिशेषे वक्तव्यं यत् यतीन्द्रविमलचौधुरीमहाभागेन 'वङ्गीयदूतकाव्येतिहासे' ग्रन्थे द्वादशशतकात् अष्टादशशतकं यावत् वङ्गदेशस्य प्रायेण षोडशसंख्यकानां दूतकाव्यानाम् उल्लेखः कृतः[7]। पूर्वोक्तानि दूतकाव्यानि विश्लिष्य वक्तुं शक्यं यत् स्वल्पख्यातदूतकाव्यानाम् उपजीव्यं विषयद्वयम् – कालिदासानुसारी लौकिकप्रणयो भगवद्भक्तिरसाश्रितश्चेति। गौड़ीयवैष्णवधर्मस्य प्रभावेन वङ्गीयकविभिः राधाकृष्णयोः प्रेमभक्तिम् आश्रित्य नैकानि दूतकाव्यानि रचितानि। मेघदूतस्यानुकरणेन रचितेषु दूतकाव्येषु विषयगतं छन्दोगतञ्च वैचित्र्यं विद्यमानं सदपि रचनापद्धतिः सम्पूर्णा कृत्रिमा। तत्र अनुकरणसर्वस्वा दूतकाव्यरचनापद्धतिः।

जैनैः वैष्णवैश्च कविभिः धर्माचार्याणां जीवनचरितमाहात्म्यं, देवताः प्रति भक्तिनिवेदनं दार्शनिकतत्त्वं चाश्रित्य दूतकाव्यस्य स्वतन्त्रा धारा निर्मिता। क्वचिद्वा ऐतिहासिकवृत्तमपि दूतकाव्यस्य उपजीव्यवस्तुत्वेन प्रतिष्ठितमभूत्। शृङ्गाररसं विहाय शान्त-भक्तिरसौ काव्यस्यास्य अङ्गिरसरूपेण प्राधान्यं लभेते एतेषु दूतकाव्येषु।

तथ्यसूत्राणि –

1. वह्निं यशसं विदथस्य केतुं सुप्राव्यं दूतं सद्यो अर्थम्।
   द्विजन्मानं रयिमिव प्रशस्तं रातिं भरद्भृगवे मातरिश्वा।। (*ऋग्वेदः*, 1.60.1)
2. प्राचां कवीनां भावनायां मेघ-पवन-चन्द्र-पद्म-पादप-पत्र-तुलसी-मनः-हृदय-शील-भक्ति-पदाङ्क-हंस-पिक-भृङ्ग-चकोर-मयूर-काक-उद्धवादिमनुष्येतरप्राणिनः दूतरूपेण पदं कृतवन्तः।
3. *साहित्यदर्पणः* (षष्ठः अध्यायः)
4. *हंससन्देशः* (2.9)

5. *हंसदूतम्* (1.29)
6. *वङ्गीयदूतकाव्येतिहासः*, पृ.-51
7. क) धोयी – पवनदूतम्, ख). विष्णुदासः – मनोदूतम्, ग). रामरामद्विजः – मनोदूतम्, घ). माधवकवीन्द्रः – उद्धवदूतम् ङ). रूपगोस्वामी – उद्धवसन्देशः च). रूपगोस्वामी – हंसदूतम् छ) रुद्रन्यायवाचस्पतिः –भ्रमरदूतम् ज). रुद्रन्यायवाचस्पतिः – पिकदूतम् झ). रघुनाथदासः – हंसदूतम् ञ). श्रीकृष्णसार्वभौमः – पदाङ्कदूतम् ट) लम्बोदरवैद्यः – गोपीदूतम् ठ) वैद्यनाथद्विजः – तुलसीदूतम् ड). श्रीकृष्णतर्कालंकारः – चन्द्रदूतम् ढ) कृष्णनाथन्यायपञ्चाननः – वातदूतम् ण). घटकर्परः घटकर्परकाव्यम् त). जम्बुकविः – चन्द्रदूतम्।

ग्रन्थसूची

चक्रवर्ती, चिन्ताहरण (सम्पा.), *मनोदूतम्*, संस्कृत-साहित्य-परिषद्, कलिकाता, १९३७.

चक्रवर्ती, सत्यनारायण (सम्पा.), *मेघदूतम्*, संस्कृत पुस्तक भाण्डार, कलिकाता, २००५ (द्वितीय संस्करण)।

चट्टोपाध्याय, ऋता, *आधुनिक संस्कृत काव्य : वाङाली मनीषा शतवर्षेर आलोके*, संस्कृत पुस्तक भाण्डार, कलकाता, २०१८।

चौधुरी, यतीन्द्रविमलः, *वङ्गीयदूतकाव्येतिहासः*, प्राच्यवाणी, कलिकाता, १९५३।

दत्तव्रज, नाथः (सम्पा.), *शुकदूतम्*, रायदर्स-फ्रोडयन्त्रेण मुद्रितम्, श्रीरामपुरम्।

भट्टाचार्य, अशोक (सम्पा.), *हंसदूतम्* , ओरियन-पावलिकेशन ,कलिकाता, २०००।

मुखोपाध्याय, गोपेन्दु, *संस्कृत साहित्येर इतिवृत्त*, इउनाइटेड वुक एजेन्सि, कलिकाता, २०१७।

दार्शनिकदृष्ट्या श्रीमद्रामायण-श्रीरामचरितमानसयोः अनुबन्धचतुष्टयालोचनम्

अर्घ्यगुप्तः[1]

"अप्रमेयत्रयातीतनिर्मलज्ञानमूर्तये ।
मनोगिरां विदूराय दक्षिणामूर्तये नमः ॥"

उपोद्घातः –

'इति – ह –आस' इति व्युत्पत्त्या निष्पन्नस्य 'इतिहास' इति शब्दस्यार्थः 'अनुरूपम् आसीत्' इति। भारतवर्षस्य यथार्थस्वरूपज्ञानाय वैदिकसाहित्यानां तथा रामायणमहाभारतानां पुराणोपपुराणानाञ्च सम्यक्तया अध्ययनमत्यावश्यकम्। रामायणे तु भारतवर्षस्य चिरन्तनं रूपं विधृतमस्ति। केचन जना रामायणस्यैतिहासिकत्वं न स्वीकुर्वन्ति। परन्तु रामायणमेव भारतवर्षस्य चिरन्तनम् इतिहासम् इति वक्तुं शक्यते। वाल्मीकिरामायणेऽप्युल्लिखितमस्ति –

"पूजयंश्च पठंश्चैनमितिहासं पुरातनम्।।"[2] इति ।

आलंकारिककुलशेखरेण राजशेखरेणापि काव्यमीमांसायाः शास्त्रनिर्देशनामके द्वितीयेऽध्याये भणितं – "पुराणप्रतिभेद एवेतिहासः इत्येके। स च द्विधा परक्रियापुराकल्पाभ्याम्। यदाहुः –

"परक्रिया पुराकल्प इतिहासगतिर्द्विधा।
स्यादेकनायका पूर्वा द्वितीया बहुनायकाः॥
तत्र रामायणं भारतं चोदाहरणे।"[3]इति।

रामायणादेव लौकिकसाहित्यस्य प्रारम्भोऽभवत्। भारतीया वाल्मीकिप्रणीतं रामायणमेवादिकाव्यमिति मन्यन्ते। वाल्मीकिमुनिस्तु आदिकविरूपेण प्रख्यातः। ब्रह्मणो वरप्रभावादेव वाल्मीकिः आदिकाव्यस्यास्य विरचनञ्चकारेति प्रसिद्धिः। विषयेऽस्मिन् अप्पयदीक्षितपादैः श्रीरामायणसारसंग्रहस्तोत्रविवरणस्यारम्भे गदितं – "इह खलु भगवान्प्राचेतसः कमलासनवरलब्धसकलार्थवेदनः श्रीरामचन्द्रचरितवर्णनात्मकं श्रीरामायणाख्यं महदादिकाव्यं निर्ममे"[4] इति।

आदिकविः वाल्मीकिः रघुकुलभूषणस्य गुणनिधेः दशरथतनयस्य सकललोकाभिरामस्य श्रीरामस्य पूतचरितं समाश्रित्य तदीयममरं महाकाव्यं रामायणनामधेयं विरचितवान्। रामायणादेव श्लोकस्याविर्भावोऽभवत्। श्लोकस्योत्पत्तिविषये प्राप्यते एका आख्यायिका। एकदा तमसायास्तटे शिष्येण धीमता भरद्वाजेन सह विचरणावसरे कस्यचित्क्रूरकर्मणो निषादस्य शराघातेन क्रौञ्चयुगलयोर्मध्ये एकं निहतं

---

[1] गवेषकः (Ph.D.), संस्कृतविभागः, रामकृष्णमिशन्– विद्यामन्दिरम्, बेलुडमठः, हावड़ा, पश्चिमवङ्गः।

[2] *रामायणम्*, ६/१३०/११४ (सम्पादकः – पञ्चाननतर्करत्न)

[3] *काव्यमीमांसा*, पृष्ठाङ्कः १९–२० (सम्पा. मधुसूदनमिश्रः)

[4] *रामायणतात्पर्यसंग्रहः*, पृष्ठाङ्कः - १

विलोक्य महर्षिर्वाल्मीकिः शोकाभिभूतः सन् व्याधं शशाप। तदा शोकाभिभूतस्य महर्षेर्मुखारविन्दाद्विनिर्गतेयं सुललिता वाणी–

'मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥'[5] इति।

श्लोकस्यास्योच्चारणादेव लौकिकसाहित्यस्योद्भवो बभूव। वाल्मीकिमुनेर्मुखारविन्दान्निःसृतं पद्यमिदं भारतीयैरादिकवितारूपेण स्वीक्रियते। कविकुलचूडामणिना कालिदासेन रघुवंशे तथा यायावरीयकुलोत्पन्नेनालंकारिककुलशेखरेण श्रीमता राजशेखरेण काव्यमीमांसायां सहृदयचक्रवर्तिना आनन्दवर्धनाचार्येण ध्वन्यालोके च आख्यानस्यास्योल्लेखो विहितः। भट्टतौतस्यापि मते जगत्यस्मिन् तावत्कविताकामिन्याः प्रादुर्भावो न अभवत् यावत्क्रान्तदर्शिनो वाल्मीकिमुनिपुङ्गवस्य हृदि प्रवाहमाना शोकतटिनी अनुष्टुप् - छन्दसा श्लोकरूपं प्रापिता तस्यैव च महर्षेर्मुखपङ्कजाद्वाणीरूपेण विनिर्गता। तथाहि निगदितं भट्टतौतेन

"तथाहि दर्शने स्वच्छे नित्येप्यादिकवेर्मुनेः।
नोदिता कविता लोके यावज्जाता न वर्णना॥" [6]इति।

भारतीयसाहित्ये रामायणस्य प्रभावः -

भारतीयसाहित्ये आदिकाव्यस्यास्य प्रभावो विशेषतया परिलक्ष्यते। भारतीयानां समाजजीवने राष्ट्रजीवने च वाल्मीकिरामायणस्य प्रभावो विद्यते। भास-कालिदास-भट्टि-राजशेखर-मुरारि-भवभूति-कुमारदासादिमहाकवयो वाल्मीकिरामायणमेवावलम्ब्य काव्यानि नाटकानि च विरचितवन्तः। कृत्तिवास-कम्बन-माधवकन्दली-रङ्गनाथ-एकनाथ- तुलसीदासादि-कोविदकवयो वाल्मीकिरामायणम् अवलम्ब्य प्रादेशिकभारतीयभाषासु काव्यानि विरचितवन्तः। न केवलं भारतवर्षेऽपि तु नेपाल-इन्दोनेशिया-मालयेशिया-थाइल्याण्ड-प्रभृतिषु देशेष्वपि रामकथायाः प्रसारः परिलक्ष्यते। नेपालराष्ट्रस्य साहित्यजगति तथा समाजजीवने भानुभक्तविरचितस्य रामायणस्य सुमहान् प्रभावो विद्यते। थाइल्याण्डदेशे '*रामकियेन* ' इति नाम्ना रामायणस्यानुवादोऽभवत्। मालयेशियाराष्ट्रेऽपि '*हिकायत्सेरीराम* ' इति नाम्ना रामोपाख्यानमुपलभ्यते। वस्तुतः न केवलं भारतवर्षेऽपि तु राष्ट्रान्तरेष्वपि रामायणस्य लोकप्रियता परिलक्ष्यते। विश्वकविना रवीन्द्रनाथेन '*सोनारतरी* ' इति काव्यग्रन्थस्य '*पुरस्कार* ' कवितायां संक्षेपेण समग्रं रामायणवृत्तं समुपवर्णितम्। रामकथा तु चिरनवीना। युगानि व्यतीतानि परं रामकाहिनी लोकप्रियतां न जहाति। तथाहि पुरस्कारकवितायां कविगुरुणा रवीन्द्रनाथेनावेदितम् –

---

[5]*रामायणम्,* १।२।१५

[6]भट्टतौतस्य वचनमिदं हेमचन्द्रेणोद्धृतम्, *काव्यानुशासनम्,* पृष्ठाङ्कः - ३१६

"शुधु से दिनेर एक खानि सुर
चिरदिन धरे बहु बहु दूर
काँदिया हृदय करिछे विधुर
मधुर करुण ताने।
से महाप्राणेर माझखानटिते
ये महारागिणी आछिल ध्वनिते
आजिओ से गीत महासङ्गीते
वाजे मानवेर काने।"[7]इति।

श्रीरामचरितमानसस्य संक्षिप्तः परिचयः -

रामकथामाश्रित्य प्रादेशिकभाषाभिर्बहवो साहित्यिकग्रन्था विरचिताः। तेषु ग्रन्थेषु तुलसीदासेन अवधिभाषायां विरचितं श्रीरामचरितमानसमद्वितीयमनन्यञ्चेति। आदिकविना वाल्मीकिना विरचितं रामायणमेवावलम्ब्य गोस्वामिना तुलसीदासेन श्रीरामचरितमानसमिति ग्रन्थरत्नं प्रणीतम्। भारतीयसाहित्ये तथा विश्वसाहित्येऽपि पुस्तकस्यास्य विशिष्टं स्थानमस्ति। इयमवधिभाषा खलु हिन्दिभाषाया एकोपभाषा। अयोध्याया नामान्तरम् 'अवधपुरी' इति। भारतवर्षस्य उत्तरप्रदेशराज्यस्य अयोध्या-लक्ष्णौप्रभृतिस्थानेष्वस्या भाषायाः प्रयोगः परिलक्ष्यते। तुलसीदासस्य मते सज्जना देवभाषया लोकभाषया वा हरिहरयोर्माहात्म्यकीर्तनं प्रकुर्वन्ति। श्रीभगवतो दिव्यचरितकथा सर्वदैव मधुरा। तथाहि श्रीतुलसीदासस्योक्तिः -

"हरि हर यश सुर नर गिरा, वरणहि सन्त सुजान।
हाण्डी हाटक चारुचीर, रान्धे स्वाद समान॥"[8] इति।

यद्यपि महामुनिना वाल्मीकिना प्रणीतं रामायणमेव श्रीरामचरितमानसस्योत्सभूतं तथापि गोस्वामिना तुलसीदासेन स्वीये ग्रन्थे वाल्मीकिरामायणतः किञ्चिद्भिन्नतया रामकथां वर्णयामास। श्रीरामचरितमानसस्य वक्ता तावत् परमेश्वरः। जगन्माता पार्वती तत्सकाशाद्रामकथां शुश्राव। वाल्मीकिरामायणे उमामहेश्वरयोः कथोपकथनात्मकोऽयं संवादो नोपलभ्यते। श्रीरामचरितमानसोपवर्णितं रावणवधवृत्तं खलु वाल्मीकिरामायणतो विलक्षणम्। वाल्मीकीयरामायणस्योत्तरकाण्डतः श्रीरामचरितमानसस्योत्तरकाण्डं सर्वथा भिन्नम्। श्रीरामचरितमानसस्योत्तरकाण्डे भुषुण्डिवायसेन सह विहङ्गराजस्य वैनतेयस्य वार्तालापस्तुलसीदासेन विस्तृततया समुपवर्णितः। भुषुण्डिकाकेन सह गरुडस्य कथोपकथनप्रसङ्गे ज्ञानमार्गस्य विवरणं, भक्तिमार्गस्य माहात्म्यं, कलियुगवर्णनञ्चेत्येते विषयास्तुलसीदासेनोपवर्णिताः।

---

[7] *रवीन्द्ररचनावली,* पुरस्कार, पृष्ठाङ्कः – ४२६–४२७

[8] *अद्वैतसिद्धिः*, सम्पा. श्रीराजेन्द्रनाथ घोष, (भूमिका, पृष्ठाङ्कः–१८४)

भारतीयसाहित्यनभसि वाल्मीकीयरामायणं तथा च तुलसीदासकृतं श्रीरामचरितमानसमिति ग्रन्थरत्नद्वितयं विषय–तत्त्व–अलंकारादिदिशा महत्त्वपूर्णमास्ते। उभयोर्ग्रन्थयोः रामकथानिर्भरत्वं खलु सादृश्यम्। साधारणदृष्ट्या ग्रन्थयोः साम्यं विद्यमानमपि वैसादृश्यमपि क्वचिच्चास्माकं नयनयोरापतति।

वाल्मीकिरामायणस्यानुबन्धचतुष्टयम् –

शब्दकल्पद्रुमे रामायणविषये प्राप्यते "रामस्य चरितान्वितम् अयनं शास्त्रम्"[9] इति। ननु आदिकाव्यस्यास्य शास्त्रत्वे किं मानमिति चेदुच्यते– वाल्मीकिरामायणस्य बालकाण्डे समुल्लिखितमस्तीदं रामायणाख्यमादिकाव्यं वेदादिसर्वशास्त्रसम्मतं पापहरं परमं पवित्रञ्चेति। तथाहि वाल्मीकिरामायणे श्लोकोऽयं प्राप्यते –

"इदं पवित्रं पापघ्नं पुण्यं वेदैश्च सम्मितम्।
यः पठेद्रामचरितं सर्व्वपापैः प्रमुच्यते॥"[10] इति।

श्लोकस्यास्य व्याख्यानप्रसङ्गे तिलकटीकाकृता श्रीरामेण टीकितम् –

"अथ नारदः स्वोपदिष्टसंक्षेपरामायणपाठफलमुपदिशति – इदमिति। पवित्रं चित्तशोधनम्। पुण्यं सकलपुण्यसाधनम्। वेदैः सम्मितं सकलरहस्यवेदार्थप्रतिपादकत्वाद्वेदतुल्यम्॥" इति।

आदिकाव्यं रामायणन्तु महोदधिसदृशम्। महामुनिना वाल्मीकिना स्वयमेव भणितं –

"कामार्थगुणसंयुक्तं धर्मार्थगुणविस्तरम्।
समुद्रमिव रत्नाढ्यं सर्वश्रुतिमनोहरम्॥"[11]इति।

अर्थात् आदिकाव्यमिदं धर्मार्थकामादित्रिवर्गयुतं, जलधिसदृशं सर्वेषां जनानां श्रवणानन्ददायकञ्च। श्लोकेऽस्मिन् धर्मार्थकाममोक्षेषु पुरुषार्थचतुष्टयेषु धर्मार्थकामादित्रिवर्गस्योल्लेखः प्राप्यते। परं मोक्षनामकस्य परमपुरुषार्थस्योल्लेखः समालोच्यमाने श्लोके न प्राप्यते। श्लोकस्यास्य व्याख्यानप्रसङ्गे रामायणतिलकटीकाकृता श्रीरामेण निगदितं –

"कामेति। कामरूपो योऽर्थः पुरुषार्थस्तद्रूपेण गुणेन फलेन युक्तं धर्मार्थरूपपुरुषार्थफलेन विस्तरवत् विस्तरेण तदुभयप्रतिपादकं तद्दातृ चेत्यर्थः। रत्नैः काव्यगुणालङ्कारव्यङ्गैराढ्यं पूर्णम्। सर्वश्रुतीनां मनोभूताः सारभूता उपनिषदस्तासां हरं तदर्थप्रतिपादकं तेन मोक्षफलकत्वम्। व्याख्यानान्तरं त्वचमत्कारीत्युपेक्षितम्॥"[12] इति।

अत्रेदमुल्लेख्यं यत् रामायणतिलकटीकाकारस्य श्रीरामस्य मते रामायणमिदं प्रधानतया धर्मार्थरूपस्य अपवर्गद्वयस्य प्रतिपादकम्। अपि च 'सर्वश्रुतिमनोहरम्' इति पदमपि किञ्चिद्भिन्नतया तेन

---

9 *शब्दकल्पद्रुमः*, चतुर्थो भागः, पृष्ठाङ्कः–१५३

10 *रामायणम्*, १/१/९९

11 प्रागेव, १।३।८

12 *रामायणतिलकटीका*, पृष्ठाङ्कः–६६

व्याख्यातम्। तिलकटीकाकारस्य मते सर्वासां श्रुतीनां सारभूता उपनिषदस्तासाम् अर्थप्रतिपादकमिदं रामायणम्। अतः 'सर्वश्रुतिमनोहरम्' इति पदप्रयोगमाध्यमेन वाल्मीकिना रामायणस्य मोक्षफलकत्वमपि प्रतिपादितम् इति तिलकटीकाकारस्याशयः।

किं नाम शास्त्रमिति जिज्ञासायां भट्टपादेन कुमारिलेनावेदितम्–

"प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा।
पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते॥" [13]इति।

शास्त्रारम्भे अनुबन्धचतुष्टयस्योल्लेखोऽवश्यकर्तव्यः। अनु पश्चात्स्वज्ञानादनन्तरं बध्नन्ति वाऽसज्जयन्ति शास्त्रे ग्रन्थे प्रवर्तयन्ति तेऽनुबन्धाः। अधिकारि-विषय-सम्बन्ध –प्रयोजनात्मकं ह्यनुबन्धचतुष्टयम्। अतः शास्त्राध्ययनात् पूर्वं पाठकस्य प्रवृत्त्युत्पादनार्थं ग्रन्थकृदादौ प्रयोजनादिकं निर्दिशति। तदुक्तं भट्टपादकुमारिलैः स्वीये श्लोकवार्तिके –

"सिद्धार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्तते।
शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः॥" इति।

क) **अधिकारी –**

अधिकारी प्राथम्यं भजते शास्त्रारम्भनिमित्तरूपानुबन्धचतुष्टयमध्ये। स्वार्थप्रतिपत्तारमनाश्रित्य शास्त्रस्य प्रवृत्त्ययोगादादौ अधिकार्यनुबन्धापेक्षा। अर्थित्वं सामर्थ्यं विद्वत्ता फलापर्युदस्तत्वमिति चत्वारि अधिकारित्वनियामकानि। फलसिद्धिरेव अधिकारिणो लक्ष्यमिति सर्वैः स्वीक्रियते। फलावाप्तये तु इच्छा आवश्यिकी। परन्तु सामर्थ्याभावे खपुष्पायते इच्छा। अतः इच्छया सह सामर्थ्यमपि अधिकारित्वसिद्धौ अपेक्ष्यते। न केवलमेतदेव लक्ष्यरूपोपेयसिद्धये उपायरूपविद्वत्ता ह्यपेक्षिता। अपि च यस्मिन्विषये अधिकारित्वं निरूप्यते स विषयः कथमपि प्रतिषिद्धो न भवेत्। एतदेव फलापर्युदस्तत्वमिति कथ्यते।

विश्वसाहित्यस्य प्राचीनतमो ग्रन्थो वेदो भवति सर्वासां विद्यानां मूलीभूतः। परन्तु श्रुतौ सर्वेषां वर्णानामधिकारो नास्ति। उक्तञ्च श्रीमद्भागवते –

"स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा।" [14]इति।

श्रीमद्रामायणस्य वेदतुल्यत्वेऽपि चतुर्वर्णानामधिकारोऽस्ति आदिकाव्यस्यास्य श्रवणे पठने च। तथाहि रामायणे प्राप्यतेऽयं श्लोकः –

"पठन् द्विजो वागृषभत्वमीयात्
स्यात्क्षत्रियो भूमिपतित्वमीयात्।
वणिग्जनः पण्यफलत्वमीयात्
जनश्च शूद्रोऽपि महत्त्वमीयात्॥" [15]इति।

---

13 *श्लोकवार्तिकम्*, शब्दपरिच्छेदः

14 *श्रीमद्भागवतम्*, १।४।२५

अर्थात्, रामायणस्य पठने यथा ब्राह्मणक्षत्रियवैश्यादीनामधिकारोऽस्ति तद्वत् शूद्राणामपि अधिकारोऽस्ति आर्षकाव्यस्यास्य श्रवणे पठने च। तथाहि श्लोकस्यास्य व्याख्यायां रामायणशिरोमणिटीकायां टीकितमस्ति – "यद्यप्यस्य वेदसम्मितत्वेन शूद्रकर्तृकपाठो न युज्यते तथापि निषादस्थपत्यधिकरणरीत्या ऋषिवचनप्रामाण्येन शूद्रस्यापि पाठाधिकारसम्भवात् युज्यत एव। तथाहि 'निषादस्थपतिं याजयेत्' इत्यत्र निषादश्चासौ स्थपतिश्चेति कर्मधारयो वा निषादानां स्थपतिर्निषादस्थपतिरिति षष्ठीतत्पुरुषो वा निषादः स्थपतिर्यस्येति बहुव्रीहिर्वेति त्रिविधा विकल्प्य बहुव्रीहिषष्ठीतत्पुरुषत्वं गुरुत्वेन परित्यज्य कर्मधारयः स्वीकृतः। तत्र यद्यपि निषादानां वेदानधिकारित्वेन याजनाप्राप्तिस्तथापि वचनप्रामाण्येन निषादाभिन्नस्थपतियाजनं स्वीकृतम्। तथाऽत्रापि परमप्रमाणभूतर्षिवचनप्रामाण्येन शूद्रस्यापि रामायणपाठाधिकारः स्वीक्रियते...." [16]इति।

ख) **विषयः –**

विषयो द्वितीयस्तावदनुबन्धः। रघुकुलचूडामणेः सीतापतेः श्रीरामस्य महनीयं चरितमेव मुख्यविषयत्वेनादिकविना वर्णितम्। तथाहि प्राप्यतेऽयं श्लोकः –

"उदारवृत्तार्थपदैर्मनोरमैस्तदास्य रामस्य चकार कीर्तिमान्।
समाक्षरैः श्लोकशतैर्यशस्विनो यशस्करं काव्यमुदारदर्शनः॥" [17]इति।

ग) **सम्बन्धः –**

अनुबन्धचतुष्टयेषु सम्बन्धस्तृतीयः। बोध्यस्य श्रीरामचरितस्य बोधकस्य श्रीमद्रामायणस्य च बोध्यबोधकभाव एव सम्बन्धः। तथाहि तिलकटीकाकृता श्रीरामेण निगदितं –

"रामोऽयनं प्रतिपाद्यो यस्य तद्रामायणम्।" [18]इति।

रामायणशिरोमणिटीकायामप्युल्लिखितमस्ति –

"रामायणं रामप्रतिपादकं रामप्रापकं वा"[19] इति।

घ) **प्रयोजनम् –**

अनुबन्धचतुष्टयमध्ये प्रयोजनमेव परमञ्चरमञ्चेति। तथाहि कथ्यते–

"प्रयोजनमनुद्दिश्य न मन्दोऽपिप्रवर्तते।" इति।

"पठन् द्विजो वागृषभत्वमीयात् स्यात् क्षत्रियो भूमिपतित्वमीयात्।...." [20] इति पूर्वोद्धृते श्लोके रामायणस्य प्रयोजनमप्युल्लिखितमस्ति। ब्राह्मणाः रामायणस्य पठनात् शब्दब्रह्मपारगत्वं प्राप्नुयुः। क्षत्रिया

---

[15] *रामायणम्*, १।१।१०१

[16] रामायणशिरोमणिटीका, पृष्ठाङ्कः – ४९

[17] *रामायणम्*, १।२।४२

[18] *रामायणतिलकटीका*, पृष्ठाङ्कः – ४८

[19] तत्रैव, पृष्ठाङ्कः – ४८

आदिकाव्यस्यास्य पठनाद्भूपतित्वं प्राप्नुयुः। वैश्याः धनसमृद्धिं प्राप्नुयुः रामायणस्य पठनात्। शूद्राः आर्षकाव्यस्यास्य पठनान्महनीयतां प्राप्नुयुः। एतेन रामायणपाठस्यैहिकप्रयोजनं सिद्धम्।

अपि च, "इदं पवित्रं पापघ्नं पुण्यं वेदैश्च सम्मितम्..." [21] इत्यनेन श्रीमद्रामायणस्य वेदमूलकत्वान्मोक्षप्राप्तिरूपं परमं फलमपि सिद्ध्यति। तिलकटीकाकृता श्रीरामेण रामायणस्यैहिकामुष्मिकफलप्राप्तिरूपं प्रयोजनं यथार्थतया निरूपितम्। तथाहि तिलकटीकायां टीकितं श्रीरामेण–

"ननु रामायणस्यैहिकामुष्मिकफलदत्वे मानाभावात् किं तद्व्याख्यानेनेति चेन्न – 'इदं पवित्रं पापघ्नम्...' इत्यादि 'जनश्च शूद्रोऽपि महत्त्वमीयात्' इत्यन्तश्लोकैरैहिकार्थसाधकत्वस्य स्पष्टमत्रैव श्रूयमाणत्वात्,

'श्रृण्वन् रामायणं भक्त्या यः पादं पदमेव वा।
स याति ब्रह्मणः स्थानं ब्रह्मणा पूज्यते सदा॥'

इति मूलरामायणवचनेन ब्रह्मलोकावाप्तेः फलस्य स्पष्टमुक्तत्वाच्च"[22] इति।

श्रीरामचरितमानसस्यानुबन्धचतुष्टयम् –

वाल्मीकिमुनेः पदाङ्कमनुसृत्य भक्तशिरोमणिना तुलसीदासेनापि स्वीये श्रीरामचरितमानसे रघुकुलभूषणस्य श्रीरामभद्रस्य महनीयञ्चरितं वर्णितम्। आसीत् तुलसीदासः संस्कृतभाषायां सुपण्डितः। श्रीरामचरितमानसस्योत्तरकाण्डे रुद्राष्टकमाप्यते। वयं जानीमो यत् शिवस्तुतिमूलकं स्तोत्रमिदं वैष्णवकुलतिलकेन तुलसीदासेनैव ग्रथितम्। देवभाषया विरचितं स्तोत्रमिदं स्तोत्रसाहित्येऽपि विशिष्टं स्थानं भजते। श्रीरामचरितमानसस्य सम्यक्पठनेन अस्माभिर्ज्ञायते यत्तुलसीदासस्तु विविधविद्यास्वासीन्निष्णातः। केवलं लोककल्याणार्थं तथा सर्वेषां बोधसौकर्यार्थं तुलसीदासेन अवधिभाषायां श्रीरामचरितमानसं विरचितम्। श्रीरामचरितमानसे रसालंकारदार्शनिकतत्त्वादीनां यादृशः प्रयोगो गोस्वामिना तुलसीदासेन विहितः सोऽतुलनीयः। विश्वविश्रुते ग्रन्थेऽस्मिन् अनुबन्धचतुष्टयस्याप्युल्लेखः प्राप्यते।

क) श्रीरामचरितमानसस्य अधिकारी –

पृथिव्याः सर्वं कार्यजातं न हि सर्वेषां कृते साध्यमिति शाश्वतं सत्यम्। तथाहि विषयस्य ग्रहणे धारणे च केवलं समर्थव्यक्तिरेवाधिकारी। श्रीरामचरितमानसस्तु परमपावनः मानससरोवरतुल्यः। श्रीरामचरितमानसे रमणीयं तथा अत्युत्तमं संवादचतुष्टयं वर्णितमस्ति। ते यथा – उमामहेश्वरसंवादः, भुशुण्डि-गरुडसंवादः, याज्ञवल्क्य-भरद्वाजसंवादः, श्रीतुलसीदास-सन्तसंवादश्चेति।

---

[20] *रामायणम्*, १।१।१०१

[21] तदेव, १/१/९९

[22] *रामायणतिलकटीका*, पृष्ठाङ्कः – २

उमामहेश्वरसंवादे परमेश्वरो वक्ता। जगन्माता पार्वती शिवसकाशाद् रामकथामिमां श्रृणोति। भुशुण्डि-गरुडसंवादस्य वक्ता भुशुण्डिनामको वायसः। श्रोता हि विहङ्गराजः सुपर्णः। याज्ञवल्क्य – भरद्वाजसंवादस्य वक्ता तावद् याज्ञवल्क्यः। श्रोता ऋषिप्रवरो भरद्वाजः। तुलसीदास – सन्तसंवादस्य वक्ता तावत् श्रीतुलसीदासः। संवादस्यास्य श्रोतारः सज्जनाः। पूर्वोक्तं संवादचतुष्टयं श्रीरामचरितमानससरोवरस्य मनोरमं घट्टचतुष्टयम्। रामचरितमानसमिदं सप्तकाण्डात्मकम्। सप्तकाण्डमिदं श्रीरामचरितमानससरोवरस्य सप्तसोपानतुल्यम्। तथोक्तं श्रीतुलसीदासेन –

"सुठि सुंदर संबाद बर बिरचे बुद्धि बिचारि।
तेइ एहि पावन सुभग सर घाट मनोहर चारि॥" [23]इति।

प्रागेवोल्लिखितं यद्गोस्वामिना श्रीतुलसीदासेन स्वकीयं श्रीरामचरितमानसमिति ग्रन्थरत्नं सरोवरेण सह तुलितम्। अतो ये जनाः सर्वदा परमश्रद्धया श्रीरामचरितं श्रृण्वन्ति, ते तु अस्य सरोवरस्य अधिकारी। उक्तञ्च तुलसीदासेन –

"जे गावहिं यह चरित सँभारे। तेइ एहि ताल चतुर रखवारे॥
सदा सुनहिं सादर नर नारी। तेइ सुरबर मानस अधिकारी॥" [24]इति।

भारतीयसंस्कृतौ भारतीयानां जीवनचर्यायाञ्च गुरोर्विशिष्टं स्थानमस्ति। श्वेताश्वतरोपनिषदि व्याख्यातं यत् परब्रह्मणि स्वगुरौ च यः समभावेन श्रद्धापरायणः स एव ब्रह्मज्ञानप्राप्तेः यथार्थाधिकारी। तथाह्याम्नातं श्वेताश्वतरोपनिषदि –

"यस्य देवे परा भक्तिः यथा देवे तथा गुरौ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः॥"[25]इति।

गुरुरेव ज्ञानाञ्जनशलाकया अज्ञानतिमिराच्छन्नानां शिष्याणां चक्षुरुन्मेलनं करोति। श्रीगुरोर्वाक्ये तथा शास्त्रवचनेषु विश्वास एव श्रद्धानाम्ना अभिधीयते। तथाहि वेदान्तसारकृता श्रीसदानन्दयोगीन्द्रेण निगदितं –"गुरूपदिष्टवेदान्तवाक्येषु विश्वासः श्रद्धा"[26]इति। गोस्वामिना तुलसीदासेनापि निगदितं –

"गुर पद प्रीति नीति रत जेई। द्विज सेवक अधिकारी तेई॥
ता कहँ यह बिसेष सुखदाई। जाहि प्रानप्रिय श्रीरघुराई॥"[27]इति।

अर्थात्, गुरुसेवापरायणः, नीतिपरायणः, द्विजसेवकः श्रीरामभक्तिपरायणश्च जनः रामचरितमानसस्य यथार्थाधिकारीति तुलसीदासस्याशयः।

---

[23] *श्रीरामचरितमानसम्*, दोहा १/३६

[24] तदेव, १।३७।१

[25] *श्वेताश्वतरोपनिषद्*, ६।२३

[26] *वेदान्तसारः*, पृष्ठाङ्कः -२५

[27] *श्रीरामचरितमानसम्*, ७।१२७।४

ख) विषयः –

ग्रन्थस्य विषयः ज्ञात्वा हि पाठको ग्रन्थपाठे प्रवृत्तो भवति। श्रीरामचन्द्रस्य चरितवर्णनमेवास्य ग्रन्थस्य मुख्यः प्रतिपाद्यो विषयः। तथाहि तुलसीदासेन स्वयमेवोक्तम् –

"नानापुराणनिगमागमसम्मतं यद्
रामायणे निगदितं क्वचिदन्यतोऽपि।
स्वान्तःसुखाय तुलसी रघुनाथगाथा
भाषानिबन्धमतिमञ्जुलमातनोति॥"[28]इति।

अर्थात् पुराणादिषु बहुविधेषु शास्त्रनिकायेषु वर्णितानां रामचरितविषयकाणां वृत्तानामवलम्बनेन तुलसीदासेन श्रीरामचरितवर्णनपरकं श्रीरामचरितमानसनामधेयं महनीयं काव्यमिदं प्रणीतम्।

ग) **सम्बन्धः –**

अनुबन्धचतुष्टयमध्ये तृतीयो विषयस्तावत् ग्रन्थयोः प्रतिपाद्य-प्रतिपादकसम्बन्धः। सकललोकाभिरामस्य श्रीरामस्य महनीयञ्चरितमेव काव्यस्यास्य प्रतिपाद्यम्। श्रीरामचरितमानसमिति काव्यं सीतापतेः पूतचरितस्यैव प्रतिपादकम्।

घ) प्रयोजनम् –

अनुबन्धचतुष्टयमध्ये प्रयोजनमेव सर्वोत्तमम्। प्रयोजनज्ञानमेव सर्वप्रवृत्तिमूलम्। तथाहि कुमारिलभट्टपादेनावेदितम् –

"सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित्।
यावत्प्रयोजनं नोक्तं तावत्तत्केन गृह्यते॥" इति।

श्रीरामचरितमानसस्य प्रयोजनविषये गोस्वामिना श्रीतुलसीदासेन निगदितं यः खलु श्रीरामचरितमानसनामके सरसि निमज्जति, स आध्यात्मिकाधिभौतिकाधिदैविकरूपतापात्परित्राणं प्राप्नोतीति। तथोक्तं श्रीतुलसीदासेन –

"सकल बिघ्न ब्यापहिं नहिं तेही। राम सुकृपाँ बिलोकहिं जेही॥
सोइ सादर सर मज्जनु करई । महा घोर त्रयताप न जरई ॥"[29]इति।

अपि च, श्रीरामचरितमानसे समुल्लिखितमस्ति –

"मन कामना सिद्धि नर पावा। जे यह कथा कपट तजि गावा॥
कहहिं सुनहिं अनुमोदन करहीं। ते गोपद इव भवनिधि तरहीं॥" [30]इति।

---

28 *श्रीरामचरितमानसम्* १/७

29 तत्रैव, १/३८/३

30 प्रागेव, ७।१२८।३

अर्थात् ये जना एकाग्रचित्तेन रामकथां शृण्वन्ति, तेषां सिद्धिलाभो भवति। अस्या रामकथायाः पठनेन श्रवणेन च जनाः गोपदमिव भवसिन्धुं तरन्तीति तुलसीदासस्याशयः।

'मन कामना सिद्धि नर पावा' इत्यंशस्य प्रयोगात् तुलसीदासेन श्रीरामचरितमानसस्यैहिकफलप्राप्तिरूपं प्रयोजनमुल्लिखितम्। 'ते गोपद इव भवनिधि तरहीं॥' इत्यंशस्य प्रयोगेन श्रीरामचरितमानसस्य आमुष्मिकफललाभरूपं प्रयोजनं वर्णितं श्रीतुलसीदासेन। जगत्यस्मिन् सर्वे मनुजाः दुःखस्यात्यन्तिकनिवृत्तये तथा सुखप्राप्तये सदैव प्रचेष्टन्ते। भारतीयदार्शनिकानां मते धर्मार्थकामरूपत्रिवर्गस्य समभावेन परिशीलनेन तथा मोक्षनामकस्य परमपुरुषार्थस्य लाभादेव आनन्दावाप्तिः दुःखस्यात्यन्तिकी निवृत्तिश्च सम्भवतः। श्रीरामचरितस्य सम्यक्तया पठनेन श्रवणाच्च त्रिवर्गप्राप्तिर्यथा सम्भवति तथैव रामभक्तिलाभो मोक्षप्राप्तिश्चापि भवतः।

उपसंहृतिः –

दशरथनन्दनस्य श्रीरामचन्द्रस्य पूतचरितमवलम्ब्य तत्रभवता आदिकविना वाल्मीकिना रामायणाख्यं महदादिकाव्यं प्रणिनाय। लोकशिक्षणार्थं सद्भावनायाः प्रसारार्थञ्च श्रीतुलसीदासेन लोकभाषायामेव श्रीरामभद्रस्य चरितवर्णनपरकं विश्वविश्रुतं श्रीरामचरितमानसमिति काव्यं व्यरचि। लोकभाषया निबद्धेऽपि श्रीरामचरितमानसे दार्शनिकतत्त्वानां यादृशः प्रयोगो वैष्णवकुलतिलकेन श्रीतुलसीदासेन विहितः स त्वतुलनीयः। अनुबन्धादीनां समुल्लेखनेन श्रीरामचरितमानसस्य शास्त्रत्वं स्वतः सिद्ध्यति। विविधानामलंकाराणां सुचारुप्रयोगात्, भाषाप्रयोगस्य सारल्येन, भावव्यञ्जनायाः माधुर्येण, काहिनीवर्णनायाश्चमत्कारित्वेन भक्तिमार्गस्य माहात्म्यवर्णनेन सर्वोपरि विविधानां दार्शनिकतत्त्वानां सुनिपुणतया प्रयोगेन च भक्तशिरोमणिना गोस्वामिना श्रीतुलसीदासेन विरचितं श्रीरामचरितमानसमिति ग्रन्थरत्नं खलु अनवद्यमिति पल्लवितेनालम् इति।

परिशीलिता ग्रन्थानुक्रमणी

संस्कृतभाषायाम् -

वाल्मीकि, *रामायणम्*, (रामकृतया तिलकव्याख्यया समेतम्) सम्पा. काशीनाथपाण्डुरङ्गपरव, मुम्बाइ : निर्णयसागरप्रेस, १९०२ (द्वितीयसंस्करणम्).

वाल्मीकि, *रामायणम्*, (श्रीमद्गोविन्दराजीयव्याख्यानसमलंकृतम्) सम्पादकौ - टी. आर. कृष्णाचार्य, टी. आर. व्यासाचार्य च, मुम्बाइ : निर्णयसागरप्रेस, १८३२ शकाब्द.

वाल्मीकि, *रामायणम्,* (रामायणतिलकं, रामायणशिरोमणिः, रामायणभूषणं चेति टीकात्रयोपेतम्) सम्पादकौ – कट्टीश्रीनिवासशास्त्री, सातकडिमुखोपाध्याय च, दिल्लि : परिमलपब्लिकेशन्, १९८३

अप्पयदीक्षितः। *रामायणतात्पर्यसंग्रहः,* (श्रीरामायणसारसंग्रहस्तोत्रविवरणम् – इति व्याख्यासहितः), श्रीरङ्गम् : श्रीवाणीविलासप्रेस्, १९२९.

राजशेखरः। *काव्यमीमांसा,* (संस्कृत-हिन्दीव्याख्याद्वयोपेता), सम्पादकः मधुसूदनमिश्रः, वाराणसी : चौखाम्बा संस्कृत सीरीज आफिस, विक्रम सम्बत -२०३४ (पञ्चमसंस्करणम्)।

हिन्दीभाषायाम्

तुलसीदास, *श्रीरामचरितमानस,* टीकाकार – हनुमानप्रसादपोद्दार, गोरक्षपुर : गीताप्रेस्, २०७३ सम्बत

तुलसीदास, *श्रीरामचरितमानस,* (विजयानन्दत्रिपाठीकृता 'विजया' टीकायुक्ता) भागत्रयात्मकम्, सम्पादकौ - ड. श्रीनाथमिश्र, ड. सहजानन्दत्रिपाठी च, वाराणसी : चौखम्बाविद्याभवन, २००४.

बङ्गभाषायाम्

वाल्मीकि, *रामायणम्,* सम्पा. पञ्चाननतर्करत्न, कलकाताः वेणीमाधव शीलस् लाइब्रेरी, २०१४ (पुनर्मुद्रितम्)

तुलसीदास, *श्रीरामचरितमानसम्,* (बङ्गानुवादः) सम्पा. सतीशचन्द्र दाशगुप्त, कलकाता : खादिप्रतिष्ठान, १९३४

कर, परिमल, *रामायण आदि परिणति प्रसार,* कोलकाता : संस्कृत पुस्तक भाण्डार, १४१६ बङ्गाब्द (प्रथम प्रकाश)

दास, करुणासिन्धु, *संस्कृतविद्यार नाना प्रसङ्ग,* कोलकाता : संस्कृत पुस्तक भाण्डार, २००४

घोष, वारिदवरण, *रामायण प्रसङ्गे रवीन्द्रनाथ,* कोलकाता : करुणा प्रकाशनी २००८

माजी, विप्लव, *वाल्मीकि रामायणे राम आदिवासी रामायणे राम,* कोलकाता : कोडेस्क, २०१२.

आङ्गलभाषायाम्

Atkins, A. G. *The Ramayana of Tulsidas,* Mathura : Shri Krishna Janmasthan Seva Sansthan, 1997.

Sarma, D. S. *The Pride of Ayodhya,* Madras : Sri Ramakrishna Math, 1946.

पाश्चात्त्यच्छन्दसां प्रयोगे संस्कृतविदुषां वैदुष्यम्

भास्करच्याटार्ज्जी[1]

चन्दयति आह्लादयति चन्द्यतेऽनेन वेत्यर्थे चदि आह्लादेति धातोः 'चन्देरादेश्च छः'- इत्यनेन असुन्प्रत्यये छन्दस् इति शब्दस्य निष्पत्तिः। अनेन छन्दसाम् आह्लादजनकत्वं सिद्ध्यते। पुनः पापेभ्यः रक्षणार्थं तथा आच्छादनार्थं छन्दश्शब्दस्य आच्छादनार्थे प्रसिद्धिः ऐतरेयारण्यके। ब्रह्मणा प्रज्वलितवह्नेः देवानां सहायभूतत्वात् सङ्गतोऽयमर्थ इति भाति। निरुक्तेऽपि अस्यैव अङ्गीकारो दृश्यते। एभिर्वस्तुतः अयं भावः समायाति यत् अशुभभावं दूरीकृत्य मनसो निर्मलीकरणाय एव छन्दसामाविर्भावः। चतुर्दशविद्यासु वेदाङ्गषट्के छन्दश्शास्त्रस्योल्लेखः शास्त्रस्यास्य महत्वं प्रतिपादयति। किञ्च तद्विधः शब्दैव न्यक्क्रियते विद्वद्भिः यत्र छन्दो नास्ति, तथाह्युच्यते - **"**छन्दोहीनो न शब्दो अस्ति, न छन्दः शब्दवर्जितम्**"**। छन्दोभिः ग्रथितं सदेव काव्यम् आस्वादयन्ति सहृदयाः। किञ्च काव्यस्य पाठोऽपि छन्दोविहीनो निरर्थकः,अश्राव्यो च भवति। तथाहि खलु पद्भ्यां विना यथा निष्क्रिया भवन्ति जनाः, छन्दोविना साहित्यस्यापि तथैव स्थितिरिति कृत्वा छन्दः पादौ तु वेदस्येति सार्थकमिदं वचः।

वैदिकलौकिकभेदादिदं छन्दश्शास्त्रं पुनः भिद्यते द्विधा प्रयोगाधारेण। तत्र वेदेषु प्रयुज्यमानं छन्दः वैदिकम्**,** लौकिकमहाकाव्यादिषु व्यवहृयमानं छन्दस्तु लौकिकम्।वैदिकमनुष्टुपादीनि**,**लौकिकं पुनः इन्द्रवज्रादीनि प्रसिद्धान्येव। कालिदासादीनां महाकाव्यानि एतैरेव लौकिकच्छन्दोभिर्गथितानि। आरम्भतः एव प्रवर्तिता प्रचलिता चासीदियं परम्परा। तत्र कदाचित् एभिः छन्दोभिः सर्जनवेलायां काठिन्यं नानुभवेयुः कवयः, यतो हि आबाल्यात् एभिर्सह सम्पृक्ताः सन्तः तेषां विवर्धनम्। किन्तु परम्परायाः बहिर्गमनादेव प्रसिद्धिमाप्नुवन्ति जनाः। निखिलेऽस्मिन् विश्वे सर्वेष्वेव साहित्येषु इदं मार्गपरिवर्तनं दृश्यते यद्धि आधुनिकतायाः समागमनं संसूचयति। संस्कृतेऽपि अवलोक्यते अर्वाचीनकविवराणां सृष्टिषु कानिचित्प्राचीनशैलीमवलम्ब्य प्रसिद्धसंस्कृतच्छन्दोभिः ग्रथितानि, कानिचित् नवीनरीतिमुपाश्रित्य मुक्तच्छन्दसा विरचितानि, कानिचित् पुनः वैदेशिकच्छन्दोभिः सुरञ्जितानि काव्यकुसुमानि।

आधुनिककाव्यविरचनपरम्परा साम्प्रतं समृद्धा बहुव्यापृता च। महाकवयो मथुरानाथशास्त्रि-अभिराजराजेन्द्रमिश्र-राधावल्लभत्रिपाठि-हर्षदेवमाधवप्रभृतयो धारामिमां परिपुष्णन्ति। एतेषां कवितासु यथा मन्दाक्रान्ता-शिखरिण्यादीनां प्रसिद्धच्छन्दसां प्रयोगो दृश्यते तथैव भूयिष्ठं दृश्यते सनेट्-हाइकु-तान्काप्रभृतीनां पाश्चात्यच्छन्दसां व्यवहारः।

वैदेशिकच्छन्दसां प्रयोगे अर्वाचीनानां दाक्ष्यम् -

"काव्येषु कोमलधीयो वयमेव नान्ये"- इति प्रसिद्धवचनात् काव्यरचनायां भारतीयानां वैदग्ध्यमेव परिस्फुटति। तथाहि यया कयाचिदपि रीत्या येन केनचिदपि छन्दसा सुमधुरम् अलंकारसमृद्धं

---

[1] शोधच्छात्रः, केन्द्रियसंस्कृतविश्वविद्यालयः, भोपालपरिसरः, मध्यप्रदेशः।

काव्यविरचनपटवस्ते विश्वेऽस्मिन् सर्वत्रैव समादृताः। स्वकीयरचनारीतिम् अतिक्रम्य सनेट्-हाइकु-तान्का-सीजो-मोनो-इमेज्-इत्यादिषु वैदेशिकच्छन्दस्स्वपि भारतीयानां गतिः श्लाघनीया। केचन कविप्रवराः साम्प्रतम् एतैः छन्दोभिः सह देववाण्याः माधुर्यं मेलयित्वा देववाण्या एव काव्यरचयन्तः राराजन्ते। नवीनच्छन्दसां प्रासङ्गीकत्वं स्वीकृत्य राधावल्लभत्रिपाठिनोक्तं –

'उन्मीलिता नवीना / मार्गा दृष्यनवीनपद्धतयः / छन्दश्चलितं भूत्वा / पाथेयं दीर्घयात्रायाम् '– इति।

१. **<u>सनेट्-छन्दसा ग्रथितं संस्कृतसाहित्यम्–</u>**

मध्ययुगे इटालिदेशे प्रथमतः अस्य छन्दसः उद्भवः सञ्जातः। पेत्रार्क् अस्य प्रवर्तकत्वेन प्रसिद्धः। चतुर्दशसंख्यकपङ्क्त्या विन्यस्तेऽस्मिन् छन्दसि अष्टक-षटकरुपेण द्वौ अवान्तरभेदौ वर्तेते। प्रथमे चरणाष्टके यो भावः प्रस्तूयते परवर्तिषु षड्सु चरणेषु तस्यैव व्याख्या क्रियते। कविहृदयस्य आनन्दः, मनोवेदना काचित् विशिष्टा अनुभूतिः वा कविः सनेट्-रूपेण वर्णयति। तथाहि आङ्गलकविना कोलरिजमहोयेन –

"A small poem, in which some lonely feelings is developed" – इत्युक्तम्।

पेत्रार्कीय-शेक्सपीयरीयभेदेन इदं सनेट्-छन्दः द्विधा भिद्यते। पाश्चात्यसाहित्ये अस्य प्रयोगः यद्यपि प्रभूतः, भारतीयसाहित्येऽपि साम्प्रतम् अस्य व्यवहारो दृश्यतेतमाम्। माइकेलमधुसूदनदत्तेन तथा रवीन्द्रनाथेन वङ्गसाहित्ये प्रथमतः सनेट्-प्रणीतम्। संस्कृतवाङ्मये तु सनेट्-प्रणयनस्य कृतित्वं वीरेन्द्रकुमारभट्टाचार्याय एव गच्छति। अनेन'कलापिका' इति कश्चन सनेट्-संग्रहात्मको ग्रन्थो विरचितः। ग्रन्थेऽस्मिन्यथा भारतीयभावधारायाः पूर्णतयाः विकाशो दृश्यते, तथैव अवलोक्यते पाश्चत्यरीतेः अनुसरणमपि। वीरेन्द्रकुमारेण सनेट्-छन्दसः संस्कृतायितं नामकरणं विहितम्, 'संस्तवकम्' इति। कलापिकायाम् अस्यां ५० संस्तवकाः सन्ति शेक्सपीयरशैल्या अनुप्राणिताः।इमाः कविताः कदाचित् वङ्गीयकवितानां संस्कृतानुवादरूपाः, कदाचित् कवेः स्वमनसोद्भूतसौन्दर्यसम्पृक्ताः, क्वचिद् कोमलभावान्विताः सरस्वत्याः सौन्दर्यसंस्तवकाः, क्वचित्पुनः समाजसंस्कारार्थं प्रणीताः। विषयवस्तूनां वैचित्र्यं यद्यपि वर्तते, प्राधान्यं तु प्रेमाश्रयाणां संस्तवकानामेवात्र। तद्यथा-

"रात्रिन्दिवं मे देहमन्दिरेऽस्मिन् संचिन्त्य विदेहरूपं
पूजार्चनार्थं वर्तते हि चेतो देव्या ननु वाञ्छितायाः।
प्रज्वाल्य दीपं कल्पनाप्रतीकं स्निग्धं च हृदार्तिधूपं
हुत्वा च तस्यै प्रेमचन्दनाक्तं पुष्पं मम कामनायाः"।।[2]

राधावल्लभत्रिपाठीमहोदयस्यापि सनेट् – छन्दसा काव्यरचणायां पाण्डित्यं प्रभूतं दृश्यते। सनेट्-छन्दसः कृते 'स्वनितम्' इति नामकरणं तेन कृतम्। तस्य सनेट्-काव्यस्य संग्रहस्तावत् **'स्वनितषोडशी'** इति। अल्पैरेव शब्दैः महानर्थप्रतिपादकाः एते श्लोकाः विद्वद्भिः सुतरां समादृताः। तत्र

---

[2] *कलापिका*, वीरेन्द्रकुमार-भट्टाचार्यः, संस्कृतपुस्तकभाण्डारः,१९६९।

दिङ्मात्रम् उदाहरणं तावत् –

"अनुनादमयी सेयं तनुवीना निनादिता।
मदीयाथ स्वरैरेषा त्वदीयैरेव गुञ्जिता।।
अनुवादमयं भद्रे जीवनं मम चाखिलम्।
मूलं त्वदीयमेवास्ते मदीयं निखिलं खिलम्"।।[3]

अपरोऽयं संस्कृतसाहित्यस्य महान् विद्वान् खलु गुर्जदेशीयः हर्षदेवमाधवः। अनेनापि सनेट्-छन्दसा काव्यं विरच्य संस्कृतसाहित्यस्य विश्वचेतनाबोधः प्रकटीकृतः पाठकानां सकाशे। उदाहरणं यथा **'निष्क्रान्ताः सर्वे'** इति कवितातः-

"गता सा तन्वङ्गी तरुणी द्रुतगम्या स्मितवती
इतो विद्युत्तुल्या करगृहीतपद्मा श्रीरथवा।
इदानीं हा विद्युतः क्षणिकस्फुरणादूर्ध्वमिव तु
मनोघटध्वान्तं पुनरपि रुणद्धि जलदवत्।।" इति।

२. **हाइकुकाव्यम्-**

जापानदेशतः समानीतमिदं छन्दः। वर्षप्रारम्भे कदाचित् काव्यरचनास्पर्धायाम् अस्य छन्दसः प्रयोगो भवति स्म। अस्य विषयवस्तु प्रकृतिकेन्द्रिकं तथा च ऋतुकेन्द्रिकं भवति। अत्र शब्दबाहुल्यं न वर्तते, स्वल्पेनापि शब्देन कथं महतः कस्यचित् विषयस्य स्फुटनं सम्भवेदिति अस्य वैशिष्ट्यम्। व्यञ्जनायाः प्रयोगचातुर्यमेव हाइकुकवेः श्रेष्ठतायाः वीजम्। कश्चन कविप्रवरः एव केवलमनेन काव्यसर्जयितुं प्रवर्तते, नेदं स्वल्पधियां कृते। सप्तदशाक्षरान्वितम् इदं छन्दः। तत्र प्रथमायां तथा तृतीयायां पङ्क्तौ पञ्चाक्षराणि तथा द्वितीयायां सप्ताक्षराणि राजन्ते। तथाह्युक्तम् –" There are only seventeen syllables in the Haiku, the first and third lines contain five, and second the seven." उदाहरणं तावत् - वाशोमहोदयस्य (Matsuo Basho) OLD POND इत्यस्मात् –

Fu-ru-i-ke-ya (5) – old pond

Ka-wa-zu-to-bi-ko-mu (7) - frog leaps in

mi-zu-no-o-to(5) – water's sound

यद्यपि जापानदेशे अस्य छन्दसः उत्पत्तिः, परमस्य व्यपकता तु साम्प्रतम् आविश्वं प्रसारिता। देववाण्यपि एनं सादरं स्व्यकरोत्, हर्षदेवादयः सयत्नं पर्यवर्धन्त। इदानिन्तु संस्कृतजगति प्रसिद्धिम् अप्राप्नोत्, सत्तरी-सत्तराक्षरी-त्रिदलमित्यादिभि नामभिः सभाजितञ्च। हर्षदेवमाधवः, हरेकृष्णमेहेरः प्रभृतयः कवयः संस्कृतभाषया हाइकुकाव्यं व्यरचयन्। **'हासितास्या वयस्या'** इत्यस्मिन् काव्यसंग्रहे

---

[3] *संस्कृतप्रतिभा*, उन्मेषः – ६५, पृ.- ३०-४०।

हरेकृष्णमहोदयेन हाइकुकाव्यं प्रणीतम्। तत्रोदाहरणं तावत् –

आयाति वात्या (५)

गृध्राणां मधुमासः (७)

अर्था उड्डीनाः।। (५)

गीर्वाणवाण्यां हर्षदेवः हाइकुकवित्वेन प्रख्यातः। तेनैव सर्वप्रथमं हाइकुकाव्यं लिखितम् –

गुञ्जति भृङ्गः / कथयति किमपि / पुष्पं हसति।

क्लेशसन्तप्तेऽस्मिन् जगति सर्वे खलु दुःखसन्तप्ताः, दुःखस्य व्यपकतां दर्शयितुं हर्षदेवेन उक्तम्

वेदनायाः समीपे/ शब्दाः न सन्ति/ अतः/ मौनमये रिक्तधनादेश पत्रे वेदना हस्ताक्षरं करोति। (वेदना-संतापः)

'लावारसन्दिग्धाः स्वप्नमयाः पर्वताः' – इति काव्यसंग्रहस्तु कवेः हाइकुकाव्यरचनाकौशलस्य उदाहरणमेकम्। छन्दसोऽस्य प्रधानं वैशिष्ट्यं तावत्प्रकृतेः नैसर्गिकरूपचित्रणं यदनुभूतिप्रसूताद्विराड्त्वं प्रति अङ्गुलिनिर्देशं करोति। दिङ्गात्रमुदाहरणं–

"पाण्डुरसूर्यः/ शुष्कपर्णपतनम्/ तिमिरमथ।।"[4]इति।

कुत्रचित् मेघस्य केशप्रसाधनार्थं इन्दधनुषः प्रयोगः कविना कृतो महता यन्तेन –

इन्द्रधनुष/ प्रसाधनी अभ्रः केशान्/ संस्कारयति।।[5]

व्यञ्जनया एकस्य शब्दस्य द्विविधार्थप्रकाशनमपि हाइकुकाव्यस्य विशिष्टतां चरितार्थयति, यथा-

निशीथे सिंह/ नादः। सुप्ता जागर्ति/ राष्ट्रचेतना।।

पद्येऽस्मिन् निशीथे सिंहनादः इत्यस्यार्थः यथा रात्रौ सिंहस्य गर्जनम्, तथैव पराधीनरात्रौ सिंहवत् पराक्रमीराष्ट्रनेतुः आगमनमित्यपि संगतम्।

एवं मृत्युशतकम्[6] इति कवितासंग्रहे मृत्योः वर्णना अपि विहिता कविना अनेनैव छन्दसा –

मृत्युः / निकषग्रावा / जीवानां कृते।। इति।

प्रसिद्धसंस्कृतछन्दोभिः समलंकृतं किञ्च हाइकुशैल्या ग्रथितं संस्कृतकाव्यमपि हर्षदेवेन सृष्टम्। यथा – शिखरिणीछन्दसा विरचितं हाइकुकाव्यम् –

---

[4] *लावारसन्दिग्धाः स्वप्नमयाः पर्वताः*, पृ-५।

[5] *संस्कृतकक्षा*, १२, १९८८, पृ- २७।

[6] *मृत्युशतकम्*, चारुसंस्कृतपरिषद्, गुजरात् , १९९९।

गतः सूर्यो हा ! / धिक् ! तिमिरमभितो / हा ! कमलिनी ! – इति (ऋषेः क्षुब्धे चेतसि)

३. <u>**सिजोकाव्यम्**</u> -

कोरियादेशस्य बहुप्रसिद्धं सर्वजनसमादृतञ्चेदं छन्दः। चतुर्दशशताब्द्यां गोरियोराजवंशस्य राजत्वकाले कोरियासाहित्ये अस्य आविर्भावः प्रसारश्च समजनि। परम् अद्यापि स्वमहिम्ना तद्देशीयं साहित्यं परिपोषयत् राजतेदं छन्दः। विषयदिशा परिवर्तनं जायमानमपि रचणाशैली तु अपरिवर्तिता एव अस्ति। तत्रत्यैः जनैः इदं 'Short song', 'The slowest song in the world' इत्यादिभिः व्यवह्रयन्ते। चाइनादेशीयैः ट्याङ्गज्युजुप्रभृतिभिः छन्दोभिस्सह अस्य सादृश्यमवलोक्य एभिरेवानुप्राणितमिदं वृत्तमिति -विदूषां मतम्।अत्र पङ्क्तित्रयं वर्तते-सम्मिल्य ४४ ,४६ अक्षराणि च तिष्ठन्ति। तत्र प्रथमपङ्क्तौ विषयस्य प्रास्ताविकं रूपं प्रदर्श्यते, द्वितीयायां वर्णणीयविषयो विस्तृतिं लभते दिक्परिवर्तणं च करोति, अन्तिमायां व्यङ्गात्मकमार्गेण समाप्तिं याति। कोरियादेशस्य प्राकृतिकसौन्दर्यं, जनानामावेगः, राष्ट्रचिन्ता, परम्पराप्राप्तं गौरवञ्चेत्यादिकं सर्वं पद्येऽस्मिन् कविभिः प्रकटीक्रियते। तत्रोदाहरणं तावत् Yi-Byung-Gi महोदयस्य-poulowunia blooms– इति कवितातः-

담머리넘어드는달빛은은은하고(14) (Misty moonlight spills over the top of the wall)
한두개소리없이내려지는오동꽃을(15) (One or two poulownia blooms silently drop)
가려다발을멈추고다시돌아보노라(15) (My feet hesitate to go; I turn and look back)

एवम्भूतसुप्रसिद्धस्यास्य छन्दसः अपि प्रयोगो दृश्यते प्रभूतो देववाण्याम्। हरेकृष्णमेहेर-हर्षदेवमाधवादयः सुकवयः सिजोछन्दसा काव्यस्रजं ग्रन्थयित्वा स्वकीयां प्रतिभामतानिषुः जगति। तत्र दिङ्मात्रम् उदाहरणम् अत्र प्रस्तूयते हरेकृष्णमेहेरमहोदस्य –

पुष्पराक्षं बाष्पालयम् / उद्यानं पुष्पालयम् / वल्ली त्रपीरूपालयम् / प्रान्तरः शष्पालयम् / विहङ्गस्तनुते स्वयम् / मन्त्रं सताल-लयम्।।[7]

अस्य अयमाशयः उद्यानं पुष्पैः परिपूर्णम्, तत्र नवीनाः लज्जाशीलाः लताः वर्तन्ते। प्रान्तरे शस्यतृणादीनि शोभन्ते। विहङ्गाःताललयाश्रितं गीतं गायन्ति। प्रकृतेः अपरुपवर्णना कविना अत्र प्रस्तूता।

गजलसङ्गीतस्यावर्तनेन प्रयुक्तस्य सिजोकाव्यस्योदाहरणं हर्षदेवमाधवस्य काव्ये दृश्यते -

---

[7] *हासितास्याः वयस्या* – बाष्पालयम्।

काकभ्रातः! गच्छ दूरं / गच्छ दूरं मे गृहात् / कोऽपि वीरो यो गतोऽस्ति / नैव निवृतो रणात्। इति।[8] द्वितीयविश्वयुद्धस्य भयावहस्थितिः विषयीभूता जाता हर्षदेवस्य कवितायाम्। यथा –

हिरोशिमायां दग्धोऽस्मि/ नष्टोऽस्मि गोलिकया/ वियेतनामे हतः,मे/ शब्दः 'Quit India'... ।[9] इति गम्भीरोऽयं विषयः कविना महता यत्नेन यथार्थतया स्पष्टीकृतः कविताद्वारेण। एवं नैके विषयाः विषयीभूतास्सन्तः कवितापरम्परामिमां परिपोषयन्ति।

४. **तान्काकाव्यम्-**

जापानदेशस्य ऐतिह्यमयसंस्कृतेः वाहकमिदं छन्दः। आदौ समेषामेव लघुछन्दसां कृते तान्का इति संज्ञा व्यवह्रियते स्म, अनन्तरं नवमशताब्दीमारभ्यो विशिष्टायां कस्याञ्चित् छन्दोधारायां इयं संकीर्णा। **ओयाका** आसीत् अस्य छन्दसः प्रथमा संज्ञा, ततः जापानीकविसमालोचकेन **मासाओयाका शिकि** महोदयेन सा तान्कायां परिवर्तिता विंशशताब्द्याम्। छन्दस्यस्मिन् पञ्चचरणाणि सन्ति, प्रथमत्रयाणां कृते – कामि नो कु (***Kami-no-ku***/ Upper lines), तथा अन्तिमद्वयोः कृते सिमो-नो कु(***Shimo-no-ku***/ Lower ones) इति नामकरणं कविभिः प्रस्तुतम्। प्रथमचरणद्वये कविः स्वीयानुभूतिं प्रकटयति, तृतीयचरणे गतिपरिवर्तनेन भिन्नविषयम् अभिव्यनक्ति, तदा अन्तिमपङ्क्तिद्वये महतः तात्पर्यपूर्णार्थस्य अभिव्यञ्जना वर्तते। साकल्येन एकत्रिंशदक्षराणि (३१) अत्र विद्यन्ते। तत्र प्रथमे चरणे अक्षरपञ्चकं, द्वितीये अक्षरसप्तकं, तृतीये अक्षरपञ्चकं, चतुर्थे पञ्चमे च चरणे अक्षरसप्तकं राजते। प्रेमनिवेदम्, कृतज्ञताप्रकटनम्, समकालीकघटनावर्णनम्, प्रकृतेः सौन्दर्यचित्रणमित्येते विषयाः अत्र अन्तर्भवितुं शक्नुवन्ति। तत्रोदाहरणं तावत्, Fujiwara Michinaga महोदयस्य *Mochizuki no Uta*[10] कवितातः -

(この世をばわが世とぞ思う望月の欠けたることもなしと思えば)– इति।

अस्य आङ्गलभाषायाम् अनुवादः अधः प्रदर्श्यते –

Konoyo wo ba (This world,I think)

Wagayo to zoomou (is indeed my world)

Mochzuki no (like the full moon)

Kaketaru koto mo (I Shine)

Nashi to omoeba[11] (Uncovered by any cloud)[12]

---

8 ऋषेः क्षुब्धेः चेतसि, हर्षदेवमाधवः – पृ. ७५/४१।

9 तत्रैव, पृ. ७५/४१।

10 *Tennō to Fujiwara-shi*: Fujiwara Michinagamochizuki no uta o utau, San'ichiShobō; Dai 1-han edition (2000)

11 *Shoyuki* , p.55.

पाश्चात्यच्छन्दसां प्रयोगे संस्कृतविदुषां वैदुष्यम्

साहित्यं न कदाचिदपि एकस्मिन् क्षेत्रविशेषे स्थिरं तिष्ठति। समग्रविश्वव्यपकता एव साहित्यस्य धर्मः। तथाहि इदं सुदूरस्थं जापानदेशीयछन्दः अपि भारतभूमौ प्रसिद्धिं गतम्। साम्प्रतं संस्कृतसाहित्ये अस्य समादरेण प्रयोगो दृश्यते। हर्षदेवमाधवादयः तान्काछन्दसः प्रयोगे धुरिणः सन्ति। हरेकृष्णमेहेरमहोदयस्यापि तान्काप्रयोगे वैदुष्यं दृश्यते। एतेषां काव्येषु कल्पनाशक्तेः चरमोल्लासः, तथा च मानवीयभावाभिव्यक्तिः सम्यक् प्रस्फुटितं दृश्यते। यथा हर्षदेवमाधवस्य -

हरिणी हता/ व्याधेन निष्ठुरेण/सायं खादिता/ सा पुनः श्वसिति/ व्याधवध्वा वक्षसि।। - इत्यस्मिन् पद्ये व्यधस्य कामक्रीडा शिकारत्वेन व्यञ्जिता।

तथा च कुत्रचित् बसस्थापनागारे भिक्षुकस्य पार्श्वे सुगन्धिपुष्पस्यावस्थानम् दरिद्रधनिनोः पार्थक्यत्वेन अनुमीय कवि भणति –

भिक्षुकः स्थितः / बसस्टेन्ड-फलके / क्षुत्रस्तः पार्श्वे / सपुष्पा जातिलता / प्रसारयति शाखाः।।

एवञ्च 'ऋषेःक्षुब्धे चेतसि' इत्यस्मात् काव्यग्रन्थात् सुमधुरमेकं पद्यबन्धं उद्धरामि अत्र विदूषां मोदाय –

गवाक्षे मुखम् / गवाक्षेऽस्ति वसन्तः / गवाक्षे चन्द्रः.... इति।

तान्काप्रयोगे हरेकृष्णमेहेरस्यापि अवदानं श्लाघनीयम्। तस्य हासितास्याः वयस्या इति काव्यग्रन्थात् उदाहरणमेकमुपस्थाप्यते –

कर्गजपुष्पं / मध्येमार्गं मञ्जुलं / निर्गन्धं भाति / आधुनिकी सभ्यता / उभयोग्य - दर्शाना।। - इति।

एवमत्र यथाक्रमं संस्कृतभाषायां व्यवहृतानां पाश्चात्यच्छन्दसां विषये आलोचनं प्रस्तूतम्। उपसंहृतौ वक्तुमलं यद्देववाणी सम्प्रति न केवलं भारते सीमिता, आमेरिका-युरोपादि-महाद्वीपानां प्रायः सर्वेषु शिक्षाप्रतिष्ठानेषु संस्कृतविभागो विद्यते। तत्र तत्र देशेषु सादरेण अस्याः अध्ययन-अध्यापनादिकं च प्रचलदस्ति। तथात्वे सति संस्कृते हाइकु-तान्का-सिजो-सनेट्प्रभृतीनां वैदेशिकच्छन्दसां प्रयोगेऽपि न काचित् हानिर्दृश्यते। अतः एतेन संस्कृतमातुः अवमानना भवति एवं चिन्ताऽपि न करणीया। किञ्च सुप्रसिद्धानि छन्दांसि विहाय एतेषां सम्प्रयोगे सति मालिन्याः शिखरिण्या वा सौन्दर्यमपचीयतेत्यपि न। अपि तु अनेन संस्कृतसाहित्यं विश्वव्यापकं सार्वजनीनञ्च भवति। ननु एतत्तु सत्यमेव न केनचिदपि अवरोधकेन साहित्यस्य व्यपकतामवरोद्धुमलम्। तथाहि खलु मिल्टन्-कीटस्-शेक्सपीयरप्रभृतीनां रचनां पाठं पाठं कालिदासवंशोद्भूताः वयमपि विस्मयविमुढाः भवामः। अतएव विकाशदृष्ट्या विषयोऽयं संस्कृतक्षेत्रे भूषणस्वरूपो न तु दूषकः इति शम्।

---

[12] Shoyuki, English translation in Ivan morris, The world of the shining prince, Alfred A, Knopf, New York,1964, p- 60.

परिशीलिता ग्रन्थानुक्रमणी

आचार्यः, सीतानाथः, *भावविलसितम्*, कोलकाता : संस्कृतपुस्तकभाण्डारम्, १९९८ ।

गङ्गादासः, *छन्दोमञ्जरी*. सम्पा. गुरुनाथविद्यानिधिभट्टाचार्यः. कोलकाता : संस्कृतपुस्तकभाण्डारम्, १३९० (वङ्गाब्दः)।

घोषः, दीपकः, *विलापपञ्चिका*, कोलकाता : संस्कृतपुस्तकभाण्डारम्, १९८९ ।

त्रिपाठी, राधावल्लभः, *आयतिः* (समकालिकसंस्कृतकाव्यानां संग्रहः), नवदेहली : राष्ट्रियसंस्कृतसंस्थानम्, २०११।

माधवः, हर्षदेवः, *ऋषेः क्षुब्धे चेतसि*, श्रीवाणी-अकाडेमि, गांधीनगरम्, २००४।

मेहेरः, हरेकृष्णः, *तपस्विनी*, परिमल-पाब्लिकेशन्, दिल्ली, २०१२।

शुक्लः, रमाकान्तः, *अर्वाचीनसंस्कृतसाहित्यपरिचयः*, नवदेहली : देववाणीपरिषद्, १९९१।

भट्टाचार्यः, वीरेन्द्रकुमारः, *कलापिका*, संस्कृतपुस्तकभाण्डारः, कोलकाता, १९६९।

सेनः, शुभ्रजित् , *भारतवर्षे आधुनिकसंस्कृतसाहित्यम्* : विहङ्गमदृष्ट्या परिशीलनम्, संस्कृतपुस्तकभाण्डारः, २०१९।

https://www.sejongculturalsociety.org/writing/current/resources/sijo_samples.php, view - 29/12/19, 11am.

https://www.masterpiece-of-japanese-culture.com/literatures-and-poems/japanese-tanka-poetry-famous-poems, view - 29/12/19, 11am.

काव्यदोषान्वेषणे विद्यानाथपूर्ववर्तिराद्धान्तैः समं विद्यानाथमतस्य तुलनात्मकम् अध्ययनम्

सुमनब्यानार्जी[1]

काव्यरसास्वादनसमये यदि सहृदयहृदये कोऽपि उद्वेगो जायेत तर्हि रसास्वादने विलम्बः भवतीति कृत्वा सहृदयानां सम्यक्तया रसास्वादनं न भवति। अयमेव हि दोष इति सामान्यतया शक्यवचम्। संस्कृतालंकारशास्त्रस्य सूक्ष्मेक्षिकया पर्यालोचनया वक्तुमलं यत् दोषनिराकरणे आलंकारिकाः सदैव कृतप्रयत्नाः। दण्ड्याचार्यः काव्ये स्वल्पदोषसद्भावमपि न स्वीकर्त्तुमियेष[2]। भोजराजो दुष्टकाव्यकारणात् कुकवित्वस्य निन्दां प्रदर्श्य तत्साक्षान्मृत्युं जगाद[3]। कवीनां काव्यप्रणयनावसरे सर्वादौ दोषहानं विधेयमिति भोजराजस्य युक्तिः[4]। एवं दोषरहितकाव्यान्न केवलं सहृदयहृदये ह्लादो जायते, अपि च काव्यकर्त्तुः कृतयः प्रीतयश्च वर्धन्ते[5]।

दोषाणां हेयत्वविषये वृद्धविपश्चितां यादृशस्तर्को दृश्यते, न तथा स्वरूपविषये। दोषाणां सामान्यलक्षणं पण्डिता न स्वीचक्रुः। अग्निपुराणकारैः दोषाणामुद्वेगजनकत्वं स्वीकृतमपि स्पष्टतया वामनाचार्यः सर्वादौ गुणवैपरीत्यं दोषत्वेनाभिहितवान् इति[6]।

दोषलक्षणे ध्वनिवाद्याचार्याणां तथा चास्य विद्यानाथस्य विचारः -

चिरन्तनकाव्यतत्त्वविपश्चितां दोषलक्षणमिदं परवर्त्तिनि समये ध्वनिमार्गिभिराचार्यैः सम्पूर्णतया खण्डितं तथा उपस्थापितमभिनवं दोषलक्षणम्। तैस्तैराचार्यपादैः काव्यात्मभूतं रसमेव सम्मुखीकृत्य दोषसंज्ञा विहिता । तेषां मते, यदि मुख्यस्य रसस्य केनचित् प्रकारेणापकर्षो जायते, तर्हि तद्दोषाय भवतीति।

विद्यानाथात् पूर्ववर्ती आचार्यस्तथा ध्वनितत्त्वस्य प्रवक्ता आनन्दवर्धनः सर्वादौ स्पष्टतया रसस्योत्कर्षत्वम् अपकर्षत्वञ्चादाय दोषलक्षणञ्चकार तथा दोषस्य नित्यत्वमनित्यत्वञ्चेति विहितवान्। आचार्यपादोऽयं रसदोषं पृथग्भावेन विश्लिष्य अनौचित्यमेव रसविभङ्गकारणत्वेन स्पष्टं निर्दिश्य

---

[1] शोधच्छात्रः, संस्कृतविभागः, कलिकाताविश्वविद्यालयः, पश्चिमवङ्गः।

[2] ''तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन।
स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम्।।'' (*काव्यादर्शः* – १/७)

[3] ''कुकवित्वं पुनः साक्षान्मृतिमाहुर्मनीषिणः।।'' (*शृङ्गारप्रकाशः* – ९/१)

[4] ''तेषाञ्च प्रथमं दोषहानमेव विधेयम्'' (तत्रैव, २)

[5] ''निर्दोषं गुणवत्काव्यमलंकारैरलंकृतम्।
रसान्वितं कविः कुर्वन् कीर्त्तिं प्रीतिञ्च विन्दति।।'' (*सरस्वतीकण्ठाभरणम्* - १/२)

[6] ''गुणविपर्ययात्मनो दोषः'' (*काव्यालंकारसूत्रवृत्तिः* – २/१/१)

रसपुष्ट्यनुकूलौचित्य-विधिग्रहणार्थे निर्दिष्टवान्[7]। आनन्दवर्धनस्योत्तरकालीनाः प्रायेण सर्वे प्राचार्या ध्वनितत्त्वस्य वाख्यातुरस्याचार्यस्य सिद्धान्तमिममङ्गीकृत्य आचार्येण प्रदर्शितं पन्थानमेवाश्रितवन्त इति।

आनन्दवर्धनोत्तरकालीनो ध्वनिप्रस्थानस्य परमाचार्यो मम्मटस्तस्य साहित्यशास्त्रविषयके काव्यप्रकाशाख्ये ग्रन्थे मुख्यरसस्यापकर्षसाधकं दोषञ्चचक्षे। तन्मते मुख्यरसस्याश्रयो वाच्यः इति कृत्वा वाच्यार्थोऽपि मुख्यः। अस्य वाच्यार्थरूपस्य मुख्यार्थस्यापकर्षकारक एव दोषपदवाच्यः। मुख्यभूतरसस्य वाच्यार्थस्य च बोधजनने उपकारका नाम सहायका भवन्ति ये शब्दवर्णादयः[8] तेष्वपि दोषः इति मम्मटाचार्यः।

मम्मटोत्तरकालीन आलंकारिकः हेमचन्द्रोऽपि रसापकर्षकारणं दोषं[9] जगाद। दोषाणां रसाश्रयत्वमेव। न तावच्छब्दार्थयोः। उपचारवशाद्रसस्योपकारकाणां शब्दादीनां दोषा उच्यन्ते। यदि दोषाः शब्दार्थयोरेव धर्माः स्युस्तर्हि बीभत्सादिरसेषु कष्टत्वादिगुणा न भवेयुः, तथा हास्यादिरसेषु अश्लीलत्वादयो गुणा न भवेयुरिति। अतो दोषाः रसाश्रया[10] इति हेमचन्द्रपादस्य सिद्धान्तविशेषः।

त्रयोदशशतकीयः पीयूषवर्षो जयदेवो दोषप्रसङ्गे चन्द्रालोके द्वितीयमयूखे आलोचितवान् यत् यौ शब्दार्थौ सहृदयहृदयं प्रविश्यैव काव्यस्य रमणीयतां विनश्यतः, स एव दोषः[11]।

चतुर्दशशतकस्य प्रख्यातो ध्वनिमार्गस्यालंकारिको विद्यानाथस्तत्पूर्ववर्त्तिनां ध्वनितत्त्वानुसारिणामालंकारिकाणां प्रभावैः परिपुष्ट इत्यनुभूयते। आचार्यपादः साक्षाद्भावेन दोषलक्षणे रसस्य प्रसङ्गं नोल्लिख्य प्रकारान्तरेण दोषलक्षणञ्चकार। पण्डितप्रवरस्य मते काव्यस्य अपकर्षहेतुरेव[12] दोषपदवाच्यः। स तु शब्दार्थगोचरः। काव्यस्य शब्दार्थमयत्वाद् दोषस्य शब्दार्थगतत्वम् इत्याशयः[13]। सामान्यतया शास्त्रकारो मनुते – शब्दार्थमाध्यमेनैव काव्य-शरीरं निर्मितं भवति। किन्तु शब्दार्थाविमौ यदि दोषाक्रान्तौ भवतस्तर्हि सम्पूर्णकाव्यं दोषमयं भवेत्। यतो दुष्टशब्दार्थौ यथार्थरसोद्रेकस्य परिपन्थिनाविति।

---

7 ''अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम्।
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत् परा।।'' (*ध्वन्यालोकः*, तृतीय उद्द्योतः, पृ. ११३)

8 ''मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयाद्वाच्यः।
उभयोपयोगिनः स्युः शब्दाद्यास्तेन तेष्वपि सः।।'' (*काव्यप्रकाशः*, ७/७१ सूत्रम्)

9 '' रसस्योत्कर्षापकर्षहेतू गुणदोषौ'' (काव्यानुशासनम्, १/१२)

10 ''रसो वक्ष्यमाणस्वरूपस्तस्य....अपकर्षहेतवस्तु दोषाः। ....रसाश्रयत्वं च गुणदोषयोः.....। .... रसविशेषे च दोषा न तु शब्दार्थयोः। यदि हि तयोः स्युस्तर्हि बीभत्सादौ कष्टत्वादयो गुणा न भवेयुर्हास्यादौ चाश्लीलत्वादयः। .... गुणदोषयो रस एवाश्रयः।'' (*काव्यानुशासनम्*, १/१२ वृत्तिः)

11 ''स्याच्चेतो विशता येन सक्षता रमणीयता।
शब्देऽर्थे च कृतोन्मेषं दोषमुद्घोषयन्ति तम्।।'' (*चन्द्रालोकः*, २/१)

12 ''दोषः काव्यापकर्षकस्य हेतुः'' (*प्रतापरुद्रयशोभूषणम्*, ५/१)

13 ''शब्दार्थमयत्वात् काव्यस्य तदपकर्षहेतूनामपि दोषाणां शब्दगतत्वेऽर्थगतत्वे ....। (तत्रैव, ५/१ वृत्त्यंशः)

काव्यदोषान्वेषणे विद्यानाथपूर्ववर्तिराद्धान्तैः समं विद्यानाथमतस्य तुलनात्मकम् अध्ययनम्

दोषाणां वर्गीकरणम् -

काव्यदोषाणां वर्गीकरणे विद्यानाथात् पूर्ववर्त्ति-ध्वनिप्रास्थानिकानाम् आलंकारिकाणां सुमहान् यत्नो दृश्यते। आनन्दवर्धनः श्रुतिकट्वादिशब्दार्थदोषं विविच्य रसदोषं पञ्चविधम् इति प्रदर्शितवान्।

दोषस्य वर्गीकरणे ध्वनिमार्ग्यालंकारिकाणां मध्ये सर्वादौ मम्मटाचार्यस्य परिशीलिता समीक्षा परिलक्ष्यते। अनुल्लिखितरससंख्यः स आचार्यः पदपदांशवाक्यार्थरसभेदेन दोषं वर्गपञ्चके विभाजितवान्। दोषस्य वर्गीकरणे मम्मटपरवर्त्ती हेमचन्द्रः प्रायशो मम्मटानुसारी। सः पदांशदोषं नोल्लिख्य 'उभयदोषं' गृहीत्वा दोषं पञ्चवर्गात्मकमिति प्रदर्शितवान्। तन्मते रसदोषः अष्टविधः, पददोषः द्विविधः, वाक्यदोषस्त्रयोदश, उभयदोषोऽष्टविधः, अर्थदोषो विंशतिरिति तेन प्रोक्तं, तथालोचितञ्च।

पीयूषवर्यजयदेवस्य मतं विश्लिष्य दृश्यते च्यूतसंस्कृत्यादिनित्यत्वं, तथा श्रुतिकटुताद्यनित्यत्वं चेति द्विविधो दोषः तेन स्वीकृतः।

एकावल्या रचयिता विद्याधरः अविमृष्टविधेयांश-प्रक्रमभेदावाच्यवचन-वाच्यवचन-पौनरुक्त्यभेदेन दोषस्य पञ्चविधत्वं स्वीचकार।

आलंकारिको विद्यानाथस्तु प्राक्तनध्वनितात्त्विकानामालंकारिकाणां पन्थानम् अनुसृत्य काव्यदोषं सुस्पष्टतया विभाजितवान्। तत्रभवान् आदौ दोषः शब्दगतः, अर्थगतश्च इति विभज्य शब्दगतदोषस्य पदवाक्यगतत्वेन द्वैविध्यम् अग्रहीत्। अतो विद्यानाथेन स्वीकृतो दोषः खलु त्रिविधः[14]। तन्मते पददोषः 'सप्तदशप्रकारकः', वाक्यदोषः 'चतुर्विंशतिप्रकारकः, अर्थदोषश्च अष्टादशप्रकारकः' सम्भवति। विद्यानाथेन स्वीकृताः सप्तदश पददोषाः –

"अप्रयुक्त[15]मपुष्टार्थ[16]मसमर्थं[17] निरर्थकम्[18]।
नेयार्थं[19] च्युतसंस्कारं[20] सन्दिग्धं[21] चाप्रयोजकम्[22]।।

[14] दोषाणां शब्दगतत्वेनार्थगतत्वेन द्वैविध्यम्। शब्दगतानामपि पदवाक्यगतत्वेन च द्वैविध्यम्। (*प्रतापरुद्रयशोभूषणम्*, दोषप्रकरणम्)

[15] आम्नातमपि कविभिर्नादृतं त्वप्रयुक्तम्।।

[16] प्रकृतानुपयुक्तार्थमपुष्टार्थं तदुच्यते।।

[17] योगमात्रप्रसिद्धं यदसमर्थं तदुच्यते।।

[18] पादपूरणमात्रं यत्तन्निरर्थकमुच्यते।

[19] स्वसंकेतप्रसिद्धार्थं नेयार्थं परिकीर्त्यते।

[20] शाब्दशास्त्रविरुद्धं यच्च्युतसंस्कारमुच्यते।

[21] सन्दिग्धं तन्मतं यत् स्यात् सन्दिग्धार्थप्रतीतिकृत्।

[22] तदप्रयोजकं यत् स्यादविशेषविधायकम्।

क्लिष्टं[23] गूढार्थकं[24] ग्राम्य[25]मन्यार्थं[26] चाप्रतीतिकम्[27]।
अविमृष्टविधेयांश[28]विरुद्धमतिकृत्त[29]था।।
अश्लीलं[30] परुषं[31] दुष्टं पदं सप्तदशाङ्कितम्।"

तस्य वाक्यदोषाः –

"शब्दहीनं[32] क्रमभ्रष्टं[33] विसन्धि[34] पुनरुक्तिमत्[35]।
व्याकीर्णं[36] वाक्यसंकीर्ण[37]मपूर्णं[38] वाक्यगर्भितम्[39]।।
द्वे भिन्नलिङ्गवचने[40] द्वे च न्यूनाधिकोपमे[41]।
भग्नच्छन्दो[42] यतिभ्रष्ट[43]मशरीर[44]मरीतिकम्[45]।।

---

[23] क्लिष्टं तदर्थावगतिर्दूरदूरा यतो भवेत्।

[24] प्रयुक्तमप्रसिद्धार्थे गूढार्थं परिकीर्त्यते।।

[25] पामरव्यवहारैकप्रसिद्धं ग्राम्यमुच्यते।

[26] यद्रूढिप्रच्युतं नाम तदन्यार्थमुदाहृतम्।।

[27] शास्त्रमात्रप्रसिद्धं यदप्रतीतिकमुच्यते।।

[28] अविमृष्टविधेयांशं गुणीभूतविधेयकम्।

[29] विपरीतार्थधीर्यस्माद्विरुद्धमतिकृन्मतम्।

[30] अश्लीलं यदमाङ्गल्य-जुगुप्सा-व्रीडधीकरम्।।

[31] परुषं नाम तद्यत् स्याद्विहितं परुषाक्षरैः।

[32] शब्दशास्त्रहतं वाक्यं शब्दहीनं प्रकीर्त्यते।

[33] क्रमभ्रष्टं भवेदर्थः शाब्दो वा यत्र न क्रमः।

[34] विसंहतो विरूपो वा यस्य सन्धिर्विसन्धि तत्।।

[35] शब्दार्थपौनरुक्त्ये तु तद्वाक्यं पुनरुक्तिमत्।

[36] व्याकीर्णं तद्विभक्तीनां च मिथोऽन्वये

[37] वाक्यान्तरपदैः कीर्णं वाक्यसंकीर्णमुच्यते।

[38] अपूर्णं तद् भवेद्यत्र न संपूर्णः क्रियान्वयः।

[39] तद्वाक्यगर्भितं यस्य मध्ये वाक्यान्तरं भवेत्।

[40] यत्रोपमा भवेद्भिन्नं वचना भिन्नलिङ्गका।
तद्भिन्नवचनं भिन्नलिङ्गं चाहुर्मनीषिणः।।

[41] यत्रोपमानमधिकं न्यूनं वा स्याद्विशेषणैः।
तत्राधिकोपमं पूर्वं न्यूनोपमा मता परम्।।

[42] छन्दोभग्नवचो यत्र तद्भग्नच्छन्द उच्यते।

काव्यदोषान्वेषणे विद्यानाथपूर्ववर्तिराद्धान्तैः समं विद्यानाथमतस्य तुलनात्मकम् अध्ययनम्

विसर्गलुप्त[46]मस्थानसमासं[47] वाच्यवर्जितम्[48]।
पतत्प्रकर्ष[49]मधिकपदं[50] प्रक्रमभग्न[51]वत्।
समाप्तपुनरात्तं[52] च तथा सम्बन्धवर्जितम्[53]।।
चतुर्विंशतिर्वा प्रोक्तं दुष्टं वाक्यं युधीगणैः।।''

विद्यानाथसम्मता अर्थदोषास्तावत् –

''अपार्थं[54] व्यर्थ[55]मेकार्थं[56] ससंशय[57]मपक्रमम्[58]।
भिन्नं[59] चैवातिमात्रं[60] च परुषं[61] विरसं[62] तथा।।
हीना[63]धीकोपमे[64] स्यातामसदृक्षोपमं[65] तथा।
असिद्धोपमं[66] हेतुशून्यं[67] च निरलंकृति[68]।।

---

43 यत्र स्थाने यतिभ्रंशस्तद् यतिभ्रष्टमुच्यते।।

44 क्रियापदेन रहितमशरीरं प्रकीर्त्यते।

45 रसानुगुणा रीतिर्यत्रारीति तदुच्यते

46 ओत्वं लोपो विसर्गस्यासकृल्लुप्तविसर्गकम्।

47 अपदस्थसमासं तत् समासो यत्र नोचितः।

48 नोक्तं स्याद् यत्र वक्तव्यं तदाहुर्वाच्यवर्जितम्

49 पतत्प्रकर्षं तत् प्राहुः प्रकर्षो यत्र विश्लथः।।

50 यत्राधिकपदोक्तिः स्यात् तत्राधिकपदं मतम्।।

51 प्रक्रान्तनियमत्यागे भग्नप्रक्रममुच्यते।

52 समाप्य पुनरादाने समाप्तपुनरात्तकम्।

53 सम्बन्धवर्जितं तत् स्याद् यत्रेष्टेनान्वयो हतः।

54 समुदायार्थशून्यं यदपार्थं तत् प्रकीर्त्यते।

55 यत् प्रयोजनशून्यं स्यात्तद् व्यर्थं परिकीर्त्यते।

56 उक्ताभिन्नार्थकं यत् स्यादेकार्थं तन्निगद्यते।

57 वाक्यार्थसंशयो यत्र तत् ससंशयमिष्यते।

58 यत्र पूर्वापरीभावविहतिस्तदपक्रमम्

59 सम्बन्धवर्जितं यत् स्यात् तद्भिन्नं परिकीर्त्यते

60 यत् सर्वलोकातीतं तदतिमात्रं प्रकीर्त्यते

61 अतिक्रूरार्थसहितं परुषं परिकीर्त्यते

62 अप्रस्तुतरसं यत् तद्विरसं परिकीर्त्यते

63 हीनं यत्रोपमानं स्यात् तद्धि हीनोपमं मतम्

अश्लीलञ्च[69] विरुद्धञ्च[70] तथा सहचरच्युतम्[71]।
एवमष्टादश प्रोक्ता अर्था दुष्टा मनीषिभिः।।''

गवेषणापत्रेऽस्मिन् विद्यानाथात् पूर्ववर्त्तिभिर्ध्वनिमार्गिभिरालंकारिकैः सह दोष-तत्त्वविषये विद्यानाथस्य तुलनात्मकम् अध्ययनं कर्तुं प्रायत। यदि विद्यानाथात् पूर्वजानां ध्वनितत्त्वानुसारिणां काव्यतत्त्वविदां काव्यदोषविषयकमभिमतं पर्यालोच्य विद्वत्प्रवरस्य विद्यानाथस्य काव्यदोषतत्त्वव्याख्यानाशयः अवगम्यते तर्हि पूर्वाचार्याणां प्रतिबिम्बनं तस्य दोषतत्त्वे संदृश्यते। आचार्यपादेन विहितं काव्यदोषलक्षणं मम्मटाचार्यस्य - ''मुख्यार्थहतिर्दोषो....'' इति उद्धृत्या प्रभावितमेवेति मन्यते। विद्यानाथपादः 'मुख्यार्थहतिः' इति नोक्त्वा – 'काव्यापकर्षस्य हेतुः' इति जगाद।

काव्यं रसमयमिति कृत्वा काव्येषु रसोऽवश्यमेवास्वादनीयः। अतः काव्यं तदैवापकर्षयुक्तं भवेद्यदा रसस्यापकर्षो भविष्यति। अतो रसापकर्षद्वारा काव्यापकर्षकस्य हेतुरेव दोषः इति विद्यानाथस्य मतिः । अयमेव दोषः शब्दार्थगोचरः। रसवत्काव्यशरीरस्यापि शब्दार्थमयत्वं स्वीकृतम् । काणत्वादि यथा शरीरस्य शोभाया विघातकं सदात्मन उत्कर्षताया हानिं साधयति तथा शब्दार्थमये काव्यशरीरे दुष्टशब्दार्थत्वाच्छरीरं दुर्भगं नितान्तमेव भवति, तथा ये शब्दादिधर्माः आत्मभूतस्य रसस्य परिपोषका सहायका वा वर्तन्ते, ते दुष्टत्वात् सम्यक्तया रसोद्रेकेऽक्षमा भविष्यन्ति। अतो दुष्टशब्दार्थद्वारेण रसापकर्षकत्वे काव्यापकर्षकत्वमिति विद्यानाथस्य विचारः। अयं विचारो मम्मटानुवर्तीति मन्मतम्।

विद्यानाथविहितस्य दोषवर्गीकरणस्य पद्धतिरपि पूर्वाचार्यविचारानुरूपेति मन्यते। विद्यानाथस्य पूर्वजः आनन्दवर्धनाचार्यो रसं पुरस्कृत्य दोषतत्त्वावक्षणे कृतप्रचेष्टोऽपि सम्यक्तया दोषस्य वर्गीकरणं न विहितवान्। अत्र दोषस्य वर्गीकरणे मम्मटाचार्यस्य महान् यत्नः परिलक्ष्यते। अस्यैवाचार्यस्य विचारधारामवलम्ब्य परवर्त्तिनि समये विद्यानाथो दोषकक्षादि-वर्णनमुपस्थापयामास। किन्तु स मम्मटविहितं दोषवर्गपञ्चकं न स्वीकृत्य वर्गत्रिकमालोचितवान्। पदांशदोषस्य सद्भावप्रसङ्गे विद्यानाथो तुष्णीं स्थितोऽपि दोषप्रकरणान्ते रसभावादीनां स्वशब्दवाच्यत्वमेव दोषायेति[72] ससंक्षेपमवदत्।

---

64 यत्रोपमानमधिकं तद् भवेदधिकोपमम्

65 यदतुल्योपमानं तद् भवेदसदृशोपमम्।

66 अप्रसिद्धोपमानं यदप्रसिद्धोपमं मतम्।

67 हेतोर्विनार्थकथनं हेतुशून्यं प्रचक्षते

68 अलंकारेण रहितं निरलंकारमुच्यते।।

69 अश्लीलार्थस्य कथनमश्लीलं परिकीर्त्यते

70 विरुद्धं देशकालादिविरुद्धं बहुधोच्यते।

71 मतं सहचरभ्रष्टमतुल्यानां निबन्धने।

72 रसभावादीनां स्वशब्दवाच्यता दुष्टैव।। (*प्रतापरुद्रयशोभूषणम्*, दोषप्रकरणम्)

काव्यदोषान्वेषणे विद्यानाथपूर्ववर्तिराद्धान्तैः समं विद्यानाथमतस्य तुलनात्मकम् अध्ययनम्

परिशेषे विद्यानाथस्य यत्काव्यदोषतत्त्वविमर्शः सुनिश्चिततया तस्य पूर्वजाणां ध्वनितत्त्वमार्गिणां विशेषतया मम्मटाचार्यस्याशयैः समृद्ध इत्यनुभूयते। क्वचिन्मम्मटस्य चिन्तनं भिन्नरीत्या विद्यानाथेनोपस्थापितम्, कुत्रापि साक्षाद्भावेन मम्मटविचार उपस्थापितोऽभिन्नतया। यथा तस्य – **'दुष्टं पदम्'** इति विचारो विद्यानाथेन आयत्तीकृतः। अतः 'पदादिदोषं विद्यानाथो दोषत्वेन वर्णितुकामः। अर्थान्न **अप्रयुक्तत्वं दोषः**, अपि तु अप्रयुक्तं दुष्टपदमिति वक्तुमलम्। विद्यानाथस्य दोषश्रेणीविभाजनेऽपि मम्मटाचार्यस्य प्रभावः सुस्पष्टतया संलक्ष्यते। नास्मिन् विषये किमपि वैमत्यं विद्यते।

अन्ततोगत्वा सिद्धान्तयितुं शक्यते यत् आचार्यस्य विद्यानाथस्य दोषतत्त्वविवेको नितान्तमेव प्राक्तनध्वनिमार्ग्याचार्याणाञ्चिन्तनैः पुष्टः। तत्र च मम्मटपक्षो विशेषतया समर्थितः। परन्तु एकोऽपि विषयस्तत्रानुधावनीयो यदध्वनिवादिनां पूर्वजानामपि प्रभावः सन्दृश्यते विद्यानाथस्य विचारे। **''दुष्टं पदम्''** इति विचारो न केवलं मम्मटस्य अपि तु वामनाचार्यस्य ग्रन्थे चोपलभ्यते [73]। तथा च भावप्रत्ययविहीनभावात्केवलं नपुंसकलिङ्गेन दोषनामविनिर्देश इति रीतिरियं 'वामन-भोज-मम्मटादीनां परम्पराक्रमेण विद्यानाथविचारेऽपि समागता। विद्यानाथस्य दोषकक्षविभाजनेऽपि भोजराजस्य प्रभावो दृश्यते। भोजदेवसम्मतः काव्यदोषोऽपि **'पदवाक्यार्थभेदेन'**[74] त्रिप्रकारक इति। मन्यामहे पदांशगत-दोषस्य पदेष्वन्तर्भाव इति भोजाशयात् प्रभावितो विद्यानाथोऽपि तद्दोषं न स्वीचकार। अपरतो विद्यानाथस्यार्थदोषतालिका भोजदेवकृतां वाक्यार्थदोषतालिकाम् एवानुकरोति। दोषविशेषाणामेषां लक्षणान्यपि भोजदेवकृतलक्षणानुसारीणि[75] प्रायेण।

अत्रेदमुल्लेख्यं यत् रसस्य काव्यात्मत्वं विनिर्दिश्यैव काव्यशास्त्रे विद्यानाथस्य अग्रगतिर्लक्षणीया। अतः ग्रन्थान्ते **'रसभावादीनां स्वशब्दवाचिता दुष्टैव'** इति संक्षेपेण नोल्लिख्य आनन्दवर्धनमम्मटादिवद्रसदोषस्य विमर्शनं विहितमिति मामकीनं मतम्।

निर्वाचितग्रन्थपञ्जी

आनन्दवर्धनः. *ध्वन्यालोकः* (लोचनटीकया बङ्गानुवादेन च सहितः). अनुवादकः विमलाकान्तमुखोपाध्यायः. सम्पादकः अशोककुमारबन्द्योपाध्यायः. कलिकाता : संस्कृत-पुस्तक-भाण्डारः,२००८.

---

[73] दुष्टं पदमसाधु....... (*काव्यालंकारसूत्राणि* – २/१/४)

[74] दोषः पदानां वाक्यानां वाक्यार्थानां च (*सरस्वतीकण्ठाभरणम्* – १/३)

[75] यथा – विद्यानाथस्य 'निरलंकृति'लक्षणम् – अलंकारेण रहितं निरलंकारमुच्यते।
भोजः – यदलंकारहीनं तन्निरलंकारमुच्यते। इत्यादयः।

जयदेवः. *चन्द्रालोकः* (राकागमटीकासहितः). सम्पादकः अनन्तरामशास्त्रिवेतालः वनारसः : चौखम्बा संस्कृत सीरीज आफिस, १९९५.

दण्डी. *काव्यादर्शः* (मालिन्यप्रोञ्छनीटीकया बङ्गानुवादेन च सहितः). सम्पादिका चिन्मयीचट्टोपाध्यायः. कलिकाता : पश्चिमबङ्ग राज्य पुस्तक पर्षत्, १९९५.

भोजराजः. *सरस्वतीकण्ठाभरणम्* (रत्नेश्वरस्वामिकृतरत्नदर्पणव्याख्यया हिन्दीभाषानुवादेन च समेतम्). व्याख्याकारः कामेश्वरनाथमिश्रः. वाराणसी : चौखम्बा पाब्लिशर्स, २००६ (द्वितीयसंस्करणम्)।

मम्मटः. *काव्यप्रकाशः* (बालबोधिनीटीकासमेतः). टीकाकारः भट्टवामनाचार्यः. दिल्ली : चौखम्बा सुरभारती प्रकाशनम्, २०१३ (प्रथमसंस्करणम्)।

वामनः. *काव्यालंकारसूत्राणि* (कामधेनुटीकया हिन्दीभाषानुवादेन च सहितानि). सम्पादकः हरगोविन्दशास्त्री. वाराणसी : चौखम्बा सुरभारती प्रकाशन, २०१३.

विद्यानाथः. *प्रतापरुद्रीयम्* (रत्नापणटीकया बालक्रीडाख्यहिन्दीव्याख्यया च सहितम्). व्याख्याकारः मधुसूदनशास्त्री. वाराणसी : चौखम्बा कृष्णदास अकादमी, २००३ (द्वितीयसंस्करणम्)।

हेमचन्द्रः. *काव्यानुशासनम्*. व्याख्याता रामानन्दशर्मा. वाराणसी : कृष्णदास अकादमी २००० (प्रथमसंस्करणम्)।

मीमांसकोद्धृतनञर्थघटितश्रुतिस्मृतिवाक्ययोर्नञर्थपर्यालोचनायां रघुनाथशिरोमणेः स्वातन्त्र्यम्

शङ्करमण्डलः[1]

वैदिकवाक्यार्थविचारार्थमेव परमकारुणिको जैमिनिः "अथातो धर्मजिज्ञासा" इत्यारभ्य "अन्वाहार्ये च दर्शनात्" इत्यन्तं यावत् धर्मविचारशास्त्रं नाम मीमांसादर्शनं प्रणिनाय। स्मृतेरपि वेदमूलत्वात् क्वचित्स्मृतिवाक्यानामप्यर्थविचारोऽस्य प्रतिपाद्यविषयत्वं भजते। तत्र मीमांसादर्शननिकाये यावन्ति नञर्थघटितश्रुतिस्मृतिवाक्यानि विचारितानि तत्र नञर्थस्य यादृश्यालोचना विहिता तत्र सर्वेषामेव शास्त्रकाराणां साम्मत्यमस्तीति न मुक्तकण्ठमुद्घोषयितुं शक्यम्। आबहोः कालात् प्रचलिते नञर्थविचारचर्चाचक्रे रघुनाथशिरोमणिविरचितो नञ्वादः अपि मिलितः। दृश्यते हि तत्र केषुचन श्रुतिस्मृतिवाक्येषु नञर्थविचारसत्रे नञ्वादकारस्य भिन्नं मतं नूतना च युक्तिः। तेषां च मतानां तासां च युक्तीनामेवाधस्तात् श्रौतस्मार्तवाक्यद्वयार्थपर्यालोचनया उपस्थापनंक्रियते, किञ्च कियदस्ति तेषां ग्राह्यत्वमिति सयुक्ति प्रतिपाद्यते। तथाहि -

यजतिषु ये यजामहं करोति नाननुयाजेषु इति वाक्यार्थविचारः

यजतिषु सर्वेषु अपि यागेषु याज्यातः पूर्वं होत्रा "ये यजामहे" इति पठनीयोऽनुयाजवर्जम्। अत्र यजतिशब्दो यागवाचकः। सप्तम्यर्थस्य यागपदार्थेन सह अन्वये यागेषु इत्यर्थो लभ्यते। प्रसङ्गतश्च यजतिचोदनाचोदितेषु यागेषु इत्यर्थो लभ्यते। ये यजामहं करोति इत्यत्र याज्यातः पूर्वम् अयमंशः पठनीय इति बोध्यः। एवं च याज्यातः पूर्वं ये यजामह इति पठित्वा ततो देवतावाचकं पदं द्वितीयान्तमुक्त्वा ततो याज्यापाठः। तदन्ते च वषट्कारप्रयोगः। यथा आग्नेययागे अध्वर्युणा प्रधानानुष्ठानाय याज्यापाठार्थं "अग्निं यज" इति प्रैषे दत्ते अनन्तरं होता "ये यजामहेऽग्निं भुवो यज्ञस्य रजसश्च हव्यवाहॅा वौषट्" इति पठेत्। ततो अध्वर्युः जुह्वादौ स्थितं हविः पुरोडाशमाहवनीये प्रक्षिपेत्।

इदानीं नानुयाजेषु इत्यत्र नञर्थः पर्युदासः प्रसज्यो वेति विचार्यः। नञर्थस्य प्रसज्यत्वे भावनायामेवान्वयो भवति, तदा तु पूर्वस्मात् "ये यजामहं करोति" इत्यनुवर्तनीयः, तेन तस्य वाक्यस्य निषेधवाक्यत्वमेव पर्यवस्यति। तथाहि अनुयाजेषु ये यजामहं न कुर्यादिति बोधः। ननु प्राप्तस्यैव निषेधः इति न्यायात् निषेधः प्राप्तिपूर्वक एव भवति। अनुयाजेषु यदि ये यजामहकरणस्य प्राप्तिः कथमपि स्यात्तदैव तस्य निषेधः संगच्छते। न हि तस्य प्राप्तिः रागतो भवति। अत एव शास्त्रमेव तत्प्राप्तौ निदानम्। तद्धि शास्त्रं यजतिषु ये यजामहं करोति इति अनन्यगत्या स्वीकार्यम्। तेन तु अनुयाजेषु अनुयाजभिन्नेषु च सर्वेषु

---

1 गवेषकः (Ph.D.), संस्कृतविभागः, रामकृष्णमिशन्-विद्यामन्दिरम्, हावड़ा, पश्चिमवङ्गः।

यागेषु शास्त्रत एव ये यजामहकरणं विधीयते। इदानीं "नानुयाजेषु ये यजामहं करोति" इति शास्त्रमागत्य अनुयाजेषु ये यजामहकरणस्य निषेधं करोति। एवं च अनुयाजेषु शास्त्रतः प्राप्तस्यैव ये यजामहकरणस्य शास्त्रेणैव निषेधे कृते "शास्त्रप्राप्तस्य च प्रतिषेधे विकल्प एव न तु बाधः"[2] इति न्यायादनुयाजेषु ये यजामहकरणाकरणयोः विकल्पापत्तिः। ननु आहवनीये जुहोति इति सामान्यशास्त्रस्य पदे जुहोति इति विशेषशास्त्रेण यथा बाधः क्रियते तथैवात्रापि यजतिषु ये यजामहं करोति इत्यस्य अनुयाजेषु बाध एवाङ्गीक्रियतामिति चेन्न –"परस्परनिरपेक्षयोरेव शास्त्रयोर्बाध्यबाधकभावः पदशास्त्रस्य हि स्वार्थविधानामाहवनीयशास्त्रानपेक्षणात् निरपेक्षत्वम्। प्रकृते तु निषेधशास्त्रस्य निषेध्यप्रसक्त्यर्थं यजतिषु ये यजामहमित्यस्यापेक्षणान्न निरपेक्षत्वम्"[3] इति। अत एवात्र विकल्प एव न तु बाधः। विकल्पे अष्टौ दोषा भवन्ति। उक्तं च मीमांसापरिभाषायां-

"प्रमाणत्वाप्रमाणत्वपरित्यागप्रकल्पना।
तदुज्जीवनहानाभ्यां विकल्पे चाष्टदोषता"[4]।। इति।

एवं चाष्टदोषदुष्टविकल्पभियात्र प्रसज्यपक्षस्त्याज्यः। नञश्च नामसम्बन्धमङ्गीकृत्य पर्युदासाश्रयणे तु अनुयाजव्यतिरिक्तेषु यजतिषु ये यजामह इति मन्त्रं कुर्यादिति वाक्यार्थबोधो भवति। एवं च न विकल्पः।

अत्र दीधितिकारास्तु– एकवाक्यतानुरोधात् ये यजामहम् इत्यादेरनुषङ्गगौरवाच्च "यजतिषु ये यजामहं करोति नानुयाजेषु" इत्यत्र अनुयाजेषु यजतिषु इत्यनयोः समानविभक्तिकत्वात् अभेदान्वयाकांक्षायाः सत्त्वात् नञ्सत्त्वदशायां च नञा अभेदस्यैवाभावो नाम भेदः प्रत्याय्यते, तस्य च भेदवति लक्षणायाम्, अनुयाजभिन्नयजतिषु नाम अनुयाजभिन्नयागेषु ये यजामहइति मन्त्रं कुर्यादिति विध्यर्थबोधो भवति इति वदन्ति।

अत्र प्रसज्यप्रतिषेधे कर्तव्ये तु यजतिषु ये यजामहं करोति नानुयाजेषु इति एकस्यैव वाक्यस्य द्विधा विभागः कर्तव्यः –"यजतिषु ये यजामहं करोति" इत्येकं वाक्यं "नानुयाजेषु" इत्यपरं वाक्यम्। द्वितीयवाक्ये च प्रथमवाक्यात् "ये यजामहं करोति" इत्यस्यानुषङ्गः कर्तव्यः। तथा च प्रसज्यपक्षे द्वौ एव दोषौ – एकवाक्यताहानिः पूर्ववाक्यांशानुषङ्गगौरवञ्च। "यत्तु करणनिषेधे विकल्पापत्तेर्भेदपरतेति तदसत्। विशेषनिषेधे सामान्यविधेस्तदिरपरतायाः व्युत्पत्तिसिद्धत्वात्, विकल्पानवकाशात्"[5] इति दीधितिकाराणामाशयः।

---

[2] *अर्थसंग्रहः* (कामेश्वरनाथमिश्रसम्पादितः, पृ.१७९)

[3] तत्रैव, पृ. १७९

[4] *मीमांसापरिभाषा* (सम्पादकः – नवनारायणवन्द्योपाध्यायः) पादटीका - पृ.८७

[5] *नञ्वादः* (सञ्जितकुमारसाधुखाँ- सम्पादितः, पृ.२)

अत्र यद्यपि नानुयाजेषु इत्यत्र नञः पर्युदासपरत्वं ग्राह्यमित्यत्र दीधितिकार-मीमांसकयोः उभयोरेव सम्मतिरस्ति। तथापि प्रसज्यपक्षानङ्गीकारे यन्निदानं तत्रैव अनयोरस्ति वैमत्यम्। तथाहि – मीमांसकमतेऽत्र विकल्पभिया प्रसज्यः त्याज्यः, रघुनाथमते तु न विकल्पभिया अपि तु एकवाक्यताहानिभिया अनुषङ्गगौरवभिया च। किन्तु विशेषनिषेधे सामान्यविधेस्तदिरपरताया यः दृष्टान्तः दीधितिकृता प्रदत्तः –"ब्राह्मणेभ्यो दधि दातव्यं, कौण्डिन्याय न दातव्यम्" इति, तेन दार्ष्टान्तिकस्य "यजतिषु ये यजामहं करोति नानुयाजेषु" इत्यस्य महद्वैषम्यं वर्तते। तथाहि दृष्टान्तस्थले विधिनिषेधयोः स्वार्थविधानार्थं परस्परमनपेक्षणान्निरपेक्षत्वम्। अत एव कौण्डिन्य-कौण्डिन्येतरब्राह्मणेभ्यश्च सामान्यशास्त्रप्राप्तस्य दानस्य विशेषशास्त्रेण निषेध एव क्रियते। किन्तु यजतिषु इत्यादिस्थले यद्यपि विधेः निरपेक्षत्वं वर्तते तथापि निषेधस्य स्वार्थविधानार्थं विधिशास्त्रस्यापेक्षणान्न निरपेक्षत्वम्। यद्धि स्वार्थविधानार्थं यमपेक्षते तद्धि न तस्य अत्यन्तं बाधकं भवति, किन्तु विकल्पेन इति तात्पर्यम्। अत एव नानुयाजेषु इत्यस्य निषेधत्वकल्पने तु विकल्पः स्यादेव। अत एव विकल्पभिया पर्युदासाश्रयणम्। यदुक्तं दीधितिकृता एकवाक्यताहानिरिति तन्न, वाक्यभेददोषवारणाय एकवाक्यताहानिः स्वीकार्या एव। तथाहि दीधितिकृन्मते यजतिषु इत्यादि एकस्यैव वाक्यस्यार्थः स्याद् अनुयाजव्यतिरिक्तेषु यागेषु ये यजामहं कुर्यादिति। तथा चात्र एकस्यैव विधेः विधेयद्वयम्- अनुयाजव्यतिरिक्तविषयकत्वं, ये यजामहकरणं च। एकेन विधिना अनेकस्य विधौ च वाक्यभेददोषो भवति। मीमांसकनयेऽयं ह्येको महान् दोषः। अत एव ते वाक्यभेददोषस्य परिहाराय अस्य द्विविधवाक्यतां कल्पयन्ति – यजतिषु ये यजामहं करोति, नानुयाजेषु (ये यजामहं करोति) चेति। तत्र प्रथमवाक्यस्य विधेयः ये यजामहकरणमिति। द्वितीयवाक्येन च नञः पर्युदासतया अनुयाजव्यतिरिक्तविषयकत्वं विधेयम्। तथा चोक्तं लौगाक्षिभास्करेण –

"अत्र च वाक्ये ये यजामहे इति न विधीयते, यजतिषु ये यजामहमित्यनेनैव प्राप्तत्वात्। किन्तु सामान्यशास्त्रप्राप्त- ये यजामह इत्यनुवादेन तस्यानुयाजव्यतिरिक्तविषयकत्वं विधीयते। यद्यजतिषु ये यजामहं करोति तदनुयाजव्यतिरिक्तेषु"[6] इति।

रात्रौ श्राद्धं न कुर्वीत इति वाक्यार्थविचारः

मनुसंहितायाः संस्कारसंज्ञके तृतीयेऽध्याये उक्तं –

"रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्तिता हि सा।
सन्ध्ययोरुभयोश्चैव सूर्यं चैवाचिरोदिते"।।[7] इति।

अत्र "रात्रौ श्राद्धं न कुर्वीत" इत्यस्मिन्वाक्ये नञः कीदृगर्थोऽभिप्रेत इति विचार्यः।

---

6 *अर्थसंग्रहः* (कामेश्वरनाथमिश्रसम्पादितः, पृ.१८४)

7 *मनुस्मृतिः* (३/२८०)

न्यायकौस्तुभकारो महादेवपण्डितो ह्यत्र रात्रौ श्राद्धं न कुर्वीत इति नञर्थघटितवाक्यस्य पर्युदासपरत्वं द्वेधा प्रतिपादयति। तथाहि –"सामान्यशास्त्रविरोधिविषयकबोधजनकनञः पर्युदासपरत्वनियमेन रात्रौ श्राद्धं न कुर्वीतेत्यत्रापि नञः पर्युदासपरतैव न तु निषेधपरता"[8]इति। तथाहि अत्र अमावस्यायां पितृभ्यो दद्यात् इति शास्त्रं रात्रिदिवससाधारणामावस्याकाले श्राद्धकरणे इष्टसानत्वबोधकमिति सामान्यशास्त्रं तद्विरोधिविषयकबोधजनकं च "रात्रौ श्राद्धं न कुर्वीत" इति वाक्यमिति बोध्यम्। तथा च "रात्रौ श्राद्धं न कुर्वीत" इत्यत्र नञः अन्योन्याभावः भेदो वा शक्यार्थः, लक्षणया च भेदवत्परता। तस्य च रात्रिपदार्थान्वये रात्रिभिन्ने श्राद्धकरणम् इष्टसाधनमिति वाक्यार्थबोधः स्यात्।

अथवा, नञोऽत्र भेद एवार्थः। तस्य च अमावस्यायां पितृभ्यो दद्यात् इत्यत्र अमावस्यापदार्थे अन्वयः। तथा च रात्रिभिन्नामावस्यायां पितृभ्यो दद्यादिति वाक्यैकवाक्यतयान्वयः, सम्भवत्येकवाक्यत्वे वाक्यभेदो हि नेष्यते इति न्यायात्।

नञ्वादकारस्य रघुनाथशिरोमणेः मतानुसारमत्र नञः प्रसज्यप्रतिषेधपरता एव । तस्य च प्रतिषेधनञः भावनान्वये प्रवर्तनाविरोधिनी निवर्तना एव प्रतीयते। अत एव वाक्यस्यास्य निषेधत्वं सङ्गच्छते। तेन निषेधवाक्यस्यास्य रात्रिश्राद्धकरणनिषेधपरता एव गम्यमानोऽर्थः। निषेधवाक्यं हि निवर्तनां प्रतिपादयन् स्वनिवर्तकत्वनिर्वाहार्थं निषेध्यस्य कलञ्जभक्षणस्य परानिष्टसाधनत्वमाक्षिपन् पुरुषं ततो निवर्तयति। ननु अत्र नञः पर्युदासपरत्वेन रात्रिभिन्ने श्राद्धकरणविधित्वमेव अङ्गीक्रियतां का हानिः इति चेदुच्यते – तथा सति अमावस्यायां पितृभ्यो दद्यात् इति शास्त्रेण अमावस्यारात्रिश्राद्धस्य करणापत्तिः अमावस्यात्वस्य रात्रिसाधारण्यात्। ननु "रात्रौ श्राद्धं न कुर्वीत" "अमावस्यायां पितृभ्यो दद्यात्" इत्यनयोः एकवाक्यतया रात्रिभिन्नामावस्यायां श्राद्धं कुर्वीत इत्यर्थकत्वे कुतो रात्रिश्राद्धप्रसक्तिरिति चेदाह दीधितिकारः –"न खलु क्रियारहितं श्राद्धविधायकं वाक्यान्तरमस्ति येनेदं तेन सममेकवाक्यतामासादयेत्। नापीदं नानुयाजेषु इतिवत् पृथक् क्रियारहितम्"[9] इति। अत एव पृथक्क्रियायुक्तवाक्ययोः एकक्रियापदार्थस्यानन्वयेन एकवाक्यत्वमसम्भवम् इति भावः।

निषेधपरत्वे तु अमावस्यारात्रिश्राद्धकरणस्य नापत्तिः। तद्यथा "ब्राह्मणेभ्यो दधि दातव्यं कौण्डिन्याय न दातव्यमि"त्यादौ लोके "कौण्डिन्याय न" इति निषेधपरमेव, न तु पर्युदासपरम्। अतः निषेधपरे तद्वाक्ये ब्राह्मणपदस्य कौण्डिन्येतरब्राह्मणे लक्षणा। एवं विरोधिविशेषशास्त्रसत्त्वे सामान्यशास्त्रस्य विरोधिविशेषेतरपरता व्युत्पत्तिसिद्धा। रात्रौ श्राद्धनिषेधे अमावस्यायामिति शास्त्रं रात्रीतरामावस्यायामेव श्राद्धविधायकमिति न रात्रिश्राद्धकरणापत्तिः। तस्मात् रात्रौ न श्राद्धं कुर्वीत इति निषेधपरमेव न तु

---

[8] *न्यायकौस्तुभः,* शब्दपरिच्छेदः, (सुब्रह्मण्यशास्त्रिसम्पादितः) पृ.८०७

[9] *नञ्वादः* (सञ्जितकुमारसाधुखाँ -सम्पादितः) पृ. २

पर्युदासपरमिति दीधितिकाराणामाशयः। अथ रात्रौ श्राद्धस्य प्रसक्तौ[10] अनेन निषेधे विकल्पापत्तिः "शास्त्रप्राप्तस्य च प्रतिषेधे विकल्प एव न तु बाधः"[11] इति नियमात्, अप्रसक्तौ च निषेधानुपपत्तिः "प्रसक्तं हि प्रतिषिध्येत" इति नियमात् इति चेन्न "साधीयानयं मन्त्रपाठो यद्वलाज्जलहृदे दहनो नास्तीत्यादौ शाब्दबोधेऽपि परमयत्नेन तत्र दहनप्रसक्तिरुपादीयते"[12]इति। अयं भावः – प्राचां मते वैधस्य रागाधीनस्य वा कर्तव्यताज्ञानस्य निषेधविधिजन्यशाब्दबोधे हेतुत्वेऽपि तत्र नास्ति नवीनानां सम्मतिः। अभावलौकिकप्रत्यक्षे आहार्यरूपा प्रसक्तिः कारणं कदाचित् सम्भवदपि शाब्दबोधे तु अन्यादृशप्रसक्तेः कारणत्वं न कस्याप्यनुमतमित्यर्थः। ननु तर्हि रात्रौ श्राद्धकरणस्य रागाद्विधितो वा अप्राप्तौ तन्निषेधप्रतिपादनं निष्प्रयोजनकमेव इति चेन्न "तात्पर्यानवबोधनिबन्धनरात्रिश्राद्धकरणवारणस्य तदर्थत्वात्"[13] इति। तथाहि- "यदि रात्रौ श्राद्धं न निषिध्येत तदा कदाचिदमावस्यायामित्यादिविधेः रात्रीतरामावस्यातात्पर्यानुरोधेन रात्रावपि श्राद्धकरणं प्रसज्येत। अतो रात्रौ श्राद्धकरणे निषिद्धेऽमावस्यापदस्य रात्रीतरामावस्यापरत्वनिश्चयान्नैषा प्रसक्तिः। एवं चामावस्यायामित्यादिविधेः तात्पर्यग्राहकतयैव तस्य सार्थकत्वमिति भावः"[14] इति।

ननु अनयोः नञ्वादकार-कौस्तुभकारमतयोः कतरः पक्षो गरीय इति विचारे प्रवृत्ते तु **शिरोमणिमते केचन दोषाः सम्भाव्यन्ते**। तथाहि-

१. रात्रौ श्राद्धं न कुर्वीत इत्यत्र नञः प्रतिषेधरूपार्थस्वीकरणाय यल्लौकिकमुदाहरणं "ब्राह्मणेभ्यो दधि दातव्यं कौण्डिन्याय न दातव्यमि"ति प्रदर्शितं तत्रापि नञा पर्युदासाङ्गीकारेण कौण्डिन्यभेद एव स्वीक्रियताम्। तथा च तत्र कौण्डिन्येतरब्राह्मणेभ्यो दधि दातव्यमिति अर्थबोधः। स्वयं शिरोमणिनैवोक्तं – "यत्र विशेषणविशेष्ययोरभेदान्वयो व्युत्पन्नस्तत्रान्योन्याभावो नञा बोध्यते" इति। अभेदान्वये च समानविभक्तिकत्वं तन्त्रम्। अत्र च ब्राह्मण-कौण्डिन्यपदयोः समानविभक्तिकत्वात् नञा भेद एव बोध्यते। यदुक्तं शिरोमणिना –"न च तत्रापि कौण्डिन्यभेदो बोध्यः कौण्डिन्यपदस्य विरुद्धैकवचनावरुद्धत्वात्"[15] इति तदसत् वेदाः प्रमाणम्, शतं ब्राह्मणाः इत्यादौ विरुद्धैकवचनयुक्तानामपि अभेदान्वयस्येष्टत्वात्। अत एव व्युत्पत्तिवादे गदाधरभट्टाचार्येण "अभेदश्च प्रातिपदिकार्थे स्वसमानविभक्तिकेन स्वाव्यवहितपूर्ववर्तिना च

---

10 प्रसक्तिश्च शास्त्रत एव, रात्रिश्राद्धकरणे रागतः प्रसक्त्यभावात्।

11 *अर्थसंग्रहः*, (कामेश्वरनाथसम्पादितः) पृ.१७९

12 इति सोपहासोक्तिः दीधितिकारस्य, *नञ्वादः* (सञ्जितकुमारसाधुखाँ- सम्पादितः) पृ.२

13 *नञ्वादः*, (सञ्जितकुमारसाधुखाँसम्पादितः) पृ.२

14 *नञ्वादटिप्पणी*, (भवानन्दसिद्धान्तवागीशकृता) (सञ्जितकुमारसाधुखाँसम्पादिता) पृ.१५

15 *नञ्वादः*, (सञ्जितकुमारसाधुखाँसम्पादितः) पृ.२

पदेनोपस्थापितस्यैव संसर्गमर्यादया भासते”[16] इत्युक्त्वा “स्वसमानविभक्तिकत्वं च स्वप्रकृतिकविभक्तिसजातीयविभक्तिकत्वं, साजात्यं च विभक्तिविभाजकप्रथमात्वादिना, न तु समानानुपूर्वीकत्वं साजात्यम्”[17] इति प्रतिपादितम्।

२. “रात्रौ श्राद्धं न कुर्वीत” इत्यत्र नञः प्रतिषेधत्वव्यवस्थापनाय शिरोमणिना प्रसिद्धे “प्रसक्तं हि प्रतिषिध्यते” इति नियमे मानाभावः महता कष्टेन साधितः। तेन तु प्रसिद्धव्युत्पत्तिभङ्गरूपो दोष आपद्यते।

३. पुनः कथञ्चित् शिरोमणिमतमङ्गीकृत्य तद्व्युत्पत्तौ मानाभावत्वस्वीकारे तु निषेधस्य निष्प्रयोजनकत्वं प्रसज्यते। तत्र “तात्पर्यानवबोधनिबन्धनरात्रिश्राद्धकरणवारणस्य तदर्थत्वात्”[18] इत्यादिवचनेन अमावस्यादिविधेः तात्पर्यग्राहकत्वपरकव्याख्यानेन महता कष्टेन निषेधस्य यत्सप्रयोजनकत्वं व्याख्यातं दीधितिकृता तत्र न सर्वेषां स्वारस्यम्।

अत एव तत्र नञः प्रतिषेधपक्षं त्यक्त्वा पर्युदासपक्षाश्रयणमेव वरम्। पर्युदासोऽपि यद् द्वेधा प्रतिपादितः कौस्तुभकारेण तत्र प्रथमपक्षे लक्षणाश्रयणात्, लक्षणाया जघन्यवृत्तित्वात्, द्वितीयपक्षे च लक्षणाविरहेण लाघवात् “नञोऽत्र भेद एवार्थः” इति द्वितीयः पक्ष एवाङ्गीकरणीयः। दृश्यते हि तत्र न्यायकौस्तुभकाराणामपि सम्मतिः। अत एव तेन द्वितीयपक्षोपस्थापनवेलायां प्राहुः इति प्रकृष्टार्थकप्रोपसर्गपूर्वकत्वेन उपस्थापितम्। न च तावता एकवाक्यत्वाङ्गीकारे दद्यात्-कुर्वीत इति क्रियापदयोः अन्यतरवैयर्थ्यापत्तिः इति वाच्यम्, अन्यथा तुल्ययुक्त्या अनुयाजेषु ये यजामहपाठनिषेधकवाक्येऽपि नञो निषेधपरत्वापत्तेः। तत्र तु पर्युदासपरत्वाभावे पर्युदासस्थलस्यैव दुर्लभत्वापत्तिः। न च तत्र यजतिषु ये यजामहं करोति, नानुयाजेषु (ये यजामहं करोति) इति वाक्ययोः एकक्रियोपस्थाप्यत्वात् एकवाक्यत्वेऽपि न क्रियाद्वयवैयर्थ्यमिति वाच्यं यजतिषु ये यजामहं करोति नानुयाजेषु इत्याकारकस्य वाक्यस्य श्रौतत्वाभावेन तद्वाक्यस्य श्रौतवाक्यद्वयतात्पर्यविषयार्थकपृथक्संग्रहकृद्वाक्यत्वात्। तथाहि –“एष वै सप्तदश प्रजापतिः, यज्ञं यज्ञमन्वायत्तः” इत्येकं वाक्यं, “नानुयाजेषु ये यजामहं करोति” इति द्वितीयं वाक्यम्। एवं च तयोः भिन्नक्रियोपस्थाप्यत्वं निर्बाधमिति शिवम्।

---

16 *व्युत्पत्तिवादः*, (हरेरामत्रिपाठिसम्पादितः) पृ.४

17 तत्रैव, पृ.४-५

18 *नञ्वादः*, (सज्जिककुमारसाधुखाँसम्पादितः) पृ.२

Bibliography

Gadadhara. *Vyutpattivādaḥ*, Edited by HareramTripathi, New Delhi, Rashtriya Sanskrit Sansthan, 2011

Krishnayajva. *Mīmāṃsāparibhāṣā.* Edited by Navanarayana Bandyopadhyaya, Kolkata, Sanskrit Book Dipo, 2006

Laugakshi. *Arthasaṃgrahaḥ.* Edited by Gurushankar Mukhopadhyaya, Kolkata, Sanskrit Book Dipo, 2005

Laugakshi. *Arthasaṃgrahaḥ*. Edited by Kameshwaranath Mishra, Varanasi, ChaukhambaSurabharatiPrakashan, 2016

Mahadeva. *Nyāyakaustubhaḥ. Śabdapariccedaḥ*. Edited by SubrahmanyaShstri, Taniyabhur, T.M.S.S.M Library, 1982

Manu. *Manusmṛitiḥ*, Edited by ChintamaniShastri, Varanasi, Chaukhamba Sanskrit Series Office, 1992

N.S Ramanuja. *Śabdabodhamīmāṃsā,* Pondicherry, Institute Francais De Pondicherry Rahstriya Sanskrit Sansthan

Raghunatha. *Nañvādaḥ*. Edited by Sanjit Kumar Sadhukhan, New Delhi, RshtryaPandulipi Mission and Dev publishers and distributers, 2013

दामोदरगुप्तरचिते कुट्टनीमते काव्ये कामशास्त्रस्य प्रभावः

जयन्तशीलः[1]

भूमिका -

प्रवृत्तिनिवृत्तिविषयकनिर्देशो भवति शास्त्रम्। शास्यते उपदिश्यते अनेनेति शास्त्रम्। पुंसां मानवानां वा कृते प्रवृत्तिर्वा निवृत्तिर्वा येनोपदिशति, तदेव शास्त्रम्। तदुक्तम् –

'प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा।
पुंसां येनोपदिशते तदेव शास्त्रम् अभिधीयते'।।

ऋगादिचतुर्वेदाः, रामायण-महाभारत-पञ्चरात्रादयो सर्वे ग्रन्था खलु शास्त्रमित्यभिधीयन्ते। महाभारते शास्त्रवियये व्यासदेवेनोक्तम्-

'वेदस्योपनिषदत् सत्यं सत्योपनिषद् दमः
दमस्योपनिषन्मोक्ष एतत् सर्वानुशासनम्'[2]।।

शास्त्रं खलु नेत्रस्वरूपम्[3] इति भर्तृहरिमतम्। शास्त्राध्ययनेन परमं सत्यं ज्ञानगोचरीभूतं भवति। संस्कृतग्रन्थाः विविधैः शास्त्रैः पुष्टाः भवन्ति।

विविधेषु शास्त्रेषु कामसूत्रमन्यतमं प्रसिद्धमिति नास्ति सन्देहाभिलेशः। सप्ताधिकरणैः, षट्त्रिंशतध्यायैः, एकसहस्राधिकद्विशतोत्तरपञ्चाशत्संख्यकैः श्लोकैर्विन्यस्तं कामसूत्रमिदं प्रणीतं वात्सायनेन। अत्र कामविषये विस्तरशः आलोचनं विद्यते। भारतीयसंस्कृतौ धर्मार्थकामाः त्रिवर्गनाम्ना अभिधीयन्ते। एषु त्रिवर्गेषु कामस्य एव सर्वातिशायि प्राधान्यम्। कामं विना सृष्टिरेव न भवितुमर्हति – 'स एकाकी न रमते', 'स द्वितीयमैच्छत्' 'बहुस्यां प्रजायेयेति', 'इच्छामात्रं प्रभोस्सृष्टिः' इत्यादिषु उपनिषत्सूक्तेष्वपि कामस्यैव प्राधान्यं सूच्यते। कौटिल्येन तदीये अर्थशास्त्रे युक्त्या उक्तम् - 'धर्मार्थविरोधेन कामं सेवेत, न निस्सुखः स्यात्। समं वा त्रिवर्गमन्योन्यानुबन्धम्'[4]।

कुट्टनीमते वर्णितं गणिकाजीवनम् -

दामोदरगुप्तेन विरचिते कुट्टनीमते काव्ये मूलतः गणिकापल्ल्याः दुःख-दीर्णा जीवनकथा समभिद्योतिता। शम्भलीमतम्, निदर्शनकाव्यम्, केलिकाव्यम्, खण्डकाव्यम्, लघुकाव्यम्, शास्त्रकाव्यञ्च

---

[1] गवेषकचरः, संस्कृतविभागः, गौड़वङ्गविश्वविद्यालयः, मालदा, पश्चिमवङ्गः।

[2] *महाभारतम्* (शान्तिपर्व, २९९.१३)

[3] वेदशास्त्राविरोधी यस्तर्कश्चक्षुरपश्यताम्। *(वाक्यपदीयम्, १.१३७)*

[4] *अर्थशास्त्रम्* (१.७.२)

विविधैर्नामभिः परिचीयते कुट्टनीमतम्। काव्योऽस्मिन् कामसूत्रस्य वैशिकाधिकरणस्य विषयः पर्यालोचितः। वस्तुतः गणिकासक्तेर्निवारणाय कविना कृतो ग्रन्थोऽयम्। कुट्टनीमतकावस्यान्तिमे दामोदरगुप्तेन ईरीतम् -

'काव्यमिदं यः श्रृणुते सम्यक् काव्यार्थपालनेनासौ
नो वञ्चते कदाचिद्विटवेश्याधूर्त कुट्टनीभिरिति'[5]।

चिन्तामणिः, मालती, समरभटः, मञ्जरी, सुन्दरसेनः, हारलता चेति काव्यस्यास्य प्रधानाः नायक-नायिकाः।

अस्य काव्यस्य हारलतोपाख्यानम्, मञ्जरीनामोपाख्यानञ्चेति उपाख्यानद्वयम् अस्माकं हृदयं ह्लादयति। पञ्चपर्वभिः विभक्तयोः उपाख्यानयोरेकस्मिन् निःस्वार्थप्रेमः, अपरेस्मिन् स्वार्थप्रेमश्च वर्णितः। तथा च तत्कालीनार्थ-सामाजिक-सांस्कृतिकजीवनस्य प्रतिच्छविः दृश्यते ग्रन्थेऽस्मिन्।

ननु का नाम गणिका? का वा कुट्टनी? कुट्टनी-गणिकयोः वृत्तिर्विषये किञ्चिदालोच्यम्। गणिका नाम बहुभोग्या नारीति। विविधेषु शास्त्रेषु गणिकायाः पर्यायवाचकाः शब्दाः प्राप्यन्ते। कुम्भदासी, परिचारिका, कुलटा, स्वैरिणी, रण्डी, वारस्त्री, क्षुद्रा, शूला, लज्जिका, वन्धुरा, भोग्या, वारवधू, नगरवधू, पण्यगता, रूपाजीवा, नटी, शिल्पकारिका, शालभञ्जिका, स्मरवीथिका, खानगी, कामरेखा, परविलासिनी, भण्डहासिनी, पतिता, वारङ्गणा, देहोपसारिणी, देहोपजीविनी, रक्षिता, वारवणिता, देवदासी, उपपत्नी, जारिणी, साधारणी, महानग्री, अतीत्वरी, स्वाधीनयौवना, गणिका चेति शब्दाः वेश्याविशेषाः। गणिका रूप-यौवन-शिक्षादिषु साधारणरमण्याः श्रेष्ठेति वात्सायनः। वात्सायनेन तदीये कामसूत्रे गणिकायास्त्रिविधित्वमुक्तम् – 'त्रिविधा वेश्या एकपरिग्रहाअनेकपरिग्रहा अपरिग्रहा चेति'[6]। तत्र एकपरिग्रहा नामैकेन नायकेन सह संसर्गं करोति या सा। अनेकपरिग्रहा खलु विविधैर्नायकैः सह सम्बन्धं स्थापयति या सा। किञ्च, अपरिग्रहा तावत् केवलमात्मसन्तुष्टये सम्बन्धयति या सा।

दशरूपकारेणोक्तं यत् 'साधारणी स्त्री गणिका कन्या प्रागल्भ्यधौर्तयुक्'[7]। साहित्यदर्पणकारेण विश्वनाथेन गणिकाया विषये उदितम् - 'धीरा कला प्रगल्भा स्याद्वेश्या सामान्यनायिका'[8]। कौटिल्येनापि तदीये अर्थशास्त्रे गणिकाध्यक्षनामकेऽध्याये गणिकांशसन्दर्भे विस्तरशः पर्यालोचितम्। पुराण-रामायण-महाभारतादिग्रन्थेषु स्वर्गवेश्या नाम्नी गणिका दृश्यते। स्वर्गवेश्या ह्यप्सरेति। नाट्यशास्त्रे ऊर्वश्यादित्रयोविंशतिः अप्सरसाम् समुल्लेखः दृश्यते। एताश्चाप्सरसो नाट्ये कैशिकीं वृत्तिं प्रयोक्तुमलम्।

---

[5] *कुट्टनीमतम्* (१०५९)

[6] *कामसूत्रम्* (वैशिकाधिकरणम्, प्रथमवृत्तम्)

[7] *दशरूपकम्* (२.११)

[8] *साहित्यदर्पणः* (३.६३)

अतः प्राचीनकालादेव समाजव्यवस्थायां गणिकानां स्थानमुच्चकोटिकमासिदित्यनुमीयते, अन्यथा वात्सायन-कौटिल्यादिशास्त्रकृद्भिः गणिकानां कृते स्वतन्त्रध्योयो न निर्दिष्टः।

कुट्टयति नाशयति स्त्रीणां कुलमिति कुट्टनीति शब्दार्थः। अथवा कुट्ट स्त्रीणां कूलनाशः कर्तव्यतया तस्याः। विगतयौवना गणिकैव कुट्टनी। कुट्टन्याः पर्यायवाचकाः शब्दास्तावत् शम्भली, माधवी, अर्जुनी, कुम्भदासी, गणेरुका, रङ्गमाता इति। क्षेमेन्द्रेण तदीये कलाविलासे कुट्टनीसम्बन्धे उक्तम्-

‘भिक्षुक-तापसबहुविधुपण्यकला द्वीपदर्शनकला च
खिन्ना कलात्तिषष्ट्या पर्यन्ते कुट्टनी कला वेश्या’[9]।।

कुट्टनी रक्तपानमिषैषिणी व्याघ्रीव। कामाचारेण समं गणिकावृत्तेरस्ति पार्थक्यम्। कामाचारे रतिसुखमेव प्रधानम्, परं गणिकावृत्तौ अर्थोपार्जनं मूलम्। वात्सायनेन कामसूत्रे सुष्ठूक्तं – ‘वेश्यानां पुरुषाधिगमे रतिवृत्तिश्च सर्गात्’। कालान्तरं गणिकावृत्तिरियं समाजे एतावत् प्रभावं विस्तारयति, काव्यकलास्वपि गुरुत्वपूर्णां भूमिकामधिकरोति। ‘गणिकावृत्तिसंग्रहः’ इति ग्रन्थस्तस्यैव निदर्शनम्।

वस्तुतः वेश्यावृत्तिः प्राचीनकालतः अद्यावधि विश्वे वृत्तिरूपेण स्वीकृता। वृत्तिरियं समाजदृष्ट्या नैतिकदृष्ट्या च दोषभाग् भवतु, परं मानविकदृष्ट्या सत्यमेव कष्टार्हा। यद्वा भवतु नाम। शास्त्रदृशा वृत्तिरियं स्वीकृतेति सत्यम्।

कुट्टनीमते कामशास्त्रस्य प्रभावः-

श्रूयते - ‘शास्त्रं शास्त्रान्तरापेक्षि’। साधारणतया एकं शास्त्रम् इतरशास्त्रैः प्रभावितं भवति। स्वाभाविकगत्या कुट्टनीमते धर्मार्थकाम-राजनीत्यादिशास्त्राणां प्रभावो वर्तते। कुट्टनीमते नामके काव्ये इतरशास्त्रवत् कामशास्त्रस्यापि प्रभावो दृक्पथम् आयाति।

दामोदरगुप्तेन तदीये काव्ये पत्रच्छेद्यकलायाः विषये[10] आलोचितम्। इयं पत्रच्छेद्यकलैव वात्सायनकृतस्य कामसूत्रस्य चतुःषष्टिकलासु खल्वन्यतमा विशेषकच्छेद्यमिति। अर्थात् पत्रच्छेदपुरःसरं तिलकादिनिर्माणस्य कलेयम्। कुट्टनीमतस्य भट्टपुत्रस्तथा नायकपदाभिधेयः समरभटः कामशास्त्रे पारदर्शी आसीत्।

---

[9] *कामविलासः* (४.११)

[10] ‘पत्रच्छेदमजानज्ञानं वा कौशलं कलाविषये’ । *(कुट्टनीमतम्)*

सीत्काराणाम् उल्लेखं कविः कृतवान् इह काव्ये - 'नखविलिखने च सीत्कृतिमाघातेषूल्वणं क्वणितम्'[11]। पक्षान्तरे कामशास्त्रे हिंकृत-स्तनित-सूत्कृत-दूत्कृत-फुत्कृत-कूजित-रुदितादीनां सीत्काराणां विषये विस्तरेणालोचितम् वात्सायनेन। सीत्कारो नाम रतिमिलनावसरे नायिकायाः मुखात् कामजनितचित्कारविशेषः। रतिरहस्ये सीत्कारस्य लक्षणं लक्षितम् – 'वंशविस्फुटनवच्च सीत्कृतम्'[12]।

हारलतोपाख्यानस्य तृतीये पर्वणि वयं दृष्टवन्तो यत् नायिका हारलता नायकसुन्दरसेनं प्रति आकृष्टा। हारलता कामाशरेण विद्धापि सा सुन्दरसेनाय मनोव्यथां विज्ञापयितुं नालम्। नायिकायाम् एतादृश्या अवस्थाया विषये कामसूत्रे दृश्यते - 'सर्वा एव हि कन्याः पुरुषेण प्रयुज्यमानं वचनं विषहन्ते न तु लघुमिश्रामपि वाचं वदन्तीति घोटकमुखम्'[13]। अर्थात् सर्वाश्च कन्याः प्रयुज्यमानस्य पुरुषस्य वाक्यं सानन्दं श्रृणोति परं स्वयं लज्जावशात् एकामपि वाचं न स्फुरतीति।

दामोदरगुप्तेन तदीये कुट्टनीमते ३७८संख्यके श्लोके विगल्लोलचुम्बनस्य प्रसङ्ग उक्तः। यस्यां चुम्बनक्रियायां जिह्वा अधिकतया स्थानग्रहणं करोति तद्विगल्लोलं चुम्बनम् इति। जिह्वाचुम्बनं चतुर्विधम् अन्तोमुखचुम्बन-दशनचुम्बन-तालुचुम्बन-जिह्वाचुम्बनभेदात्। केवलं चण्डवेगनायकनायिकाः अस्य चुम्बनस्याधिकारिणः। चुम्बनस्य स्थानविषये रतिरहस्ये परिदृश्यते -

'नयनगलकपोलं दन्तवासो मुखान्तःस्तनयुगलललाटं चुम्बनस्थानमाहुः।
दधति जघननाभीमूलकक्षासु चुम्बव्यतिकरसुखमुच्चैर्देशसात्म्येन लाटाः'[14]।।

अतःपरं कविना दामोदरगुप्तेन विविधानामालिङ्गनानां विषये समुल्लेखो विहितः। तद्यथा क्षीरनीरक-स्पृष्टक-चक्राहव-हंस-पारावत-नकुलादिभेदात् बहुविधम् आलिङ्गनम्। तथापि कामशास्त्रे विद्धक-उदघृष्टक-पीडितक-लतावेष्टितक-वृक्षाधिरुढक-तिलकतण्डुलक-ऊरुपगूहन-जघनोपगूहन-स्तनालिङ्गन-ललाटिकाख्यानि आलिङ्गनानि वर्णितानि।

कविना दामोदरगुप्तेन समरतशब्दस्योल्लेखः कृतः - 'कामः समरतनरोपभोगेन'[15]। समप्रमाणविशिष्टगुह्यशालीनां स्त्रीपुरुषाणां रतिरेव समरतः। वात्सायनेन नार्यः मृगी वडवा हस्तिनी चेति तिसृभिः विभक्तास्तथा च पुरुषाः शश-वृष-अश्वभेदात् त्रिधा विभक्ताः। मृग्या सह शशस्य, वडवया सह वृषस्य, हस्तिन्या सह अश्वपुरुषाणां रतिक्रियैव समरतः। पक्षान्तरेण असमानप्रमाणोपेतगुह्यशालिनार्य्या सह

---

[11] *कुट्टनीमतम्* (१५५)

[12] *रतिरहस्यम्* (१०.५६)

[13] *कामसूत्रम्* (३.२.१७)

[14] *रतिरहस्यम्* (७.१)

[15] *कुट्टनीमतम्* (६५२)

पुरुषस्य रतिक्रिया हि विषमरतनाम्ना अभिधीयते। रतिक्रियायां वेग-काल-उदयानाम् अत्यन्तं मूल्यं वर्तते। नारीपुरुषभेदात् वेगकालयोर्वैचित्र्यं परिलक्ष्यते। अतः प्रमाणम् (Size), वेगः (Impulse), कालः (Duration), क्रिया (Amount of stimulation for excitement) चेति विषयाणां समन्वयो हि प्रकृष्टः समरतः।

उपसंहारः –

परिशेषे वक्तव्यं यत् दामोदरगुप्तेन विरचिते कुट्टनीमते कामशास्त्रस्य सूक्ष्मातिसूक्ष्मं वर्णनं निहितं वरीवर्ति। सम्पूर्णं काव्यं कामोचारविषयसम्पृक्तम् इति कृत्वा काव्यस्य प्रतिच्छत्रं कामशास्त्ररीत्या वर्णनं समस्ति। इह काव्ये अश्लीलतायाः नूनमपि विषयो नास्तीति। शास्त्रदृष्ट्या अश्लीलता नाम किमपि तत्त्वं नोपलभ्यते। कुट्टनीमते अपि वर्णिताः सर्वे कामोपचाराः शास्त्रदिशा शोभनीया इति। एतेन प्रमीयते यत् आसीत् दामोदरगुप्तः कामशास्त्रे प्रवीणः इति शम्।

ग्रन्थानुक्रमणी

कौटिल्यः. *कौटिलीयम् अर्थशास्त्रम्.* सम्पा. अध्यापक डः मानवेन्दु वन्द्योपाध्याय, संस्कृत पुस्तक भाण्डार, कलकाता,२०१४ (षष्ठ संस्करण).

चट्टोपाध्याय, दुर्गापद (सम्पा.). *संस्कृत साहित्ये वाराङ्गना*, सुवर्णा प्रकाशनी, कलिकाता, १९९८ (प्रथम प्रकाश).

दामोदरगुप्तः. *कुट्टनीमतम्.* अनुवादक अध्यापक त्रिदिवनाथ राय, वसुमती साहित्य मन्दिर, कलिकाता, १३६०. (प्रथम संस्करण).

धनञ्जयः. *दशरूपक* , सम्पा. सीतानाथ आचार्य एवं देवकुमार दास, संस्कृत पुस्तक भाण्डार, कलकाता, १९९७ . (प्रथम संस्करण).

वन्द्योपाध्याय, धीरेन्द्रनाथ (सम्पा.). *संस्कृत साहित्येर इतिहास*, पश्चिमवङ्ग राज्य पुस्तक पर्षद्, कलकाता, २०१५ (द्वितीय संस्करण).

वात्सायनः. *कामसूत्रम्* , सम्पा. पारसनाथ द्विवेदी, चौखाम्वा सुरभारती प्रकाशन, वाराणसी, २०१४.

विश्वनाथः. *साहित्यदर्पणः* , सम्पा. विद्यावाचस्पति-साहित्याचार्य-शालिग्रामशास्त्री, मोतीलाल वनारसीदास, दिल्ली, २००४ .

"संस्कृतसाहित्यसाधनायां रमाचतुर्धुरी" – एकं सामान्यमध्ययनम्

भोलानाथमण्डलः[1]

क. भूमिका

संस्कृतनाट्यरचनाया आरम्भो भासाश्वघोषादीनां लेखनीमाध्यमेन अभवदपि कालिदासभवभूत्यादीनां लेखनीस्पर्शात् तस्य रूपवैभिन्न्यं सञ्जातम्। भक्तकवीनाम् आश्रयेण एतन्नाटकप्रपञ्चो मात्रान्तरमुपैति। परन्तु तत्परवर्त्तिनि युगे संस्कृतनाट्यसाहित्यं न खलु तथैव उत्कर्षाधिक्यं गतम्। पक्षान्तरे क्रमेण संस्कृतनाट्यसाहित्यस्य नितरां क्षयीभावो परिदृष्टः। यद्यपि अवक्षयस्य प्रधानकारणानुसन्धानम् असम्भवरूपमेव, तथापि कालिदासादिसदृशकवीनाम् असद्भाव एव अवक्षयकारणं भवितुमर्हति इति वक्तुं शक्यते।

परन्तु कालचक्रस्य गतिरविच्छिन्ना तथा परिवर्तनशीला। अतस्तेनैव सर्वेषां परिवर्तनं भवतीति सत्यम्। अधुना कालिदासस्येव कवेः तथा अभिज्ञानशकुन्तल-सदृशनाटकस्याभावादपि न खलु संस्कृतनाटकजगतो गतिरवरुद्धा। किन्तु परभावि संस्कृतनाटकजातं सहृदयहृदयप्रह्लादकारि नाभवत् किन्तु नाटकप्रणयनं कथमपि स्तब्धं न जातम्। अपि तु बङ्गीयकविव्रातस्य कारयितृप्रतिभया साम्प्रतं संस्कृतदृश्यकाव्येषु पुनरपि प्राचीनकाव्यधारायाः प्रभावः प्रपततीति निश्चप्रचम्। तत्र कवयित्र्याः रमायाः योगदानं महत्त्वपूर्णमास्ते ।

विंशशतकस्य कस्याश्चित् नारीकवेरगाधपाण्डित्यम् आधुनिक-संस्कृतनाट्यभाण्डारगारं समृद्धयतीति। सा खलु कविः रमाचतुर्धुरी। सा १९११-ख्रीष्टाब्दस्य फेब्रुयारीमासस्य अष्टमदिनाङ्के कलिकातानगर्यां वन्द्यवंशे जज्ञे। तस्याः पिता सुधांशुमोहनवोसः, माता च रोमोलादेवी, पितामहः आनन्द-मोहनवोसः, पितामही स्वर्णप्रभादेवी। असाधारणपाण्डित्यस्याधिकारिणी रमा-चतुर्धुरी भारतवर्षस्य प्रथमा रमणी या अक्सफोर्डविश्वविद्यालयतः'विद्यावारिधिः' इत्युपाधिं लेभे। भारतवर्षस्य सैव प्रथमा नारी या पश्चिमबङ्गराज्यस्य रवीन्द्रभारतीविद्यालयस्य उपाचार्यपदे समासीना बभूव। 'Royal Asiatic Society of Bengal' इत्यस्य प्रथमा नारी 'Fellow' इति सञ्जाता। जार्मानदेशतः सा उच्चकोटिकभारतीयनागरिकसम्मानेन विभूषितासीत् १९७० ख्रीष्टाब्दे[2]।

ख. नाट्यप्रतिभा

नाट्यविशारद्रूपेण प्रख्याता रमादेवी स्वकारयित्र्या प्रतिभया विंशत्यधिकानि नाटकानि संस्कृतेन रराच। तस्या अर्वाचीनसंस्कृतनाटकपाठेन सहृदयसामाजिकाः नितान्तमाप्लुताः। तत्कृतयः सर्वाः

---

[1] गवेषकः, संस्कृतविभागः, कलिकाताविश्वविद्यालयः, कोलकाता

[2] *आधुनिक संस्कृत नाटक* (द्वितीयभागः), रामजी-उपाध्यायः, पृ. - १०३८

'प्राच्यवाणी' इति प्रतिष्ठानतः प्रकाशिता अभवन्। एता नाट्यकृतयः वस्तुगतदिशा निम्नरीत्या प्रदर्शयितुं शक्यन्ते –

१. वरेण्यचरित्राश्रयि
२. कालिदासमेघदूताश्रयि
३. स्वीयकल्पनाश्रयि

ख.०. रमाचतुर्धुरिणः नाट्यानां संक्षिप्तमध्ययनम्

१. **वरेण्यचरित्राश्रयिनाटकव्रातम् -** विश्ववन्द्यचरित्राणि आश्रित्य रचितानि कानिचित् रूपकाणि कवयित्र्या रमया।

क. **यतीन्द्र-यतीन्द्रम्** – यतीन्द्रयतीन्द्रनाटके कविः वर्णितवान् उच्चशिक्षार्थे यतीन्द्रस्य देशान्तरगमनम्। लण्डनविश्वविद्यालये यतीन्द्रेण विद्यावारिध्युपाधिप्राप्तये सम्मते याचनम्। 'India Office Library' इत्यत्र संस्कृतपालिविभागे प्रधानगवेषकरूपेण तथा लण्डनविश्वविद्यालयस्य संस्कृतविभागीयाध्यापकरूपेण नियुक्तिः, लण्डनदेशे भारतीयभोजनागारे रमादेव्या सह साक्षात्कारस्तथा प्रेमालापः, तया सहोपयामः, प्राच्यवाणीसंस्थायाः स्थापनं चेत्यादिविचित्रविषयमाश्रित्य नाटकमिदं रराच नाट्यकारः।

ख. **शंकरशंकरम्** – अद्वैतवेदान्तवादिनः शिवावताररूपिणः शंकराचार्यस्य जीवनदर्शनं तथा तत्प्रचारितवेदान्तदर्शनमाश्रित्य चतुर्दशदृश्यैः रराच नाटकमिदम्। इह नाटके कवयित्र्या वर्ण्यन्ते – कथं गुप्तोत्तरयुगे शङ्कराचार्य आसमुद्रहिमाचलं परिभ्रम्य भारतवासिनां हृत्स्पन्दनम् अभूतवान। स्वशास्त्रज्ञानेन शङ्करः तदानीन्तनकालस्य प्रख्यातं पण्डितमूर्धन्यं माधवमिश्रं विज्ञामुभयभारतीं मण्डनस्त्रियं च तर्कयुद्धेन पराजितवान्। चतुर्दशदृश्येषु दृश्यते शङ्करः केदारं गच्छन् तत्र द्वात्रिंशद्वर्षवयसि सम्पूर्णे स्वस्य परमात्मसायुज्यप्राप्तौ प्रकृतजीवनस्योपलब्धीः प्रकटितवान्। तेन भारतस्य चतसृषु दिक्षु चत्वारो मठाः संस्थापिताः। तत्र मठेषु ऋग्यजुःसामाथर्वणामध्ययनव्यवस्था कृता[3]।

ग. **युगजीवनम्** – युगावतारपुरुषस्य रामकृष्णदेवस्य दीव्यजीवनं तथा दैवभावमाश्रित्य दशदृश्यसमन्वितं नाटकमिदं रचितम्। नाटकेऽस्मिन् भग्नविग्रहविषये रामकृष्णस्य विधानदानम्, जगज्जनन्या दर्शनलाभाय गदाधरस्याकुलता, गदाधरस्य नियमशून्या पूजापद्धतिः, तैश्च भैरवीब्राह्मणगुर्व्याः लाभः, तस्य चावतारत्वप्रमाणम्, अद्वैतवेदान्तवादिनस्तोतापुरीसन्न्यासिनः

[3] *भारतवर्षे आधुनिकसंस्कृतसाहित्यम् : विहङ्गमदृष्ट्या परिशीलनम्*, शुभ्रजित्सेनः, पृ. – ४७४-४७५

सकाशात् दीक्षालाभः, श्रीरामकृष्णस्य दीव्यगार्हस्थ्यजीवनम् चेत्यादीनि सुष्ठुतया चित्रितानि रमादेव्या।

घ. **निवेदितानिवेदितम्** – द्वादशदृश्येषु मागरिटनोवेलस्य तथा भगिन्या निवेदिताया जीवनमाश्रित्य नाटकमिदं रराच। अत्र मागरिटमहोदयया सह स्वामिनः साक्षात्कारः, विवेकानन्दस्य सविधे निवेदितायाः धर्मजिज्ञासा, तया च गुरुरूपेण स्वामिनो वरणम्, सारदादेव्या सह मागरिटमहोदयायाः साक्षात्कारः, स्वामिसकाशात् मागरिटमहोदयाया दीक्षालाभः, गुरुणा निवेदितानाम्नः प्रदानम्, निवेदितायाश्च जनसेवार्थे दीक्षाग्रहणं चेति विषया उपस्थापिताः कविना।

ङ. **अभेदानन्दम्** – रामकृष्णशिष्यस्य स्वामिनः अभेदानन्दमहाराजस्य जीवनस्य विचित्रा दिशोऽस्य नाटकस्योपजीव्यम्। अस्य नाटकस्य दृश्यसंख्या द्वादश।

च. **भारताचार्यम्** – विख्यातदार्शनिकस्य सर्वपल्लीराधाकृष्णमहोदयस्य जीवनं तथा दार्शनिकचिन्ता चास्य नाटकस्य विषयवस्तुरूपेण परिगण्येते। तत्र द्वादश दृश्यानि सन्ति।

छ. **रामचरितमानसम्** – रामचरितमानसस्य रचयितुः भक्तकवितुलसीदास-महोदयस्य जीवनचरितमवलम्ब्य रचितमिदं द्वादशदृश्यात्मकं नाटकम्।

ज. **रसमयरासमणिः** – बङ्गीयविदुष्या राणीरासमणेः कथामाश्रित्य दृश्याष्टकेन नाटकमिदं विरचितम्।

झ. **प्रसन्नप्रसादम्** – नाटकेऽस्मिन्नस्ति कालीसाधकस्य रामप्रसादस्य जीवनेतिवृत्तम्। नाटकस्यास्य दश दृश्यानि सन्ति।

ञ. **चैतन्य-चैतन्यम्** – नदीयानिवासिनो महाप्रभोश्चैतन्यदेवस्याविर्भावः, बाल्यलीला, दिग्विजयः, महासमाधिश्चेत्यादयो विषया अत्र वर्तन्ते। दृश्यपञ्चकसमन्वितमिदं नाटकम्।

ट. **गणदेवतानाटकम्** – बङ्गीयसाहित्यिकस्य ताराशङ्करवन्द्योपाध्याय-महोदयस्य जीवनचरितमस्य नाटकस्योपजीव्यम्।

ठ. **अग्निवीणानाटकम्** – नाटकेऽत्रास्ति महाकवेः नजरुल-इसलामस्य जीवनवृत्तान्तः।

ड. **भारततातम्** – गान्धिमहोदयस्य जीवने संघटितानि 'हरिजनोद्धारः' 'साम्प्रदायिकमेलनम्' लवणसत्याग्रहान्दोलनं चेत्यादीनि वृत्तानि दृश्याष्टकेन आलोचितानि सन्ति।

ढ. **भारतपथिकम्** –सुप्रसिद्धसमाजसंस्कारकस्य राममोहनरायमहोदयस्य जीवनचरितं दृश्यपञ्चकेऽङ्कितम्।

ण. **तानतनुः** – सङ्गीतचूडामणेः तानसेनस्य जीवनचरितमस्य नाटकस्य उपजीव्यम्।

त. **लेलिनविजयम्** – मास्कवादिनो लेलिनस्य जीवनं नाटकस्यास्य विषयवस्तु।

थ. **भारतवीरम्** – माराठ्यधिपतेः शिवाजीमहाराजस्य जीवनगाथा नाटकस्यास्य विषयः।

२. **कालिदासमेघदूताश्रयि नाटकजातम्**

कविकुलशेखरस्य कालिदासस्य खण्डकाव्यं मेघदूतमाश्रित्य रमादेवी कानिचित् नाट्यानि रचितवती। तानि यथा -

क. **कविकुलकोकिलम्** – कालिदासस्य व्यक्तिजीवनमुपाश्रित्य ग्रथितमिदं नाटकम्। नाटकेऽस्मिन् दश दृश्यानि विलसन्ति। मूर्खकालिदासतो महाकवित्वेन कालिदासस्य परिणतिरत्र नाट्यायितावर्तत। इह नाटके विद्यावती विशिष्टायां स्त्रीभूमिकायामवतीर्णा संबभूव। सा मूर्खं कालिदासमुपरेमे। परवर्तिकाले पतेः प्रकृतस्वरूपं विज्ञाय सा कालिदासं बहुधा तिरस्कृतवती। अन्तिमे कालिदासस्य महता तपसा अर्जितेन पाण्डित्येन सा धन्याभवदिति नाट्यविषयः[4]।

ख. **कविकुलकमलम्** – महाकवेः कालिदासस्य उत्तरकालीनजीवनं नाटकस्यास्योपजीव्यम्। अत्र अष्टौ दृश्यानि वर्त्तन्ते।

ग. **मेघमेदूरणीयम्** – सर्वजनविदितं खण्डकाव्यं मेघदूतस्य पूर्वोत्तरघटनानामेकत्र समाकलनं विद्यते। अत्र षड्संख्यकानि दृश्यानि वर्तन्ते।

3. **स्वीयकल्पनाश्रयिनाटकम्**

कविकल्पनामाश्रित्य रचितानि कानिचिन्नाटकानि रमया।

क. **पल्लीकमलम्** –

लोकप्रसिद्धं कथामवलम्ब्य रचितमिदं नवदृश्यात्मकं नाटकम्। कमलकलिकारूपकुमारयोः प्रेमकथामाधारीकृत्य ग्राम्यसंस्कृतिञ्च संलक्ष्य कवयित्री नाटकं व्यलिखत्। नायकस्य रूपकुमारस्य नायिकायाः कमलकलिकायाश्च प्रेम्णः परिणतिः अनन्तो गत्वा परिणयेन सम्पाद्यते[5]।

ख. **देशदीपम्** – कवयित्र्या राष्ट्ररक्षायै दिवं गतानां संस्मरणं कृतम्। चम्पकवदननाम्नः युवकविशेषस्य स्वीयमातृभूमिप्रेमा तथा प्राणान् तत्याज नाटकेऽस्मिन् चित्रितः। अत्र नव दृश्यानि वर्तन्ते।

ग. **नगरनूपुरम्** – मेघलानाम्न्या वारविलासिन्या रमण्या भोगमयजीवनमत्र वर्णितम्। अत्र दश दृश्यानि सन्ति।

घ. **संसारामृतम्** –

---

[4] *भारतवर्षे आधुनिकसंस्कृतसाहित्यम् : विहङ्गमदृष्ट्या परिशीलनम्*, शुभ्रजित्सेनः, पृ. – ४७९-४८०

[5] तत्रैव, पृ. - ४७६

केलिनाम्न्याः दरिद्रपरिवारस्य कन्यायाः दुःखमयं जीवनमवलम्ब्य सप्तदृश्यात्मकमिदं नाटकम्। मयूरनामकः कश्चन तस्या बालिकायाः प्रतारणामकरोत्। अनन्तरं प्रतारिता सा बाला तं मयूरनामकमेकं धनिनमुद्वहति। किन्तु स मयूर आसीत् चरित्रहीनः। किन्तु तस्या बालिकायाः संस्पर्शात् स शनैः शनैः कुस्वभावं परित्यज्य शुद्धजीवनं यापितवान्। समाजस्य वास्तवजीवनमत्र प्रतिध्वनितं कवियित्र्या[6]।

ग. नाट्यकर्तृरूपेण रमादेव्याः मूल्यायनम्

अर्वाचीनेयं नाट्यकर्त्री रमाचतुर्धुरी स्वीयप्रतिभया समुज्ज्वला। तस्याः रचनासु सर्वत्रैव प्रतिभाया सर्वातिशायी प्रभावः विद्यतेतमाम् । एकत्र रचनासु यथा नाट्यशास्त्रविधानमनुसृत्य – 'नान्दी', 'प्रस्तावना', 'भरतवाक्यम', 'सन्धिः', 'अर्थोपक्षेपकम्' च संयोजितानि वर्तन्ते तथान्यत्र नाट्यविधेः अनुशासनं परित्यज्य नवीनतायाः स्पर्शः संयोजितः। तस्या नाट्येषु 'अङ्कः' इत्यस्य प्रयोगो न दृश्यते, परन्तु 'दृश्यम्' इत्यस्य शब्दस्य प्रयोगो विद्यते। काव्यसौन्दर्यसृजनेऽपि तस्या दक्षता अनस्वीकार्येति। तस्याः वर्त्तिकास्पर्शान्नाट्यचरित्राणि अकृत्रिमतां लेभिरे। संस्कृतनाटके व्यवहृतं शब्दकाठिन्यं परित्यज्य तया सरलभाषाप्रयोगः अकारि। तस्या रचना सहृदयमानसोद्वेजिसमासबद्धशब्दराशितो मुक्ता। संक्षिप्तसंलापैः सह सुदीर्घसंलापानामपि संयोजनं परिलक्ष्यते नाटकेषु। नाट्येषु भाषाणां प्रयोगे सातीव कुशलिनी आसीत्। तस्या नाट्येषु पारस्परिकवार्त्तालापः अतीव परिमार्जितस्तथा नवीनः। यद्यपि संवादाः प्रायेण दीर्घायिताः, किन्तु भाषा तेषां सरला[7]। एतादृशी भाषा पुनः दार्शनिकभावपरिपुष्टापि वर्तते[8]। कुत्रापि च भाषा व्यङ्ग्यात्मिका। तस्याः भाषाया अन्यतमं विशेषत्वं खलु ध्वनेः प्रयोगः। यथा – हा हा हा, फू फू फू, रे रे रे[9] - चेत्यादीनि। अपशब्दानामपि अदभ्रप्रयोगो लक्ष्यते। यथा – मर्कट, शठश्रृगाल, कृमिकीट[10]। रूपकादिषु – एकोक्त्याः प्रयोगोऽस्ति। यथा - युगजीवनम्[11], निवेदितनिवेदितम्[12]।

वाक्येषु सम्बोधनपदानि ललितविशेषणान्वितानि वर्तन्ते। यथा – मातुः निमित्ते - 'परमस्नेहकोमले मातः', सुधाधने मातः, 'ममता मधुरे'[13], पितुः निमित्ते - 'परमस्नेहसुशीतलपितः'[14], पुत्रस्य निमित्ते -

---

[6] *भारतवर्षे आधुनिकसंस्कृतसाहित्यम् : विहङ्गमदृष्ट्या परिशीलनम्, शुभ्रजित्सेनः, पृ. – ४७७*

[7] *आधुनिक संस्कृत महिला नाटककार*, मीराद्विवेदी, पृ. - १६७

[8] तत्रैव

[9] *देशदीपम्*, रमाचतुर्धूरी, पृ. – ३७-३९

[10] *आधुनिक संस्कृत महिला नाटककार*, मीराद्विवेदी, पृ. - १६७

[11] *युगजीवनम्*, रमाचतुर्धुरी, पृ. - २६

[12] *निवेदितनिवेदितम्*, रमाचतुर्धुरी, पृ. - ९३

[13] *देशदीपम्*, रमाचतुर्धुरी, पृ. – २०,२२

'स्नेहकोमलपुत्रक', 'प्राणधनपुत्रक' [15] , भ्रातुः निमित्ते - 'पुण्यश्लाश्लोकः भ्रातृमहोदय, जीवनसर्वस्वभ्रातृवर', 'हृदयलोकभ्रातृवर' [16] , भगिन्याः निमित्ते - 'सुधास्वरूपिणी भगिनी', 'ममतामयिभगिनी'[17], बन्धोः पितुः निमित्ते - ज्येष्ठतात महोदय[18], शक्रोः निमित्ते – रे रे क्युत्सितकुक्कुर, रे रे दुर्वृत्त[19]

तस्या नाट्येषु प्रादेशिकभाषाणामपि बहुलव्यवहारो लक्ष्यते। बङ्गीयशब्दानामजस्रप्रयोगोऽस्ति। यथा – 'कालुदादा', 'झाडुदार दादा', 'दादावावु', 'दिदिमणि'[20], 'दुत्तेरि'[21], 'लुकोचुरि'[22], 'कुलुकुलु'[23]' इत्यादयः। अन्यतः बङ्गीयाः प्रवादा अपि व्यवह्रियन्ते – ''मुद्रा मृत्तिका, मृत्तिका मुद्रा, मुद्रा मृत्तिका, मृत्तिका मुद्रा''[24]। बङ्गभाषायाम् – "टाका माटि, माटि टाका, टाका माटि, माटि टाका" इति।

आङ्गलशब्दानामपि भूरिशः व्यवहारो दृश्यते - 'ओयाटार', 'गड'[25] चेति। आङ्गलवाक्यस्यापि प्रयोगः दर्शितः - ''The boat is sinking , but I shall see the sunrise''[26]। पालिभाषायाः प्रयोगो लक्ष्यते नाट्येषु[27]। 'पाणि', 'आल्ला'[28], 'चाचारहिम्', 'खोदाताला', 'छुछुन्दरि'[29]इत्यादिभाषाया व्यवहारोऽस्ति।

अलंकारप्रयोगेऽपि रमादेव्याः पारङ्गमत्वमसाधारणम्। छन्दसां प्रयोगोऽस्ति तत्र। समवृत्तेन सह आधुनिकविषयवृत्तछन्दसः मेलकोऽपि संलक्ष्यते –

---

15 *देशदीपम्*, रमाचतुर्धुरी, पृ. - ४२

16 तत्रैव, पृ. – ७,४२,४३

17 तत्रैव, पृ. – १३, ४२, ४३

18 तत्रैव, पृ. - १४

19 तत्रैव, पृ. – ४४, ४५

20 *आधुनिक संस्कृत महिला नाटककार*, मीराद्विवेदी, पृ. - १६८

21 *युगजीवनम्*, रमाचतुर्धुरी, पृ. - १६

22 तत्रैव, पृ. - २१

23 तत्रैव, पृ. - ४६

24 *युगजीवनम्*, पृ. - ७

25 *युगजीवनम्*, पृ. - ८९

26 *निवेदितनिवेदितम्*, रमाचतुर्धुरी, पृ. - १०४

27 तत्रैव, पृ. - १०२

28 *युगजीवनम्*, रमाचतुर्धुरी, पृ. - ८९

29 *देशदीपम्*, रमाचतुर्धुरी, पृ. – १३, १९, ३६

'कदा भविष्यति स प्रेमसञ्चारः।
भूत्वा पूर्णकामो वदिष्यामि हरिनाम
पतिष्यति नयनयोः प्रेमाश्रुधारः'[30]।।

रमादेव्याः खलु रचनासु स्वरचितश्लोकैः सह 'रघुवंशम्', 'कुमारसम्भवम्', 'मेघदूतम्' 'ऋतुसंहारम्' इत्यादिग्रन्थादुत्कलिताः श्लोकाः अपि संलक्ष्यन्ते यत् सत्यमेव अभिनवत्वकाङ्षि।

नाटकेषु भक्तिभावगम्भीरमानकं सङ्गीतं श्रूयते, यत्र जगन्मातुः कालीदेव्या आराधनायां मग्नसाधकस्य भक्तिभाव उपस्थापितः। सङ्गीतान्येतानि बङ्गीयश्यामासङ्गीतानां संस्कृतानुवादात्मकानि इत्यनुभूयन्ते[31]। एवं सङ्गीतमूर्च्छना सहृदयसमाजान् परमं ह्लादयतीति निश्चप्रचम्।

घ. उपसंहृतिः

परिशेषे वक्तुं शक्यते नाट्यकोविदा रमादेवी बङ्गदेशे अर्वाचीन-संस्कृतचर्चाया नवतममध्यायं रचितवती। तस्या हस्तेनैव अर्वाचीनसंस्कृतनाटकानि नवदिशः प्रापुः। तस्या रचनावैचित्र्ये 'जीवनाश्रयिनाटकम्' अधिकतया परिलक्ष्यते। एतानि नाटकानि तथ्यपूर्णानि तथा काव्यसौन्दर्यान्मनोहारिरूपाणि च । नाटकानामनेकस्थानेषु – 'उपनिषद्वाणी' ध्वनिताभवत्।

न केवलं संस्कृतकविरपि तु दार्शनिकरूपेणापि तस्याः परिचितिः समग्रे भारतदेशेऽस्ति। १९७४ख्रीष्टाब्दे महिलाकविरयं 'सर्वशास्त्रपारङ्गमा' इत्युपाधिना भूषितोऽभवत् प्राचीनकलाकेन्द्रतः[32]। प्रसिद्धाधुनिककविप्रवरः रामजी-उपाध्यायमहोदयः रमादेवीमुद्दिश्य प्रशस्तिरूपेण उल्लिलेख – "The only lady dramatist poet, ballet-writer and drama organizer etc of India and outside of great fame and universal approbation pioneer of Modern Sanskrit Drama Movement in India.[33]"

---

[30] *युगजीवनम्*, रमाचतुर्धुरी, चतुर्दशदृश्यम्, श्लोकः – ४८

[31] इच्छाजातं तव सर्वं
इच्छामयी ताराऽसि त्वम्।
तव कर्म करोषि त्वमम्ब
लोके वदति करोम्यहम्।। (*युगजीवनम्*, तृतीयदृश्यम्, श्लोकः - ३९)

[32] *आधुनिक संस्कृत महिला नाटककार*, मीराद्विवेदी, पृ. - ५

[33] *आधुनिक संस्कृत नाटक*, रामजी-उपाध्यायः, पृ.- १०९६

परिशीलितग्रन्थसूची

उपाध्यायः, रामजी. *आधुनिक संस्कृत नाटक* (भागः -२). वाराणसी : चौखम्बा विद्याभवन, २०१४ (पुनर्मुद्रितसंस्करणम्)।

चट्टोपाध्यायः, ऋता. *आधुनिक संस्कृत साहित्य(१९१०-२०१०) छोटगल्प ओ नाटक* . कलकाता : प्रग्रेसिभ पावलिशार्स, २०१९ (पुनर्मुद्रणम्)।

चतुर्धुरी, रमा. देशदीपम्. कलिकाता : प्राच्यवाणी,

चतुर्धुरी, रमा. *युगजीवनम्.* कलिकाता : प्राच्यवाणी,

चतर्धूरी, रमा. *निवेदिता-निवेदितम्.*कलिकाता : प्राच्यवाणी,

द्विवेदी, मीरा. *आधुनिक संस्कृत महिला नाटककार.* दिल्ली : परिमल पब्लिकेशनस्, २००० (द्वितीयसंस्करणम्)।

मुखोपाध्यायः, अञ्जलिका. *संस्कृत काव्यचर्चाय वाङाली(सेकाल ओ एकाल).* कलिकाता : संस्कृतपुस्तकभाण्डारः, २०१३ (प्रथमसंस्करणम्)।

सेनः, शुभ्रजित्. *भारतवर्षे आधुनिकसंस्कृतसाहित्यम् : विहङ्गमदृष्ट्या परिशीलनम्.* कलिकाता : संस्कृत पुस्तक भाण्डारः, २०१९ (प्रथमसंस्करणम्)।